ॐ

श्री स्वामिनारायणो विजयतेतराम् ।

# श्रीमद् सत्सङ्गिजीवन शास्त्रम् ।

श्रीशतानन्दमुनि विरचितम्-गुर्जरानुवाद सहितम् ।

**શ્રી શતાનંદમુનિ વિરચિતમ્ ।**

# શ્રીમદ્ સત્સંગિજીવન શાસ્ત્રમ્

પ.પૂ. સનાતન ધ.ધુ. શ્રી લક્ષ્મીનારાયણ દેવ પીઠાધિપતિ આચાર્યશ્રી ૧૦૦૮ શ્રી અજેન્દ્રપ્રસાદજી
શ્રી નરેન્દ્રપ્રસાદજી મહારાજશ્રી (વડતાલ)ની આજ્ઞાથી સાધુ આનન્દસ્વરૂપદાસ (વેદાન્તાચાર્ય) સંશોધિત

## पंचम प्रकरणम् ।

**ગુજરાતી અનુવાદ સહિત**

## પંચમ-પ્રકરણ

सुव्रत उवाच –

एकदा शिवरामस्तं विप्रवर्यो नराधिप! ।
पप्रच्छ प्राञ्जलिर्नत्वा नारायणमृषीश्वरम् ।।१।।

---

### અધ્યાય : ૧

**શ્રીહરિએ ધર્મશાસ્ત્રના વક્તાની ઉક્તિપૂર્વક છ પ્રકારના લક્ષણનું નિરૂપણ કર્યું છે.**

**સુવ્રત મુનિ બોલ્યા** : હે પ્રતાપસિંહ રાજન્ !
એક દિવસે બ્રાહ્મણશ્રેષ્ઠ શિયાણી ગામના નિવાસી શ્રીહરિની
પાદુકાનું રક્ષણ કરવામાં પ્રીતિવાળા **શિવરામ** નામના બ્રાહ્મણ
મુનિપતિ-દુર્ગપત્તનમાં નિશ્ચલપણે રહીને પોતાના ભક્તજનોને
સુખ આપતા શ્રી નારાયણ મુનિને નમસ્કાર કરી,
બન્ને હાથ જોડી પૂછતા હતા : (૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ब्राह्मण उवाच - **भगवञ्छ्रोतुमिच्छामि नृणां धर्मं सनातनम् । त्वमेव सर्वधर्मज्ञो धर्ता धर्मस्य च प्रभो ! ॥२॥ बुधैरपि सुदुर्ज्ञेयो धर्मोऽयं सामवेदवत् । केवलं त्वां समाश्रित्य वर्तते सर्वथा हि सः ॥३॥ यदा यदा तु भवति ग्लानिस्तस्यात्र भूतले। तदा तदाऽवतीर्य त्वं सम्यक्पासि तमच्युत ! ॥४॥ वक्ता कर्ताऽविता चास्य नान्यस्त्वत्तोऽत्र विद्यते । न स्वर्गे न च पाताले न च ब्रह्मसदस्यपि ॥५॥ तस्मात्त्वमाश्रमैः साकं वर्णानां च पृथक् पृथक् । वक्तुमर्हसि सद्धर्मानितरेषां नृणां च मे ॥६॥** सुव्रत उवाच - **इति ब्राह्मणवर्यस्य प्रश्नं सर्वहितावहम् । श्रुत्वा स भगवानूचे प्रसन्नो धर्मरक्षकः ॥७॥** श्रीनारायणमुनिरुवाच- **नैःश्रेयसकरो नृणां ब्रह्मन् ! प्रश्नः कृतस्त्वया । ततः सनातनान् धर्मानार्षवाक्यैर्वदामि ते ॥८॥ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः । वेदो नारायणः साक्षात्स्वयंभूरिति गीयते ॥९॥ धर्मा वेदेन ये प्रोक्ता ऋषिभिस्तत्त्वदर्शिभिः । प्रोक्तास्त एव स्मृतिषु प्रमाणं तास्ततः स्मृताः ॥१०॥ पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥११॥ मन्वत्रिविष्णुहारीतयाज्ञवल्क्याङ्गिरोयमाः । व्यासापस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥१२॥ पराशरोशनःशङ्खलिखिता दक्षगौतमौ । शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्तकाः ॥१३॥ सन्ति चान्येऽपि मुनय एतद्धर्मानुसारिणः । तदुक्तान्यपि शास्त्राणि प्रमाणत्वेन गम्यताम् ॥१४॥ एतेषामुक्तिमात्रस्य प्रामाण्ये सत्यपि द्विज ! । युगानुरूपो बोद्धव्यो विशेषः खलु सर्वदा ॥१५॥ कृते तु मानवा धर्मास्त्रेतायां गौतमा हिताः । द्वापरे शाङ्खलिखिताः कलौ पाराशराः स्मृताः ॥१६॥ तेभ्योऽपि मोक्षधर्मोक्ता श्रीमद्भागवतोदिताः । भगवद्गीतया चोक्ता धर्माः श्रेयस्कराः कलौ ॥१७॥**

**શિવરામ વિપ્ર પુછે છે** - હે સકલ ઐશ્વર્યસંપન્ન પ્રભો ! મનુષ્યોના **સનાતન ધર્મ**ને સાંભળવા માટે હું ઈચ્છા ધરાવું છું. સર્વ ધર્મજ્ઞ, યથાર્થ સમગ્ર ધર્મના જ્ઞાતા અને ધર્મના પોષણકર્તા તમે જ છો. (૨) સામવેદ જેમ સ્વરથી, અર્થથી અને શાખાથી અત્યંત દુર્જ્ઞેય છે. આ ધર્મ વિદ્વાનોને પણ અત્યંત દુર્બોધ છે. તે ધર્મ કેવળ તમારા આશ્રયે સર્વ પ્રકારે વર્તે છે. તમો ધર્મનું રક્ષણ કરનારા છો. (ધર્મને સામવેદના ઉપમાનથી ઓળખવામાં આવે છે. તેથી સામવેદ પણ એક ભગવાન એવા તમારે આશ્રયે રહેલો છે, એમ પણ જાણવું.) (૩) હે અચ્યુત, આ પૃથ્વીમાં જે જે સમયે ધર્મની ક્ષીણતા થાય છે, ત્યારે ત્યારે તમો અવતાર પામીને ધર્મનું સારી રીતે રક્ષણ કરો છો. (૪) આ ધર્મના ઉપદેષ્ટા, અનુષ્ઠાતા, રક્ષણકર્તા, સ્વર્ગ, મૃત્યુલોક અને પાતાળમાં, તમારાથી બીજા કોઈ છે નહીં. તેમ જ બ્રહ્માની સભામાં પણ છે નહીં પરન્તુ તમે જ છો. (૫) માટે તમો બ્રહ્મચારી વગેરે ચાર આશ્રમોની સાથે, બ્રાહ્મણાદિ વર્ણોના અને સંકર જાતિઓના મનુષ્યોના સદ્ધર્મોને જુદા જુદા, મને કહેવા માટે યોગ્ય છો. (૬) **સુવ્રતમુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે સમગ્ર ભક્તજનોને કલ્યાણકારી પ્રશ્ન, શિવરામ નામના શ્રેષ્ઠ બ્રાહ્મણને મુખેથી સાંભળી ધર્મરક્ષક ભગવાન **શ્રી નારાયણમુનિ પ્રસન્ન થઈને બોલ્યા** : (૭) હે બ્રાહ્મણશ્રેષ્ઠ ! તમોએ મનુષ્યોનું કલ્યાણ કરનારો પ્રશ્ન કર્યો છે, માટે સનાતન ધર્મો પુરાણ ઋષિઓનાં વચનોથી તમોને કહું છું. (૮) વેદમાં જે પ્રમાણ કરેલો છે તે ધર્મ છે. અને [ધર્મની સિદ્ધિ માટે નહિ પુછાયેલા અધર્મનું પણ લક્ષણ કહે છે કે ] ધર્મથી વિપરીત તે અધર્મ જાણવો. વેદ સાક્ષાત્ નારાયણથી ઉત્પન્ન હોવાથી તે જ સાક્ષાત્ નારાયણ છે, આ પ્રમાણે પ્રત્યક્ષ ઉપચાર છે. વેદ સ્વયંભૂ ભગવાનના નિઃશ્વાસ માત્રથી આવિર્ભૂત હોવાથી વેદમાં સ્વયંભૂપણાનો ઉપચાર છે. (૯) જે ધર્મો વેદે કહેલા છે. તે ધર્મો જ તત્ત્વદર્શી પુરુષોએ, ઋષિ મુનિઓએ સ્મૃતિઓમાં કહેલા છે. માટે સ્મૃતિઓ **પ્રમાણભૂત** કહેલી છે. (૧૦) બ્રાહ્માદિ પુરાણો, ન્યાય, મીમાંસા, મનુ આદિ ધર્મશાસ્ત્ર, વ્યાકરણાદિ છ અંગો, તેનાથી યુક્ત ઋગાદિ ચાર વેદો : આ ચૌદ, વિદ્યાઓ અને ધર્મનાં સ્થાનો **(હેતુ)** છે. (૧૧) મનુ, અત્રિ, વિષ્ણુ, હારિત, યાજ્ઞવલ્કય, અંગિરા, યમ, વ્યાસ, આપસ્તંબ, સંવર્ત, કાત્યાયન, બૃહસ્પતિ, પરાશર, ઉશનસ, શંખ, લિખિત, દક્ષ, ગૌતમ, શાતાતપ અને વસિષ્ઠ - આ વીશ મુનિઓ **ધર્મશાસ્ત્રના રચયિતાઓ** છે. (૧૨-૧૩) આ ધર્મને અનુસરીને બીજા પણ જે બૌધાયનાદિ ઋષિઓ છે, તે મુનિઓએ કહેલાં ધર્મશાસ્ત્રો પ્રમાણપણે જાણો. (૧૪) હે દ્વિજ ! મનુ આદિનાં વચનમાત્ર પ્રમાણભૂત હોવા છતાં પણ સર્વદા યુગને અનુરૂપ **ભેદ** જાણવો જ. (૧૫) સત્યુગમાં તો મનુએ કહેલા ધર્મો હિતને કરનારા કહ્યા છે. ત્રેતાયુગમાં ગૌતમ મુનિએ કહેલા ધર્મો હિતકર છે. કલિયુગમાં પરાશર મુનિએ રચેલા ધર્મો **હિતકર** કહેલા છે. (૧૬) પરાશરે કહેલાં ધર્મોથી પણ મોક્ષધર્મમાં કહેલા, શ્રીમદ્ ભાગવતમાં કહેલા, ભગવદ્ ગીતામાં કહેલા, શ્રીમદ્ વાસુદેવ માહાત્મ્યમાં કહેલા ધર્મો **કલિયુગમાં કલ્યાણકારી** છે. (૧૭) શ્રુતિ અને સ્મૃતિમાં કહેલા ધર્મનું



**પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર**

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः । इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥१८॥ स षड्विधो वर्णधर्मो धर्म आश्रमिणां तथा । धर्मो वर्णाश्रमाणां च गौणो नैमित्तिकस्तथा ॥१९॥ साधारण इति प्रोक्ताः षोढा तद्भेदवेदिभिः । लक्षणान्यपि चैतस्य सङ्क्षेपेण वदामि ते ॥२०॥ वर्णत्वमेकमाश्रित्य यो धर्मः सम्प्रवर्तते । वर्णधर्मः स तु प्रोक्तो यथोपनयनादिकम् ॥२१॥ आश्रमं तु समाश्रित्य धर्मो यः सम्प्रवर्तते । स खल्वाश्रमधर्मो हि भिक्षादण्डादिको यथा ॥२२॥ वर्णत्वमाश्रमत्वं च योऽधिकृत्य प्रवर्तते । स वर्णाश्रमधर्मस्तु मौञ्ज्यादिर्मेखला यथा ॥२३॥ यो गुणेन प्रवर्तेत गुणधर्मः स उच्यते । यथा मूर्धाभिषिक्तस्य प्रजानां परिपालनम् ॥२४॥ निमित्तमेकमाश्रित्य यो धर्मः सम्प्रवर्तते । नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा ॥२५॥ वर्णानामाश्रमाणां च सर्वेषां यः समो भवेत् । स हि साधारणो धर्मस्त्वहिंसादिर्यथा द्विज !॥२६॥ धर्म आचरितः शुद्धे देशे स्यात्फलदायकः । स एवाशुचिदेशे तु कृतोऽप्यकृतवद्भवेत् ॥२७॥ मृगः कृष्णश्चरेद्यत्र स्वभावात्तु महीतले । स पुण्यदेशः कथित आर्यावर्तश्च पुण्यभूः ॥२८॥ यत्र यत्र हरेर्भक्ता भवेयुः शुद्धचेतसः । ज्ञेयः स स पवित्रो वै देशो धर्मक्रियोचितः ॥२९॥ कायक्लेशैर्न बहुभिर्न चैवार्थस्य राशिभिः । धर्मः सम्प्राप्यते ह्येष श्रद्धाहीनैः सुरैरपि ॥३०॥ तच्छ्रद्दधानैर्नियमेन धर्मः संवर्धनीयः पुरुषैः सुदेशे । भवेत्सहायी परलोक एष ध्रुवं न तु ज्ञातिधनादयोऽन्ये ॥३१॥ इति श्री सत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे षड्विधधर्मलक्षणनिरूपणनामा प्रथमोऽध्यायः ॥१॥

---

અનુષ્ઠાન કરવાથી મનુષ્ય આ લોકમાં **કીર્તિ** પામે છે, અને મૃત્યુ પછી **સર્વોત્તમ** સુખ પામે છે. (૧૮) **તે ધર્મ છ પ્રકારનો છે** : વર્ણધર્મ, આશ્રમીઓનો ધર્મ, વર્ણાશ્રમોનો ધર્મ, ગુણધર્મ, નૈમિત્તિક ધર્મ તથા સાધારણ ધર્મ - આ પ્રમાણે ભેદ જાણનારાઓએ છ પ્રકારનો ધર્મ કહ્યો છે. છ પ્રકારના **ધર્મનાં લક્ષણો** પણ તમોને સંક્ષેપમાં કહું છું. (૧૯-૨૦) જે ધર્મ એક કેવળ બ્રાહ્મણાદિ વર્ણભાવને આશ્રયે રહીને પ્રવર્તે છે તે ધર્મ-**વર્ણધર્મ** કહ્યો છે. જેમકે - 'ઉપનયન આદિ સંસ્કાર આઠ વર્ષના બ્રાહ્મણને કરવા' એવા સિદ્ધાંતો કહેલા છે તે ધર્મ. (૨૧) જે ધર્મ, બ્રહ્મચર્ય આદિ આશ્રમને આશ્રયે વર્તે છે તે ધર્મ **આશ્રમધર્મ** કહેવાય છે. જેમકે ભિક્ષા, દંડધારણ આદિ નિયમો યુક્ત ધર્મ. (૨૨) જે, વર્ણ તથા આશ્રમભાવને આશ્રયે પ્રવર્તે છે તે ધર્મ **વર્ણાશ્રમ ધર્મ** છે. જેમકે - મુંજની મેખલા ધારણ કરવી - તેવા નિયમો યુક્ત ધર્મ. (૨૩) જે ધર્મ અભિષેક આદિ ગુણથી પ્રવર્તે છે, તે **ગુણધર્મ** કહેવાય છે. જેમકે રાજ્યાભિષેક સંપ્રાપ્ત કરેલા ક્ષત્રિયે પ્રજાઓનું પરિપાલન કરવું - તેવા નિયમો યુક્ત ધર્મ. (૨૪) હે દ્વિજ, જે ધર્મ કેવલ નિમિત્ત = શાસ્ત્રમાં કહ્યા પ્રમાણે ન વર્તે અને નિષેધનું સેવન કરે, તે હેતુને આશરે પ્રવર્તેલો ધર્મ તે **નૈમિત્તિક ધર્મ** જાણવો. જેમકે - પ્રાયશ્ચિત્તવિધિ. (૨૫) હે દ્વિજ ! જે ધર્મ વર્ણો અને આશ્રમો તથા સમગ્ર મનુષ્યધારીઓને સામાન્યપણે પ્રાપ્ત થાય, તે **સાધારણ ધર્મ** છે - જેમ કે - અહિંસાદિ ધર્મ. (૨૬)

શુદ્ધ દેશમાં આચરણ કરેલો ધર્મ ઈચ્છિત ફળને આપનારો થાય પરંતુ તે જ ધર્મ અશુદ્ધ દેશમાં, આચરણ કરેલો હોય તોપણ અનાચરિત સમાન થાય. (૨૭) જે પૃથ્વીમાં કૃષ્ણમૃગ નિર્ભયપણે વિચરણ કરે, તે પુણ્ય દેશ કહ્યો છે. અને આર્યાવર્ત દેશ તે પવિત્ર ભૂમિ છે. (૨૮) જે જે દેશમાં વિશુદ્ધ અંતઃકરણવાળા શ્રીહરિના ભક્તો રહેલા હોય, તે **પવિત્ર દેશ** ધર્મ ક્રિયાને યોગ્ય છે. (૨૯) આસ્તિક બુદ્ધિથી રહિત દેવોને પણ આ ધર્મ ઘણા શરીરના ક્લેશોથી પણ પ્રાપ્ત થતો નથી. અને ધનના સમુદાયોથી પ્રાપ્ત થતો નથી. ધર્મ **શ્રદ્ધાને આધીન** હોવાથી તેનાથી રહિત દેવોએ પણ શરીરના ક્લેશાદિથી તે પ્રાપ્ત થતો નથી. તો શ્રદ્ધા રહિત મનુષ્યોની તો વાત જ શી કહેવી ? (૩૦)

માટે શ્રદ્ધાવાળા પુરુષોએ સારા દેશમાં નિયમથી **ધર્મ** વૃદ્ધિ પમાડવો. (આચાર અને પ્રચારથી વૃદ્ધિ પમાડવો.) વૃદ્ધિ પમાડેલો ધર્મ પરલોકમાં **સહાયભૂત** થાય જ; બીજાં જ્ઞાતિ, ધન વગેરે પરલોકમાં સહાય કરનારાં થતાં નથી. (૩૧)

*ઈતિ શ્રી સત્સંગિજીવને, નારાયણ ચરિત્રે, ધર્મશાસ્ત્રે, પંચમ પ્રકરણે ધર્મોપદેશે ષડ્વિધધર્મલક્ષણ નિરૂપણનામા પ્રથમોઽધ્યાયઃ (૧)*

श्री नारायणमुनिरुवाच – **ब्रह्मक्षत्रियविट्शूद्रा वर्णाश्चत्वार ईरिताः । मुखबाहूरुपादेभ्यो वैराजस्याभवन् द्विज ! ॥१॥ तेषां साधारणो धर्मश्चतुर्णामप्युदीर्यते । अहिंसा ब्रह्मचर्यं च त्यागोऽस्तेयं क्षमाऽऽर्जवम् ॥२॥ सन्तोषो ब्रह्मवित्सेवा ग्राम्येच्छापरिवर्जनम् । शौचं तपो दया सत्यं तितिक्षा च शमो दमः ॥३॥ युक्तायुक्तविवेकश्च जन्ममृत्युसमीक्षणम् । सर्वदा पापभीरुत्वं कुसङ्गपरिवर्जनम् ॥४॥ अन्नाद्यादेः संविभागो भूतेभ्यश्च यथोचित्तम् । तेष्वात्मदेवताबुद्धिर्मनुष्येषु विशेषतः ॥५॥ कथायाः श्रवणं नित्यं कीर्तनं स्मरणं हरेः । सेवेज्यावनतिर्दास्यं सख्यं चात्मसमर्पणम् ॥६॥ एष साधारणो धर्मः सर्वेषां सुखदायकः । कथितोऽथ विशेषांस्ते तेषां धर्मान्वदाम्यहम् ॥७॥ शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् । अहिंस्रयज्ञोऽमात्सर्यं मैत्री सत्यं धृतिर्दया ॥८॥ धर्मोऽनसूया दानं च हर्यर्चा मार्दवं त्रपा । ज्ञानं विज्ञानमास्तिक्यं स्वाध्यायः समदृष्टिता ॥९॥ चतुर्विंशतिसङ्ख्याका ब्राह्मणस्य मयोदिताः । गुणाः स्वाभाविका ह्येते सर्वाभीष्टफलप्रदाः ॥१०॥ शौर्यं धैर्यं च वीर्यं च तितिक्षा तेज उद्यमः । औदार्यं स्थैर्यमुत्साहो मान आत्मजयस्तथा ॥११॥ ब्रह्मण्यत्वं तथैश्वर्यं रक्षणं चारिनिग्रहः । दक्षत्वं च प्रसादश्च सङ्ग्रामेष्वपलायनम् ॥१२॥ शस्त्रवाहनयोः प्रीतिर्दानं द्रव्यमखे रुचिः । ब्राह्मणाभ्यर्चनं नित्यं वासुदेवार्चनं तथा ॥१३॥ प्रजानां पुत्रवद्रक्षा शरणागतपालनम् । क्षत्रियस्य गुणा ह्येते प्रोक्ताः स्वाभाविका मया ॥१४॥**

## અધ્યાય : ૨

### ચતુર્વર્ણ ધર્મલક્ષણ : શ્રી હરિએ સામાન્યધર્મો કહેવા પૂર્વક ચાર વર્ણનાં વિવિધ-ધર્મો અને વૃત્તિઓનું વર્ણન કર્યું છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે દ્વિજ ! બ્રાહ્મણ, ક્ષત્રિય, વૈશ્ય, શૂદ્ર - આ ચાર વર્ણો કહેલા છે. વૈરાજ નારાયણના મુખ, બાહુ, ઉરુ, પાદથી અનુક્રમે ઉત્પન્ન થયા. ('બ્રાહ્મણોઽસ્ય મુખમાસીત્' ઈત્યાદિ શ્રુતિ છે. (૧) તે બ્રાહ્મણાદિ વર્ણોનો પણ (સંકર જાતિઓનો પણ) **અહિંસાદિ સાધારણ ધર્મ કહેવાય છે :** અહિંસા, બ્રહ્મચર્ય, ત્યાગ, અસ્તેય, ક્ષમા, આર્જવ, સંતોષ, બ્રહ્મવિત્‌ની સેવા, માયિક વિષય સુખની ઈચ્છાઓનો ત્યાગ, શૌચ, તપ, દયા, સત્ય, તિતિક્ષા, શમ, દમ, યોગ્યાયોગ્યનો વિવેક, જન્મમૃત્યુના દુઃખનુ દર્શન, સર્વદા પાપકર્મથી ભય પામવાનો સ્વભાવ, કુસંગનો ત્યાગ, ભૂત પ્રાણીઓને અન્નાદિક ભોજ્ય વગેરે વસ્તુઓનો યથાયોગ્ય વિભાગ કરીને આપવો, ભૂતોમાં પોતાના ઈષ્ટદેવ વાસુદેવ ભગવાનની બુદ્ધિ, તેમાં પણ મનુષ્યોમાં વિશેષપણે પોતાના ઈષ્ટદેવની અંતરાત્માની બુદ્ધિ રાખવી. (૨-૩-૪-૫) શ્રીહરિની કથાનું નિત્ય શ્રવણ, કીર્તન, હૃદયમાં મૂર્તિનું ધ્યાન, દાસત્વથી પાદસંવાહનાદિ સેવા, યથાવિધિ શક્તિ પ્રમાણે અર્ચના, યથાયોગ્ય સાષ્ટાંગ-પંચાંગ નમસ્કાર, દાસ્યભાવે શ્રીહરિની પરિચર્યા, સખાભાવ, આત્માનું સમર્પણ; સર્વ જનોને સુખ આપનારો - આ બત્રીશ સંખ્યાવાળો બ્રાહ્મણાદિ સર્વજનોનો સાધારણ ધર્મ કહ્યો. હવે હું બ્રાહ્મણાદિ વર્ણોના **અસાધારણ** ધર્મો તમોને કહું છું. (૬-૭) **તેમાં પ્રથમ બ્રાહ્મણોના વિશેષ ધર્મો કહું છું :** શમ, દમ, તપ, શૌચ, સંતોષ, ક્ષાન્તિ (બીજાઓ તાડન કરે છતાં અવિકૃત ચિત્તપણું) આર્જવ, અહિંસ્ર યજ્ઞ, અમાત્સર્ય, મૈત્રી, સત્ય, ) ધૃતિ, દયા, સંધ્યાવંદનાદિ આચાર, અનસૂયા, દાન, હંમેશા શ્રીકૃષ્ણનું પૂજન, માર્દવ, અકાર્યમાં લજ્જા, આત્મા-પરમાત્માનું યથાર્થ જ્ઞાન, વિજ્ઞાન (પરમાત્મા શ્રીકૃષ્ણના સ્વરૂપમાં રહેલા નિષ્કારણ અપાર કારુણ્યાદિ ગુણોનું અસાધારણ જ્ઞાન) આસ્તિક્ય, સ્વાધ્યાય, સમદષ્ટિતા, સર્વને અભીષ્ટ ફળોના આપનારાં આ શમાદિક **ચોવીશ** સંખ્યાવાળા બ્રાહ્મણના સ્વાભાવિક ધર્મો મેં કહ્યા છે. (૮-૯-૧૦) **ક્ષત્રિયોના ધર્મો કહે છે.** શૌર્ય, ધૈર્ય, વીર્ય, તિતિક્ષા, તેજ, ઉદ્યમ, ઔદાર્ય, સ્થૈર્ય, ઉત્સાહ, માન, મનોજય, બ્રાહ્મણના હિતેચ્છુ, ઐશ્વર્ય - રક્ષણ (પોતાનું અને પારકાનું રક્ષણ કરવાનું સામર્થ્ય) અરિનિગ્રહ, દક્ષત્વ (સર્વ ક્રિયાઓને પરિપૂર્ણ કરવાનું સામર્થ્ય) પ્રસન્નતા, (અનુગ્રહ) યુદ્ધોમાં અપલાયન, શસ્ત્ર અને વાહનોમાં પ્રીતિ, દાન, ધનના સાધનથી સાધ્ય યજ્ઞોમાં રુચિ, બ્રાહ્મણોનું-શ્રી વાસુદેવનું પૂજન, પ્રજાઓનું પુત્રની માફક રક્ષણ, શરણે આવેલાનું પાલન આ **૨૬-છવીશ** ક્ષત્રિયનાં સ્વાભાવિક ગુણો મેં કહ્યા. (૧૧ થી ૧૪) **હવે વૈશ્યના વિશેષ ધર્મો કહું છું.** આસ્તિક્ય, પરલોકાદિમાં સત્યતાનો વિશ્વાસ, દરરોજ અર્થને પેદા કરવાનો ઉદ્યમ, અદંભ, બ્રાહ્મણોની



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

आस्तिक्यं चोद्यमो नित्यमदम्भो ब्रह्मसेवनम् । पोषणं च त्रिवर्गस्य भक्तिश्च गुरुदेवयोः ॥१५॥ कृषिर्गोरक्षणरुचिर्दाननिष्ठा च दक्षता । स्वाभाविका गुणा ह्येते वैश्यस्य परिकीर्तिताः ॥१६॥ शुश्रूषणं द्विजगवां देवानां चाप्यमायया । तत्र लब्धेन सन्तोषः शूद्रप्रकृतयस्त्विमाः ॥१७॥ ब्राह्मणक्षत्रियविशस्त्रयः प्रोक्ताद्विजातयः । एकजातिर्मतः शूद्र उपनीतेरभावतः ॥१८॥ आद्यं तु सत्कुले जन्म तेषां प्रोक्तं ततः परम् । संस्कारैर्वैदिकैश्चान्यत्तेन प्रोक्ता द्विजा इति ॥१९॥ गर्भाधानं पुंसवनं सीमन्तो जातकर्म च । नामक्रिया निष्क्रमोऽन्नप्राशनं चौलकर्म च ॥२०॥ कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः । केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः ॥२१॥ त्रेताग्निसङ्ग्रहश्चेति संस्काराः षोडश स्मृताः । ब्राह्मणक्षत्रियविशां वेदमन्त्रैरुदीरिताः ॥२२॥ नवैताः कर्णवेधान्ता मन्त्रवर्जं क्रियाः स्त्रियाः । विवाहो मन्त्रतस्तस्याः शूद्रस्यामन्त्रतो दश ॥२३॥ सच्छूद्रस्य दश प्रोक्ताः संस्कारा मन्त्रवर्जिताः । असच्छूद्रस्य तु ब्रह्मन् ! विवाहो ह्येक ईरितः ॥२४॥ शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति । वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना ॥२५॥ यज्ञदानादिकं मन्त्रैः पौराणैर्ब्राह्मणेरितैः । कुर्याच्च

---

સેવા, ધર્મ, અર્થ અને કામનું યશાશાસ્ત્ર પોષણ, ગુરુ અને દેવની ભક્તિ, ધાન્યને ઉત્પન્ન કરવાની ખેતી, ગાયો વગેરેનું પશુપાલન કરવામાં પ્રીતિ, દાનમાં નિષ્ઠા, દક્ષતા (વાણિજ્યાદિ ક્રિયામાં નિપુણતા) આ **અગિયાર** વૈશ્યના સ્વાભાવિક ગુણો કહ્યા છે. (૧૫-૧૬) **હવે શૂદ્રોના વિશેષ ધર્મો કહે છે** - ત્રણ વર્ણ (બ્રાહ્મણ, ક્ષત્રિય, વૈશ્ય) ગાયો તથા દેવમંદિરોની નિષ્કપટ ભાવથી સેવા, તેમાં બ્રાહ્મણની સેવા, (પાદની પરિચર્યા કરવી વગેરે) ક્ષત્રિયની સેવા, (વિષ્ટિ-નોકરી વગેરેથી) વૈશ્યની સેવા (પત્ર-સંદેશવાહક થઈને) ગાયની સેવા (લીલું ઘાસ વગેરે આપવાથી) દેવસેવા (મંદિરમાં વાળવું - લીંપવું વગેરેથી) આ સેવા કરવાથી પ્રાપ્ત થયેલા અન્નધનાદિથી સંતોષ; આ **છ** શૂદ્રોના સ્વાભાવિક ગુણો છે. (૧૭) બ્રાહ્મણ, ક્ષત્રિય અને વૈશ્ય આ ત્રણ દ્વિજાતિ સંજ્ઞાથી કહેલા છે. ઉપનયન - દ્વિજતાને પમાડનારો ઉપનયન સંસ્કારનો અભાવ હોવાથી શૂદ્ર **એક જાતિ** માનવામાં આવે છે. શૂદ્રઃ ચતુર્થો વર્ણઃ એકજાતિઃ । એવી સ્મૃતિ છે. (૧૮) **દ્વિજાતિ શબ્દની નિરૂક્તિ કહે છે.** બ્રાહ્મણાદિ ત્રણનો સત્કુલમાં જન્મ તે પ્રથમ જન્મ કહ્યો છે. પછી વેદમાં કહેલા સંસ્કારો મૌંજીબંધન વગેરે બીજો જન્મ કહ્યો છે. તેથી બે વાર જન્મના કારણથી દ્વિજ કહેલા છે. (૧૯)

**ગર્ભાધાન** : પ્રથમ ઋતુવાળી સ્ત્રીના સોળ રાત્રિ સુધી ઋતુ કાળમાં ચાર દિવસોનો ત્યાગ કરીને બાર દિવસમાં યુગ્મ તિથિએ રહિત સુસ્થ ચન્દ્ર થયે પોતાની પત્નીમાં પુરુષે ગર્ભનું સિંચન કરવું. ત્રીજા માસમાં કરવા યોગ્ય કર્મ **પુંસવન** છે. **સીમન્ત** : ચોથા, છઠ્ઠા કે આઠમા માસે યથાશાસ્ત્ર, ગૃહ્યોક્ત વિધિથી પોતાના પતિએ પોતાની પત્નીનો કરાવાતો કેશવેશ રચના નામનો સંસ્કાર, આ ક્ષેત્રનો સંસ્કાર હોવાથી એક વાર કરવો. દરેક ગર્ભાધાન વખતે કરવાનો હોતો નથી.

**જાતકર્મ** : પુત્ર ઉત્પન્ન થાય ત્યારે કરવા યોગ્ય કર્મ. **નામક્રિયા** : એકાદશ દિવસે પુત્રનું નામકરણ કરવું. **નિષ્ક્રમણ** : ચોથે મહિને કુમારને ઘરથી બહાર કાઢવાનો સંસ્કાર. **અન્નપ્રાશન** : છઠ્ઠે માસે અન્નપ્રાશન = પ્રથમ ભોજન - કરાવવું. **ચૌલકર્મ** : જન્મથી ત્રીજે વર્ષે ( કે પ્રથમ વર્ષે) **કેશવપન** = મુંડન કરાવવું.

**કર્ણવેધ** : પ્રથમ કર્ણ વીંધવાનું કર્મ, **વ્રતાદેશ,** (મૌજીબંધન) **ઉપનયન,** વેદારંભ ક્રિયાવિધિ, **કેશાન્ત સ્નાન, પરિણયન, વિવાહાગ્નિ પરિગ્રહ, ત્રેતાગ્નિ સંગ્રહ** (અગ્નિહોત્ર) - આ સોળ સંસ્કારો કહેલા છે. બ્રાહ્મણ, ક્ષત્રિય, વૈશ્યોને વેદમંત્રોથી કહ્યા છે. (આ સંસ્કારનો ક્રમ વ્યાસ સ્મૃતિને અનુસારે જાણવો.) (૨૦-૨૧-૨૨) કર્ણવેધ સંસ્કાર સુધી નવ ગર્ભાધાનાદિ સંસ્કારો, ત્રણ વર્ણિક સ્ત્રીઓને વેદમંત્રોના ઉચ્ચારણે સહિત જેમ હોય, તેમ થાય છે. વિવાહસંસ્કાર ત્રણ વર્ણની સ્ત્રીઓને વેદમંત્રોના ઉચ્ચારણે સહિત જેમ હોય તેમ થાય છે. કર્ણવેધ પર્યન્ત નવ સંસ્કારો અને દશમો વિવાહસંસ્કાર શૂદ્રને વેદમંત્રોના ઉચ્ચારણે રહિત પૌરાણિક મંત્રોથી થાય છે. (૨૩) હે બ્રહ્મન્ ! મંત્રે રહિત દશ સંસ્કારો સત્શૂદ્રને કહ્યા છે. અસત્શૂદ્રને તો કેવલ એક વિવાહ - સંસ્કાર જ કહ્યો છે. (વિશુદ્ધ વંશમાં ઉત્પન્ન થયેલો, મદ્ય-માંસથી નિવૃત્તિ પામેલો, દ્વિજભક્ત અને વણિકવૃત્તિવાળો **સત્શૂદ્ર** કહ્યો છે. તેનાથી વિપરીત **અસચ્છૂદ્ર** છે.) (૨૪) ચોથો વર્ણ શૂદ્ર પણ, વર્ણપણું હોવાથી વેદમંત્રો, સ્વધા, સ્વાહા, વષટ્કાર તથા પ્રણવ આદિ વિના યજ્ઞાદિ કર્મ કરવા યોગ્ય છે. (૨૫) શૂદ્ર વર્ણ - યજ્ઞ દાનાદિ ધર્મકાર્ય, બ્રાહ્મણોએ ઉચ્ચારણ કરેલા, પુરાણોમાં કહેલા મંત્રોથી કરે. શ્રીમદ્ ભાગવત આદિક પુરાણો સહિત - મહાભારત - બ્રાહ્મણમુખે સાંભળે. (વેદના શ્રવણમાં ક્યારેય પણ શૂદ્રને અધિકાર નથી. પુરાણ-

श्रृणुयाद्विप्रात्सपुराणं स भारतम् ॥२६॥ युगान्तरे तु नारीणामासीन्मौञ्जीनिबन्धनम् । अध्यापनं च वेदानां सावित्रीवाचनं तथा ॥२७॥ तत्रापि ब्रह्मवादिन्यः सद्योवध्वश्च सुव्रत ! । बभूवुर्द्विविधा योषा द्विजानां तीक्ष्णबुद्धयः ॥२८॥ तत्राद्यानां व्रतस्थानामासीदग्नीन्धनं सदा । स्वगृहे भैक्षचर्या च ब्रह्मचर्यं तथाऽष्टधा ॥२९॥ अन्यासां तूपनयनाद्विवाहोऽभूच्च योषिताम् । एतत्कलौ निषिद्धं वै योषितां बुद्धिजाड्यतः ॥३०॥ अध्यापनं याजनं च विशुद्धाच्च प्रतिग्रहः । जीविकावृत्तयस्तिस्रो ब्राह्मणस्य प्रकीर्तिताः ॥३१॥ प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदम् । अन्याभ्यामेव जीवेत्स शिलैर्वा दोषदृक् तयोः ॥३२॥ चतुर्विधा तथास्यान्या जीविकावृत्तिरुच्यते । मुख्यानुकल्पभेदेन देहनिर्वाहहेतुना॥३३॥ वार्ता विचित्राः शालीनं यायावरशिलोञ्छनम् । विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा ॥३४॥ शस्त्राजीव्यं क्षिते रक्षा परसैन्यस्य निर्जयः । राज्यं च नीत्या सहितं क्षत्रस्योक्ता हि जीविका ॥३५॥ कृषिवाणिज्यगोरक्षाः कुसीदं च तुरीयकम् । वार्ता वृत्तिश्चतुर्धेत्थं वैश्यस्योक्ता च जीविका ॥३६॥ सेवनं ब्राह्मणादीनां निश्छद्म क्रयविक्रयौ । शूद्रस्येति स्मृतिप्रोक्ता जीविकाऽस्ति द्विजोत्तम! ॥३७॥ लवणं मधु तैलं च दधि तक्रं घृतं पयः । विक्रीणीयाच्छूद्रजातिर्न दोषस्तस्य विद्यते ॥३८॥ विक्रयो मद्यमांसादेरभक्ष्यस्य च भक्षणम् । अगम्यागामिता चौर्यं शूद्राणां पातहेतवः ॥३९॥ इत्येते द्विजवर ! कीर्तिता मया ते वर्णानां निगममता वृषाश्चतुर्णाम् । वक्ष्यामि क्रममनुसृत्य वेदगीतं सर्वांस्तान् परमहितानथाश्रमाणाम् ॥४०॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे चातुर्वर्ण्यधर्मनिरूपणनामा द्वितीयोऽध्यायः ॥२॥

શ્રવણમાં તો દેવ - બ્રાહ્મણની સમીપમાં અધિકાર છે.) (૨૬) સત્યાદિ યુગમાં નારીઓને ઉપનયન સંસ્કાર, વેદપઠન તથા ગાયત્રીપાઠ હતો. (૨૭) હે સુવ્રત ! તે યુગમાં પણ ત્રણ વર્ણવાળાઓની અતિસૂક્ષ્મ બુદ્ધિવાળી, બ્રહ્મવાદિનીઓ અને સદ્યોવધુ એમ બે પ્રકારની સ્ત્રીઓ હતી. (૨૮) બે પ્રકારની સ્ત્રીઓમાં નૈષ્ઠિક વ્રતધારિણી **બ્રહ્મવાદિની** સંજ્ઞાવાળી સ્ત્રીઓ હંમેશાં અગ્નિહોત્રનું આચરણ કરે, પોતાના પિતા વગેરે સંબંધીજનોના ગૃહમાં જ ભિક્ષા કરે, તથા અષ્ટ પ્રકારે બ્રહ્મચર્ય, ત્યાગીઓની માફક જ હતું. (૨૯) બીજી **સદ્યોવધુ** સંજ્ઞાવાળી નારીઓને તો યજ્ઞોપવીત સંસ્કાર પછી વિવાહ હતો. કલિયુગમાં સ્ત્રીઓની બુદ્ધિનું જાડ્ય હોવાથી નિષેધ છે. ( આ યુગાન્તર પર છે.) (૩૦) દક્ષિણા નક્કી કર્યા વગર વેદોનું અધ્યાપન, યથાયોગ્ય વૈષ્ણવાદિ યાગનું વિધાન કરાવવું. સ્વધર્મ નિષ્ઠાવાળાથી દાનનું ગ્રહણ કરવું - આ ત્રણ **બ્રાહ્મણની જીવિકા છે.** (૩૧) તેમાં જે બ્રાહ્મણ, પ્રતિગ્રહને તપ, સ્વધર્મ, બ્રહ્મતેજ, અને સત્કીર્તિનો નાશ કરનાર છે. એમ માનતો હોય તો યાજન અને અધ્યાપનથી જ જીવિકા કરે અથવા યાજન, (યજ્ઞ) અને અધ્યાપનમાં પણ જો દોષદર્શી થાય ત્યારે ધણીએ ખેતરમાં ત્યાગ કરેલાં કણસલાં ભેગાં કરીને જીવે. (૩૨) પોતાના દેહનિર્વાહાદિ નિમિત્ત, ગૌણ તથા મુખ્ય ભેદથી બ્રાહ્મણને બીજી ચાર પ્રકારની વૃત્તિ કહું છું. (૩૩) નિષેધ નહીં કરેલી ખેતી, વાણિજ્ય-વેપાર વગેરે, માગ્યા વિના જ પ્રાપ્ત થયેલું, દરરોજ ધાન્યની યાચના, શીલવૃત્તિ (ખેતરમાં પડેલાં કણસલાં વીણવાં તે) તથા ઉંછ, હાટ - બઝારમાં પડેલા દાણા ગ્રહણ કરવા તે - આ બન્ને મળીને એક વૃત્તિ છે. માટે શિલોંચ્છ વૃત્તિ કહેવાય છે. આ વાર્તાદિરૂપ ચાર પ્રકારની બ્રાહ્મણવૃત્તિ ઉત્તરોત્તર શ્રેયસ્કર છે. અર્થાત્ શ્રેષ્ઠ છે. (૩૪) હવે **ક્ષત્રિય વૃત્તિ** કહે છે - શસ્ત્રાસ્ત્રના ધારણ કરવાથી જીવિકા, પૃથ્વીનું ચોરો વગેરેથી રક્ષણ કરવું. શત્રુના સૈન્યને જીતવું. નીતિયુક્ત રાજ્ય કરવું. આ ક્ષત્રિય જ્ઞાતિની જીવિકા કહેલી છે. (૩૫) હવે **વૈશ્યવૃત્તિ** કહે છે : વૃદ્ધ પરાશરે કહેલી સ્મૃતિ પ્રમાણે ખેતી કરવી, શાસ્ત્રમાં નિષેધ નહિ કરેલા ક્રય અને વિક્રય રૂપ વેપાર, ગાયો વગેરે પશુઓનું પાલન કરવું. વૃદ્ધિને માટે દ્રવ્યનો પ્રયોગ - આ પ્રકારે વૈશ્યની જીવિકાવૃત્તિ છે. (૩૬) હવે **શૂદ્રની વૃત્તિ** કહે છે : હે દ્વિજોત્તમ ! બ્રાહ્મણ વગેરેની નિષ્કપટ સેવા, વેચાતું લેવું અને વેચાતું આપવું - તે રૂપ વાણિજ્ય, આ પ્રમાણે યાજ્ઞવલ્કયાદિ સ્મૃતિઓમાં કહેલી શૂદ્રની જીવિકા છે. (૩૭) લવણ, મધ, તેલ, છાશ, દહીં, ઘી અને દૂધ-શૂદ્રજાતિ વેચે તે શૂદ્ર જાતિ માટે દોષ નથી. (૩૮) મદ્ય અને ત્રણ પ્રકારની સુરા, માંસ અને આમિષ વગેરે યુક્ત અગિયાર પ્રકારનું મદ્ય વગેરેનો વિક્રય, અભક્ષ્ય પલાંડુ લશૂનાદિનું ભક્ષણ, અગમ્ય પરસ્ત્રીનો પ્રસંગ-તેનું આચરણ, પારકા દ્રવ્યનું ગ્રહણ કરવું આ મદ્યાદિનો વિક્રયાદિ-શૂદ્રોને નરકમાં પડવાનાં કારણો છે માટે એનું આચરણ શૂદ્રોએ ના કરવું. (૩૯)

હે દ્વિજવર ! આ પ્રકારે મેં તમોને ચાર વર્ણોના વેદોક્ત ધર્મો કહ્યા. હવે વેદમાં કહેલા ક્રમથી અત્યંત હિત કરનારા ચાર આશ્રમોના સર્વ ધર્મો તમોને કહું છું. (૪૦)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે ચાતુર્વર્ણ્યધર્મનિરૂપણનામા દ્વિતીયોઽધ્યાયઃ (૨)*

श्रीनारायणमुनिरुवाच - ब्रह्मचर्यं च गार्हस्थ्यं वानप्रस्थश्च सन्मते! । सन्न्यास इति चत्वार आश्रमाः परिकीर्तिताः ।।१।। त्रैवर्णिकस्य चत्वार आश्रमा विदिता इमे । तुरीयमाश्रमं केचिन्नेच्छन्ति क्षत्रवैश्ययोः ।।२।। कीर्त्यमानान्मया तत्र द्विजातीनां यथोचितम् । ब्रह्मचर्याश्रमस्थानां धर्मानादौ शृणु द्विज ! ।।३।। जातकर्मादिभिः पूर्वं संस्कारैः संस्कृतोऽपि सन्। उपनीत्यैव लभते द्विजत्वं द्विजबालकः ।।४।। गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम् । एकादशे क्षत्रियस्य वैश्यस्य द्वादशे स्मृतम् ।।५।। तीक्ष्णबुद्धेर्ब्राह्मणस्य पञ्चमेऽब्देऽपि शस्यते । अष्टमे क्षत्रियस्यापि वैश्यस्य नवमे तथा ।।६।। ब्रह्मवर्चसकामो वा विप्रोऽब्दे पञ्चमेऽर्हति । बलार्थी मेखलां क्षत्रं षष्ठेऽर्थार्थ्यष्टमे च विट् ।।७।। संस्कारेष्विह सर्वेषु द्विजत्वप्रापको ह्ययम् । मौञ्जीबन्धस्ततः सम्यक् कर्तव्यः स यथाविधि ।।८।। विप्रं वसन्ते क्षितिपं निदाघे वैश्यं घनान्ते व्रतिनं विदध्यात् । माघादिशुक्रान्तिमपञ्चमासाः साधारणा वा सकलद्विजानाम् ।।९।। न जन्ममासे न च जन्मधिष्ण्ये न जन्मकालीयदिने विदध्यात् । ज्येष्ठे न मासि प्रथमस्य सूनोस्तथा सुताया अपि मङ्गलानि ।।१०।। जन्ममासे तिथौ भे च विपरीतदले सति । कार्यं मङ्गलमित्याहुर्गर्गभार्गवशौनकाः ।।११।। बृहस्पतेर्बलं दृष्ट्वा कर्तव्यमुपनायनम् । तस्मिंस्तु निर्बले कुर्याच्चैत्रे मीनगते रवौ ।।१२।। स्वशाखेशबलं दृष्ट्वा लग्नशुद्धिं विलोक्य च । स्वस्वशाखानुसारेण पूर्वाह्णे

## અધ્યાય : 3

### શ્રીહરિએ બ્રહ્મચર્યાશ્રમ-ધર્મનું વિસ્તારપૂર્વક નિરૂપણ કર્યું છે.

**શ્રી નારાયણ મુનિ બોલ્યા** : હે સન્મતે ! બ્રહ્મચર્ય, ગાર્હસ્થ્ય, વાનપ્રસ્થ અને સંન્યાસ-ચાર આશ્રમો કહેલા છે. (૧) ત્રૈવર્ણિક- બ્રાહ્મણ, ક્ષત્રિય, વૈશ્યને ચાર આશ્રમો કહેલા છે. કેટલાક મુનિઓ ક્ષત્રિય અને વૈશ્યને ચોથો આશ્રમ (સંન્યસ્તાશ્રમ) ઈચ્છતા નથી. (૨) હે દ્વિજ ! આશ્રમોમાં પ્રથમ બ્રહ્મચર્યાશ્રમમાં રહેલા દ્વિજાતિઓના મેં યથાયોગ્ય કહેલા ધર્મો સાંભળો. (૩) ત્રણ વર્ણનો બાળક પ્રથમ જાતકર્માદિ સંસ્કારોથી સંસ્કાર પામેલો હોવા છતાં પણ **ઉપનયન-સંસ્કાર**ની પ્રાપ્તિથી જ દ્વિજપણું પામે છે. (૪) બ્રાહ્મણને ઉપનયન સંસ્કાર, ગર્ભધારણના દિવસથી આઠમે વર્ષે અથવા જન્મના દિવસથી આરંભીને કહ્યો છેઃ ક્ષત્રિયને ઉપયનયનસંસ્કાર ગર્ભથી અથવા જન્મથી અગિયારમેં વર્ષે કહેલો છે. વૈશ્યને ઉપનયનસંસ્કાર ગર્ભથી અથવા જન્મથી અગિયારમેં વર્ષે કહેલો છે. (૫) કુશાગ્ર બુદ્ધિવાળા બ્રાહ્મણને પાંચમે વર્ષે (ગર્ભથી કે જન્મથી) શ્રેષ્ઠ ગણાય છે. તીક્ષ્ણ બુદ્ધિવાળા ક્ષત્રિયને ગર્ભથી અથવા જન્મથી આઠમે વર્ષે ઉપનયન પ્રશંસાપાત્ર ગણાય છે. તથા તીક્ષ્ણબુદ્ધિવાળા વૈશ્યને ગર્ભથી અથવા જન્મથી નવમા વર્ષમાં ઉપનયનની ઈચ્છા રાખવી. (૬) અથવા બ્રહ્મ-શબ્દ વાચ્ય તપ-સ્વાધ્યાય વગેરે તેજની ઈચ્છાવાળો અને અતિ તીવ્ર બુદ્ધિવાળો, પણ બ્રાહ્મણ ઉક્ત પ્રકારે પાંચમે વર્ષે ઉપવીતસંસ્કારની પ્રાપ્તિને યોગ્ય છે. બલપ્રાપ્તિની ઈચ્છાવાળો ક્ષત્રિય છઠ્ઠા વર્ષે ઉપવીતસંસ્કારને યોગ્ય છે. ધનપ્રાપ્તિની ઈચ્છાવાળો વૈશ્ય, આઠમે વર્ષે ઉપનયનસંસ્કારને યોગ્ય બને છે. આવો મનુસ્મૃતિનો મત છે. (૭) આ સર્વે સંસ્કારોમાં ઉપનયન સંસ્કાર, ત્રણેય વર્ણને દ્વિજત્વને ઉત્પન્ન કરનારો છે. માટે મૌંજીબંધન (યજ્ઞોપવીત) સંસ્કાર શાસ્ત્રવિધિ પ્રમાણે કરવો. (૮) બ્રાહ્મણને વસંતઋતુમાં યજ્ઞોપવીત સંસ્કાર પિતા વગેરે કુટુંબીજનો કરે. ક્ષત્રિયને ગ્રીષ્મ ઋતુમાં ઉપવીત સંસ્કાર કરે. વૈશ્યને શરદઋતુમાં ઉપવીત સંસ્કાર કરે. અથવા માઘથી જેઠ સુધીમાં પાંચ માસ દરમિયાન સમગ્ર- દ્વિજ શબ્દ વાચ્ય ત્રિવર્ણો ઉપનયન સંસ્કાર પ્રાપ્ત કરે. આ ગર્ગ મુનિના મતથી કહ્યું છે. (૯) પુત્રના જન્મ માસમાં જન્મનક્ષત્રમાં અને જન્મતિથિએ ઉપનયનાદિ મંગલ કાર્યો ન કરે. મોટા પુત્ર તથા મોટી પુત્રીનું પણ જેઠ માસમાં મંગલ કાર્ય ન કરવું. (આ **વ્રતશત** ગ્રંથને અનુસરીને કહ્યું છે.) (૧૦) જન્મ માસમાં, જન્મતિથિમાં અને જન્મના નક્ષત્રમાં, તેનાથી વિપરીત દલમાં મંગલકાર્ય કરવું : જેઠ માસના શુકલ પક્ષમાં જન્મ હોય તો કૃષ્ણ પક્ષમાં. અને કૃષ્ણ પક્ષમાં જન્મ હોય તો શુકલ પક્ષમાં મંગલ કાર્ય કરવું. જન્મ તિથિમાં પણ તે તિથિની પૂર્વે ત્રીશ ઘડીમાં જન્મ હોય તો ઉત્તર ત્રીશ ઘડીમાં, ઉત્તર ત્રીશ ઘડીમાં જન્મ હોય તો, પૂર્વની ત્રીશ ઘડીમાં માંગલિક કાર્ય કરવું. આ પ્રમાણે જન્મનક્ષત્રમાં પણ જાણવું. તેમ ગર્ગ, ભાર્ગવ, શૌનક મુનિઓ કહે છે. (૧૧) બૃહસ્પતિનું બલ જોઈને ઉપનયન સંસ્કાર કરવો. બૃહસ્પતિ નિર્બલ હોય તો ચૈત્ર માસમાં સૂર્ય મીન રાશિને વિષે પ્રાપ્ત થયો હોય ત્યારે ઉપવીત સંસ્કાર કરવો. (આ નિર્ણયસિંધુનું પ્રમાણ છે.) (૧૨) પોતાની શાખાના પતિનું સામર્થ્ય જોઈને તથા લગ્ન શુદ્ધિ જોઈને પોત-પોતાની શાખાને અનુસારે

व्रतमादिशेत् ॥१३॥ पितैवोपनयेत्पुत्रं तदभावे पितुः पिता । तदभावे पितुर्भ्राता तदभावेऽपि सोदरः ॥१४॥ शुद्धकार्पाससूत्रेण समेनात्रुटितेन च । स्थाने पवित्रे सङ्ख्यातं षण्णवत्याङ्गुलीषु च ॥१५॥ त्रिवृदूर्ध्ववृतं कार्यं तन्तुत्रयमधोवृतम् । त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥१६॥ यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि । तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते ॥१७॥ उपवीतं बटोरेकं द्वे तथेतरयोः स्मृते । एकमेव यतीनां स्यादित्याहुरपि केचन ॥१८॥ उपवीतं क्रमेण स्यात्कार्पासं शाणमाविकम् । सर्वेषां वा द्विजातीनां कार्पासं तत्प्रशस्यते ॥१९॥ पृष्ठदेशे च नाभ्यां च धृतं यद्विन्दते कटिम् । तद्धार्यमुपवीतं स्यान्नातिलम्बं नचोच्छ्रितम् ॥२०॥ विप्रस्य मेखला मौञ्जी मौर्वी राज्ञो विशस्तथा । शाणा सा प्रवरग्रन्थिस्त्रिवृच्छ्लक्ष्णा समा मता ॥२१॥ पालाशो दण्ड आमौलेर्बैल्वो वा ब्राह्मणस्य तु । न्यग्रोधजः खादिरो वा ललाटान्तो नृपस्य च ॥२२॥ नासान्तः पैलवो दण्डो वैश्यस्यौदुम्बरोऽपि वा । ऐणं रौरवमाजं च विप्रादेरजिनं मतम् ॥२३॥ उपविश्योत्तरे चाग्नेराचार्यं प्राङ्मुखः सुधीः । प्रत्यङ्मुखाय बटवे सावित्रीं समुपादिशेत् ॥२४॥ प्रदक्षिणं परीत्याग्निमुपस्थाय दिवाकरम् । दण्डाजिनोपवीताढ्यो बटुर्भिक्षेत्समेखलः ॥२५॥ ब्राह्मणक्षत्रियविशामादिमध्यावसानतः । भैक्षचर्या क्रमेण स्याद्भवच्छब्दोपलक्षिता ॥२६॥ यावत्तु नोपनयनं क्रियते वै द्विजन्मनः । कामचेष्टोक्तिभक्ष्यस्तु तावद्भवति सुव्रत ! ॥२७॥

દિવસના પૂર્વ ભાગમાં ઉપનયન સંસ્કાર કરવો. (૧૩) પિતા જ પુત્રને ઉપનયન કરે. પિતાના અભાવમાં પિતામહ કરે, તેના અભાવમાં કાકા ઉપવીત કરે. તેના અભાવમાં મોટો ભાઈ ઉપનયન સંસ્કાર કરે. (૧૪) **યજ્ઞોપવીત કરવાનો પ્રકાર:-** પવિત્ર સ્થાનમાં બેસીને, સર્વ પ્રકારે સરખા, તૂટેલા નહિ, એવા- શુદ્ધ કપાસના તંતુઓથી, (સૂતરથી) ભેગી કરેલી આંગળીઓવાળો જમણો કે ડાબો હાથ, બેમાંથી એક હાથની ચાર આંગળીઓનાં મૂલોમાં છન્નું વાર ગણેલા ને ત્રણ સરો કરીને, જમણા હાથને ઊંચો કરીને વળ દેવો. પછી તેને ત્રિગુણ (ત્રેવડું) કરી ડાબા હાથને ઊંચો કરીને વળ દેવો. એટલે નવસૂત્ર ભેગાં થાય. પછી તેને ફરીથી ત્રણ સેરો કરવાથી 'ઉપવીત' થાય તે ઉપવીતની એક ગાંઠ ઈષ્ટ છે. (આનો વિસ્તાર 'કૃત્ય' ચિંતામણિ'માંથી જાણવો.) (૧૫-૧૬)

શ્રૌત-(અગ્નિહોત્રાદિ યજ્ઞ કર્મમાં) અને સ્માર્ત કર્મ જે ગર્ભાધાનાદિક સંસ્કાર નામના કર્મમાં બે યજ્ઞોપવીત ધારણ કરવાં. ઓઢવાના વસ્ત્રની સિદ્ધિ માટે વસ્ત્રના અભાવમાં ત્રીજું યજ્ઞોપવીત ધારવું. (આ હેમાદ્રિ મતથી કહ્યું છે.) (૧૭) બ્રહ્મચારી માટે એક ઉપવીત કહેલું છે. તથા બીજા ગૃહસ્થ અને વાનપ્રસ્થ માટે બે યજ્ઞોપવીત કહેલાં છે. યતિઓને તો એક ઉપવીત જ ધારણ કરવું એમ કેટલાક કહે છે. (આ દેવલ મતથી કહ્યું છે.) (૧૮) તથા યજ્ઞોપવીત કઈ વસ્તુનું કરવું ? આ શંકાનો જવાબ આ રીતે છે - બ્રાહ્મણાદિને અનુક્રમથી, કપાસના સૂત્રનું શણના સૂત્રનું તથા ઊનનું અથવા સર્વ દ્વિજાતિને કપાસના સૂત્રથી નિર્માણ કરેલું ઉપવીત શ્રેષ્ઠ માનેલું છે. (તેમ મનુ તથા કાત્યાયન કહે છે.) (૧૯) જે ઉપવીત પીઠનો ભાગ અને નાભિમાં ધારણ કરેલું કટિ પાછળના ભાગે પહોંચે તે ઉપવીત ધારણ કરવા યોગ્ય છે. ( આ કાત્યાયનના મતથી છે.) નાભિથી ઊંચે હોય, તો આયુષ્યનો ક્ષય કરે છે. માટે નાભિ પર્યંત ઉપવીત ધારણ કરવું. (આમ વસિષ્ઠ કહે છે.) (૨૦) બ્રાહ્મણને **મેખલા** (કેડ્યે બાંધવાની) મુંજના તંતુની થાય. ક્ષત્રિયને મેખલા કાશના તંતુની થાય. વૈશ્યને શણની, તે મેખલા (કટિબંધ) પોતપોતાના પ્રવરમાં માનેલી ગ્રંથિ યુક્ત મુંજ-કાશ-અને શણની થાય. ત્રેવડી, સુંદર અને એકસરખી હોવી જોઈએ. ('નિર્ણયસિન્ધુ') (૨૧) બ્રાહ્મણને પલાશ-દંડ કે બીલીનો દંડ, મસ્તક પર્યન્ત માનેલો છે. ક્ષત્રિયને વડના કાષ્ટનો અથવા ખેરનો દંડ લલાટ સુધીનો માનેલો છે. (૨૨) વૈશ્યને પીલુનો દંડ, પીપળા કે ઉમરડાનો દંડ, નાસિકા પર્યન્તનો માનેલો છે. હવે **મૃગચર્મ** કહે છે : વિપ્રને ઐણ-કાળીયાર મૃગનું ક્ષત્રિયને રૂરૂ નામના (ગૌર) મૃગનું અને વૈશ્યને બકરીના ચામડાનું ઉત્તરીય હોવું જોઈએ. એમ આશ્વલાયન કહે છે. (૨૩) બુદ્ધિમાન આચાર્ય પૂર્વમુખે, અગ્નિની ઉત્તર દિશામાં બેસીને, પશ્ચિમ દિશામાં મુખવાળા બટુને ગાયત્રી મંત્રનો ઉપદેશ કરે. આ પ્રમાણ તો પોતપોતાના ગૃહ્ય સૂત્રોથી જાણવું. (૨૪) બટુ અગ્નિને પ્રદક્ષિણા ફરીને સૂર્યનું ઉપસ્થાન કરી, દંડ મૃગચર્મ અને ઉપવીત યુક્ત થાય. મેખલા સહિત ભિક્ષા કરે. (૨૫) બ્રાહ્મણ, ક્ષત્રિય અને વૈશ્યના અનુક્રમથી, આદિ, મધ્ય અને અંત અવસ્થામાં **'ભવત્'** શબ્દનો પ્રયોગ કરે. બ્રાહ્મણ બટુ 'ભવતિ ભિક્ષામ્ દેહી' ક્ષત્રિય બટુ 'ભિક્ષાં ભવતિ દેહી' બોલે - એમ યાજ્ઞવલ્કય મુનિ કહે છે. (૨૬) હે સુવ્રત ! જ્યાં સુધી ઉપનયન સંસ્કાર ત્રણ વર્ષ સુધી ના કરે, ત્યાં સુધી બાળક ઈચ્છામાં આવે એવી ચેષ્ટા કરે અને અન્નભોજન કરનારો થાય, એમ ગૌતમ ઋષિ કહે છે. (૨૭)

कृतोपनयनः सम्यक् ब्रह्मचारी स कीर्त्यते । द्विजश्च सोऽथ प्रयतो वसेद्गुरुगृहे व्रती ॥२८॥ मेखलाजिनवासांसि जटादण्डकमण्डलून् । बिभृयादुपवीतं च दर्भपाणिर्यथाविधि ॥२९॥ ईदृशो ब्रह्मचारी च शौचाचारसमन्वितः । आहूतोऽध्ययनं कुर्याद्वीक्षमाणो गुरोर्मुखम् ॥३०॥ आरम्भेऽन्ते च शिरसा पादयोः प्रणमेद्गुरोः । छन्दांसि समधीयीत त्यक्त्वाऽनध्यायवासरान् ॥३१॥ गुरुश्च ताडयित्वापि विद्यामध्यापयेत्स तम् । औद्धत्यनाशनार्थत्वान्न दोषः शिष्यताडने ॥३२॥ अधोभागे शरीरस्य शनैः कुर्वीत ताडनम् । नोत्तमाङ्गे न हृदये दोषभागन्यथा भवेत् ॥३३॥ लालयेत्पञ्च वर्षाणि दश वर्षाणि ताडयेत् । प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ॥३४॥ ब्रह्मचारी गुरुं नित्यं विद्याकामो जितेन्द्रियः । सेवेत तद्ब्रह्मचर्यं चतुष्पादित्युदीर्यते ॥३५॥ आचार्यमेव पितरौ ज्ञात्वा द्रोहादिवर्जितः । शिष्यवृत्त्याऽऽप्नुयाद्विद्यां पादोऽयं प्रथमोऽस्य हि ॥३६॥ गुरोः पत्नीं च पुत्रं च विनयान्मानयन् शुचिः । जितेन्द्रियोऽभ्यसेद्विद्यां द्वितीयः पाद इत्ययम् ॥३७॥ उपकारं गुरुकृतं निजजाड्यविनाशनम् । जानन्सेवेत तं प्रीत्या तृतीयः पाद इत्ययम् ॥३८॥ आचार्यस्य प्रियं कुर्याद्वाङ्मनःकायकर्मभिः । प्राणैर्धनैश्चाप्रमत्तः पादस्तुर्योऽयमस्य च ॥३९॥ ज्ञानं सत्यं तितिक्षा ह्रीरमात्सर्यं धृतिस्तपः । शमो दमोऽनसूया च दानं यज्ञो गुणा अमी ॥४०॥ कामः क्रोधः शोकमोहौ तृष्णेर्ष्या चाकृपा स्पृहा । लोभोऽसूया जुगुप्सा च मानो दोषा इमे मताः ॥४१॥ त्यक्त्वा दोषान् द्वादशैतान् युक्तो द्वादशभिर्गुणैः । वेदाभ्यासं प्रकुर्वीत वेदार्थं च विचिन्तयेत् ॥४२॥ सायं प्रातरुपासीत वह्निं चार्कं समाहितः। प्रातःसन्ध्यां जपं कृत्वा गुर्वादीन्प्रणमेत्स च ॥४३॥ अभिवादनशीलस्य वृद्धसेवारतस्य च । आयुर्यशो बलं बुद्धिर्वर्धतेऽहरहोऽधिकम् ॥४४॥ सायं प्रातश्चरेद्भैक्षं पवित्रद्विजवेश्मसु । निवेद्य गुरवे तच्च भुञ्जीत तदनुज्ञया ॥४५॥

---

ઉપનયન સંસ્કાર કરેલો દ્વિજન્મા બ્રહ્મચારી કહેવાય છે. પછી દ્વિજ બ્રહ્મચારી, નિયમ પરાયણ, બ્રહ્મચર્ય વ્રતવાળો ગુરુના ગૃહે નિવાસ કરે. **(ગુરુનું લક્ષણ** - 'જે ઉપનયનની ક્રિયા કરાવીને વેદ બટુને આપે છે, તે ગુરુ કહેવાય છે.') (૨૮) વિધિ પ્રમાણે હાથમાં દર્ભ ધારણ કરનાર બ્રહ્મચારી, કટિ મેખલા, મૃગચર્મ, વસ્ત્રો, દંડ, કમંડલ અને ઉપવીતને ધારણ કરે. (૨૯) આવી રીતનો શૌચાચાર યુક્ત બ્રહ્મચારી, ગુરુએ બોલાવેલો, ગુરુના મુખને જોતો જોતો વેદનો પાઠ કરે. (૩૦) અધ્યયનના આરંભમાં અને અંતમાં ગુરુનાં ચરણોમાં મસ્તકથી પ્રણામ કરે. પડવાનો દિવસ અને ચૌદશનો દિવસ વગેરે ધર્મશાસ્ત્રનાં વચનોથી અધ્યયનમાં નિષેધ કરેલા દિવસોનો ત્યાગ કરીને વેદોનું પઠન કરે. (૩૧) ગુરુ, શિષ્યને તાડન કરીને પણ બ્રહ્મચારીને વિદ્યા ભણાવે. વિદ્યામાં વિઘ્ન કરનારી ઉદ્ધતાઈ કરનાર શિષ્યને તાડન કરવામાં દોષ નથી. (૩૨) શરીરના નીચેના ભાગમાં ધીમેથી તાડન કરવું. મસ્તકમાં અને હૃદયમાં તાડન કરવું નહીં. અન્યથા-કહેલાથી બીજા અંગમાં તાડન કરવાથી દોષિત થાય છે. (૩૩) પુત્રને પાંચ વર્ષ સુધી લાલન-પાલન કરવું. સોળ વર્ષનો થાય ત્યારે પુત્રને મિત્રની સમાન માની આચરણ કરવું. (૩૪) વિદ્યાની ઈચ્છાવાળો બ્રહ્મચારી, જિતેન્દ્રિય થઈને દરરોજ ગુરુની સેવા કરે. તે **બ્રહ્મચર્યના ચાર પાદ** આ પ્રમાણે કહેલા છે. (૩૫) પોતાના ગુરુને જ માતાપિતા જાણીને દ્રોહાદિથી રહિત, વિનયાદિ શિષ્યધર્મથી વિદ્યા પ્રાપ્ત કરે. આ બ્રહ્મચર્યનો **પ્રથમ પાદ** કહેલો છે. (૩૬) ગુરુની પત્ની અને પુત્રને વિનયથી માનતો, બાહ્યાભ્યંતર શુદ્ધિવાળો, જિતેન્દ્રિય થઈ વિદ્યાનો અભ્યાસ કરે, તે **બીજો પાદ** કહ્યો છે. (૩૭) વિદ્યાધ્યાયનરૂપ ગુરુએ, પોતાના જડત્વને નાશ કરનારા એવા ઉપકારને જાણવો. પ્રીતિપૂર્વક ગુરુની સેવા કરવી. તે આ **તૃતીય પાદ** કહેલો છે. (૩૮) સાવધાન થઈને-વાણી, મન અને શરીરની ક્રિયાઓ પ્રાણ અને ધનથી આચાર્યનું પ્રિય કાર્ય કરે, આ બ્રહ્મચર્યનો **ચોથો પાદ** છે. (આ પ્રમાણે બ્રહ્મચર્યના ચાર પાદો, સનત્સુજાતે કહ્યા છે. (૩૯) આત્મા-પરમાત્માનું જ્ઞાન, સત્ય, તિતિક્ષા, અકાર્યમાં લજ્જા, અમાત્સર્ય, ધૃતિ, તપ, શમ, દમ, અનસૂયા, દાન, અને યજ્ઞ અર્થાત્ વિષ્ણુપૂજનઃ આ બાર **ગુણો** માનેલા છે. (૪૦) કામ, ક્રોધ, શોક, મોહ, તૃષ્ણા, ઈર્ષ્યા, અકૃપા, સ્પૃહા, લોભ, અસૂયા, પરનિન્દા, માન-આ બાર **દોષો** માનેલા છે. (૪૧) આ કામાદિ બાર દોષોનો ત્યાર કરીને, બાર જ્ઞાનાદિ ગુણોએ સહિત બ્રહ્મચારી **વેદાભ્યાસ** કરે, અને વેદોના અર્થનું સર્વદા ચિન્તવન કરે. (૪૨) બ્રહ્મચારી શાંત ચિત્તવાળો થઈને સાયં, પ્રાતઃ અગ્નિ અને સૂર્યની ઉપાસના કરે. અને પ્રાતઃસંધ્યામાં ગાયત્રીનો જપ કરીને ગુરુ વગેરેને પ્રણામ કરે. (૪૩) દરરોજ ગુરુ વગેરેને વંદન કરવાના સ્વભાવવાળા, વૃદ્ધની સેવામાં પ્રીતિવાળા, બ્રહ્મચારીને દરરોજ આયુષ્ય, યશ, બલ, બુદ્ધિ, અધિક-યથાર્થ વૃદ્ધિ પામે છે. (૪૪) પ્રાતઃ અને સાયંકાલમાં પવિત્ર બ્રાહ્મણોના ઘરમાં ભિક્ષા કરે, તે ભિક્ષાનું અન્ન ગુરુને અર્પણ કરી, ગુરુની આજ્ઞાથી ભોજન કરે. (એમ યાજ્ઞવલ્કયે કહ્યું છે.) (૪૫) અતિ ભોજન આરોગ્ય કરનારું નથી. આયુષ્યની વૃદ્ધિ

अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् । अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ॥४६॥ नैकस्यान्नं समश्नीयान्नित्यं वर्णी ह्यनापदि । ब्राह्मणः काममद्याच्च श्राद्धे व्रतमपीडयन् ॥४७॥ तिष्ठेत्कृताञ्जलिर्भक्त्या गुरोरभिमुखं सदा । त्वमत्रोपविशेत्युक्तस्तस्यासीत पुरः स तु ॥४८॥ गुरोश्च चक्षुर्विषये न यथेष्टासनो भवेत् । नचैवास्यानुकुर्वीत गतिभाषितचेष्टितम् ॥४९॥ गुरोर्निन्दा भवेद्यत्र सद्य उत्थाय तत्स्थलात् । कर्णौ पिधाय गच्छेद्वा शिक्षयेन्निन्दकान्प्रभुः ॥५०॥ दूरस्थो नार्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः । नचैवास्योत्तरं ब्रूयादुच्चशब्देन कर्हिचित् ॥५१॥ उदकुम्भं कुशान्पुष्पं समिधोऽस्याहरेत्सदा । मार्जनं लेपनं नित्यमङ्गानां च समाचरेत् ॥५२॥ नास्य निर्माल्यशयने पादुकोपानहावपि । आक्रामेदासनं छायां मञ्चकं वा कदाचन ॥५३॥ साधयेद्दन्तकाष्ठादीन्कृत्यं चास्मै निवेदयेत् । अनापृच्छ्य न गच्छेत्तं क्वापि स प्रियकृद्गुरोः ॥५४॥ पादौ प्रसार्य पुरतो गुरोर्नासीत कर्हिचित् । आस्फोटनं चाट्टहासं न कुर्यात्तत्र च स्वपिम् ॥५५॥ धावन्तमनुधावेच्च गच्छन्तं गुरुमन्वियात् । नोदाहरेच्च तन्नाम ब्रूयान्नापृष्टमुत्तरम् ॥५६॥ जितेन्द्रियः स्यात्सततं वश्यात्माऽक्रोधनः शुचिः । प्रयुञ्जीत सदा वाचं मधुरां गुरुसन्निधौ ॥५७॥ स्त्रीणां कथायाः श्रवणं प्रेक्षणं कीर्तनं तथा । सङ्कल्पं क्रीडनं ताभिर्निश्चयं गुह्यभाषणम् ॥५८॥ वर्जयेत्प्रयतो नित्यं तत्स्पर्शं तु विशेषतः । स्त्रीसङ्गिसङ्गं च बटुर्न कुर्यात्कर्हिचिद्व्रती ॥५९॥ गुरुवद्गुरुपत्नी च पूज्या च गुरुपुत्रकः । अवमानं न कुर्वीत तयोरपि कदाचन ॥६०॥ अभ्यञ्जनं स्नापनं च गात्रसम्मर्दनं तथा । गुरुपत्न्या न कुर्वीत केशानां च प्रसाधनम् ॥६१॥ गुरुपत्नीति युवतिर्नाभिवाद्या हि पादयोः । कुर्वीत वन्दनं भूमावसावहमिति ब्रुवन् ॥६२॥

---

કરનારું નથી. સ્વર્ગ પમાડનારું નથી. ધર્મની વૃદ્ધિ કરનારું નથી. લોકમાં નિંદિત છે. માટે અતિ ભોજનનો ત્યાગ કરવો. (૪૬) વર્ણિએ આપત્કાળ વિના નિત્ય એકનું અન્ન ખાવું નહિ. અભ્યર્થના કરાયેલાં બ્રાહ્મણ-બ્રહ્મચારીઓ પોતાના નિયમો-વ્રતોનું પાલન કરતા થકા શ્રાદ્ધનું ભોજન યથેચ્છ જમે. (૪૭) તે વર્ણિ હંમેશાં ભક્તિથી બન્ને હાથ જોડીને ગુરુની સન્મુખ ઊભો રહે. તું આ સ્થાનમાં બેસ, એમ ગુરુ વડે આજ્ઞાંકિત થયેલો ગુરુની પાસે બેસે. (૪૮) ગુરુની દૃષ્ટિ આગળ રુચિ પ્રમાણે બેસે નહિ. તે ગુરુના ગમન, ચેષ્ટા, અને ભાષણ વગેરેનું અનુકરણ કરે જ નહિ. (દેશી કાઢે નહિ) (૪૯) જે સ્થળમાં ગુરુની નિંદા થાય, તે સ્થાનથી તત્કાલ જ ઊઠીને બન્ને કાન આંગળીઓ વડે બીડી દઈને નાસી જાય, અથવા સમર્થ હોય તો ગુરુનિંદા કરનારને શિક્ષા કરે. (મનુ પણ કહે છે કે જ્યાં ગુરુની નિંદા થતી હોય ત્યાંથી કાન બંધ કરી ચાલ્યા જવું.) (૫૦) ગુરુથી દૂર ઊભો રહીને ગુરુપૂજન ન કરવું. ક્રોધિત થઈ ગુરુપૂજન ન કરવું. ગુરુપત્ની સમીપે ગુરુપૂજન ન કરવું. ક્યારેય પણ ઊંચે શબ્દે ગુરુની વિરુદ્ધમાં બોલે નહિ. (૫૧) ગુરુ માટે જળ યુક્ત કુંભ, કુશ, પુષ્પ, સમિધાઓ, વગેરે હંમેશા લાવે. તેમનાં અંગોને તેલે સહિત મર્દન કરી, સ્નાન કરાવે, અને ચંદન વડે અર્ચા કરવી. (૫૨) આ ગુરુના નિર્માલ્ય, (અંગથી ઉતારેલી પુષ્પ-માલા વગેરે) તથા શય્યા, પાદુકા, પગરખાં, આસન, છાયા અને પલંગનું ક્યારેય ઉલ્લંઘન ન કરવું. (૫૩) ગુરુનું પ્રિય કરનાર વર્ણિએ દાતણ વગેરે ગુરુ સંબંધી ઉપયોગી પદાર્થો તે-તે સમયે આપવા માટે રાખવાં, પોતાનું જે-જે કર્તવ્ય હોય તે ગુરુને નિવેદન કરવું. ગુરુને પૂછ્યા વિના કોઈ પણ સ્થાનમાં જવું નહિ. (૫૪) ગુરુની આગળ પગ લાંબા કરીને ક્યારેય બેસવું નહિ. બાહુતાડન, મલ્લવત્ ન કરવું. અટ્ટહાસ્ય ન કરવું. તેમ જ સુવું નહિ. (૫૫) ઉતાવળા ચાલતા ગુરુની પાછળ ઉતાવળા ચાલવું. સુખપૂર્વક ચાલતા ગુરુની પાછળ તે પ્રકારે જ ચાલવું. પોતાના ગુરુનું નામ ઉચ્ચારણ કરવું નહી. ગુરુએ પૂછ્યા વિના ઉત્તર આપવો નહીં. (૫૬) ચક્ષુરાદિ ઇન્દ્રિયો નિયમમાં રાખનારો, નિયમિત અંતઃકરણવાળો, ક્રોધથી રહિત, બાહ્ય અને આંતર્ શુદ્ધિવાળો થાય. પોતાના ગુરુની સમીપમાં હંમેશાં પ્રિય વાણી બોલવી. (૫૭) વર્ણિએ, સ્ત્રીઓની કથાશ્રવણ, કીર્તન, દર્શન, સંકલ્પ, સ્ત્રીઓ સાથે ક્રીડા, ગુપ્ત ભાષણ, સ્ત્રીની પ્રાપ્તિનો નિશ્ચય ન કરવો. નિયમ તત્પર થઈને હંમેશા સ્ત્રી કથા-શ્રવણાદિ ત્યાગ કરે તેના અંગ સ્પર્શનો વિશેષપણે ત્યાગ કરે. બ્રહ્મચારી સ્ત્રીલંપટ જનોનો પ્રસંગ ક્યારેય પણ ન કરે. (૫૮-૫૯) ગુરુ-પત્ની, ગુરુની માફક પૂજ્ય માનવી. અને ગુરુપુત્ર ગુરુની માફક પૂજ્ય માનવો. ક્યારેય પણ તેઓનું અપમાન કરવું નહીં. (૬૦) ગુરુ-પત્નીને તૈલમર્દન, સ્નાન, શ્રમનાશ માટે ચરણસેવા, વાળ ઓળવા, લીંખો કાઢવી, માથામાં તેલ નાખવું, કેશ ગૂંથવા વગેરે ક્રિયાઓ કરવી નહીં. (૬૧) ગુરુ-પત્ની યુવતી છે માટે તેમના બંને પાદની અભિવંદના નજ કરવી (ચરણમાં માથું મુકી અભિવાદન ન કરવું.) અમુક ગોત્ર-શાખા, નામવાળો હું તમોને નમસ્કાર કરું છું : આ પ્રમાણે બોલતાં બોલતાં પૃથ્વીમાં

अङ्गस्पर्शो न कर्तव्यो गुरुपत्न्या अपि क्वचित् । तेनापि व्रतभङ्गः स्याद्यतोऽत्र ब्रह्मचारिणः ॥६३॥ पितृष्वसा मातृष्वसा भ्रातृजाया च मातुली । गुरुपत्नीव मान्याश्च जननी भगिनी तथा ॥६४॥ गुरोस्त्यागो न कर्तव्यः कर्हिचिद्ब्रह्मचारिणा । कामाल्लोभाच्च मोहाच्च तं त्यक्त्वा पतितो भवेत् ॥६५॥ गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य मनुस्त्यागं समब्रवीत् ॥६६॥ लौकिकं वैदिकं वापि ज्ञानमाध्यात्मिकं यतः । आददीत न तं क्वापि गुरुं शिष्योऽवमानयेत् ॥६७॥ अहेरिव गणाद्भीतः सौहित्यान्मरणादिव । राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति ॥६८॥ द्युतं पुस्तकशुश्रूषा वाटिकासक्तिरेव च । स्त्रियस्तन्द्रा च निद्रा च विद्याविघ्नकराणि षट् ॥६९॥ विद्यामेवमधीयानो ब्रह्मचारी गुरोर्गृहे । वसंस्त्रिषवणस्नायी कुसङ्गं परिवर्जयेत् ॥७०॥ पुष्पस्रजश्चन्दनं च रसासक्तिं च कुङ्कुमम् । सुगन्धिद्रव्यसम्पर्कं वर्जयेद्दन्तधावनम् ॥७१॥ अभ्यङ्गं चाञ्जनं छत्रमादर्शालोकनं तथा । व्रती स वर्जयेद्द्युतं गीतवादित्रनर्तनम् ॥७२॥ प्राणिहिंसां च पैशुन्यं कामं लोभं भयं तथा । वर्जयेन्मधु मांसं च ह्यभक्ष्यं लशुनादिकम् ॥७३॥ सन्ध्ययोश्च दिवास्वापं निशश्चाद्यन्तयामयोः । वर्जयेच्च प्रयत्नेन परीवादमुपानहौ ॥७४॥ अनृत्यदर्शी च भवेद्ग्राम्यगीतं च सर्वथा । शृणुयान्न व्रती धीरो नानृतं च वदेद्वचः ॥७५॥ न मञ्चे शयनं कुर्यान्न च ताम्बूलभक्षणम् । तत्तत्कालोचितं सर्वं वैदिकं विधिमाचरेत् ॥७६॥ उपाकर्म च वेदानां कुर्वीत हि यथाविधि । बह्वृचः श्रावणे मासि पूर्वाह्णे श्रवणाख्यभे ॥७७॥ यजुर्वेदी च तन्मासे

વંદન કરે. (૬૨) ક્યારેય (પરિચરણાદિમાં) પણ ગુરુપત્નીનો અંગસ્પર્શ માત્ર પણ ન કરવો. કારણ કે ગુરુ-પત્નીના અંગસ્પર્શ માત્રથી પણ આ લોકમાં બ્રહ્મચારીને વ્રતલોપ થાય છે. (૬૩) પિતાની બહેન, માતાની બહેન, પોતાના ભાઈની પત્ની, પોતાના મામાની સ્ત્રી અને પોતાની માતા, અપરમાતા તથા પોતાની બહેન વગેરેને ગુરુપત્નીની માફક માનવાં. (૬૪) બ્રહ્મચારીએ ક્યારેય પણ ગુરુનો ત્યાગ ન કરવો, કામ; લોભ અને મોહથી ગુરુનો ત્યાગ કરીને અધોગતિને પામનારો થાય છે. (૬૫) ગુણાદિના ગર્વથી પરાભવ પામેલા, શાસ્ત્રીય કાર્યને નહિ જાણનારા, શાસ્ત્રવિહિત પોતાના ધર્મનું ઉલ્લંઘન કરી, નઠારા માર્ગને પામેલા ગુરુનો પણ ત્યાગ કરવો તેમ મનુ મહર્ષિ કહે છે. (મહાભારત-કૂર્મપુરાણમાં શ્લોક લખેલો છે.) (૬૬) ગુરૂ થકી લૌકિક, વ્યાવહારિક, વૈદિક કર્મ, આધ્યાત્મિક જ્ઞાન ગ્રહણ કરે. શિષ્ય ક્યારેય ગુરૂનું અપમાન ન કરે. (૬૭) જે બ્રહ્મચારી જનસમુદાયથી કૃષ્ણ સર્પ સમાન ભય પામે, મિષ્ટાન્ન ભોજનની તૃપ્તિથી મરણ જેવો ભય રાખે, નારીઓનો ભય રાક્ષસી માની રાખે, તે બ્રહ્મચારી વિદ્યા પામે છે. (૬૮) જુગાર, પાસાંઓની ક્રીડા, પુસ્તકની શુશ્રૂષા, બગીચામાં ફરવા જવામાં આસક્તિ, સ્ત્રીઓ સાથે વાર્તાલાપ, આલસ્ય, નિદ્રા, આ છ તત્ત્વો વિદ્યામાં વિઘ્ન કરનારાં છે.(૬૯)

આ પ્રમાણે વિદ્યાભ્યાસ કરવા ગુરુગૃહે નિવાસ કરતો, ત્રિકાલ સ્નાન કરનારો, જે બ્રહ્મચારી - તેમણે ધર્મપતિત જનોનો પ્રસંગ ન કરવો. (૭૦) પુષ્પની માલાનું ધારણ, ચંદનથી અંગરાગ, રસમાં આસક્તિ, શરીરની શોભા માટે કુંકુમધારણ, સુગંધી દ્રવ્યનો સંબંધ, દાંતોને અતિ ઘસવાપૂર્વક શુદ્ધિવિધાન વગેરેનો ત્યાગ કરવો. (૭૧) બ્રહ્મચારીએ, તેલમર્દન અને સ્નાન, નેત્રાંજન, છત્રધારણ, દર્પણ-દર્શન, જુગાર, ગીત, વાજિંત્ર તથા નૃત્યનો ત્યાગ કરવો. (૭૨) પ્રાણીહિંસા, ચાડિયાપણું, કામ, લોભ, ભય, મદ્ય, માંસ તથા લસૂન વગેરે અભક્ષ્યનો ત્યાગ કરવો. (૭૩) પ્રાતઃકાલે અને સાયંકાલે, દિવસે અને રાત્રિનો પ્રથમ યામ અને અંતિમ યામમાં નિદ્રા પ્રયત્નપૂર્વક ત્યાગવી. પરનિંદા અને પગરખાં (ઉપાનહ)નો ત્યાગ કરવો. (૭૪) ધૈર્ય યુક્ત વ્રતી બ્રહ્મચારી નૃત્ય-દર્શન ન કરે, સર્વ પ્રકારે સાંસારિક ગાયન ન સાંભળે, અસત્ય વચન ન બોલે. (સ્વપર હિંસાના નિવારણ માટે તેવા ઉચ્ચારણમાં દોષ નથી.) (૭૫) ખાટલામાં શયન ન કરે. તાંબૂલ ભક્ષણ ન કરે. સમયોચિત સ્નાન, સંધ્યા, આહ્નિક વગેરે વેદોક્ત સમગ્ર વિધિનું આચરણ કરે. (૭૬) વેદોનો આરંભ પોતપોતાના ગૃહ્યમાં કહેલા વિધિથી વર્ણી કરે. તેમાં ઋગ્વેદી વર્ણી શ્રાવણમાસમાં શ્રવણ નક્ષત્રમાં દિવસના પૂર્વભાગમાં કરે. (સંગ્રહકારિકા પ્રયોગપારિજાત વગેરેમાં કહ્યું છે.) (૭૭) યજુર્વેદી વર્ણી, શ્રાવણ માસમાં પૂર્ણિમાને

पौर्णमास्यां विधानतः । मध्याह्ने तत्प्रकुर्वीत हस्तर्क्षे तत्र सामगः ॥७८॥ सङ्क्रान्तिर्ग्रहणं वापि यदि पर्वणि जायते । श्रावणे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते ॥७९॥ अर्धरात्रादधस्ताच्चेत् सङ्क्रान्तिर्ग्रहणं भवेत् । उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत् ॥८०॥ पौषमासस्य रोहिण्यामष्टकायामथापि वा । जलान्ते छन्दसां कुर्यादुत्सर्गं च द्विजो बहिः ॥८१॥ उपाकर्मदिनेऽप्येके वेदोत्सर्गं प्रकुर्वते । कर्मणोरुभयोरत्र ऋषीणां पूजनं स्मृतम् ॥८२॥ एवमाचारसम्पन्नमात्मवन्तमदाम्भिकम्। वेदशास्त्रपुराणानि गुरुरध्यापयेत्स तम् ॥८३॥ बहुनापि च कालेन परीक्ष्य ब्रह्मचारिणम् । उपादिशेद्गुरुर्ज्ञानं भूत्वा निष्कपटोऽखिलम् ॥८४॥ वेदं वेदौ च वेदान्वा सोऽप्यधीत्य यथारुचि । गुरवे दक्षिणां दत्वा समावर्तेत च द्विजः ॥८५॥ गृहं वनं वा प्रविशेत्प्रव्रजेद्वा विलोक्य सः । मन्दत्वं मध्यमत्वं च स्ववैराग्यस्य तीव्रताम् ॥८६॥ चतुर्विधो ब्रह्मचारी कथ्यते द्विजसत्तम! । सावित्रः प्राजापत्यश्च ब्राह्मो नैष्ठिक इत्यसौ ॥८७॥ प्राप्योपनयनं सम्यग्गायत्रीं प्रपठन्व्रतम् । दिनत्रयं धारयेद्यः प्रथमः स प्रकीर्तितः ॥८८॥ द्वितीयस्तु पठन्वेदं व्रती संवत्सरं भवेत् । आवेदग्रहणाद्वापि द्वादशाब्दान्व्रती परः ॥८९॥ यावज्जीवं चतुर्थस्तु तिष्ठेद्गुरुकुले व्रती । उत्तरोत्तरतः श्रैष्ठ्यं ज्ञेयमेतस्य निश्चितम् ॥९०॥ अज्ञानान्मांसमिश्रं वा सुरासंसृष्टमेव वा । पुनः संस्कारमर्हन्ति भुक्त्वाऽन्नादि द्विजातयः ॥९१॥ सेवमानो गुरुंसोऽपि व्रतं स्वं पालयेत् दृढम् । अज्ञानाज्ज्ञानतो वापि तच्च्युतौ निष्कृतं चरेत् ॥९२॥ अकृत्वा भैक्षचरणमसमिध्य च पावकम् ॥ अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ॥९३॥ असद्भैक्षभुजौ वान्तौ नग्नस्त्रीदर्शने तथा ।

દિવસે મધ્યાહ્‌ને વિધિપૂર્વક ઉપાકર્મ કરે. સામવેદી વર્ણી શ્રાવણમાસમાં હસ્ત નક્ષત્રમાં કરે. જો શ્રાવણ માસમાં સિંહ રાશિમાં સૂર્ય હોય તો તેમાં જ ઉપાકર્મ કરે. અન્યથા ભાદરવા માસમાં જાણવું. અહીંયાં નથી કહ્યો, તો પણ સામવેદીઓને અપરાહ્ન કાલ જાણવો. (૭૮) જો શ્રાવણ માસમાં પૂર્ણિમાને દિવસે સૂર્યનું બીજી રાશિમાં સંક્રમણ અથવા ચંદ્રગ્રહણ થાય, ત્યારે શ્રાવણ માસે, હસ્ત નક્ષત્રેયુક્ત કોઈપણ તિથિમાં અથવા શ્રાવણ સુદી પાંચમને દિવસે ઉપાકર્મ (જનોઈ બદલવાનું કર્મ) ઈચ્છેલું છે.(૭૯) જો રાત્રિના મધ્યભાગથી પહેલાં સંક્રાન્તિ હોય તો ઉપાકર્મ ન કરે, જો અર્ધરાત્રીથી પછી હોય તો તે બન્ને થાય, તો દોષ કરનાર નથી. (૮૦) પોષ માસની રોહિણી અથવા અષ્ટકામાં ગામથી બહાર ભાગમાં જલના સમીપમાં દ્વિજ વર્ણીએ વેદોનું પોતાના ગૃહ્યોક્ત વિધિથી ઉત્સર્જન કરવું. (૮૧) કેટલાક મુનિઓ ઉપાકર્મને દિવસે વેદોત્સર્ગ પણ કરે છે. આ બન્ને કર્મમાં ઋષિઓનું પૂજન કહ્યું છે. (૮૨) આ પ્રકારે આચારસંપન્ન આત્માવાળા, (ધીરજવાન)દંભરહિત બ્રહ્મચારીને ગુરુ વેદ-શાસ્ત્ર- પુરાણો ભણાવે. (૮૩) ગુરુ બહુકાળ પર્યન્ત બ્રહ્મચારીની પરીક્ષા કરી, કપટ રહિત થઈ સમસ્ત જ્ઞાનનો ઉપદેશ કરે. (૮૪) દ્વિજ બ્રહ્મચારી રુચિ પ્રમાણે એક વેદ, બે, ત્રણ, ચાર વેદોને ભણીને, ગુરુને દક્ષિણા આપીને ગુરુની આજ્ઞાથી વેદ-વ્રતની સમાપ્તિ નિમિત્તે સ્નાન કરે. (૮૫) બ્રહ્મચારી પોતાના વૈરાગ્યનું મંદપણું- મધ્યમપણું તીવ્રપણું જાણીને ગૃહ પ્રત્યે અથવા વનમાં પ્રવેશ કરે. અથવા સંન્યાસ ગ્રહણ કરે, અથવા નૈષ્ઠિક બ્રહ્મચારી થાય, વૈરાગ્યની તારતમ્યતા પ્રમાણે કરે. હે બ્રાહ્મણશ્રેષ્ઠ ! સાવિત્ર, પ્રાજાપત્ય, બ્રાહ્મ, નૈષ્ઠિક આ પ્રકારે બ્રહ્મચારી ચાર પ્રકારનો કહેવાય છે. (૮૬-૮૭)

જે વર્ણી, શાસ્ત્રવિધિ પ્રમાણે ઉપનયન પામીને ગાયત્રી પાઠ કરતાં કરતાં, બ્રહ્મચર્ય વ્રત ત્રણ દિવસ, અહોરાત્ર ધારણ કરે, તે બ્રહ્મચારી પ્રથમ **'સાવિત્ર'** સંજ્ઞાવાળો કહેવાય છે. (૮૮) જે વેદાભ્યાસ કરતાં કરતાં, એક વર્ષ સુધી બ્રહ્મચર્ય વ્રતવાળો થાય તે તો બીજો **'પ્રાજાપત્ય'** સંજ્ઞાવાળો કહેલો છે. જે વેદાધ્યન પર્યન્ત અથવા ૧૨ વર્ષ સુધી બ્રહ્મચર્ય રાખે, તેને **'બ્રાહ્મ'** સંજ્ઞાવાળો કહેલો છે. (૮૯) જે વ્રતી, બ્રહ્મચારી, જીવન પર્યન્ત ગુરુગૃહે નિવાસ કરે, તે ચોથો **'નૈષ્ઠિક'** સંજ્ઞાવાળો કહ્યો છે. આ ચાર પ્રકારના બ્રહ્મચારીઓ ઉત્તરોત્તર શ્રેષ્ઠ છે, એમ જાણવું. (૯૦) ત્રણ વર્ણના બ્રહ્મચારીઓ અજ્ઞાનથી માંસમિશ્રિત અન્ન વગેરે અથવા સુરા મિશ્રિત અન્નાદિ જમે તો ફરીથી ઉપનયનસંસ્કારને યોગ્ય થાય છે. (આ પ્રમાણે મનુએ કહ્યું છે.) (૯૧) ગુરુને સેવનાર બ્રહ્મચારી પણ પોતાના નિયમોનું દઢપણે પાલન કરે. અજ્ઞાનતાથી અથવા બુદ્ધિપૂર્વક પણ પોતાના વ્રતનો ભંગ થાય તો યથાયોગ્ય પ્રાયશ્ચિત્ત કરે. (૯૨) રોગાદિ આપત્કાલથી રહિત બ્રહ્મચારી સાત અહોરાત્ર સુધી ભિક્ષાચરણ ન કરીને, અગ્નિને હોમ ન કરીને, અવકીર્ણિવ્રત કરે. (આ મનુએ કહ્યું છે.) (૯૩) ભિક્ષામાં થયેલા અસત્ ભોજન કે ઊલટી થતાં, નગ્ન સ્ત્રીના દર્શનમાં, સૂર્ય ઊગતી વખતે સૂઈ રહે, કે

नग्नस्वापेऽभिनिर्मुक्ताभ्युदितत्वे दिवाशये ॥९४॥ श्मशानाक्रमणेऽश्वाद्यारोहे पूज्यव्यतिक्रमे । विना यज्ञोपवीतं च भोजनादिक्रियाकृतौ ॥९५॥ प्रतिग्रहे च मण्यादेर्वृक्षसर्पादिघातने । एतेष्वन्यतमे दोषे जाते तच्छुद्धये द्विजः॥९६॥ स्नात्वाचम्योत्तमे देशे कृत्वा त्रीन्प्राणसंयमान् । अष्टोत्तरसहस्रं तु प्रजपेद्वेदमातरम् ॥९७॥ प्रायश्चित्तं हि सर्वत्र व्रतभङ्गे समीरितम्। तच्चाग्रेऽहं वदिष्यामि सर्वेषां हि हितावहम् ॥९८॥ नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् । नाशौचं कीर्तितं सद्भिः शावं सौत्यं च सन्मते! ॥९९॥ आचार्यं स्वमुपाध्यायं मातरं पितरं गुरुम् । निर्हृत्य च व्रती प्रेतं सद्यः स्नानेन शुद्ध्यति ॥१००॥ न त्यजेत्सूतके कर्म ब्रह्मचारी स्वकं क्वचित् । सव्रतो ह्येव कुर्वीत तेषां पिण्डोदकक्रियाम् ॥१०१॥ एते मया ते द्विजवर्य! धर्मा आद्याश्रमस्थस्य यथावदुक्ताः । समासतोऽथाऽऽह्निककर्म सर्वं वदामि शुद्धं विहितं द्विजानाम् ॥१०२॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे ब्रह्मचर्याश्रमधर्मनिरूपणनामा तृतीयोऽध्यायः ॥३॥

श्रीनारायणमुनिरुवाच – स्नानं सन्ध्या जपो होमः स्वाध्यायः पितृतर्पणम् । देवताभ्यर्चनं चेति षट् कर्माणि दिने दिने ॥१॥ प्रातः स्नानं विना नैव द्विजन्मा निजकर्मसु । अर्हः सन्ध्यादिषु स्याद्वै तस्मात्तत्पूर्वमाचरेत् ॥२॥ नद्यां तडागे कूपे वा गृहे वा स्नानमाचरेत् । उद्धृत्य पञ्च मृत्पिण्डान्स्नायात् परजलाशये ॥३॥ विशुद्धां मृदमादाय बर्हिषि तिलगोमयम् । शुचौ देशे प्रतिष्ठाप्य विधिवत्स्नानमाचरेत् ॥४॥ उपग्रही बद्धशिखो जलमध्ये प्रविश्य च । तत्तन्मन्त्रैर्मृदादींश्च स्नायात्स्वाङ्गे

આથમતી વખતે સૂઈ રહે, પોતે નગ્ન થઈ સૂઈ રહે, દિવાનિદ્રા કરે; સ્મશાનના ઉલ્લંઘનમાં, ઘોડા વગેરેના વાહનમાં બેસે, પૂજ્યની પૂજાના ઉલ્લંઘનમાં, ઉપવીત ધારણ કર્યા વગર ભોજનાદિ ક્રિયા કરે, મણિ-રત્નાદિ પદાર્થના પ્રતિગ્રહમાં, વૃક્ષો, સર્પો વગેરેના હનનમાં, વગેરેમાં કોઈ એક દોષ થયો હોય તો, વર્ણી તે દોષની શુદ્ધિ માટે સ્નાન કરી, આચમન કરી ઉત્તમ દેશમાં બેસીને ત્રણ પ્રાણાયામો કરીને, ગાયત્રી મંત્રના એક હજાર આઠ જપ કરે. (૯૪ થી ૯૭) સર્વે વ્રતભંગમાં જે પ્રાયશ્ચિત્ત કહ્યું છે, તે સર્વેને હિત કરનારું પ્રાયશ્ચિત્ત હું આગળ કહીશ. (૯૮) હે સન્મતે ! નૈષ્ઠિકોને—જીવન પર્યન્ત બ્રહ્મચર્ય વ્રત ધારણ કરનારા બ્રહ્મચારીઓને તથા વાનપ્રસ્થો, સંન્યાસીઓ, અને સાવધિ બ્રહ્મચર્ય વ્રતવાળાઓને કુળમાં જન્મમરણ થાય તેનું સૂતક મુનિઓએ કહ્યું નથી. (આ કૂર્મપુરાણમાં કહ્યું છે.) (૯૯) પોતાના આચાર્ય, ઉપાધ્યાય, માતા, પિતા, ગુરુના મરણમાં તેમને અગ્નિસંસ્કાર કરીને બ્રહ્મચારી તત્કાલ જ સ્નાન કરવાથી પવિત્ર થાય છે. (આ શુદ્ધિ, કર્મમાં અધિકાર માટે છે, સર્વદા નથી. અર્થાત્ અસ્પૃશ્યત્વ તો દશ દિવસ સુધી છે. (૧૦૦) બ્રહ્મચારી, પોતાના આચાર્યાદિના અગ્નિસંસ્કાર નિમિત્તે આશૌચમાં પોતાનું નિત્ય પ્રાપ્ત સંધ્યા અગ્નિકાર્યાદિનો ક્યારેય પણ ત્યાગ ન કરે, પોતાના વ્રત સહિત જ આચાર્યાદિની પિણ્ડોદક ક્રિયા કરે. (આ છન્દોગોના મતાનુસાર કહ્યું છે.) (૧૦૧)

હે દ્વિજવર્ય ! શિવરામ ભટ્ટ, મેં આદ્ય આશ્રમમાં રહેલા બ્રહ્મચારીના આ ધર્મો સંક્ષેપથી તમોને શાસ્ત્ર પ્રમાણે કહ્યા. હવે ત્રણ વર્ણોનું શાસ્ત્રમાં કહેલું શુદ્ધિ કરનારું સમગ્ર **આહ્નિક કર્મ** કહું છું. (૧૦૨)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે બ્રહ્મચર્યાશ્રમધર્મનિરૂપણનામા તૃતીયોऽધ્યાયઃ (૩)*

## અધ્યાય : ૪

### શ્રી હરિએ વિસ્તારે સહિત સ્નાન તથા સંધ્યાનો વિધિ કહ્યો છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે દ્વિજ ! સ્નાન, સંધ્યા નિમિત્તે ગાયત્રી જપ, હોમ, સ્વાધ્યાય, પિતૃતર્પણ, અને વિષ્ણુનું આરાધન આ છ કર્મ દરરોજ દ્વિજ જાતિઓ માટે કર્તવ્યપણાથી કહ્યા છે. (૧) દ્વિજ જાતિ પ્રાતઃ સ્નાન વિના, સંધ્યા વગેરે પોતાના કર્મમાં યોગ્ય થાય નહિ. માટે પ્રાતઃસ્નાન પ્રથમ આચરણ કરવું. (૨) નદી, તળાવ, કૂવો કે ઘરમાં સ્નાન કરે. પારકા જળાશયમાં પાંચ મૃત્તિકાના પીંડા કાઢીને સ્નાન કરે. (૩) અતિ પવિત્ર મૃત્તિકા, દર્ભ, તિલ, ગોમય-તેને ગ્રહણ કરી, પવિત્ર સ્થાનમાં મૂકીને વિધિ પ્રમાણે સ્નાન કરે. ( આ પ્રમાણે યાજ્ઞવલ્કય-શૌનક વગેરે કહે છે. (૪) ડાબા હાથમાં ત્રણ કુશો લઈ, શિખાબંધન કરી, જળમાં પ્રવેશ કરે. મૃત્તિકા વગેરેનું મંત્રોચ્ચાર સાથે પોતાના શરીરે લેપન કરે. મૃદાદિ

विलिप्य सः ।।५।। मन्त्राः स्नानेऽम्बुदैवत्याः पावमान्यश्च पावने । ग्रहीतव्या ऋचस्तेन स्मरता हृदये हरिम् ।।६।। स्नानाङ्गं तर्पणं कृत्वा परिधाय च वाससी । धौते ततः स चाचम्य सन्ध्योपासनमाचरेत् ।।७।। प्रातःस्नाने न कर्तव्यं कदाचित्तिलतर्पणम् । जलमध्ये स्थितः कुर्यात्केवलं कुशवारिणा ।।८।। उष्णोदकेन यत्स्नानं वृथा स्नानं तदुच्यते । अशक्तस्यैव तत्स्नानं प्रशस्तं मुनिभिः स्मृतम् ।।९।। रविसङ्क्रान्तिवारेषु ग्रहणे च शशिक्षये । व्रताहेषु च षष्ठीषु स्नातव्यं नोष्णवारिणा ।।१०।। अशक्तावशिरस्कं वा स्नानमस्य विधीयते । आर्द्रेण वाससा वाऽथ मार्जनं पावनं स्मृतम् ।।११।। देशकालौ विलोक्यैव प्राहुः स्नानान्तराणि च। आपन्नानां द्विजातीनां पूर्वजा हि महर्षयः ।।१२।। मार्जनं पावनैर्मन्त्रैर्ब्राह्मं स्नानं कुशोदकैः । भस्मोद्धूलनमाग्नेयमापादतलमस्तकम् ।।१३।। गोखुरोद्धूतरजसा वायव्यं स्नानमुच्यते । स्नानं सातपवर्षेण यत्तद्दिव्यमुदाहृतम् ।।१४।। मानसं च हरेर्ध्यानं स्नानमाहुर्मनीषिणः । स्नानान्येतान्यशक्तस्य शक्तस्यैव तु वारुणम् ।।१५।। कालातिक्रमणं न स्यात्सन्ध्यायाश्च यथा तथा । प्रातः स्नानविधिः कार्यो मध्याह्ने शेषमाचरेत् ।।१६।। ऊर्ध्वपुण्ड्रं मृदा कृत्वा भस्मना वा त्रिपुण्ड्रकम् । स्वस्वशाखानुसारेण कुर्युः सन्ध्याविधिं द्विजाः ।।१७।। रात्र्यन्तयामनाड्यौ द्वे सन्ध्याकालोऽयमुच्यते । दर्शनाद्रविरेखायास्तदन्तो मुनिभिः स्मृतः ।।१८।। आयतं पूर्वतः कृत्वा गोकर्णाकृतिवत्करम् । संहताङ्गुलिना तेन गृह्णीयादुदकं द्विजः ।।१९।। मुक्ताङ्गुष्ठकनिष्ठेन करेणाचमनं चरेत् । ब्राह्मेणैव तु तीर्थेन द्विजो नित्यमुपस्पृशेत्

---

श्रीनारायणमुनिरुवाच – **शनैः शनैः सञ्चिनुयाद्धर्मं वल्मीकशृङ्गवत् । परपीडामकुर्वाणः परलोकसहायिनम् ॥१॥ धर्म एव सहायी स्यादमुत्र न परिच्छदः । पितृमातृसुतभ्रातृयोषिद्बन्धुजनादिकम् ॥२॥ देहे पञ्चत्वमापन्ने दग्ध्वा तं च सुतादयः। बान्धवा विमुखा यान्ति धर्मस्तमनुगच्छति ॥३॥ कामश्चेद्रक्षणीयः । स्यात्कुतो दग्धः शिवेन सः । रक्ष्योऽर्थश्चेदरक्षन् किं हरिश्चन्द्रादयो न तम् ॥४॥ धर्मस्तु रक्षितः सर्वैरपि देहव्ययेन च । पुरातनैर्नृपतिभिर्दधीच्याद्यैस्तथर्षिभिः ॥५॥ धर्मेणैव हरिः प्रीतो भवत्याशु जगत्पतिः । ब्रह्माण्डमखिलं चैतद्धर्मेणैव धृतं किल ॥६॥ त्रिवर्गेऽपि गुणैर्ज्येष्ठो धर्मो ह्यर्थस्तु मध्यमः । कामो यवीयानुदितस्तस्माद्धर्मं समाश्रयेत् ॥७॥ धर्माविरुद्धः सेव्योऽर्थः कामोऽपि च तथाविधः । तस्यैश्वर्याणि धर्मस्य दश प्रोक्तानि सूरिभिः ॥८॥ तपो दानं क्षमा श्रद्धा भावशुद्धिर्बहुश्रुतम् । यज्ञक्रिया दया सत्यं संयमश्चेति सन्मते! ॥९॥ धर्मेणैवर्षयस्तीर्णा धर्मे लोकाः प्रतिष्ठिताः । धर्मेणैवैधिरे देवाः सेव्यो धर्मस्ततो मतः ॥१०॥ तस्माद्धर्मपरो भूत्वा गृही पञ्च महामखान् । कुर्यान्नित्यं पञ्चसूनादोषनाशार्थमादृतः ॥११॥ कण्डनी पेषणी चुल्ली ह्युदकुम्भी च मार्जनी । पञ्चसूना गृहस्थस्य कथ्यन्ते पापहेतवः ॥१२॥ तद्दोषपरिहारार्थं कार्याः पञ्च महामखाः । ग्रस्तोऽन्यथा तु तैः पापैर्नरकान्प्राप्नुयाद्गृही ॥१३॥**

**दैवश्च भौतिकः पैत्रो ब्राह्मो मानुष इत्यमी । प्रोक्ताः पञ्च महायज्ञाः सर्वदोषापहारकाः ॥१४॥ शालाग्नौ साग्निकोऽनग्निः पचनाग्नौ यथाविधि । देवताभ्यो हविर्दद्याद्देवयज्ञः स उच्यते ॥१५॥ जले वा भुवि होतव्यमग्न्यभावे द्विजन्मना ।**

## અધ્યાય : ૯

### ધર્મની પ્રશંસાપૂર્વક પંચ મહાયજ્ઞોનો વિધિ વિસ્તારપૂર્વક શ્રીહરિએ નિરૂપિત કર્યો છે.

**શ્રી નારાયણ મુનિ બોલ્યા** : હે બ્રહ્મન્ ! અન્ય જનોને પીડા નહિ કરતો ગૃહસ્થ, પરલોકમાં સહાય કરનારો ધર્મ; રાફડાના શિખરની માફક ધીમે ધીમે વૃદ્ધિ પમાડે. (૧) પરલોકમાં ધર્મ જ સાથે આવે; દ્રવ્ય, ઘર વગેરે ઉપકરણ સહાય કરનારાં નથી. પિતા, માતા, બંધુ, મિત્રો કોઈ સહાય કરનારાં નથી. (૨) જ્યારે શરીર મરણ પામે છે ત્યારે બંધુ જનો, મરણ પામેલા દેહને ચિત્તાગ્નિમાં બાળીને પુત્ર સહિત બાંધવો પાછું વળીને પણ આવતી વખતે જોતાં નથી. અને પોતપોતાને ઘેર જાય છે. આચરણ કરેલો ધર્મ દેહનો ત્યાગ કરીને ગયેલા પુરુષને અનુગમન કરે છે. (એમ વિદુરે કહ્યું છે.) (૩) જો કામદેવ ધર્મની માફક પાલન કરવા યોગ્ય હોય તો શિવજીએ શા માટે કામને બાળી નાંખ્યો ? માટે રક્ષણ કરવા યોગ્ય નથી. ધન રાશિ રક્ષણ કરવા યોગ્ય હોય તો હરિશ્ચંદ્રાદિ રાજા તે અર્થને શા માટે પાળતા ન હતા ? માટે અર્થરાશિ પણ રક્ષણ કરવા યોગ્ય નથી. (૪) પ્રાચીન યુગમાં શિબિ જેવા રાજાઓએ તથા દધીચિ જેવા ઋષિઓએ પોતાનો દેહ અર્પણ કરીને ધર્મનું રક્ષણ કર્યું હતું. (૫) જગત્પતિ શ્રીહરિ ધર્મથી જ તત્કાલ પ્રસન્ન થાય છે. સમગ્ર બ્રહ્માંડ ધર્મથી જ ધારણ કરાયેલું છે. (૬) ધર્મ, અર્થ, કામમાં પણ ધર્મ સર્વથી શ્રેષ્ઠ મનાયો છે. અર્થ તો ગુણોથી મધ્યમ છે. અને કામ ગુણોથી કનિષ્ઠ છે એમ શાસ્ત્રજ્ઞોએ કહ્યું છે. માટે ધર્મનો જ આશ્રય કરવો. (૭) જેમ ધર્મનો વિરોધ ન થાય, તેમ અર્થનું સેવન કરવું. કામ પણ ધર્મનો વિરોધ ન થાય તેમ સેવવો. સર્વ પ્રકારે શ્રેષ્ઠ ગુણવાળા ધર્મનાં દશ ઐશ્વર્યો મુનિઓએ કહેલાં છે. (૮) હે સન્મતે ! તપ, દાન, ક્ષમા, શ્રદ્ધા, ભાવશુદ્ધિ, (કામાદિ દોષથી ક્ષોભ ન પામવો તે) બહુશ્રુત, (ઘણાં સત્ શાસ્ત્રોનું પઠન-પાઠન, અભ્યાસ, આચરણ) યથાયોગ્ય યજ્ઞાચરણ, દયા, સત્ય, સંયમ, (ઇંદ્રિયનિગ્રહ) - આ દશ ધર્મના ઐશ્વર્યો છે. (૯) ઋષિઓ ધર્મથી જ સંસારસાગરના પારને પામેલા છે. લોકો ધર્મમાં જ પ્રતિષ્ઠા પામેલા છે. દેવો ધર્મથી જ વૃદ્ધિ પામ્યા છે. માટે ધર્મ સેવન કરવા યોગ્ય માન્યો છે. (૧૦) આવું ધર્મનું માહાત્મ્ય છે, માટે ગૃહસ્થ પુરુષ ધર્મપરાયણ થઈને પાંચ પ્રકારના પાપના દોષની શાંતિ માટે, પાંચ પ્રકારની હિંસાના દોષનું નિવારણ કરવા માટે, પ્રતિદિન આદરપૂર્વક પંચ મહાયજ્ઞો (વૈશ્વદેવ) કરે. (૧૧) ખાંડણિયો, ઘંટી, ચૂલો, પાણિયારું, સાવરણી આ પાંચ પ્રકારે પાપનાં કારણો કહેલાં છે. (૧૨) તે દોષોના નિવારણ માટે પંચમહાયજ્ઞો કરવા. જો ના કરે તો તે પાપોથી યુક્ત ગૃહસ્થ નરકોને પામે. (૧૩) દેવયજ્ઞ, ભૂતયજ્ઞ, પિતૃયજ્ઞ, બ્રહ્મયજ્ઞ, મનુષ્યયજ્ઞ આ પ્રમાણે પાંચ મહાયજ્ઞો સર્વદોષોને નાશ કરનારા કહ્યા છે. (૧૪) સ્માર્ત અગ્નિ સહિત હોય તો આવસથ્ય અગ્નિમાં, અને સ્માર્ત અગ્નિ રહિત હોય તે પાકઅગ્નિમાં શાસ્ત્રવિધિથી દેવતાઓને હવિષ્યાન્ન આપે, તે **દેવયજ્ઞ** કહેવાય છે. (૧૫) દ્વિજે અગ્નિના અભાવમાં, જળમાં અથવા પૃથ્વીમાં હોમ કરવો. અન્નના અભાવમાં



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

अन्नाभावे तु शाकाद्यैरपि दैवं समाचरेत् ॥१६॥ हुतशेषेण चान्नेन संस्कृते भूतले बलीन् । भूतेभ्य आहरेन्नित्यं भूतयज्ञः स चोच्यते॥१७॥ स्वाध्यायो ब्रह्मयज्ञः स्यात्स चेत्प्राक्तर्पणान्न हि । कृतस्तदा तु कुर्वीत यथाशक्ति तदैव तम् ॥१८॥ प्रातश्चेत्सङ्गवादूर्ध्वमन्ते वा नित्यकर्मणाम् । अथवा वैश्वदेवान्ते ब्रह्मयज्ञस्त्रिधा मतः ॥१९॥ आवर्तनेऽवगाह्यापः कुशपाणिस्तु बह्वृचः । ब्रह्मयज्ञं प्रकुर्वीत सन्ध्यां माध्याह्निकीं ततः ॥२०॥ स्नानं कृत्वा तु मध्याह्ने द्विजः सन्ध्यामुपास्य च । ब्रह्मयज्ञं ततः कृत्वा तर्पयेत्तैत्तिरीयकः ॥२१॥ स्ववेदसहिताध्यायं सूक्तं वा पौरुषं पठेत् । श्रीसूक्तयुक्तं वाशक्तःस्तोत्रमार्षं रमापतेः ॥२२॥ वेदादिपाठासामर्थ्ये स्वाध्यायार्थं सकृज्जपेत् । द्विजः सप्रणवां भक्त्या गायत्रीं निगमात्मिकाम् ॥२३॥ पित्रुद्देशेन सततमेकं विप्रं तु भोजयेत् । अशक्तो भुवि पिण्डं वा दद्यात्पितृमखस्तु सः ॥२४॥ गोभ्यः श्वभ्यश्च काकेभ्यः क्षुद्रजीवेभ्य आहरेत् । किञ्चिदन्नं ततो द्वारि प्रतीक्षेतातिथिं स्थितः ॥२५॥ वृद्धं बालं युवानं वा मूर्खं वा पण्डितं नरम् । वैश्वदेवान्तसम्प्राप्तं मन्येतातिथिमच्युतम् ॥२६॥ हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः । दद्यादतिथये नित्यं मानुषो यज्ञ इत्यसौ ॥२७॥ ग्रासमात्रं भवेद्भिक्षा तासामग्रं चतुष्टयम् । अग्राणि चापि चत्वारि हन्तकारोऽभिधीयते ॥२८॥ अतिथिं तत्र सम्प्राप्तमन्नाद्येनोदकेन च । सम्पूजयेद्यथाशक्ति गन्धपुष्पादिभिस्तथा ॥२९॥ न मित्रमतिथिं कुर्यान्नैकग्रामनिवासिनम् । तत्कालायातमज्ञातनामगोत्रं हि तं विदुः ॥३०॥ न पृच्छेद्गोत्रचारित्रं न स्वाध्यायं च पण्डितः । शोभनाशोभनाकारं तं मन्येत प्रजापतिम् ॥३१॥ अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते । तस्मिंस्तृप्ते नृयज्ञोत्थादृणान्मुच्येद्गृहाश्रमी ॥३२॥ अध्वगः क्षीणवृत्तिश्च विद्यार्थी च विरागवान् । यतिश्च ब्रह्मचारी च षडेते धर्मभिक्षुकाः ॥३३॥ यतिर्व्रत्यग्निहोत्री च यश्चात्र मखकृद्द्विजः । सदैतेऽतिथयः

---

શાકાદિથી પણ દેવયજ્ઞ કરવો. (૧૬) લીંપીને શુદ્ધ કરેલા પૃથ્વી તળમાં, હોમથી બાકી રહેલા અન્નથી મેઘ-પૃથ્વી વગેરે ભૂતોને બલિ નિત્ય સમર્પણ કરે, તે **ભૂતયજ્ઞ** કહેવાય છે. (૧૭) સ્વાધ્યાય બ્રહ્મયજ્ઞ થાય, તે બ્રહ્મયજ્ઞ પિતૃતર્પણથી પૂર્વે ન કરેલો હોય, ત્યારે તો તે બ્રહ્મયજ્ઞને યથાશક્તિ વૈશ્વદેવ સમયે જ કરે. (૧૮) જો બ્રહ્મયજ્ઞ પ્રાતઃકાલે કરે તો સંગવ સમય પછીથી કરે. અથવા નિત્યકર્મ (સ્નાનાદિ દેવની પૂજા) ને અંતે બ્રહ્મયજ્ઞ કરે. અથવા વૈશ્વદેવના અંતે બ્રહ્મયજ્ઞ કરે. આ પ્રમાણે **બ્રહ્મયજ્ઞ** ત્રણ પ્રકારે કરે. પછી માધ્યાહ્નિકી સંધ્યા કરે. (૧૯-૨૦) તૈતરીય શાખાવાળો બ્રાહ્મણ મધ્યાહ્ને સ્નાન કરીને માધ્યાહ્નિકી સંધ્યાની ઉપાસના કરી, બ્રહ્મયજ્ઞને કરી પિતૃતર્પણ કરે. (૨૧) પોતાના વેદની સંહિતાનો એક પણ અધ્યાયનો પાઠ કરે અથવા 'હિરણ્યવર્ણાં હરિણીં' વગેરે પંદર ઋચાત્મક લક્ષ્મીસૂક્ત સહિત પુરુષસૂક્ત ષોડશ ઋચાત્મક પાઠ કરે. અથવા અશક્ત પુરુષ શ્રી વિષ્ણુના ઋષિપ્રણીત સ્તોત્રનો પાઠ કરે. (૨૨) બ્રાહ્મણ વેદાદિ પાઠ કરવા અસમર્થ હોય તો સ્વાધ્યાય માટે ૐ-કારે સહિત વેદરૂપ ગાયત્રીને ભક્તિપૂર્વક એક વાર જપે. (૨૩) નિરંતર પોતાના પિતૃના ઉદ્દેશથી બ્રાહ્મણને જમાડે અથવા અશક્ત દ્વિજ પૃથ્વીમાં પિંડ આપે તે **પિતૃયજ્ઞ** થાય. (૨૪) ગાયો, કૂતરા, કાગડા, કીડી વગેરે શૂદ્ર જંતુઓને કંઈ પણ અન્ન તે નિમિત્તે પૃથ્વીમાં નાંખે, પછી પોતાના આંગણામાં ઊભો રહીને અતિથિની વાટ જુએ. (૨૫) વૈશ્વદેવ કર્મના અંતમાં દૈવઈચ્છાથી આવેલા વૃદ્ધ, બાલ, યુવાન અથવા મૂર્ખ અથવા પંડિત નર આવે તેને અતિથિ માનવો અને તેને પ્રત્યક્ષ વિષ્ણુ આવ્યા એમ જાણે. (૨૬) દ્વિજ, હન્તકાર પરિમાણવાળું અન્ન અથવા અગ્ર પરિમિત અન્ન અથવા ભિક્ષા પરિમિત અન્ન, શક્તિ પ્રમાણે દરરોજ અતિથિને આપે. આ પ્રમાણે આ **માનુષયજ્ઞ** થાય. (૨૭) એક ગ્રાસ પરિમિત અન્નને ભિક્ષા કહે છે. ચાર ગ્રાસ પરિમિત અન્નને અગ્ર કહે છે. સોળ ગ્રાસ પરિમિત અન્ન હન્ત કહેવાય તેથી ઉપર ભોજન કહેવાય છે. ( આ વ્યાસની ઉક્તિ છે.) (૨૮) વૈશ્વદેવના અવસાન સમયે આવેલા અતિથિને અન્ન અને જળથી તથા ચંદન પુષ્પાદિથી શક્તિ પ્રમાણે પૂજા કરે. (૨૯) મિત્રને અતિથિ ના કરવો. એક ગામમાં રહેનારને અતિથિ ના કરે કારણ કે વૈશ્વદેવના અંતમાં ઈશ્વરેચ્છાથી આવેલાને નામ ગોત્ર અને કુળ ના જાણ્યું હોય તેને અતિથિ કહ્યો છે. (૩૦) વિવેકી બ્રાહ્મણ તે અતિથિનું કુળ અને આચરણ પૂછે નહીં તેમજ અધ્યયન સંપત્તિ પણ પૂછે નહીં. સુરૂપ અથવા કુરૂપ હોય તો પણ તેને બ્રહ્મરૂપ માને. (૩૧) કારણ કે નિત્ય રહેતો નથી, માટે **અતિથિ** કહેવાય. અતિથિ સંતોષ પામ્યે સતે ગૃહસ્થાશ્રમી મનુષ્યયજ્ઞ-નિમિત્તના ઋણથી મુકાય છે. (૩૨) માર્ગમાં ચાલેલો, ક્ષીણ વૃત્તિવાળો, વિદ્યાર્થી, વૈષ્ણવ, સાધુ, સંન્યાસી, બ્રહ્મચારી આ છ ધર્મભિક્ષુક છે. માટે અતિથિબુદ્ધિથી અન્નજળાદિ આપે તો મહાપુણ્ય થાય છે. (૩૩) યતિ, બ્રહ્મચારી, અગ્નિહોત્રી, આ લોકમાં જે બ્રાહ્મણ વિષ્ણુયાગાદિ મહાયજ્ઞ કરનાર - આ ચાર સદા અતિથિઓ કહેલા છે.



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

प्रोक्ता अपूर्वाश्च दिने दिने ॥३४॥ तेभ्यो न दत्त्वा पुरुषो योऽन्नं भुङ्क्ते गृहाश्रमी । स पापं केवलं भुङ्क्ते पुरीषं चान्यजन्मनि ॥३५॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते । स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥३६॥ अप्यम्बुना वा शाकेन यच्च वाऽश्नाति स स्वयम् । तेनैव पूजयेच्छक्त्या गृहस्थोऽतिथिमादरात् ॥३७॥ अन्नाच्छादनदानेषु पात्रं नैव विचारयेत् । अन्नस्य क्षुधितः पात्रं विवस्त्रो वसनस्य च ॥३८॥ इत्येष पञ्चयज्ञानां विधिः सङ्क्षेपतो मया । प्रोक्तो गृहस्थाश्रमिणा योऽनुष्ठेयो हि सर्वथा ॥३९॥ अकृत्वा यो द्विजो मोहान्नित्यं पञ्चमहामखान् । भुञ्जीत चेत्स मूढात्मा तिर्यग्योनिं प्रपद्यते ॥४०॥ स पञ्चसूनाजनितेन भूम्ना दोषेण लिप्तो यमयातनाश्च । हित्वा नृदेहं लभते द्विजन्मा सुधीस्ततस्तान्विदधीत नित्यम् ॥४१॥

इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे गृहस्थधर्मेषु स्मार्तकर्मविधिनिरूपणनामा नवमोऽध्यायः ॥९॥

श्रीनारायणमुनिरुवाच - **श्रुतिस्मृत्युदितः सम्यक्साधुभिर्यश्च सेवितः । तमाचारं निषेवेत गृही नान्यं तु कञ्चन ॥१॥ स्नानसन्ध्यापरो नित्यं सत्यवादी जितेन्द्रियः । अनसूयो मृदुः शान्तो लोभमोहविवर्जितः ॥२॥ सावित्रीजाप्यनिरतो गोब्राह्मणहिते रतः । मातापित्रोर्हिते युक्तो देवब्राह्मणपूजकः ॥३॥ दान्तो यज्वा क्षमायुक्तः परद्रोहविवर्जितः । यथोचितं त्रिवर्गं च सेवेतात्र गृहाश्रमी ॥४॥ न धर्मवर्जितं काममर्थं वा मनसा स्मरेत् । सीदन्नपि निजं धर्मं सर्वथा नैव हापयेत् ॥५॥**

દરરોજ - જે અપૂર્વ-નવા આવેલા તે પણ હંમેશાં અતિથિઓ કહેલા છે. (૩૪) ગૃહસ્થાશ્રમી પુરુષ તે અતિથિઓને અન્ન નહિ આપીને જમે છે તે કેવળ પાપને જ ખાય છે, અને અન્ય જન્મમાં વિષ્ટા ખાય છે. (૩૫) ભગ્ન આશા લઈને જે અતિથિ ગૃહસ્થને ઘેરથી પાછો ફરે છે તે અતિથિ પોતાના પાપ ગૃહસ્થને આપીને, ગૃહસ્થનું પુણ્ય લેતો જાય છે. (૩૬) અતિથિનું પૂજન કરનાર પોતે ગૃહસ્થ જે અન્નાદિ જમે છે, તે જ અન્નાદિ વડે શક્તિ પ્રમાણે આદરપૂર્વક અતિથિને પૂજે અથવા જળથી કે શાકથી અતિથિને સત્કાર કરે. (૩૭) અન્ન વસ્ત્ર આપવામાં પાત્રનો વિચાર ના કરે. કારણ કે ભૂખ્યો જન, અન્ન દાનનું પાત્ર છે. વસ્ત્ર રહિત જન, તે વસ્ત્રદાનનું પાત્ર છે. (૩૮) આ પ્રમાણે મેં પંચયજ્ઞોનો આ વિધિ સંક્ષેપથી કહ્યો છે. જે વિધિ ગૃહસ્થાશ્રમીએ સર્વ પ્રકારે અનુષ્ઠાન કરવા યોગ્ય છે. (૩૯) જો બ્રાહ્મણ અજ્ઞાનથી પ્રતિદિન પંચ મહાયજ્ઞોને નહીં કરીને ભોજન કરે તો મૂઢાત્મા બ્રાહ્મણ પશુપક્ષ્યાદિ જાતિને પામે. (૪૦)

પંચ મહાયજ્ઞ - કર્તા બ્રાહ્મણ, પાંચ પાપનાં સ્થાનોથી થયેલા મહાદોષથી યુક્ત મનુષ્યના દેહનો ત્યાગ કરીને યમની યાતના (દુ:ખો)ને પામે છે. માટે બુદ્ધિશાળી બ્રાહ્મણ પંચમહાયજ્ઞો દરરોજ કરે. (આ વ્યાસની ઉક્તિ છે.) (શાતાતપ અને યમે પણ કહેલું છે.) (૪૧)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે ગૃહસ્થધર્મેષુ સ્માર્તકર્મવિધિ નિરૂપણ નામા નવમોऽધ્યાય: (૯)*

## અધ્યાય : ૧૦

### શ્રીહરિએ ગૃહસ્થના ધર્મમાં યજ્ઞનો વિધિ કહ્યો છે. અને સત્ દેશકાલાદિ મળ્યાના વિશેષો નિરૂપિત કર્યા છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે બ્રહ્મન્ ! જે આચાર શ્રુતિસ્મૃતિમાં કહેલો છે અને અહિંસાદિ સદ્ધર્મમાં પ્રીતિવાળા સત્પુરુષોએ સારી રીતે આચરણ કરેલો હોય તે આચારને ગૃહસ્થ સેવન કરે, તેનાથી વિરુદ્ધનું ક્યારેય પણ આચરણ ન કરે. (૧) હંમેશા સ્નાન-સંધ્યાપરાયણ, સત્યવાદી, જિતેન્દ્રિય, અસૂયા રહિત, મૃદુ, શાંત, લોભ-મોહથી રહિત ગાયત્રીમંત્રના જપમાં આસક્ત, ગાય અને બ્રાહ્મણના હિતમાં પ્રીતિવાળો, માતાપિતાના હિતના આચરણે યુક્ત, દેવ-બ્રાહ્મણોનો પૂજક, મનને નિયમમાં રાખનાર, યજ્ઞ કરનાર, ક્ષમાવાળો, પારકાનો દ્રોહ નહિ કરનાર ગૃહસ્થાશ્રમી આ લોકમાં યથાયોગ્ય ધર્મ-અર્થ-કામને સેવન કરે. (૨-૩-૪) ધર્મે રહિત કામને અથવા અર્થને મનથી પણ સ્મરણ કરે નહિ. પોતાના ધર્માચરણમાં દુ:ખનો અનુભવ કરતો હોય છતાં પોતાના ધર્મનો કોઈ પ્રકારે ત્યાગ ન કરે. (૫) ગૃહસ્થાશ્રમમાં રહેવા છતાં પણ ધર્મ, અર્થ અને કામને અતિ દુ:ખથી ના ભજે, પરંતુ અનાયાસથી સેવે. ચંડાલ પતિતો પર્યંત સદા અન્ન યથાયોગ્ય આપે. (૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि । आश्वचण्डालपतितानन्नं संविभजेत्सदा ॥६॥ मृगांश्च पक्षिणोऽन्यांश्च क्षुद्रजीवानपि द्विज! । पश्येत्स्वपुत्रसाम्येन नास्ति भेदो विचारतः ॥७॥ पितरौ भ्रातरः पुत्राः सुहृदो ज्ञातयश्च ये । यद्वदेयुर्यदिच्छेयुरनुमोदेत निर्ममः ॥८॥ गृहोचिताः क्रियाः कुर्वन्निषेवेत महामुनीन् । तत्सङ्गात्स्त्रीधनादौ स्यादनासक्तो गृहेष्वपि ॥९॥ ये चाधिकारसम्पन्नाः सम्पन्नाश्च धनादिभिः । यथाविधि यजेयुस्ते यज्ञैर्नानाविधैर्हरिम् ॥१०॥ अश्वमेधादियज्ञानां निषिद्धत्वात्कलाविह । कर्तव्यास्तु विष्णुयागमहारुद्रादयो मखाः ॥११॥ पशुहिंसाविहीना हि सात्त्विकानां मखाः प्रियाः । देवानां च हरेस्तत्तैर्यष्टव्यं भूतिमिच्छता ॥१२॥ नास्त्यहिंसासमो धर्मो लोकेऽन्यः कोऽपि पावनः । प्राणिहिंसासमं पापं तथाऽन्यन्नास्ति भूतले ॥१३॥ पायसान्नैर्घृताद्यैश्च हविर्भिः प्रीणयन्सुरान् । भूसुरांस्तर्पयेत्सम्यग्भोजनैश्च सदक्षिणैः ॥१४॥ दृष्ट्वाग्निचक्रं कर्तव्यो होमारम्भोऽन्यथा त्विह । क्रूरग्रहमुखे पातादाहुतेः स्यान्महद्भयम् ॥१५॥ वृतैश्च ब्राह्मणैस्तत्र यजमानेन तत्स्त्रिया । ब्रह्मचर्यादिनियमाः पालनीयाः प्रयत्नतः ॥१६॥ एतेषु नियमभ्रष्टो यद्येकोऽपि यथोचितम् । प्रायश्चित्तं न कुर्याच्चेत्स यज्ञो निष्फलो भवेत् ॥१७॥ यथोक्ता दक्षिणा नस्याद्यत्र यत्र न वैदिकाः । विप्रसम्प्रीणनं यच्च न स्यात्सोऽपि मखोऽफलः ॥१८॥ आज्यप्लुतैर्यथा भोज्यैर्नृभिर्विप्रमुखे हुतैः । हरिस्तुष्येत्तथा नाग्नौ हुतैर्यज्ञे हविर्भरैः ॥१९॥ अयमेव महान्यज्ञः सर्वयज्ञोत्तमो मतः । प्रचुराज्यसितोपेतैर्भोज्यैर्यद्विप्रतर्पणम् ॥२०॥ प्रीतेषु ब्राह्मणेष्वेव प्रीतोऽत्यन्तं भवेद्धरिः । त्रैलोक्यं हि हरौ प्रीते तृप्तं स्यान्नात्र संशयः ॥२१॥ विप्रा विष्णोः प्रिया यद्वत्तथा नैव निजं वपुः । प्रिया नान्ये च विबुधा न च देवी रमा तथा ॥२२॥ येन सम्पूजिता विप्रास्तेन सम्पूजितो हरिः । येनापमानितास्ते च तेनासावपमानितः

હે દ્વિજ ! મૃગો, પક્ષીઓ અને બીજા ક્ષુદ્ર જીવોને પણ પોતાના પુત્રની સમાન જુએ. કારણ કે વિચાર કરે, તો પુત્રાદિ અને મૃગાદિમાં જીવપણે કોઈ વિશેષ નથી. (વિશેષ તો મોહથી થયેલો છે.) (૭) માતા, પિતા, ભાઈઓ, પુત્રો, મિત્રો અને જ્ઞાતિઓ એ જે બોલે, જે ઇચ્છે તે મમતાએ રહિત થઈ (તમારા કહેવા પ્રમાણે કરીશ એમ) અનુમોદન આપે. (૮) ગૃહસ્થાશ્રમને યોગ્ય ક્રિયાઓ કરતો મહામુનિઓને સેવે, તેમના સમાગમથી ગૃહો તથા સ્ત્રી ધનાદિને વિષે પણ આસક્તિ રહિત થાય. (૯)

જે ગૃહસ્થો અધિકાર સંપન્ન અને ધનાદિથી સંપન્ન હોય તે ગૃહસ્થો વિધિ પ્રમાણે નાના પ્રકારના યજ્ઞોથી શ્રીહરિનું યજન કરે. (૧૦) આ કલિયુગમાં અશ્વમેધાદિ યજ્ઞોનો નિષેધ હોવાથી વિષ્ણુયાગ અને મહારુદ્ર વગેરે યજ્ઞો કરવા. (૧૧) પશુહિંસાથી રહિત યજ્ઞો સાત્ત્વિક દેવોને તથા દેવોના અધિષ્ઠાતા શ્રી વાસુદેવને પ્રિય છે. માટે પોતાના ઉદયને ઇચ્છતા ગૃહસ્થે અહિંસામય યજ્ઞોથી પૂજન કરવું. (૧૨) આ લોકમાં અહિંસા સમાન પવિત્રકારી કોઈ પણ ધર્મ નથી તથા પૃથ્વીમાં પ્રાણીની હિંસા સમાન કોઈ પણ મોટું પાપ નથી. (૧૩) દૂધપાક અને ઘૃત વગેરે હુત દ્રવ્યોથી દેવતાઓને તૃપ્ત કરીને દક્ષિણાઓએ સહિત નાના પ્રકારનાં અન્નોથી બ્રાહ્મણોને યથેષ્ટ તૃપ્ત કરે. (૧૪) અગ્નિચક્ર જોઈને હોમનો આરંભ કરવો. અગ્નિચક્રનું દર્શન ના થાય તો તે વખતે યજ્ઞમાં આહુતિ ક્રૂર ગ્રહોના મુખમાં પડે, તેથી મહાભય થાય. (૧૫) યજ્ઞમાં વરેલા બ્રાહ્મણોએ, યજમાન અને યજમાનની પત્નીએ બ્રહ્મચર્યાદિ નિયમો પ્રયત્નથી પાલન કરવા. (૧૬) જે યજ્ઞમાં એક પણ (ઋત્વિજ વગેરે) નિયમ ભ્રષ્ટ થાય, અને યથાયોગ્ય પ્રાયશ્ચિત્ત ન કરે તો તે યજ્ઞ નિષ્ફળ થાય. (૧૭) જે યજ્ઞમાં જે પ્રમાણે કહી હોય તે પ્રમાણે દક્ષિણા ન હોય, જ્યાં વૈદિક બ્રાહ્મણો ન હોય, જ્યાં બ્રાહ્મણો તૃપ્ત થાય તેવાં નાના પ્રકારનાં ભોજનો ન હોય, તે યજ્ઞ પણ નિષ્ફળ જાય. (૧૮) યજ્ઞ કરનાર મનુષ્યોએ સ્વધર્મનિષ્ઠ બ્રાહ્મણના મુખમાં હોમેલું પુષ્કળ ઘી મિશ્રિત મોદકોથી જેવા શ્રીહરિ પ્રસન્ન થાય, તેવા અગ્નિમાં હોમેલા હુત દ્રવ્યના સમૂહોથી પ્રસન્ન થતા નથી. (૧૯) ઘણા ઘી અને સાકરથી મિશ્રિત ભોજનોથી બ્રાહ્મણનું તર્પણ આ જ મહાન સર્વોત્તમ યજ્ઞ માન્યો છે. (૨૦) સ્વધર્મનિષ્ઠ ભગવાનના ભક્ત બ્રાહ્મણો પ્રસન્ન થવાથી શ્રીહરિ અત્યંત જ પ્રસન્ન થાય છે. હરિ પ્રસન્ન થાય, તો ત્રિલોકી તૃપ્ત થાય, એમાં સંશય નથી. (૨૧) વિષ્ણુને પોતાના શરીર કરતાં બ્રાહ્મણો વધુ પ્રિય છે. બીજા બ્રહ્માદિ દેવો પણ પ્રિય નથી. તથા દેવી (દિવ્યરૂપ) લક્ષ્મીજી પ્રિય નથી. (૨૨) જે માનવીએ બ્રાહ્મણો પૂજ્યા છે, તેણે શ્રીહરિ પૂજ્યા સમાન



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

॥२३॥ अविद्यो वा सविद्यो वा ब्राह्मणो भूतले नृणाम् । पूजनीयो भोजनीयो नापमान्यः कदाचन ॥२४॥ मानयन्ब्राह्मणांस्तस्माद्गृही निर्मत्सरः सदा । देशकालविशेषेषु कुर्याद्धर्मं विशेषतः ॥२५॥ सत्पात्रं यत्र लभ्येत देशः पुण्यतमो हि सः । जन्म विष्णोर्यत्र यत्र सतां विचरणं तथा ॥२६॥ तपोविद्यादयोपेता यत्र स्युर्ब्राह्मणोत्तमाः । हर्यर्चापूजनं भक्त्या यत्र च स्यान्निरन्तरम् ॥२७॥ नद्यः पुराणप्रथिता यत्र गङ्गादयस्तथा । सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितानि च ॥२८॥ तपःस्थानान्यृषीणां च सर्वेऽपि च कुलाचलाः । एते पुण्यतमा देशाः पुण्यकर्मोचिताः सदा ॥२९॥ सहस्रगुणितं पुण्यमेषु स्यादितरस्थलात् । तस्मात्पुण्येषु तीर्थेषु कुर्यात्पुण्यं विशेषतः ॥३०॥ प्रादुर्भावाद्विचरणान्निवासाच्च हरेर्द्विज !। परिग्रहान्मुनीनां च तीर्थानां पुण्यता स्मृता ॥३१॥ तीर्थयात्रां चिकीर्षुः प्राग्विधायोपोषणं गृहे । गणेशं च पितॄन्विप्रान्साधूञ्छान्तान्प्रपूजयेत् ॥३२॥ कृत्वाथ पारणां गच्छेत्तीर्थं नियमवान्गृही। न परीक्ष्या द्विजास्तीर्थे भोज्या ह्यन्नार्थिनोऽखिलाः ॥३३॥ तीर्थप्राप्तेः पूर्वदिने मुण्डनं चाप्युपोषणम् । कुर्यात्सम्प्राप्य तीर्थं तु श्राद्धं ब्राह्मणतर्पणम् ॥३४॥ यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् । विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥३५॥ अकोपनो दृढमतिः सत्यवादी जितेन्द्रियः । आत्मोपमश्च भूतेषु प्राप्नुयात्तीर्थजं फलम् ॥३६॥ तिर्यग्योनौ न जायेत न कुदेशे च तीर्थकृत् । न दुःखी स्यात्स्वर्गभाक्च मोक्षोपायं स विन्दति ॥३७॥ अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः । हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः ॥३८॥ ब्रह्मचर्यविहीनो यस्तीर्थं वा व्रतमाचरेत् । न स तत्फलमाप्नोति प्राप्नोत्येव तु किल्बिषम् ॥३९॥ अन्यस्थाने कृतं पापं पुण्यक्षेत्रे विनश्यति । पुण्यक्षेत्रे कृतं पापं वज्रलेपो भवत्यलम् ॥४०॥ इन्द्रियाणि नियम्यैव तस्मात्तीर्थेषु

---

છે. જેણે બ્રાહ્મણો અપમાનિત કર્યા છે, તેણે શ્રીહરિ અપમાનિત કરેલા છે. (૨૩) પૃથ્વીમાં અભણ અથવા વિદ્યાવાળો બ્રાહ્મણ મનુષ્યોને પૂજનીય છે. ક્યારેય પણ તેનું અપમાન ન કરવું. (૨૪) માટે મત્સર રહિત થઈને બ્રાહ્મણોને માન આપવું. બ્રાહ્મણોને માન આપતો ગૃહસ્થ દેશ કાલના વિશેષોમાં વિશેષ ધર્મ કરે. (૨૫) જે દેશમાં સત્પાત્ર મળે, જે દેશમાં વિષ્ણુનો પ્રાદુર્ભાવ હોય, જેમાં સંતોનું વિચરણ હોય તે દેશ અતિશય પુણ્યવાળો છે. (૨૬) જે દેશમાં તપ, વિદ્યા અને દયાથી યુક્ત શ્રેષ્ઠ બ્રાહ્મણો હોય જે દેશમાં નિરંતર ભક્તિથી શ્રીકૃષ્ણની પ્રતિમાનું પૂજન થાય, જે દેશમાં પુરાણોમાં પ્રસિદ્ધ ગંગાદિ નદીઓ તથા પુષ્કરાદિ સરોવરો અને મહાપુરુષોએ આશ્રય કરેલાં ક્ષેત્રો છે, ઋષિઓનાં તપનાં સ્થાનો, સર્વે મહેન્દ્રાદિ કુલાચલો, સાત પર્વતો છે - આવા દેશો હંમેશા ધર્મક્રિયાઓમાં યોગ્ય અતિશય પુણ્યશાલી દેશો છે. (૨૭-૨૮-૨૯) આ પુણ્ય દેશોમાં બીજા સ્થાનથી હજારગણું પુણ્ય થાય, માટે આ પુણ્યદેશ રૂપ તીર્થોમાં વિશેષપણે પુણ્ય કરે. (૩૦) હે દ્વિજ ! હરિના પ્રાદુર્ભાવ, વિચરણ અને નિવાસથી તથા ભગવાનના એકાંતિક સાધુઓએ જેનો પોતાના નિવાસપણે સ્વીકાર કરવાથી તીર્થોની પુણ્યતા સ્મરણ કરેલી છે. (૩૧) તીર્થયાત્રા કરવા ઈચ્છતા ગૃહસ્થ પ્રથમ જ પોતાના ઘરમાં ઉપવાસ કરીને ગણેશ, પિત્રિઓ, વિપ્રો તથા જિતેન્દ્રિય સાધુઓને પૂજે. અર્થાત્ મિષ્ટાન્ન જમાડવા વગેરેથી સત્કાર કરે (૩૨) પછી પારણાં કરીને ગૃહસ્થ, નિયમવાળો થઈને તીર્થમાં જાય. તીર્થમાં બ્રાહ્મણોની પરીક્ષા ન કરવી. અને સમગ્ર અન્નાર્થીઓને યથાયોગ્ય અન્નદાનથી તૃપ્ત જ કરવા. (૩૩) તીર્થ પ્રાપ્તિના પ્રથમ દિવસે (તીર્થના સમીપદેશમાં) મુંડન અને ઉપવાસ પણ કરે, તીર્થને પામીને તો શ્રાદ્ધ અને બ્રાહ્મણતર્પણ કરે. (૩૪) જેના બન્ને હાથ, મન, વિદ્યા, તપ અને કીર્તિ-નિયમમાં હોય તે તીર્થનું ફળ પામે છે. (૩૫) ક્રોધથી રહિત, પોતાના ધર્મમાં નિશ્ચલ બુદ્ધિ, સત્યવાદી, જિતેન્દ્રિય, પ્રાણીઓમાં આત્માની ઉપમા અર્થાત્ પોતાને તુલ્ય અનુસંધાન રાખે તે તીર્થયાત્રાનું ફળ પામે. (૩૬) તીર્થયાત્રા કરનારા પુરુષ પશુ આદિ જાતિમાં ઉત્પન્ન ન થાય. નઠારા દેશમાં ઉત્પન્ન થાય નહીં. દુઃખી થાય નહીં. સ્વર્ગમાં જનારો થાય. તે તીર્થ કરનાર પોતાની મુક્તિને યોગ્ય થાય છે. (૩૭) શ્રદ્ધા વિનાનો, પાપાત્મા, પરલોકાદિને નહિ માનનાર નાસ્તિક, સંશયવાળો અને કારણો ખોળનારો - આ પાંચ જણાને તીર્થનું ફળ પ્રાપ્ત થતું નથી. (૩૮) જે પુરુષ બ્રહ્મચર્ય વ્રત રહિત થઈને તીર્થયાત્રા અથવા એકાદશી આદિક વ્રત કરે, તે પુરુષ તીર્થયાત્રા તથા વ્રતના ફળને પામતો નથી. પરંતુ પાપને પામે છે. (૩૯) તીર્થ વિના બીજા સ્થાનમાં કરેલું પાપ, પુણ્યતીર્થમાં નાશ પામે છે. પુણ્ય ક્ષેત્રમાં કરેલું પાપ અતિશય વજ્રલેપ સમાન થાય છે. (૪૦) માટે સદ્‌ગૃહસ્થે તીર્થોમાં ઈન્દ્રિયોને નિયમમાં રાખીને જ શક્તિ પ્રમાણે દાન કરવું. તથા બ્રાહ્મણોને



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सद्गृही । दानं दद्याद्यथाशक्ति ब्राह्मणान्भोजयेत्तथा ॥४१॥ वयोज्येष्ठा मातृतुल्याः समाना भगिनीसमाः। कनिष्ठाः कन्यकातुल्याः पश्येन्नारीस्तु निर्मलः ॥४२॥ कृतयात्रः पुनर्गेहं समेत्य श्राद्धमाचरेत् । ब्राह्मणान्भोजयित्वाऽथ यात्रायाः फलमाप्नुयात् ॥४३॥ श्रयन्क्षेत्राणि पुण्यानि स्वस्ववित्तानुसारतः । श्रद्धया पुण्यकालेषु कुर्वीत सुकृतं गृही ॥४४॥ मासि भाद्रपदे कुर्याच्छ्राद्धमापरपक्षिकम् । स्वपित्रोश्च पितृव्यादेर्वैभवे सति वा पृथक् ॥४५॥ दिनक्षये व्यतीपाते विषुवे चायनद्वये । द्वादश्यामनुराधायाः श्रवणस्य च सङ्गमे ॥४६॥ एकादश्यां वा द्वादश्यामुत्तरात्रयसङ्गमे। ऊर्जे शुक्लनवम्यां च सप्तम्यां च तपःसिते ॥४७॥ अक्षयाख्यतृतीयायामष्टकान्वष्टकास्वपि । षष्ठ्यां च कपिलाख्यायां योगे चार्धोदयाभिधे॥४८॥ राकायामनुमत्यां वा तन्मासाख्यर्क्षसङ्गमे । दिने स्वजन्मर्क्षयुते मन्वादिषु तिथिष्वपि ॥४९॥ उत्सवाहेषु विष्णोश्च प्रादुर्भावदिनेषु च । इन्दुक्षयेऽर्कसङ्क्रान्तौ चन्द्रसूर्यग्रहे तथा ॥५०॥ स्नानं दानं जपो होमः श्राद्धं ब्राह्मणभोजनम्। एतेषु कुर्याद्यत्किञ्चित्पुण्यं स्यादक्षयं हि तत् ॥५१॥ अमावास्याऽथ सोमेन सप्तमी भानुना सह । चतुर्थी भूमिपुत्रेण सोमपुत्रेण चाष्टमी ॥५२॥ चतस्त्रस्तिथयस्त्वेताः सूर्यग्रहणसम्मिताः । आसु दानं जपो होमो भवेत्कोटिगुणः कृतः ॥५३॥ गर्भाधानादिसंस्कारत्रयकालेऽथ योषितः । जातकर्मादिषु तथा संस्कारेषु सुतस्य च ॥५४॥ प्रेतकर्मणि पित्रोश्च मृताहे वार्षिके तयोः । कुर्यात्पुण्यं यथाशक्ति स्वस्य चाभ्युदये सति ॥५५॥ श्रोत्रियाय कुलीनाय विनीताय तपस्विने । व्रतस्थाय दरिद्राय दानं देयं हि सर्वथा ॥५६॥ यथा तपः सत्ययुगे च यज्ञास्त्रेतायुगे द्वापर ईशपूजा । हिताय नृणामुदिता तथैव कलौ युगे ब्राह्मणवर्य! दानम् ॥५७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे गृहस्थधर्मेषु

---

જમાડવા. (૪૧) કામાદિથી અક્ષુભિત હૃદયવાળો, તીર્થ કરનારો ગૃહસ્થ પોતાની ઉંમરથી મોટી સ્ત્રી હોય તેને માતા તુલ્ય જાણે; સમાન ઉંમરવાળી સ્ત્રીને પોતાની બહેન સમાન જાણે, નાનીને દીકરી સમાન જાણે. (૪૨) આ પ્રમાણે તીર્થયાત્રા કરીને ગૃહસ્થ, ફરીથી પોતાને ઘેર આવીને શ્રાદ્ધ કરે, પછી બ્રાહ્મણોને ભોજન કરાવવાથી તીર્થયાત્રાનું ફળ પામે. (૪૩) પુણ્ય તીર્થોના આશ્રયવાળો, સૂચિત વિધિથી સેવા કરતો ગૃહસ્થ પુણ્યને યોગ્ય સમયોમાં શ્રદ્ધાથી પુણ્ય કરે. (૪૪) ભાદરવા માસમાં કૃષ્ણ પક્ષમાં થતું, પોતાનાં માતા-પિતાનું તથા પિતૃવ્ય (કાકા) વગેરેનું યથાશક્તિ જુદું જ શ્રાદ્ધ કરે. (૪૫) દિવસનો ક્ષય હોય, વ્યતીપાત, વિષુવ=મકર રાશિ અને કર્ક રાશિમાં સૂર્યનું સંક્રમણ થાય તે દિવસે, દ્વાદશીમાં, અનુરાધા નક્ષત્રમાં અને શ્રવણ નક્ષત્રના સંગમમાં, એકાદશી અથવા દ્વાદશી, ઉત્તરા ફાલ્ગુની, ઉત્તરાષાઢા, ઉત્તરાભાદ્રપદ તેમાંથી કોઈ પણ નક્ષત્રના સંબંધમાં કારતક સુદી નવમી તિથિ, માઘ સુદિ સપ્તમી, અક્ષય તૃતીયા, અષ્ટકા= હેમન્ત અને શિશિર ઋતુઓની કૃષ્ણ પક્ષની અષ્ટમીઓ તથા અન્વષ્ટકા= તે અષ્ટમી પછીની નવમીઓ તથા કપિલા ષષ્ઠીઓ, પૂર્ણ ચન્દ્રમાયુક્ત પૂર્ણિમાઓ અથવા લગારેક ન્યૂન ચન્દ્રમાયુક્ત પૂર્ણિમાઓ, તે તે માસ નામના નક્ષત્રોએ યુક્ત પૂર્ણિમાઓ, પોતાના જન્મ નક્ષત્રે સહિત દિવસ, મન્વાદિતિથિઓ અને યુગાદિની તિથિઓ, વિષ્ણુના ઉત્સવો, (અન્નકૂટાદિ) વિષ્ણુના પ્રાદુર્ભાવના દિવસો, (જન્માષ્ટમી રામનવમી વગેરે) અમાવાસ્યાઓ અને સૂર્યની બાર રાશિઓમાં સંક્રમણના દિવસોમાં તથા ચન્દ્ર અને સૂર્યના ગ્રહણના દિવસ : આ દિનક્ષયાદિમાં સ્નાન, દાન, જપ, હોમ, શ્રાદ્ધ, બ્રાહ્મણભોજન; જે કાંઈ પુણ્ય કરે તે પુણ્ય અક્ષય થાય જ. (૪૬ થી ૫૧) વળી સોમવારે સહિત અમાવાસ્યા, રવિવારે સહિત સપ્તમી, મંગલવારે સહિત ચતુર્થી, બુધવારે સહિત અષ્ટમી, આ અમાવાસ્યાદિ ચાર તિથિઓ, સૂર્યગ્રહણના દિવસના તુલ્ય છે. આ ચાર તિથિઓમાં કરેલું દાન, જપ, હોમ, કોટિગણું પુણ્ય આપે છે. (૫૨-૫૩) વળી પોતાની પત્નીના ગર્ભાધાનસંસ્કાર, પુંસવન, સીમન્ત નામના ત્રણ સંસ્કારની ક્રિયાના દિવસોમાં તથા પોતાના પુત્રના જાતકર્માદિસંસ્કાર દિવસોમાં અને પોતાના મંત્રદીક્ષા, યજ્ઞદીક્ષા વગેરે સંસ્કારના દિવસોમાં, માતાપિતાની ઔર્ધ્વદૈહિક ક્રિયામાં, માતાપિતાની વાર્ષિક મરણતિથિમાં, તથા પોતાના અભ્યુદયમાં (આકસ્મિક લાભમાં) શક્તિ પ્રમાણે પુણ્ય કરે. (૫૪-૫૫) અધીત વેદવાળા શ્રોત્રિય, શુદ્ધ માતાપિતાના કુલથી ઉત્પન્ન થયેલ, વિનય યુક્ત, તપસ્વી, વ્રતમાં રહેલા કે દરિદ્ર આ બધા કે બધામાંથી એક ગુણવાળા બ્રાહ્મણને સર્વ પ્રકારે દાન આપવું જ. (૫૬)

હે બ્રાહ્મણશ્રેષ્ઠ ! સત્યયુગમાં જેમ તપ મનુષ્યોના હિત માટે મુનિઓએ કહ્યું છે, ત્રેતાયુગમાં જેમ યજ્ઞો મનુષ્યોના હિત માટે કહેલા છે, જેમ દ્વાપરમાં તંત્રોક્ત વિધિથી પરમેશ્વરનું પૂજન મનુષ્યોના હિત માટે કહેલું છે, તે પ્રકારે જ કલિયુગમાં દાન મનુષ્યોના હિત માટે કહેલું છે. (૫૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

देशकालपात्रविशेषनिरूपणनामा दशमोऽध्यायः ॥१०॥

श्रीनारायणमुनिरुवाच – **सर्वेषामिह दानानामन्नदानं विशिष्यते । अन्नं हि प्राणिनां प्राणा ह्यन्नदः प्राणदः स्मृतः ॥१॥ अन्नममृतमित्याह पुराकल्पे प्रजापतिः । अन्नमाश्रित्य वर्तन्ते त्रयो लोका न संशयः ॥२॥ ब्राह्मणायाभिरूपाय यो ददात्यन्नमर्थिने। स निधत्ते निधिश्रेष्ठं पारलौकिकमात्मनः ॥३॥ ब्राह्मणं क्षत्रियं वैश्यं शूद्रं वान्यं क्षुधातुरम् । दृष्ट्वा स्वयमुपोष्यापि योऽन्नं दत्ते स धर्मवित् ॥४॥ कृतपातककर्मापि यो दद्यादन्नमर्थिने । ब्राह्मणाय विशेषण न स पापेन लिप्यते ॥५॥ अन्नाभावे तु भिद्यन्ते शारीराः पञ्च धातवः । बलं बलवतोऽपीह प्रणश्यत्यन्नहानितः ॥६॥ अन्नेन वर्तते सर्वं यत्किञ्चित्स्थाणु जङ्गमम् । त्रिषु लोकेषु धर्मार्थमन्नं देयमतो बुधैः ॥७॥ अन्नदस्य मनुष्यस्य बलमोजो यशांसि च । पुण्यं च वर्धते शश्वत्त्रिषु लोकेषु सुव्रत! ॥८॥ भवनान्यन्नदातॄणां प्रकाशन्ते त्रिविष्टपे । तरुणादित्यवर्णानि स्थावराणि चराणि च ॥९॥ प्रासादाः पाण्डुराः शुभ्राः शय्याश्च कनकोज्ज्वलाः । अन्नदास्ताः प्रपद्यन्ते तस्मादन्नप्रदो भवेत् ॥१०॥ लक्षं वाप्ययुतं विप्रान्सहस्रं शतमेव वा । सदन्नैः पायसाद्यैश्च शक्तितो भोजयेत्तु यः ॥११॥ दिव्यं विमानमारुह्य सौवर्णं सूर्यवर्चसम् । गीयमानो देवगणैः स स्वर्गे वसति ध्रुवम् ॥१२॥ तथाऽत्र भूमिदानं च महादानं प्रकीर्त्यते । सर्वान्कामानवाप्नोति भूमिदानेन मानवः ॥१३॥ अपि गोचर्ममात्रां यः पक्वधान्यभृतां महीम् । विप्राय साधवे दद्यात्तस्य पुण्यमनन्तकम् ॥१४॥ एको वृषः शतं गावो यावत्यां शेरते भुवि । गोचर्ममात्रा सा भूमिरुच्यते परिमाणतः ॥१५॥**

---

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે ગૃહસ્થધર્મેષુ દેશ, કાલ, પાત્ર વિશેષ નિરૂપણ નામા દશમોડધ્યાયઃ (૧૦)*

## અધ્યાય : ૧૧

### શ્રીહરિએ સર્વથી અધિક દાનનું વિધાન તથા ગૃહસ્થધર્મનું નિરૂપણ કર્યું છે.

**શ્રી નારાયણ મુનિ બોલ્યા** : હે બ્રહ્મન્ ! આ લોકમાં સર્વે દાનોમાં અન્નદાન સર્વના કરતાં અધિક છે. કારણકે **અન્નદાન** પ્રાણીઓના પ્રાણો ધારણ કરવામાં કારણ છે. માટે જ અન્ન આપનારો પ્રાણ આપનારો કહ્યો છે. (૧) પુરાકલ્પમાં બ્રહ્મા અન્નને **અમૃત** કહે છે. ત્રણ લોક અન્નનો આશ્રય કરીને વર્તે છે. આમાં સંશય નથી. (૨) સત્પાત્ર, યાચના કરતાં બ્રાહ્મણને જે ગૃહસ્થ અન્ન આપે છે તે પોતે પરલોકમાં હિત કરનારો ખજાનો ધારણ કરે છે. (૩) બ્રાહ્મણ, ક્ષત્રિય, વૈશ્ય, શૂદ્ર અથવા ચાર વર્ણથી બીજો કોઈ મનુષ્ય પોતે ઉપવાસ કરીને પણ બ્રાહ્મણાદિકને અન્ન આપે છે, તે ધર્મજ્ઞ છે. (૪) પાપી પુરુષ પણ જો અન્નાર્થીને અન્ન આપે, બ્રાહ્મણને વિશેષપણે અન્ન આપે તો તે પાપથી લેપાતો નથી. (૫) શરીર સંબંધી પૃથ્વી વગેરે પાંચ ધાતુઓ અન્નના અભાવમાં ભેદાઈ જાય છે. આ લોકમાં બલવાન પુરુષનું બળ પણ અન્નના અભાવથી નાશ પામે છે. (૬) ત્રણ લોકમાં સ્થાવર જંગમ જે કંઈ પ્રાણીમાત્ર, અન્નથી જીવે છે માટે પંડિતોએ ધર્મ માટે અન્ન આપવું. (૭) હે સુવ્રત, અન્ન આપનારા મનુષ્યોનું શરીર સામર્થ્ય, ઈન્દ્રિયબલ અને પુણ્ય ત્રણ લોકમાં સુખાકારી નિરંતર વૃદ્ધિ પામે છે, કીર્તિની વૃદ્ધિ થાય છે. (૮) અન્નાર્થીને અન્ન આપનારા મનુષ્યોને મધ્યાહ્ન સમયના સૂર્યકિરણો સમાન વર્ણવાળા, સ્થિર અને સંકલ્પ પ્રમાણે ગતિ કરનારા **વિમાનરૂપ ભવનો** સ્વર્ગમાં પ્રકાશે છે. (૯) પીળાશથી યુક્ત શ્વેત વર્ણવાળા, કેવલ શ્વેત વર્ણવાળા, મહેલો અને સુવર્ણની કાંતિ સમાન શય્યાઓ અન્ન આપનારાઓને પ્રાપ્ત થાય છે. માટે અન્નદાની થવું. (૧૦) લાખ બ્રાહ્મણો અથવા દશ હજાર બ્રાહ્મણો અથવા એક હજાર અથવા સો બ્રાહ્મણોને જે ગૃહસ્થ દૂધપાક વગેરે શ્રેષ્ઠ અન્નોથી ભોજન કરાવે તે ગૃહસ્થ સુવર્ણ વર્ણવાળા દિવ્ય વિમાનમાં બેસીને દેવગણો વડે કીર્તિગાન પામે છે અને સ્વર્ગમાં નિવાસ કરે છે. (૧૧-૧૨) તથા આ લોકમાં **પૃથ્વીદાન** મહાદાન કહેવાય છે, મનુષ્ય ભૂમિદાનથી સર્વ મનોરથોને પામે છે. (૧૩) જે પુરુષ પાકેલા ધાન્યથી પરિપૂર્ણ ગોચર્મ માત્ર જેટલી પૃથ્વી સદાચારી બ્રાહ્મણને દાનમાં આપે છે, તે પુરુષ અંતે અપરિમિત ફળ પામે છે. (૧૪) એક સાંઢ અને સો ગાયો જેટલી પૃથ્વીમાં સુખેથી બેસી શકે તે ભૂમિ પરિમાણથી **ગોચર્મ માત્રા** કહેવાય છે. (૧૫) ભૂદાન કરનારો પુરુષ સમગ્ર પાતક રહિત થાય. તત્કાલ અશ્વમેધથી પણ અધિક પુણ્ય નિશ્ચય-નક્કી પામે છે.



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सर्वपापविनिर्मुक्तो भूमिदः पुरुषो भवेत्। अश्वमेधाधिकं पुण्यं सद्यः प्राप्नोति निश्चितम् ॥१६॥ सुवर्णं रजतं वस्त्रं मणिमुक्तावसूनि च । सर्वमेतन्महाप्राज्ञो ददाति वसुधां ददत् ॥१७॥ पञ्च पूर्वान्स पुरुषान्स्वं च पञ्च परानपि। एकादश ददद्भूमिं परिपातीह मानवः ॥१८॥ सर्वोपस्करसंयुक्तं दृढं वेश्म द्विजाय यः । दद्यात्सम्पूज्य विधिवद्ब्रह्मलोकं स चाप्नुयात् ॥१९॥ प्राकारा यत्र सौवर्णा गृहाण्युच्चैस्तराणि च। नानारत्नैर्भूषितानि तानि प्राप्नोति वेश्मदः ॥२०॥ कुटुम्बिने ब्राह्मणाय सुशीलां गां ददाति यः । सवत्सां वस्त्रसंयुक्तां सुरूपां च पयस्विनीम् ॥२१॥ हेमशृङ्गीं रुक्मखुरां मुक्ताहारविभूषिताम् । सदक्षिणां विधानेन विष्णुलोकं स चाप्नुयात् ॥२२॥ सुवर्णं दक्षिणोपेतं ब्राह्मणाय ददाति यः । न प्राप्नोति स मालिन्यं सर्वदोषैः प्रमुच्यते ॥२३॥ माघमासे तिलान् यश्च ब्राह्मणेभ्यः प्रयच्छति । ताम्रपात्रभृतान्सोऽपि यमलोकं न पश्यति ॥२४॥ निदाघकाले पानीयं यः प्रयच्छत्युपानहौ । छत्रं च वर्षाकाले यश्चन्द्रलोकं प्रयान्ति ते ॥२५॥ एकादशीव्रतं कृत्वा द्वादश्यां भोजयेत्तु यः । विष्णुभक्तान्द्विजान्साधून् विरक्तांश्च विशेषतः ॥२६॥ सर्वेषामपि यज्ञानां प्राप्नोत्येव फलं स च । तस्मै प्रीतो हरिर्दत्ते सर्वं तन्मनसेप्सितम् ॥२७॥ द्वादश्यां मार्गशीर्षस्य केशवं तु प्रपूज्य यः । तद्भक्तान्भोजयेत्तस्य फलं स्यादश्वमेधजम् ॥२८॥ पौषे नारायणं भक्त्या पूजयित्वैव भोजयेत् । द्वादश्यां ब्राह्मणांस्तस्य वाजपेयफलं भवेत् ॥२९॥ माधवं यः समभ्यर्च्य द्वादश्यां माघमासि च । भोजयेद्ब्राह्मणांस्तस्य फलं स्याद्राजसूयजम् ॥३०॥ गोविन्दं फाल्गुनेऽभ्यर्च्य मासि यो द्वादशीदिने । प्रीणयेद्ब्राह्मणांस्तस्य फलं स्यादतिरात्रजम् ॥३१॥ विष्णुं भक्त्या समभ्यर्च्य द्वादश्यां मधुमासि च । तद्भक्तान्ब्राह्मणान्साधून्स्वशक्त्या प्रीणयेच्च यः ॥३२॥ पौण्डरीकस्य यज्ञस्य फलं प्राप्य स मानवः । दिव्यं लोकमवाप्नोति देहान्ते देवदुर्लभम् ॥३३॥ द्वादश्यां पूजयित्वा यो माधवे मधुसूदनम्। भोजयेद्ब्राह्मणांस्तस्य ह्यग्निष्टोमफलं

(૧૬) મહાબુદ્ધિશાળી પુરુષ પૃથ્વીને દાનમાં આપે તો સુવર્ણ, ચાંદી, વસ્ત્ર, મણિ, મોતી, રત્ન એ બધું આપે છે, તેમ માનવું. અર્થાત્ પૃથ્વીના દાનથી સુવર્ણાદિ દાનનું ફળ થાય છે. (૧૭) જે પુરુષ આ લોકમાં ભૂમિદાન કરે છે, તે મનુષ્ય પોતાની પૂર્વજ પાંચ પેઢી અને પછીની પાંચ પેઢી એમ અગિયાર પેઢીના રક્ષણ માટે પુણ્ય પ્રાપ્ત કરે છે. (૧૮) જે પુરુષ સર્વ ગૃહસ્થાશ્રમને ઉપયોગી, ખાંડણી, ઘંટી, ગાદલાં, વાસણો વગેરે તમામ સાધનો સહિત નૂતન દૃઢ ગૃહ વિધિ પ્રમાણે સુપાત્ર બ્રાહ્મણને પૂજા કરીને અર્પણ કરે તે પુરુષ બ્રહ્માના લોકને પામે છે. (૧૯) જે ગૃહોમાં સુવર્ણના નિર્માણ કરેલા કિલ્લાઓ છે અને ઊંચા વિવિધ રત્નોથી અલંકૃત કરેલાં છે તેવા ગૃહોને, મકાનનું દાન કરનાર પુરુષ પામે છે. (૨૦) જે ગૃહસ્થ સારા સ્વભાવવાળી (લાત-શીંગડાનો પ્રહાર નહીં કરનારી) વાછરડીએ સહિત, વસ્ત્ર સહિત, સુંદર આકૃતિવાળી, બહુ દૂધવાળી, સુવર્ણનાં શીંગડાંવાળી, ચાંદીની ખરીઓવાળી, મોતીહારથી શણગારેલી, દક્ષિણા સહિત, દોહન પાત્ર સહિત ગાયને શાસ્ત્ર પ્રમાણે વિધિ પ્રમાણે કુટુંબી બ્રાહ્મણને આપે, તે ગૃહસ્થ વિષ્ણુલોકને પામે. (૨૧-૨૨) જે ગૃહસ્થ દક્ષિણાએ સહિત સુવર્ણ બ્રાહ્મણને આપે છે, તે ગૃહસ્થ પુરુષ મલિન અંતઃકરણવાળો થતો નથી. સર્વ દોષોથી મુક્ત થાય છે. (૨૩) માઘ માસમાં, ત્રાંબાના પાત્રમાં તલ ભરીને બ્રાહ્મણોને જે પુરુષ આપે છે તે યમલોકમાં જતો નથી. (૨૪) જે ગ્રીષ્મ સમયે જલ દાન કરે, ઉપાનહ (જોડાં) દાન કરે, વર્ષાકાલે છત્ર આપે, તે સર્વે પણ ચંદ્ર લોકને પામે છે. (૨૫) જે એકાદશીનું વ્રત કરીને દ્વાદશીને દિવસે વિષ્ણુભક્ત બ્રાહ્મણો અને વૈરાગ્યવાળા સાધુઓને વિશેષપણે ભોજન કરાવે, તે સર્વ યજ્ઞોનું ફળ પામે છે જ. તેની ઉપર પ્રસન્ન થયેલા શ્રીહરિ તેને મનવાંછિત સર્વ ફળ આપે છે. (૨૬-૨૭) જે માગશર માસની દ્વાદશીને દિવસે કેશવ નામના ભગવાનને પૂજીને ભગવાનના ભક્તોને જમાડે, તેને **અશ્વમેધ** યજ્ઞનું ફળ પ્રાપ્ત થાય છે. ( અહીંથી પૂર્વદિને એકાદશીનું વ્રત કરવાપૂર્વક દ્વાદશીનું વિધાન જાણવું.) (૨૮) જે પુરુષ પોષ માસમાં, દ્વાદશીમાં, નારાયણ ભગવાનનું ભક્તિથી પૂજન કરીને જ બ્રાહ્મણોને જમાડે તથા ભગવાનના એકાંતિક સાધુઓને જમાડે તેને **વાજપેય** યજ્ઞનું પુણ્ય પ્રાપ્ત થાય છે. (૨૯) જે માઘ માસમાં દ્વાદશીને દિવસે, માધવ ભગવાનનું પૂજન કરીને બ્રાહ્મણો તથા સાધુઓને જમાડે તેને **રાજસૂય** યજ્ઞનું ફળ પ્રાપ્ત થાય. (૩૦) જે ફાગણ માસમાં બારસને દિવસે ગોવિંદ ભગવાનને પૂજીને બ્રાહ્મણો તથા સાધુઓને તૃપ્ત કરે, તેને **અતિરાત્ર** નામના યજ્ઞનું ફળ પ્રાપ્ત થાય. (૩૧) જે ચૈત્ર માસમાં દ્વાદશીને દિવસે વિષ્ણુ ભગવાનને ભક્તિથી સમર્ચન કરી ભગવાનના ભક્ત બ્રાહ્મણો અને સાધુઓને પોતાની શક્તિ પ્રમાણે ભોજન કરાવે તે મનુષ્ય **પૌંડરિક** યજ્ઞનું ફળ પ્રાપ્ત કરીને દેહાન્તે દેવતાઓને દુર્લભ એવા દિવ્ય લોકને પામે છે. (૩૨-૩૩) જે મનુષ્ય વૈશાખ માસમાં



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

भवेत् ॥३४॥ त्रिविक्रमं पूजयित्वा ज्येष्ठे च द्वादशीदिने । भोजयेद्यो द्विजान् यायाद्गवामयनजं फलम् ॥३५॥ सम्पूज्य वामनं भक्त्या द्वादश्यां शुचिमासि यः । विप्रांस्तु भोजयेत्तस्य फलं स्यात्सोमयागजम् ॥३६॥ श्रावणे श्रीधरं यश्च समर्च्य द्वादशीदिने । भोजयेद्ब्राह्मणान् सोऽपि यायाद्विश्वजितः फलम्॥३७॥ हृषीकेशं भाद्रपदे द्वादश्यां च समर्च्य यः । ब्राह्मणान्भोजयेत्तस्य सौत्रामण्याः फलं भवेत् ॥३८॥ आश्विने पद्मनाभं यः समर्च्य द्वादशीदिने । विप्रान्सन्तर्पयेत्सोऽपि सौमिकं फलमाप्नुयात् ॥३९॥ द्वादश्यां कार्तिके चेष्ट्वा मासि दामोदरं द्विजान् । भोजयेद्यः स चाप्नोति सर्वमेधफलं पुमान् ॥४०॥ द्वादशी वैष्णवी प्रेष्ठा तिथिर्नारायणस्य च । तस्यां यत्सुकृतं कुर्यात्तद्भवेदक्षयं खलु ॥४१॥ दानानि च यथाशक्ति दद्याद्विप्राय तद्दिने । तत्तदृतूचितैर्भोज्यैर्भक्तान्सम्प्रीणयेद्धरेः ॥४२॥ एवंविधो गृही दिव्यं किङ्किणीजालमण्डितम् । अर्कप्रभं समारुह्य विमानं याति तत्पदम्॥४३॥ औषधं स्नेहमाहारं रोगिणे रोगशान्तये । ददानो रोगरहितो दीर्घायुर्जायते नरः ॥४४॥ वेदं शास्त्रं पुराणं वा भारतं वा ददाति यः । अक्षयं तद्भवेत्पुण्यं सर्वपापक्षयो भवेत् ॥४५॥ शीतकाले च वस्त्राणि काष्ठान्यूर्णापटांस्तथा । ददाति यो ब्राह्मणेभ्यः स नित्यं सुखमेधते ॥४६॥ यद्यदिष्टतमं लोके यच्चापि दयितं गृहे । तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥४७॥ द्वादश्यां चैत्रशुक्ले च श्वेतवस्त्रप्रदो नरः । चैत्रे प्रतिदिनं वा यः सोऽक्षयं स्वर्गमेति हि ॥४८॥ वैशाखे स्वर्णदः शुक्रे छत्रोपानत्प्रदस्तथा। शय्याप्रदः शुचौ मासे श्वेतद्वीपमवाप्नुयात् ॥४९॥ पुराणदाता नभसि प्रौष्ठपादे च गोप्रदः । इषेऽश्वदाता पुरुषः कुलमुद्धरते निजम् ॥५०॥ ऊर्णामूर्जे च लवणं मार्गे पौषेऽन्नपर्वतम् । फाल्गुने सुरभिद्रव्यं यो दद्यात्स सुखी सदा ॥५१॥ न दानं यशसे दद्यान्न भयान्न च लोभतः ।

---

દ્વાદશીને દિવસે મધુસૂદનને પૂજીને બ્રાહ્મણો તથા સાધુઓને ભોજન કરાવે તેને **અગ્નિષ્ટોમ** યજ્ઞનું ફળ મળે છે. (૩૪) જે જન, જેઠ માસમાં દ્વાદશીને દિવસે ત્રિવિક્રમ ભગવાનને પૂજીને બ્રાહ્મણો તથા સાધુઓને ભોજન કરાવે તે **ગવાયન** યજ્ઞનું ફળ પામે. (૩૫) જે અષાઢ માસમાં વામન ભગવાનને ભક્તિથી પૂજન કરી, બ્રાહ્મણોને ભોજન કરાવે તેને **સોમયાગ**નું ફળ મળે. (૩૬) જે શ્રાવણ માસમાં દ્વાદશીને દિવસે શ્રીધર ભગવાનનું સમર્ચન કરીને બ્રાહ્મણોને જમાડે તે પણ **વિશ્વજિત** યજ્ઞનું ફળ પામે. (૩૭) જે ભાદરવા માસમાં બારસને દિવસે હૃષીકેશ ભગવાનનું સમર્ચન કરીને બ્રાહ્મણોને ભોજન કરાવે તેને **સૌત્રામણિ** યજ્ઞનું ફળ મળે. (૩૮) જે આસો માસમાં પદ્મનાભ ભગવાનનું પૂજન કરી, વિપ્ર સંતર્પણ કરે તે પુરુષ પણ **સોમયજ્ઞ** સંબંધી ફળને પામે. (૩૯) અને જે પુરુષ કાર્તિક માસમાં દ્વાદશીના રોજ દામોદર ભગવાનનું પૂજન કરી, બ્રહ્મભોજન કરાવે તે પુરુષ **સર્વમેધ** નામના યજ્ઞના ફળને પામે છે. (૪૦) વૈષ્ણવી દ્વાદશી તિથિ નારાયણ ભગવાનને, અતિપ્રિય છે. તે દ્વાદશીમાં જે સુકૃત કરે તે અક્ષય થાય છે જ. (૪૧) માટે દ્વાદશીને દિવસે યથાશક્તિ દાનો બ્રાહ્મણને આપે. હરિના ભક્તોને તે તે ઋતુઓમાં યોગ્ય ભોજનોથી પ્રસન્ન કરે. (૪૨) આ પ્રકારે દ્વાદશીઓમાં પુણ્ય કરનારા સદ્‌ગૃહસ્થ ઝીણી ઝીણી ઘંટડીઓથી શોભાયમાન, સૂર્યની કાંતિ સમાન ચળકતા દિવ્ય વિમાન ઉપર બેસીને શ્રી વિષ્ણુના સ્થાનને પામે છે. (૪૩) રોગની શાંતિ માટે રોગયુક્ત જનને ઔષધ-ઘૃત-તેને રુચિકર અન્નને આપતો માણસ રોગ રહિત થઈને દીર્ઘાયુ થાય છે. (૪૪) જે પુરુષ વેદ, શાસ્ત્ર, પુરાણ, મહાભારત આપે છે, તેને અક્ષય પુણ્ય થાય છે અને સર્વ પાપનો નાશ થાય છે. (૪૫) જે પુરુષ ઠંડીના સમયમાં વસ્ત્રો, લાકડાં તથા ઊનના કામળા બ્રાહ્મણોને આપે છે તે નિરંતર સુખેથી વૃદ્ધિ પામે છે. (૪૬) આ ભૂલોકમાં જે જે વસ્તુ પોતાને અત્યન્ત પ્રિય હોય અને જે જે વસ્તુ ઘરમાં પોતાની પત્નીને પ્રિય હોય, તે તે વસ્તુઓને અવિનાશી ઇચ્છતા પુરુષે ધાર્મિક બ્રાહ્મણને આપવી જોઈએ. (૪૭) જે મનુષ્ય ચૈત્ર શુકલ પક્ષની દ્વાદશીમાં અથવા ચૈત્ર માસમાં શ્વેત વસ્ત્રનું દરરોજ દાન કરે તે મનુષ્ય અક્ષય સ્વર્ગને પામે છે. (૪૮) જે વૈશાખમાં સુવર્ણ દાન કરે, જેઠમાં છત્રીનું દાન કરે તથા ઉપાનહ (જોડાં-પગરખાં)નું દાન કરે તથા અષાઢમાં શૈયા દાન કરે તે મનુષ્ય શ્વેતદ્વીપને પામે છે. (૪૯) જે પુરુષ શ્રાવણમાં શ્રીમદ્ ભાગવતનું દાન કરે, ભાદરવા માસમાં ગૌદાન કરે, આસો માસમાં વિધિપૂર્વક અશ્વનું દાન કરે તે પોતાના કુળનો ઉદ્ધાર કરે છે. (૫૦) કારતકમાં ઊન, માગશરમાં લવણ, પોષમાં અન્નનો ઢગલો, ફાગણમાં સુરભિ દ્રવ્ય, કેસર, ચંદનાદિ વસ્તુ આપે તે સદા સુખી થાય. (૫૧) દાન, કીર્તિ માટે ન આપે, કોઈના ભયથી પણ ન આપે,



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**परलोकहितायैव देयं पात्रद्विजाय तत् ॥५२॥ पात्रभूतोऽपि यो विप्रः प्रतिगृह्य प्रतिग्रहम् । असत्सु विनियुञ्जीत तस्मै देयं न कर्हिचित् ॥५३॥ सञ्चयं कुरुते यस्तु समादाय ततस्ततः । धर्मार्थं नोपयुञ्जीत तस्मै देयं न कर्हिचित् ॥५४॥ दानकाले च सम्प्राप्ते विप्रस्यासन्निधौ सति । सङ्कल्प्य मनसा तत्तु जलमध्ये जलं क्षिपेत् ॥५५॥ दातुः फलं दशगुणं भवेदेवं कृते सति । ग्रहीतुरपि विप्रस्य न दोषः स्यात्प्रतिग्रहे ॥५६॥ विद्यावते दरिद्राय लक्ष्मीभ्रष्टाय चार्थिने । यद्दीयते तदक्षय्यं सुशीलाय विशेषतः ॥५७॥ अक्रोधना धर्मपराः सत्यनित्या दमे रताः । ईदृशाः साधवो विप्रास्तेभ्यो दत्तं महाफलम् ॥५८॥ अमानिनः सर्वसहा निःस्पृहा विजितेन्द्रियाः । सर्वभूतहिता मैत्रास्तेभ्यो दत्तं महाफलम् ॥५९॥ साङ्गांश्च चतुरो वेदानधीते यो द्विजर्षभः । षट्कर्मनिरतः शान्तः सत्पात्रं स प्रकीर्त्यत्ते ॥६०॥ ईदृशेभ्यस्तु यद्दानं ददाति धनवान् गृही। सहस्त्रगुणितं सद्यस्तद्भवत्येव निश्चितम् ॥६१॥ प्रज्ञाश्रुताभ्यां शीलेन वृत्तेन च समन्वितः । तारयत्येव हि कुलं स एकोऽपि द्विजोत्तमः ॥६२॥ निशम्यापि गुणोपेतं ब्राह्मणं साधुसम्मतम् । दूरादानाय्य सत्कृत्य सर्वभावेन पूजयेत् ॥६३॥ निष्फलं नवसूत्सृष्टं चाटचारणतस्करे । कुवैद्ये कितवे धूर्ते शठे मल्ले च बन्दिनि ॥६४॥ न्यायार्जितेनैव धनेन कुर्याद्दानं यथाशक्ति गृही द्विजेन्द्र! । न क्लेशयित्वा निजपोष्यवर्गं नान्यायलब्धेन धनेन चापि ॥६५॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे गृहस्थधर्मेषु दानविधिनिरूपणनामैकादशोऽध्यायः ॥११॥

---

લોભથી પણ ન આપે, પરંતુ તે દાન પરલોકમાં પોતાનું હિત કરવા માટે સુપાત્ર બ્રાહ્મણને આપે. (૫૨) પાત્રતા ગુણયુક્ત હોય તો પણ જે બ્રાહ્મણ દાન ગ્રહણ કરીને અધર્મ કાર્યોમાં ઉપયોગ કરે તેવા બ્રાહ્મણને ક્યારેય દાન ન કરવું. (૫૩) જે બ્રાહ્મણ જ્યાં ત્યાંથી દરેક ઘરેથી મેળવીને સંચય કરે અને ધર્મ માટે યોજના કરતો નથી, તે બ્રાહ્મણને ક્યારેય પણ દાન આપવું નહિ. (૫૪) વળી દાન સમયે સુપાત્ર બ્રાહ્મણ સમીપમાં ન હોય તો દાન, મનથી સંકલ્પ કરીને જળ મધ્યે જળ મૂકે. (૫૫) આ પ્રકારે કરવાથી દાતાને દશગણું ફળ થાય. પ્રતિગ્રહ કરનાર બ્રાહ્મણને પણ દોષ ના થાય. (૫૬) વિદ્યાવાન, શાસ્ત્રના અભ્યાસી, દરિદ્ર, લક્ષ્મીથી ભ્રષ્ટ થયેલો, (ધન નાશ પામેલો), યાચક બ્રાહ્મણ તેમાં પણ સુશીલ બ્રાહ્મણને જે અપાય છે તે ક્ષયે રહિત થાય. (૫૭) ક્રોધે રહિત, સ્વધર્મ પરાયણ, સત્ય પરાયણ, બાહ્યેન્દ્રિયને નિયમમાં રાખનાર, આ પ્રકારના સાધુસ્વભાવ યુક્ત બ્રાહ્મણોને આપેલું દાન મહાફળ આપનારું થાય છે. (૫૮) માને રહિત, સર્વને સહન કરનારા, નિઃસ્પૃહી, જિતેન્દ્રિય, સર્વભૂત પ્રાણીમાત્રનું હિત ઈચ્છનારા, સર્વના મિત્ર આ પ્રકારના જે બ્રાહ્મણો હોય તેમને આપેલું દાન મહાફલને આપનારું છે. (૫૯) જે બ્રાહ્મણશ્રેષ્ઠ શિક્ષાદિ અંગોએ સહિત ચાર વેદોને ભણે છે. સ્નાનસંધ્યાદિ ષટ્કર્મમાં નિષ્ઠાવાળો, શાન્ત-જીતેન્દ્રિય હોય તે બ્રાહ્મણ **સત્પાત્ર** કહેવાય છે. (૬૦) ધનવાન ગૃહસ્થ આ પ્રકારના સુપાત્ર વિપ્રોને જે દાન આપે છે તે તત્કાલ હજાર ગણું થાય છે, એમાં સંશય નથી. (૬૧) જે શ્રેષ્ઠ બ્રાહ્મણ, બુદ્ધિ અને શાસ્ત્રના અભ્યાસથી સારો સ્વભાવ અને સદાચારથી યુક્ત એવો એક જ દ્વિજોત્તમ હોય તે પણ દાન આપનાર પુરુષના સમગ્ર કુળને નિશ્ચય તારે જ છે. (૬૨) સમગ્ર સત્પાત્ર ગુણ સંપન્ન સ્વધર્મનિષ્ઠ સાધુ-પુરુષોએ પ્રમાણ કરેલા બ્રાહ્મણને સાંભળીને દૂર દેશથી પણ પોતાની પાસે બોલાવીને તેને યોગ્ય સત્કાર કરીને સર્વ ભાવથી પૂજે. (૬૩) ઠગ, ચારણ, ચોર, નઠારા-વૈદ્ય (કુવૈદ્ય), કપટી, ધૂર્ત, ચાડીઓ, મલ્લ, ખુશામતિયા (બંદીજનો) આ નવ જણને આપેલું દાન નિષ્ફળ જાય છે. (૬૪)

હે દ્વિજેન્દ્ર ! ગૃહસ્થ પુરુષ ન્યાય - માર્ગથી સંપાદન કરેલા ધનથી જ યથાશક્તિ દાન કરે. પોતાના પિતાદિ પોષ્ય વર્ગને ક્લેશ આપીને દાન ન કરે. (૬૫)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે, ધર્મશાસ્ત્રે, પંચમ પ્રકરણે, ધર્મોપદેશે દાનવિધિનિરૂપણ નામૈકાદશોऽધ્યાયઃ (૧૧)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच – **स्ववैभवानुसारेण गृहस्थो हरिमन्दिरम् । कारयेत्सुदृढं भक्त्या सुधालिप्तं समण्डलम् ॥१॥ यथा यथा चातिदृढं कारयेन्मन्दिरं गृही । तथा तथा फलोत्कर्षो ज्ञातव्यस्तस्य सुव्रत! ॥२॥ मन्दिरं कारयेद्रम्यं प्राचीसाधनपूर्वकम्। पुरस्तस्यैकभौमं च कारयेत्तार्क्ष्यमण्डपम् ॥३॥ मन्दिरं चाभितः कार्या धर्मशाला मनोहरा । पान्थवैष्णववासार्हा प्राकारेणाभिवेष्टिता ॥४॥ उद्यानं कारयेत्तत्र फलपुष्पद्रुमान्वितम् । मिष्टनिर्मलपानीयां वापिकां च सदोदकाम् ॥५॥ मध्ये श्रीवासुदेवं तु मन्दिरे स्थापयेद्यदा । आग्नेय्यामम्बिकां सूर्यं नैर्ऋते स्थापयेत्तदा ॥६॥ ब्रह्माणं स्थापयेद्वायावीशाने सात्मजं शिवम् । महोत्सवेन तन्मूर्तिः स्थापनीया यथाविधि ॥७॥ हरेरुपासातन्त्राणि पुरा प्रोक्तानि तेन वै । पञ्चरात्राभिधानानि सप्तरात्राभिधानि च ॥८॥ व्यस्तानि तानि मुनिभिः कालेन दिवि चेह च । पञ्चविंशतिसङ्ख्यानि तेषां नामानि मच्छृणु ॥९॥ हयग्रीवं वैष्णवं च पौष्करं गार्ग्यगालवम् । प्राह्लादं नारदीयं च श्रीप्रश्नं शौनकं तथा ॥१०॥ शाण्डिल्यमैश्वरं तार्क्ष्यं वासिष्ठं ज्ञानसागरम् । स्वायम्भुवं च विश्वोक्तं सत्योक्तं कापिलं तथा ॥११॥ नारायणीयमात्रेयं नारसिंहं तथारुणम् । बौधायनं च सानन्दमष्टान्ताख्यं तथान्तिमम् ॥१२॥ एतेष्वन्यतमेनोक्तमाश्रित्य वैष्णवं विधिम् । मन्दिरं तत्प्रतिष्ठां च पूजनं च समाचरेत् ॥१३॥ विष्णोः शंभ्वर्कगणपदेवीनां च तदात्मनाम् । कारयेन्मन्दिराण्येवं वैभवे सति सद्गृही ॥१४॥ चैत्रफाल्गुनवैशाखज्येष्ठमासाः शुभावहाः । सर्वदेवप्रतिष्ठायां चैत्रं नेच्छन्ति केचन ॥१५॥ प्रतिष्ठायां तथा विष्णोर्माघमासो न चोचितः । दक्षिणं चायनं तद्वन्निषिद्धं देवकर्मणि ॥१६॥ माघफाल्गुनवैशाखज्येष्ठाषाढेषु पञ्चसु । मासेषु शुक्लपक्षे च शिवस्थापनमुत्तमम् ॥१७॥ देवालयं कारयति धर्मशालां च यः पुमान् । स तारयति**

---

## અધ્યાય : ૧૨

### શ્રીહરિએ મંદિરાદિ-પૂર્ત કર્મનો વિધિ તથા ગૃહસ્થ જનોને ગ્રહોનું અર્ચન કરવાનો વિધિ પણ કહ્યો છે.

**શ્રીનારાયણ મુનિ બોલ્યા :** હે બ્રહ્મન્ ! ગૃહસ્થ પોતાના વૈભવ પ્રમાણે અતિદૃઢ, ચૂનાથી ધોળેલું, સર્વતોભદ્રાદિ મંડલે સહિત પરમાત્માની પ્રતિષ્ઠાને યોગ્ય ભવન (મંદિર) ભક્તિપૂર્વક કરાવે. (૧) હે સુવ્રત ! ધનવાન ગૃહસ્થ જેમ જેમ અતિદૃઢ મંદિર કરાવે તેમ તેમ દૃઢ મંદિર કરાવનારને ફલનો સમુત્કર્ષ જાણવો. (૨) જ્યોતિષશાસ્ત્રમાં કહેલી રીતે પૂર્વ દિશાના સાધનપૂર્વક (શાસ્ત્રોક્ત વિધિથી) રમણીય મંદિર કરાવે, તે મંદિરનાં અગ્ર ભાગમાં એક માળવાળો, જેમાં સન્મુખ બેઠેલા ગરુડે પોતાના ઈષ્ટદેવના સારી રીતે દર્શન થાય તેવો, ગરુડની અર્ચાના સ્થાપનનો મંડપ કરાવે. (૩) મનોહર, વટેમાર્ગુના નિવાસ યોગ્ય, કોટે સહિત ધર્મશાળા; મંદિરની ચોતરફ કરાવે. (૪) મંદિરની સમીપમાં ફલ—પુષ્પપ્રધાન વૃક્ષોથી બાગ બનાવે, અને મીઠું, નિર્મળ જેનું જળ હોય, તેવી રમણીય પગથિયાવાળી વાવ બનાવે. (૫) જ્યારે મધ્ય મંદિરમાં શ્રી વાસુદેવ ભગવાનની સ્થાપના કરે. ત્યારે અગ્નિ દિશામાં દુર્ગાનું સ્થાપન કરે. નૈર્ઋત્ય ખૂણામાં સૂર્યની સ્થાપના કરે. (૬) વાયવ્ય ખૂણામાં બ્રહ્માની સ્થાપના કરે. શ્રી વાસુદેવની પ્રતિમા મહોત્સવે સહિત, પ્રતિષ્ઠા કરીને સ્થાપના કરવી. (૭) પંચ-રાત્ર અને સપ્ત-રાત્ર નામના હરિની ઉપાસનાને જણાવનારાં શાસ્ત્રો પ્રથમ શ્રીહરિએ કહેલા છે. (૮) કાળે કરીને સ્વર્ગમાં અને પૃથ્વીલોકમાં મુનિઓએ તે ઉપાસનાતંત્રો પચ્ચીશ સંખ્યાવાળાં બનાવ્યાં છે અને વિભાગો પાડ્યા છે તે તંત્રોનાં નામ મારા થકી સાંભળો. (૯) હયગ્રીવ, વૈષ્ણવ, પૌષ્કર, ગાર્ગ્ય, ગાલવ, પ્રાહ્લાદ, નારદીય, શ્રીપ્રશ્ન, શૌનક, શાંડિલ્ય, ઐશ્વર, તાર્ક્ષ્ય, વાસિષ્ઠ, જ્ઞાનસાગર, સ્વાયંભુવ, વિશ્વોક્ત, સત્યોક્ત, કાપિલ, નારાયણીય, આત્રેય, નારસિંહ, આરૂણ, બૌધાયન, સાનંદ તથા અષ્ટાંત નામનું : આ **પચીશ તંત્રો** છે. (૧૦-૧૧-૧૨) આ પચીશ તંત્રોમાં કહેલું કોઈપણ એક વૈષ્ણવ તંત્રથી, વિષ્ણુ સંબંધી વિધિનો આશ્રય કરીને શ્રી વાસુદેવનું મંદિર, પ્રતિષ્ઠા અને પૂજન કરે. (૧૩) જે શ્રીવાસુદેવના મહાભક્ત સદ્ગૃહસ્થને વૈભવ હોય, તેમણે શંભુ, સૂર્ય ગણપતિ અને પાર્વતીનાં મંદિરો કરાવવા. (૧૪) ફાગણ, ચૈત્ર, વૈશાખ અને જેઠ, આ ચાર માસો સર્વ દેવની પ્રતિષ્ઠામાં શુભ ફળ આપનારા છે. કેટલાક ચૈત્ર માસને દેવ-પ્રતિષ્ઠા માટે વર્જ્ય ગણે છે. (૧૫) તેમજ વિષ્ણુની પ્રતિષ્ઠા માટે માઘ માસ યોગ્ય નથી, 'माघः कर्तुर्विनाशाय'' એમ વિષ્ણુધર્મોત્તરમાં કહ્યું છે. તેમ જ વિષ્ણુ પ્રતિષ્ઠા જેવી દેવ યોગ્ય પ્રતિષ્ઠા માટેની ક્રિયામાં દક્ષિણાયન નિષેધ છે. (૧૬) મહા, ફાગણ, વૈશાખ, જેઠ, અષાઢ આ પાંચ માસોમાં શુકલ પક્ષમાં શિવનું સ્થાપન ઉત્તમ છે. (આ **'રત્નાવલિ'** ગ્રંથને અનુસારે છે.) (૧૭) જે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

संसारादात्मनः सप्त पूरुषान् ॥१८॥ यावत्य इष्टिकास्तत्र चिता देवालयादिषु । तावन्त्यब्दसहस्राणि तत्कर्ता स्वर्गमावसेत् ॥१९॥ श्रीमतो वासुदेवस्य कारयत्युत्तमं तु यः । मन्दिरं सुदृढं रम्यं स मोक्षं प्राप्नुयाद्ध्रुवम् ॥२०॥ मध्यमं कारयेद्यस्तु पुमांस्तन्मन्दिरं नवम्। स च वैकुण्ठमाप्नोति लोकं लोकनमस्कृतम् ॥२१॥ कनिष्ठं मन्दिरं यश्च कारयेत्तस्य वाडव! । सुरेन्द्रलोकमाप्नोति स पुमानपि निश्चितम् ॥२२॥ फलं धनी श्रेष्ठतमेन यत्तु प्राप्नोति तन्मन्दिरकर्मणा तत् । प्राप्नोति हि स्वल्पधनः कनिष्ठं तत्कारयित्वा प्रयतः स्वशक्त्या ॥२३॥ प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयम् । पूजादिना ब्रह्मलोकं त्रिभिस्तत्साम्यमाप्नुयात् ॥२४॥ यः कारयति तद्धाम निर्दम्भः प्रीतये हरेः । कुलानि शतमुद्धृत्य वैकुण्ठे निवसत्यसौ ॥२५॥ सुधादिभिर्लेपयित्वा जीर्णोद्धारं च कारयेत् । देवालयमठादेश्च यस्तस्य सुकृतं महत् ॥२६॥ सम्मार्जयेच्च यस्तत्र यश्च तत्रानुलेपयेत् । दीपं च तत्र यः कुर्याद्विष्णुलोकं प्रयाति सः ॥२७॥ तथा कूपांश्च वापीश्च तडागानि च ये नराः । कारयन्त्यक्षयं पुण्यं तेषां तद्भवति ध्रुवम्॥२८॥ वर्षाकाले तडागे तु सलिलं यस्य तिष्ठति । अग्निहोत्रसमं तस्य फलमाहुर्मनीषिणः ॥२९॥ शरत्काले तु सलिलं तडागे यस्य तिष्ठति । गोसहस्त्रप्रदानस्य फलं स लभते नरः ॥३०॥ हेमन्तकाले सलिलं तडागे यस्य तिष्ठति। स वै बहुसुवर्णस्य यज्ञस्य लभते फलम् ॥३१॥ यस्य वा शिशिरे काले तडागे सलिलं भवेत् । तस्याग्निष्टोमयज्ञस्य फलं भवति सुव्रत! ॥३२॥ वसन्तकाले सलिलं तडागे यस्य वर्तते । सोऽतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः ॥३३॥ निदाघकाले पानीयं तडागे यस्य तिष्ठति । फलं स वाजिमेधस्य यज्ञस्य लभते पुमान् ॥३४॥ स कुलं तारयेत्सर्वं येन खाते जलाशये । गावः पिबन्ति सलिलं साधवश्च नराः सदा ॥३५॥ सर्वाण्यपि च सत्त्वानि

---

પુરુષ દેવાલય અને ધર્મશાળા કરાવે છે, તે પુરુષ, પોતાના સાત પુરુષોને તારે છે. આ સાત પુરુષો એટલે- પિતા, પિતામહ, પ્રપિતામહ- એ ત્રણ તથા પુત્ર, પૌત્ર, પ્રપૌત્ર - એ ત્રણ અને પોતે; આ સાત (અથવા પોતા થકી પૂર્વ વર્તનારા કે ભાવિ સાત) પુરુષોને સંસારથી તારે છે. (૧૮) દેવાલયમાં જેટલી ઈંટો ચણેલી હોય, તેટલા હજાર વર્ષ (પ્રત્યેક ઈંટ-હજાર વર્ષ) સુધી દેવાલયનો કરનાર સ્વર્ગમાં નિવાસ કરે છે. (૧૯) જે પુરુષ લક્ષ્મીએ સહિત વાસુદેવનું સુદૃઢ, રમણીય, ઉત્તમ, મંદિર કરાવે છે, તે નિશ્ચે મોક્ષને પામે છે. (૨૦) જે પુરુષ શ્રી વાસુદેવનું નવીન મંદિર સાધારણ પ્રકારનું પણ જો બંધાવે, તો તે સર્વલોકોએ નમસ્કાર કરાયેલા વૈકુંઠને પામે છે. (૨૧) હે વિપ્ર! જે પુરુષ શ્રી વાસુદેવનું કનિષ્ઠ મંદિર કરાવે, તે પુરુષ ઈન્દ્રલોકને પામે છે એમાં સંશય નથી. (૨૨) ઘણો ધનવાન પુરુષ અતિ ઉત્તમ શ્રી વાસુદેવનું મંદિર કરાવવાથી જે ફળ પામે છે, અલ્પવિત્તવાળો પુરુષ નિયમતત્પર થઈને કનિષ્ઠ મંદિર કરાવીને, ઉત્તમ મંદિર બંધાવવાનું ફળ પામે છે. (૨૩) કોઈએ કરાવેલા મંદિરની પ્રતિષ્ઠા કરાવવાથી સાર્વભૌમ રાજા થાય. કેવલ મંદિરના નિર્માણ વડે ભૂરાદિ ત્રણ લોકનો સ્વામી થાય. બીજાએ પ્રતિષ્ઠા કરાવેલા દેવની પૂજા વગેરેના નિર્વાહ માટે વૃત્તિ બાંધી આપે, તો બ્રહ્માના લોકને પામે. પ્રતિષ્ઠા, મંદિર અને પૂજાના પ્રવાહની નિરંતર વૃત્તિ આપે, આ ત્રણ કાર્યથી શ્રી વાસુદેવના સાધર્મ્યપણાને પામે. (શ્રીમદ્ ભાગવતના દશમસ્કંધથી વિસ્તાર જાણવો.) (૨૪) જે પુરુષ દંભે રહિત, શ્રીહરિની પ્રીતિ માટે શ્રીહરિનું મંદિર કરાવે છે, તે પુરુષ એકસો પરિમિત કુળોનો ઉદ્ધાર કરી વૈકુંઠમાં નિવાસ કરે છે. (૨૫) જે પુરુષ દેવાલય, મઠ, વગેરેને ચૂના વગેરેથી લીંપાવીને જીર્ણોદ્ધાર કરાવે તે પુરુષને મહાપુણ્ય થાય. (૨૬) જે પુરુષ ભગવાનના મંદિરમાં સાવરણીથી કચરો કાઢે છે અને તેમાં લીંપાવે છે અને જે દીવો કરે છે. તે ત્રણેય વિષ્ણુલોકમાં જાય છે. (૨૭) જે પુરુષો કૂવો, વાવ, તળાવ કરાવે છે તેઓને તેથી અક્ષય પુણ્ય થાય છે જ. (૨૮) જેણે કરાવેલા સરોવરમાં વર્ષાકાળે જળ ભરાયેલું રહે છે, તે પુરુષને પ્રતિદિન અગ્નિહોત્રીને હવનનું જે ફળ થાય તે ફળ થાય છે, એમ વિદ્વાનો કહે છે. (૨૯) જેના તળાવમાં શરદ ઋતુમાં પાણી રહે છે, તે મનુષ્ય હજાર ગાયોના દાનનું ફળ પામે છે. (૩૦) જેના તળાવમાં હેમંત ઋતુમાં પાણી રહે છે, તે ઘણા સુવર્ણના દાને સહિત યજ્ઞનું ફળ પામે છે. (૩૧) હે સુવ્રત ! શિશિર ઋતુમાં પાણી રહે, તેને અગ્નિષ્ટોમ યજ્ઞનું ફલ પ્રાપ્ત થાય છે, જ. (૩૨) જેના તળાવમાં વસંત ઋતુમાં પાણી રહે તેને અતિરાત્ર યજ્ઞનું ફળ મળે છે. (૩૩) જેના તળાવમાં ગ્રીષ્મ ઋતુમાં પાણી રહે, તેને અશ્વમેધ યજ્ઞનું ફળ મળે છે. (૩૪) જે પુરુષે ખોદાવેલા જલાશયમાં ગાયો- સાધુઓ અને મનુષ્યો સદા પાણી પીવે છે, તે પુરુષ પોતાના સર્વ કુળને પાપ થકી તારે છે. (૩૫) તૃષાથી વ્યાકુળ થયેલા સર્વ પ્રાણીઓ જેના

तृषार्तानि पिबन्ति यत् । जलाशये तस्य पुण्यमप्रमेयं हि कीर्त्यते ॥३६॥ तडागमभितो रोप्याश्छायावृक्षा वटादयः । तेनात्र कीर्तिश्च भवेत् स्वर्गोऽक्षय्यः परत्र च ॥३७॥ आरामाश्चापि कर्तव्याः शुभवृक्षैः सुशोभिताः । जलाशयस्योपकण्ठे गृहस्थेन सुखार्थिना ॥३८॥ फलोपयोगिनः सर्वे तथा पुष्पोपयोगिनः। आरामेषु द्रुमा रोप्याः पितृदेवोपभोगदाः ॥३९॥ अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दश तिन्तिडीश्च । कपित्थबिल्वामलकीत्रयं यो वपेन्नवाम्रान्नरकं स नेयात् ॥४०॥ उद्दिश्य विष्णुं पुरुषोऽत्र कुर्यात् पूर्तं यदित्थं सुकृतं तु भक्त्या। अनन्ततामेति तदेव सर्वं कुर्यात्ततो भक्तिसमेतमेतत् ॥४१॥ प्रत्यहं प्रतिमासं वा प्रत्यब्दं वा विधानतः । गृहस्थैश्च ग्रहाः पूज्या राजभिस्तु विशेषतः ॥४२॥ दुःस्थितो यस्तु यस्य स्यात्पूज्यस्तस्य स यत्नतः । तुष्टो ग्रहः सुखं दत्ते रुष्टः पीडयति ध्रुवम् ॥४३॥ रविणा सप्तमस्थेन रावणो विनिपातितः । अष्टमेन शशाङ्केन हिरण्यकशिपुर्हतः ॥४४॥ अङ्गारकनिरोधेन नमुचिश्च हतो रणे । पाण्डवा द्यूतकरणे बुधेनापि नियोजिताः ॥४५॥ गुरुणा जन्मसंस्थेन हतो राजा सुयोधनः । षष्ठेनोशनसा युद्धे हिरण्याक्षो निपातितः ॥४६॥ शनैश्चरेण सौदासो नरमांसे नियोजितः । राहुणा पीडितो राजा नलो भ्रान्तो महीतले ॥४७॥ केतुना पीडितश्चाभूद्राजा सङ्ग्रामजित्तथा । एवं बहुविधा भूपा ग्रहदोषैर्हि पीडिताः ॥४८॥ ज्योतिर्विदो विदित्वैव दुष्टस्थानस्थितान् ग्रहान् । शान्तिस्तेषां प्रकर्तव्या दानं दत्त्वा यथाविधि ॥४९॥ माणिक्यं तरणेस्तु दानमुदितं मुक्ताफलं शीतगोर्माहेयस्य च विद्रुमं मरकतं सौम्यस्य गारुत्मतम् । देवेज्यस्य च पुष्परागमसुरामात्यस्य वज्रं शनेर्नीलं निर्मलमन्ययोस्तु गदिते गोमेदवैदूर्यके ॥५०॥ धेनुः शङ्खोऽरुणरुचिवृषः काञ्चनं पीतवस्त्रं श्वेतश्चाश्वः सुरभिरसिता कृष्णलोहं च लोहम् । सूर्यादीनां मुनिभिरुदिता दक्षिणास्तु ग्रहाणां स्नानैर्दानैर्हवनबलिभिस्ते ग्रहाः स्युः प्रसन्नाः ॥५१॥

જળાશયમાં જલપાન કરે છે, તેને અગણિત પુણ્ય મળે છે. (૩૬) તળાવની ચોતરફ વડ જેવા છાયાપ્રધાન વૃક્ષો રોપવાં, તેનાથી આ લોકમાં કીર્તિ થાય અને પરલોકમાં અક્ષય સ્વર્ગસુખ મળે છે. (૩૭) સુખી ગૃહસ્થે સરોવરની સમીપમાં સુશોભિત આમ્રવૃક્ષથી વટેમાર્ગુને આરામ મળે તેવા કૃત્રિમ વનો પણ કરાવવા. (૩૮) જેમના ફળો ઉપયોગમાં આવે તેવા તથા જેમના પુષ્પો ઉપયોગમાં આવે તેવા, પિતૃઓ અને દેવોના પૂજાવિધિમાં ઉપયોગી સર્વે વૃક્ષો બગીચામાં રોપવા. (૩૯) જે પુરુષ, એક પીપળો, એક લીમડો, એક વડ, દશ આમલી વૃક્ષો, એક કોઠી, એક બીલી, એક આમળી, નવ આંબા રોપે તે કદી નરકમાં જાય જ નહિ. (૪૦) આ લોકમાં ગૃહસ્થ પુરુષ વિષ્ણુને ઉદ્દેશીને આ પ્રકારે જે **પૂર્ત** નામનું પુણ્યકર્મ ભક્તિથી કરે, તે સર્વે અનન્ત (અવિનાશીપણા યુક્ત) થાય છે માટે પૂર્તકર્મ ભગવાનની ભક્તિયુક્ત કરે. (૪૧)

ગૃહસ્થોએ દરરોજ કે દર માસે કે દર વર્ષે **સૂર્યાદિ ગ્રહો**ને શાસ્ત્રોક્ત વિધિથી પૂજવા. રાજાઓએ વિશેષપણે પૂજવા. (૪૨) જે ગૃહસ્થને જે ગ્રહ દુષ્ટ ભવનમાં રહેલો હોય, તે ગ્રહ ગૃહસ્થે પ્રયત્નપૂર્વક પૂજવો. જેથી તે ગ્રહ પૂજન વગેરેથી સંતોષ પામી, સુખ આપે. ક્રોધ પામેલો દુઃખ પેદા કરે જ. (૪૩) જન્મરાશિથી સાતમાં સ્થાનમાં રહેલા સૂર્યે રાવણનો નાશ કર્યો. આઠમા સ્થાનમાં રહેલા ચન્દ્રે હિરણ્યકશિપુનો નાશ કર્યો. (૪૪) આઠમાં ભાવને પામેલા મંગળે આયુષ્યને રોકવાથી નમૂચી નામનો અસુર ઈન્દ્રે માર્યો. તનુ ભાવને પામેલા બુધને કારણે યુધિષ્ઠિરાદિ પણ દ્યુત રમવામાં જોડાયેલા દુઃખી થયા. (૪૫) જન્મ સ્થાનમાં રહેલા ગુરુ વડે દુર્યોધન રાજા હણાયો. છટ્ઠા સ્થાને શત્રુભાવને પામેલા શુક્રે હિરણ્યાક્ષનો યુદ્ધમાં નાશ કર્યો. (૪૬) આદ્ય ભાવને પામેલા શનિએ મદયન્તિના પતિ સૌદાસ નૃપતિને રાક્ષસભાવની પ્રાપ્તિપૂર્વક બ્રાહ્મણના માંસભક્ષણમાં જોડ્યો. આદ્ય ભાવને પામેલા રાહુએ પીડા પમાડેલા-નૈષધ દેશના અધિપતિ નલ રાજાને પૃથ્વીમાં ભ્રમણ કરાવ્યું. (૪૭) મૂર્તિ ભવનમાં રહેલા કેતુએ પીડેલા સંગ્રામજિત્ સંજ્ઞાવાળા નૃપતિને નલરાજાની માફક પીડા થઈ. આ પ્રમાણે ઘણા રાજાઓ ગ્રહના દોષોથી પીડા પામેલા છે. (૪૮) જ્યોતિષશાસ્ત્રને જાણનાર બ્રાહ્મણથી જ દુષ્ટ સ્થાનમાં રહેલા ગ્રહોને જાણીને યથાવિધિ દાન આપીને ગ્રહોની શાંતિ કરાવવી. (૪૯) સૂર્યને માણિક્ય દાન કહેલું છે. ચંદ્રને મોતીનું દાન, મંગલને વિદ્રુમ દાન, બુધને મરકત દાન, ગુરુને ગારૂત્મત મણિનું દાન, શુક્રને પુષ્પરાગ મણિનું દાન, શનિને નિર્મલ નીલમણિનું દાન, રાહુને ગોમેદ અને કેતુને વૈદૂર્યક મણિ દાનમાં કહેલા છે. (૫૦) દૂઝણી ગાય, શંખ, લાલ કાંતિવાળો સાંઢ, સુવર્ણ, પીત વસ્ત્ર, શ્વેત અશ્વ, કાળું લોખંડ, સામાન્ય લોહ, આ પ્રકારે યાજ્ઞવલ્કયાદિ ઋષિઓએ સૂર્યાદિ ગ્રહોને દક્ષિણા અનુક્રમથી કહી છે. **તે સૂર્યાદિ ગ્રહો સ્નાન-દાન, આહુતિદાન તથા પૂજા કરવાથી પ્રસન્ન થાય છે.** (૫૧)

देवब्राह्मणवन्दनाद्गुरुवचःसम्पादनात्प्रत्यहं साधूनामपि सेवनात्प्रतिदिनं सच्छास्त्रसंशीलनात् । होमादध्वरदर्शनाच्छुचिमनोभावाज्जपाद्दानतो नो कुर्वन्ति कदाचिदेव पुरुषस्यैते ग्रहाः पीडनम् ॥५२॥ यतीनां च वनस्थानां वर्णिनां रङ्कदेहिनाम् । साधूनां याचकानां च पोषणं गृहिणां हितम् ॥५३॥ अनेनैव पुराणेषु हेतुना हि गृहाश्रमः । इतराश्रमतः श्रेष्ठः कीर्तितो मुनिभिर्द्विज! ॥५४॥ अतिथौ स्वगृहं प्राप्ते समुत्थायादरेण तम् । नमस्कृत्यासनं दत्त्वा पूजयेच्च यथोचितम् ॥५५॥ वाक्यैः सुमधुरैः पृष्ट्वा स्वागताद्यथ भोजयेत् । तस्मिंस्तुष्टे विजानीयात्तुष्टं त्रैलोक्यमित्यसौ ॥५६॥ यद्येवं गृहिणा न स्यात्किमर्थं क्लिश्यते तदा । गृहान्धकूपे विषमे पतित्वा तेन भूतले ॥५७॥ पशुपक्षिमृगादयोऽपि जीवा बहवः सन्त्युदरम्भरा हि लोके । यदि तादृशवृत्तिमान् गृही स्याद्द्विज! तत्पङ्क्तिगतस्तदा न किं सः ॥५८॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे गृहस्थधर्मेषु पूर्तकर्मादिविधिनिरूपणनामा द्वादशोऽध्यायः ॥१२॥

श्रीनारायणमुनिरुवाच – **ब्राह्मणस्य गृहस्थस्य विशेषं कथयाम्यथ । सदा शुचिश्चरेद्विप्रः षट्कर्मनिरतः सदा ॥१॥ शान्तो दान्तस्तितिक्षुश्च नित्यं वेदार्थचिन्तकः । स्वधर्मं न त्यजेत्क्वापि दुःसङ्गं न समाचरेत् ॥२॥ शुक्लाम्बरधरो नीचकेशश्मश्रुस्तपःप्रियः । नातिसूक्ष्मपटो नित्यमनालस्योऽल्पनिद्रकः ॥३॥ स्नानसन्ध्यापरो नित्यं ब्रह्मयज्ञपरायणः । सावित्रीजाप्यनिरतः श्राद्धकृन्मुच्यते गृही ॥४॥ विभागशीलः सततं क्षमायुक्तो दयालयः । गृहस्थस्तु समाख्यातो न गृहेण**

---

દેવ-બ્રાહ્મણોને વંદનથી, ગુરુની આજ્ઞા પાલનથી દરરોજ સંત સમાગમ કરવાથી, સત્શાસ્ત્રોના નિત્ય અભ્યાસથી, હોમથી, યજ્ઞદર્શનથી, શુદ્ધ મનના અભિપ્રાયથી, જપથી, દાનથી, આ ગ્રહો (સ્થાનદોષ હોવા છતાં) પુરુષનું પીડન ક્યારેય કરતા જ નથી. (૫૨) (આ પ્રમાણે પ્રાસંગિક કહીને હવે પ્રકૃત વાતને કહે છે.) સંન્યાસીઓ, વાનપ્રસ્થો, બ્રહ્મચારીઓ, આંધળા-લંગડા, વગેરે ગરીબજનો, ત્યાગી સાધુઓ તથા ભિક્ષુકો વગેરેનું યથાશક્તિ પોષણ કરવાથી **ગૃહસ્થનું હિત** થાય છે. (૫૩) હે દ્વિજ! આ કારણથી જ યતિ વગેરે સમગ્રનું પોષણ કરવાથી પુરાણોમાં મુનિઓએ ગૃહસ્થાશ્રમ, બીજા આશ્રમોથી શ્રેષ્ઠ કહ્યો છે. (૫૪) જ્યારે પોતાને ઘેર અતિથિ આવે ત્યારે આદરથી ઊઠીને અતિથિને આસન આપીને યથાયોગ્ય પૂજા કરે. (૫૫) સુમધુર વાક્યો 'સુખેથી પધાર્યા' વગેરે પૃચ્છા કરીને, સંપત્તિ પ્રમાણે જમાડવા. તે અતિથિ પ્રસન્ન થયે આ ગૃહસ્થ ત્રિલોકી પ્રસન્ન થઈ એમ જાણે. (૫૬) જો આ પ્રમાણે અતિથિનું પૂજન વગેરે ના થાય તો તે ગૃહસ્થ પૃથ્વીમાં ગૃહ રૂપી આંધળા કૂવામાં પડીને શા માટે ક્લેશને પામે છે ? (૫૭)

હે દ્વિજ ! લોકમાં પશુ-પક્ષીઓ, મૃગો, વગેરે બીજા પણ એવા ઘણા જીવો ઉદર ભરનારા છે જ. જ્યારે ગૃહસ્થ તેવી વૃત્તિ ભજનારો થાય, તો તે ગૃહસ્થ પશુ વગેરેની પંક્તિની ગણનાને પામેલો કેમ ન થાય ? અર્થાત્ પશુપંક્તિ જ પામેલો છે. (૫૮)

*ઈતિ શ્રી સત્સંગિજીવને, નારાયણચરિત્રે, ધર્મશાસ્ત્રે પંચમ-પ્રકરણે ધર્મોપદેશે ગૃહસ્થધર્મેષુ પૂર્તકર્માદિ વિધિ નિરૂપણ નામા દ્વાદશોઽધ્યાયઃ (૧૨)*

## અધ્યાય : ૧૩

### ગૃહસ્થધર્મમાં પ્રીતિવાળા બ્રાહ્મણને વિશેષ ધર્મ વિસ્તારપૂર્વક કહ્યો છે.

**શ્રી નારાયણ મુનિ બોલ્યા** : હે બ્રહ્મન્ ! હવે ગૃહસ્થ બ્રાહ્મણના વિશેષ ધર્મ કહું છું. બ્રાહ્મણ પ્રતિદિન સ્નાનાદિ છ કર્મમાં નિષ્ઠાવાળો, સદા બાહ્ય અને આભ્યંતર શુદ્ધિવાળો થઈ આ લોકમાં વિચરણ કરે. (૧) નિયમિત અંતઃકરણવાળો, બાહ્યેન્દ્રિય દમન કરનારો, સુખદુઃખાદિ દ્વન્દ્વોને સહન કરનારો, હંમેશા વેદના અર્થોને ચિન્તવન કરનારો બ્રાહ્મણ ક્યારેય પણ પોતાના ધર્મનો ત્યાગ ન કરે. દુષ્ટ જનનો પ્રસંગ કરે નહિ. (૨) શ્વેત વસ્ત્રોને ધારણ કરનાર, મસ્તકના કેશ, દાઢી-મૂછ અતિ મોટા ન થાય તેમ કપાવી નાંખનારો, તપશ્ચરણમાં પ્રીતિવાળો, અતિ સૂક્ષ્મ વસ્ત્રોને ધારણ નહિ કરનારો, હંમેશાં આળસ વિનાનો, યથાયોગ્ય નિદ્રાવાળો, નિત્ય સ્નાનસંધ્યાપરાયણ, બ્રહ્મયજ્ઞની સિદ્ધિ માટે ભાગવતાદિની પારાયણમાં પ્રીતિવાળો, યથાયોગ્ય ગાયત્રી જપમાં આસક્તિવાળો, છન્નું શ્રાદ્ધોમાં યથાનુકૂલ યથાશક્તિ શ્રાદ્ધકર્તા ગૃહસ્થ બ્રાહ્મણ, દેવાદિ-ઋણથી મુક્ત થાય છે. (૩-૪) હંમેશા અતિથિને અન્ન આપનાર, પર અપરાધને સહન કરનાર, દયાના



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

गृही भवेत् ॥५॥ अहुतं च हुतं चैव प्रहुतं प्राशितं तथा । ब्राह्मं हुतं पञ्चमं च नित्यं यज्ञानिमांश्चरेत् ॥६॥ जपोऽहुतो हुतो होम प्रहुतो भौतिको बलिः । प्राशितं पितृसन्तृप्तिर्हुतं ब्राह्मं द्विजार्चनम् ॥७॥ पञ्चयज्ञानिमान्कुर्वन्ब्राह्मणो नावसीदति । एतेषामननुष्ठानात्पञ्चसूना अवाप्नुयात् ॥८॥ आत्मार्थं भोजनं यस्य रत्यर्थं यस्य मैथुनम् । वृत्त्यर्थं यस्य चाधीतं निष्फलं तस्य जीवितम् ॥९॥ न शब्दशास्त्राभिरतस्य मोक्षो न चैव रम्यावसथप्रियस्य । न भोजनाच्छादनतत्परस्य न लोकचित्तग्रहणे रतस्य ॥१०॥ एकान्तशीलस्य सदैव तस्य सर्वेन्द्रियप्रीतिनिवर्तकस्य । स्वाध्याययोगे गतमानसस्य मोक्षो ध्रुवं नित्यमहिंसकस्य ॥११॥ तस्मान्नित्यं व्रतस्थः स्यादग्निसेवापरायणः । तत्परश्च तपस्यायां ब्राह्मणो विजितेन्द्रियः ॥१२॥ न धर्मस्यापदेशेन पापं कृत्वा व्रतं चरेत् । प्रेत्येह चेदृशो विप्रो गर्ह्यते ब्रह्मवादिभिः ॥१३॥ पाषण्डिनो विकर्मस्थान्वामाचारान्सुरद्रुहः । वेदनिन्दारतान्मर्त्यान्दूरतः परिवर्जयेत् ॥१४॥ अनृतात्पारदार्याच्च तथाऽभक्ष्यस्य भक्षणात् । श्रौतधर्मपरित्यागात्कुलं विप्रस्य नश्यति ॥१५॥ कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च । कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥१६॥ परनिन्दां न कुर्वीत नात्मश्लाघापरो भवेत् । अपापं पापिनं नैव प्राणान्तेऽपि प्रकीर्तयेत् ॥१७॥ स्नात्वा पुण्ड्रं मृदा कुर्याद्धुत्वा वह्निं तु भस्मना । देवानभ्यर्च्य गन्धेन जलेनैव जले स्थितः ॥१८॥ स्नानं सन्ध्या तर्पणादि जपहोमसुरार्चनम् । भोजनात्प्राक् प्रकर्तव्यं सायंसन्ध्याहुतीर्विना ॥१९॥ ब्राह्मणस्य हि देहोऽयं क्षुद्रकामाय नेष्यते । कृच्छ्राय तपसे चेह प्रेत्यानन्तसुखाय च ॥२०॥ ज्याकर्षणं शत्रुनिबर्हणं च कृषिर्वणिज्या पशुपालनं च । शुश्रूषणं चापि

---

નિવાસસ્થાનરૂપ બ્રાહ્મણ; આવા ગુણોથી યુક્ત ગૃહસ્થ કહેલો છે. કેવળ સ્ત્રીને ઘરમાં રાખવાથી ગૃહી ન થાય. (૫) અહુત (જપયજ્ઞ), હુત શબ્દથી દેવયજ્ઞ, પ્રહુત શબ્દથી ભૂત સંબંધી બલિ-ભૂતયજ્ઞ, પ્રાશિતમ્-પિતૃયજ્ઞ, બ્રાહ્મણનું પૂજન, બ્રાહ્મણનો આતિથ્યસત્કાર (મનુષ્ય યજ્ઞ) (૬-૭) આ પાંચ મહાયજ્ઞોને કરતો બ્રાહ્મણ પંચસૂનાજન્ય-દોષથી ખેદને પામતો નથી. આ પાંચ યજ્ઞોનું આચરણ ન કરવાથી કંડની-પેષણી આદિ પંચસૂના કહેતાં (તેનાથી થતી) પાંચ હિંસાને પામે. (૮) જે બ્રાહ્મણને ભોજન પકાવવાનું કેવળ પોતાને માટે હોય. જેને સ્ત્રીસંભોગ માત્ર કામોપભોગને માટે હોય, જેનું વેદાદિ અધ્યયન કેવળ વૃત્તિ માટે હોય તે બ્રાહ્મણનું જીવિત નિષ્ફળ છે. (૯) કેવળ વ્યાકરણાદિ શબ્દશાસ્ત્રના પઠનમાં આસક્તને મોક્ષ ન થાય. તથા જે રમણીય નિવાસ ભુવનમાં પ્રીતિવાળો હોય, પ્રતિદિન નાના પ્રકારના રસયુક્ત ભોજન અને કોમળ-સૂક્ષ્માદિ વસ્ત્ર પરિધાનમાં તત્પર તથા લોકોનાં ચિત્ત આકર્ષણ કરવામાં આસક્તને મોક્ષ ન થાય. (૧૦) દુર્જનના સંબંધથી રહિત સ્થાનમાં નિવાસ કરનાર, સર્વે ઇન્દ્રિયની શાસ્ત્રનિષિદ્ધ વિષયસંબંધી પ્રીતિમાંથી નિવૃત્તિ પામેલો, સ્વાધ્યાયમાં મનવાળો, નિત્ય હિંસાએ રહિત એવા પુરુષનો મોક્ષ નિશ્ચે થાય છે. (૧૧) માટે બ્રાહ્મણ હંમેશા એકાદશી આદિ ભગવાનને પ્રિય વ્રતોનું આચરણ કરે. અગ્નિ સેવાપરાયણ-અગ્નિહોત્રી થાય. કૃચ્છ્ર ચાંદ્રાયણાદિ તપશ્ચર્યામાં તત્પર થાય. જિતેન્દ્રિય થાય. (૧૨) પરસ્ત્રી સંગ, ચૌર્ય આદિ પાપ, બુદ્ધિપૂર્વક અથવા ગુપ્ત રીતે કરીને ધર્મના મિષથી ધર્મીપણાની પ્રસિદ્ધિ માટે કૃચ્છ્ર ચાંદ્રાયણાદિનું અનુષ્ઠાન ન કરે. કારણ કે બ્રહ્મવાદી મુનિઓએ કહ્યું છે : આવો બ્રાહ્મણ મરીને પરલોકમાં અને આ લોકમાં નિન્દાય છે. (૧૩) વેદ વિરુદ્ધ આચારવાળા, દેવમાં શ્રેષ્ઠ શિવ-બ્રહ્માદિનો દ્રોહ કરનારા, વેદનિન્દાપરાયણ, કુકર્મમાં નિષ્ઠાવાળા તથા વામ આચારવાળા મનુષ્યોનો દૂરથી ત્યાગ કરે. (૧૪) અસત્ય ભાષણ, પરાંગનાનો સંગ, અભક્ષ્ય-મદ્ય, માંસ, લસૂન અને ડુંગળી વગેરેનું ભક્ષણ કરવાથી, તથા શ્રુતિએ કહેલા અગ્નિહોત્રાદિ ધર્માચરણના ત્યાગથી બ્રાહ્મણના કુળનો નાશ થાય છે. (૧૫) દુષ્કુળની કન્યા સાથે વિવાહ, સ્વવર્ણાશ્રમધર્મનો ત્યાગ, વેદોના અધ્યયનનો ત્યાગ તથા બ્રાહ્મણોના અતિક્રમણથી, સત્કુળો પણ હીનપણાને પામે છે. (૧૬) પારકી નિન્દા ન કરવી, આત્મશ્લાઘાપરાયણ ન થાય, પોતાના પ્રાણના અવસાન સમયે પણ પાપ રહિત પુરુષને પ્રાણાન્તે પણ પાપી ન જ કહે. (૧૭) તીર્થાદિમાં સ્નાન કરીને મૃત્તિકાથી તિલક કરે. અગ્નિમાં હોમ કરીને ભસ્મથી પુંડ્ર તિલક કરે. દેવોને પૂજીને ચંદનથી તિલક કરે, જળમાં નાહીને જળથી જ પુંડ્ર કરે. (૧૮) સ્નાન, સંધ્યા, તર્પણ, સ્વાધ્યાય, અતિથિપૂજન, જપ, હોમ અને દેવોનું પૂજન - આ સર્વ ભોજન પહેલાં કરવું. સાયં-સંધ્યા અને આહુતિ તો મધ્યાહ્ન ભોજન બાદ પણ યથાસમય કરવી. (૧૯) આ બ્રાહ્મણનું શરીર તુચ્છ માયિક વિષયસુખનાં ઉપભોગને માટે જ નથી, પરંતુ આ લોકમાં કૃચ્છ્ર-ચાંદ્રાયણાદિ અનેકવિધ તપશ્ચર્યાને માટે અને પરલોકમાં અનન્ત સુખ-મોક્ષ માટે જ ઇચ્છનીય છે. (૨૦) ધનુષ્યાદિ આયુધો ધારવા, તેનાથી શત્રુ હણવો એ આદિક

तथाऽर्थहेतोरकार्यमेतत्परमं द्विजस्य ॥२१॥ न राज्ञः प्रतिगृह्णीयाद्वर्तमानादसत्पथे । स्वधर्मनिष्ठात्तस्मात्तु प्रतिगृह्णन्न दोषभाक्॥२२॥ भोज्यशुद्धौ सत्त्वशुद्धिः स्याद्ध्रुवानुस्मृतिस्ततः । ततश्च सर्वग्रन्थीनां विप्रमोक्षो हि जायते ॥२३॥ नाद्याच्छूद्रस्य विप्रोऽन्नं नटनर्तकयोरतः । गणान्नं गणिकान्नं च हीनजातेश्च सर्वतः ॥२४॥ अतिथीनां च सर्वेषां प्रेष्याणां स्वजनस्य च । सामान्यं भोजनं नित्यं गृहस्थस्य प्रशस्यते ॥२५॥ आर्धिकः कुलमित्रं च स्वगोपालश्च नापितः । एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥२६॥ भूमौ बलीनुपाहृत्य कृत्वा चापोशनं ततः । प्राणाग्निहोत्रपूर्वं तु वाग्यतो भोजनं चरेत् ॥२७॥ स्नास्यतो वरुणः शक्तिं जुह्वतोऽग्निर्हरेच्छ्रियम् । भुञ्जानस्यान्तकश्चायुस्तस्मान्मौनं त्रिषु स्मृतम्॥२८॥ अन्नं मध्ये प्रतिष्ठाप्यं दक्षिणे घृतपायसम् । शाकादि पुरतः स्थाप्यं भक्ष्यं भोज्यं च वामतः ॥२९॥ एकपङ्क्त्युपविष्टेषु यद्येकोऽप्यघवान्भवेत् । सर्वेषां तदघं तुल्यं पङ्क्तिभेदो न चेत्कृतः ॥३०॥ अग्निना भस्मना चैव स्तम्भेन सलिलेन च । द्वारेण चापि मार्गेण षड्भिः पङ्क्तिर्विभिद्यते ॥३१॥ पितृदेवमनुष्येभ्यो दत्त्वाऽश्नात्यमृतं गृही । स्वार्थं पचन्नघं भुङ्क्ते केवलं स्वोदरम्भरः ॥३२॥ इतस्ततश्च यज्ञार्थं नैव याचेत वाडवः । याचितं चेत्सर्वमेव देयं तद्यज्ञकर्मणि ॥३३॥ प्रतिग्रहे

---

ક્ષત્રિયધર્મ તથા કૃષિ કર્મ, વાણિજ્ય, પશુપાલન એ જે વૈશ્યનો ધર્મ છે. તથા દ્રવ્યોપાર્જન માટે પોતાનાથી નીચ જાતિની શુશ્રુષા; આ સર્વ બ્રાહ્મણ માટે કરવા યોગ્ય નથી જ. (૨૧) અધર્મમાર્ગમાં વર્તતા રાજા થકી દાનાદિ પ્રતિગ્રહ ન કરવો. સ્વધર્મનિષ્ઠ રાજાથી તે દાનાદિ ગ્રહણ કરવાથી દોષયુક્ત નથી થતો. (૨૨) આહાર શુધ્ધિથી અંતઃકરણની શુદ્ધિ થાય છે, અંતઃકરણ શુધ્ધ થવાથી પોતે જોયેલા સાંભળેલા પરમાત્માનું સતત અનુસ્મરણ થાય; આ પ્રકારની અખંડસ્મૃતિથી અહંમમત્વાદિ સર્વ ગ્રંથિઓથી વિમુક્ત થાય છે. (૨૩)

તે માટે વિપ્રે શૂદ્ર, નટ-નર્તક વગેરેનું અન્ન તથા ગણાન્ન=કૂટ નક્ષત્રને સૂચવનારાનું અન્ન અથવા ગંધર્વનું અન્ન, તથા ગણિકાન્ન=વેશ્યાનું અન્ન, તથા સર્વ હીનજાતિનું અન્ન જમવું નહિ. (આનો વિશેષ મનુસ્મૃતિથી જાણવો) (૨૪) ગૃહસ્થને નિત્યપ્રાપ્ત ભોજન-સર્વ અતિથિઓ, પોતાનો સેવક અને પુત્રાદિ સ્વજનોની સાથે સમાનપણે પ્રશસ્ત માનેલું છે. માટે પાકભેદથી પંક્તિભેદ કરવો નહિ (૨૫) શૂદ્રનું અન્ન અગ્રાહ્ય કહ્યું તેમાં અપવાદ કહે છે : આર્ધિક, (ખેતરમાં અર્ધો ભાગિયો, પોતાની ખેતી કરનાર), કુળ પરંપરાગત મિત્ર, પોતાનો ગોવાળીયો, નાપિત = વાળંદ આ ચારનું તથા જે શૂદ્ર પોતાના આત્માને દાસભાવથી નિવેદન કરે તેનું પણ અપક્વ અન્ન વિપ્રે ગ્રહણ કરવું. (૨૬) પૃથ્વી ઉપર **'ભૂતપતયે નમઃ'** ઈત્યાદિ મંત્રથી ત્રણ ભૂતબલિ મુકીને, **'અમૃતોપસ્તરણમસિ'** આ મંત્રથી અપોશન વિધિ કરીને **'પ્રાણાય સ્વાહા'** ઈત્યાદિ મંત્રથી પ્રાણાગ્નિહોત્ર કરી વાણીના મૌનપૂર્વક વિપ્રે ભોજન કરવું.(૨૭) મૌન રહિત સ્નાન કરતા વિપ્રની શક્તિ વરુણદેવ હરે છે, મૌન રહિતપણે હોમ કરતા વિપ્રની શ્રી = ધનશોભાદિ સંપત્તિ અગ્નિ હરે છે, મૌન રાખ્યા વિના અન્નભોજન કરનાર વિપ્રની આયુષ્યને મૃત્યુ હરે છે. સ્નાનાદિમાં મૌન કહેલું છે. ભગવાનનું નામોચ્ચારણ તો સ્નાનાદિના સાદ્‌ગુણ્યાર્થે કરવું જ. (૨૮) ભોજનપાત્રમાં મધ્યે ભાત મૂકવો. તેના દક્ષિણ ભાગમાં ઘીથી મિશ્ર પાયસાન્ન-દૂધપાક વગેરે રાખવું. તેના આગળનાં ભાગમાં શાકાદિક રાખવું. ભક્ષ્ય= લાડુ વગેરે તથા ભોજ્ય = બીરંજ વગેરે ડાબા ભાગમાં મુકવું. (૨૯) એક પંક્તિમાં ભોજન કરવા સાથે બેઠેલામાં જો એક પણ પાપી બેઠો હોય અને પંક્તિભેદ (જુદી પંક્તિ) જો ન કરે, તો બીજા પંક્તિમાં બેઠેલા સર્વે વિપ્રો તે પાપીના સમાન, પાપથી લેપાય છે. માટે તેનાથી પંક્તિભેદ જરૂર કરવો. (૩૦) **જેનાથી જુદી પંક્તિનો પ્રકાર કહે છે** : સગડી આદિકમાં મુકેલા અગ્નિથી, ભસ્મથી, સ્તંભથી પાણીની રેખા કરવાથી, દ્વારથી, માર્ગથી આ છ પ્રકારે કરીને પંક્તિભેદ થાય. (૩૧) ગૃહસ્થ વિપ્રે પિતૃ-દેવ, અને મનુષ્યોને યથાયોગ્ય અર્પણ કરીને અમૃત તુલ્ય અન્ન જમવું. જે ગૃહી કેવળ પોતાનાં ઉદરભરણ માટે જ રાંધીને જમે છે તે પાપને જ ખાય છે. (૩૨) ગૃહસ્થ વિપ્રને યજ્ઞ, દાન આદિક કર્મો કરવાના કહ્યા છે, તેમાં જો ધનાઢ્ય હોય તો દ્રવ્યસાધ્ય યજ્ઞ કરે. પરંતુ જ્યાંત્યાંથી ધન લાવીને યજ્ઞ ન કરે. જો યજ્ઞનિમિત્તે યાચનાથી ધન પ્રાપ્ત કરેલું હોય તો તે સંપૂર્ણ દ્રવ્ય યજ્ઞકાર્યમાં જ વાપરી નાખે. તેમાંથી પોતાને માટે લેશ પણ રાખે નહિ. (૩૩) બ્રાહ્મણ, વૃત્તિ માટે કે ધર્માર્થે પણ આ પાંચથી પ્રતિગ્રહ ન જ કરે : સૂની = પ્રાણીઓની હિંસા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

सूनिचक्रिध्वजिवेश्यानराधिपाः । दुष्टा दशगुणं पूर्वात्पूर्वादेते यथाक्रमम् ॥३४॥ अजिनं मृतशय्यां च मेषीं चोभयतोमुखीम्। कुरुक्षेत्रे च गृह्णानो न भूयः पुरुषो भवेत् ॥३५॥ लोहं तिलाश्च महिषी तैलं लवणमेव च । तिलधेनुर्मणिश्चेति घोराः सप्त प्रतिग्रहाः ॥३६॥ प्रवाहमवधिं कृत्वा नद्या हस्तचतुष्टयम् । न तत्र प्रतिगृह्णीयात्प्राणैः कण्ठगतैरपि ॥३७॥ कृष्णाजिनप्रतिग्राही हयानां क्रयविक्रयी । नवश्राद्धस्य भोक्ता च न भूयः पुरुषो भवेत् ॥३८॥ अहर्निशं श्रुतेर्जाप्याच्छौचाचारनिषेवणात् । अद्रोहवृत्त्या बुद्ध्या च पूर्वजन्म स्मरेद्द्विजः ॥३९॥ यथा दारुमयो हस्ती यथा कृत्तिमयो मृगः । तथा विप्रोऽनधीयानस्त्रयोऽमी नामधारिणः ॥४०॥ न विद्या न तपो यस्य समादत्ते प्रतिग्रहम् । अधोगतिमवाप्नोति दात्रा सह स तु द्विजः ॥४१॥ अपूपं च हिरण्यं च गामश्वं पृथिवीं तिलान् । अविद्वान्प्रतिगृह्णानो भस्मीभवति काष्ठवत् ॥४२॥ शक्तः प्रतिग्रहीतुं यो वेदवृत्तो जितेन्द्रियः। दीयमानं न गृह्णाति स्वर्गस्तस्य न दुर्लभः ॥४३॥ शूद्रान्नं ब्राह्मणो ह्यश्नन्मासं मासार्धमेव वा । तद्योनावभिजायेत सत्यमेतद्विदुर्बुधाः ॥४४॥ कणानामथवा भिक्षां ब्राह्मणो वृत्तिकर्शितः । सच्छूद्राणां गृहे कुर्यान्न स पापेन लिप्यते ॥४५॥ विशुद्धान्वयसञ्जातो निवृत्तो मद्यमांसतः । द्विजभक्तो वणिग्वृत्तिः सच्छूद्रः स प्रकीर्त्यते ॥४६॥ रजनीमध्ययामौ द्वौ हुतशेषं च यद्धविः । तत्र स्वपंस्तदश्नंश्च ब्राह्मणो नावसीदति ॥४७॥ अपेयं न पिबेत्क्वापि नाभक्ष्यमपि भक्षयेत् । न गन्धमपि गृह्णीयाद्ब्राह्मणो मद्यमांसयोः ॥४८॥ भवेदज्ञानतः क्वापि गन्धस्याग्रहणं यदि । तर्हि स्नात्वा स्मरेद्विष्णुं सायंसन्ध्यां

---

કરનારો, ચક્રી = ઘાણીથી તેલ કાઢનાર, ધ્વજી = સુરાને વેચનારો, વેશ્યા અને અધાર્મિક રાજા આ પાંચેજણા અનુક્રમે એક એકથી દશ દશ ગણા અધિક દુષ્ટ છે. (૩૪)

મૃગચર્મ, મૃત્યુ પામેલાને ઉદ્દેશીને આપેલી શય્યા, બકરી, ઉભયતોમુખી ગાય, (જ્યાં સુધી વત્સનાં બે પગ અને મુખ યોનિમાં દેખાય એવી ગાય) આટલા પદાર્થોને કુરુક્ષેત્રમાં પ્રતિગ્રહ કરનાર વિપ્ર ફરીને મનુષ્ય જન્મને પામતો નથી. (૩૫) લોહ, તિલ, ( કાળા-ધોળા; કેટલાક તો કાળા જ કહે છે) મહિષી = ભેંસ, તેલ, લવણ તથા તિલધેનું અને મણિ આ સાતનો પરિગ્રહ પ્રબળ પાપ ઉત્પન્ન કરનાર છે. (૩૬) નદીના પ્રવાહને અવધિ કરીને ચાર હાથ જેટલા પ્રદેશની અંદર તો પ્રાણો કંઠે આવેલા હોય તો પણ પ્રતિગ્રહ ન જ કરે. (૩૭) જે વિપ્ર કૃષ્ણમૃગનાં ચર્મનો પ્રતિગ્રહ કરે છે, જે અશ્વોનો ક્રય-વિક્રય કરે છે, તથા જે પ્રેતશ્રાધ્ધનું અન્ન જમે છે તે ફરીને મનુષ્ય ન જ થાય. (પશુ પક્ષ્યાદિકની યોનિને જ પામે છે.) (૩૮)

અહોરાત્ર શ્રુતિનો પાઠ કરીને, પવિત્ર આચારનું સેવન કરીને, અદ્રોહ વૃત્તિ રાખીને શાસ્ત્રનિષ્ઠ બુદ્ધિથી બ્રાહ્મણ પૂર્વજન્મનું સ્મરણ કરે. (૩૯) અંગે સહિત વેદના અધ્યયન રહિત બ્રાહ્મણ સુથારે ઘડેલા લાકડાના હાથી જેવો તથા ચર્મ-મય મૃગ જેવો છે. કારણ કે આ વિપ્રસહિત ત્રણેય કેવળ નામધારી છે. (૪૦) જે બ્રાહ્મણને વિદ્યાના અધ્યયન રૂપી ગુણ ન હોય, સ્વધર્મ આચરણ રૂપ તપશ્ચર્યા નામનો ગુણ ન હોય; તે જો દાન ગ્રહણ કરે તો દાતાએ સહિત અધોગતિને પામે. (૪૧) માલપૂવા, સુવર્ણ, ગાય, ઘોડો, પૃથ્વી, તલ વગેરે ગ્રહણ કરનાર અવિદ્વાન બ્રાહ્મણ ગ્રહણ કરે તો અગ્નિમાં કાષ્ઠની માફક ભસ્મીભૂત થાય છે. (૪૨) વેદાધ્યયન અને સદાચાર યુક્ત, જિતેન્દ્રિય, દાન લેવા શક્તિમાન હોવા છતાં જે બ્રાહ્મણ સુવર્ણાદિ આપવા તૈયાર હોય; તેવા દાતા પાસેથી દાન ગ્રહણ કરતો નથી, તે બ્રાહ્મણને સ્વર્ગ દુર્લભ નથી પરંતુ સુલભ છે. (૪૩) એક માસ કે પંદર દિવસ સુધી શૂદ્રનું અન્ન જમનારો બ્રાહ્મણ મરીને શૂદ્ર યોનિમાં ઉત્પન્ન થાય છે. પંડિતો આ સત્ય માને છે. (૪૪) વૃત્તિથી વ્યવહારે દુર્બલ બ્રાહ્મણ સત્શૂદ્રોનાં ગૃહોમાં કાચા અન્નની ભિક્ષા કરે તે બ્રાહ્મણ પાપથી લેપાતો નથી. (૪૫) શુદ્ધ વંશે ઉત્પન્ન થયેલો, મદ્યપાન અને માંસ ભક્ષણથી નિવૃત્તિ પામેલો, બ્રાહ્મણાદિ ત્રણ વર્ણની સેવા કરનારો, વૈશ્યવૃત્તિથી જીવનારો તે સત્શૂદ્ર કહેવાય. (૪૬) જે વિપ્ર પ્રતિદિન, હોમમાંથી બાકી રહેલું હવિષ્યાન્ન જ જમે છે, રાત્રિના મધ્ય બે પ્રહરમાં જ નિદ્રા કરે છે. પ્રથમ અને અંતિમ પ્રહરમાં નિદ્રા કરતો નથી, તે કદાપિ ખેદ પામતો નથી. (૪૭) અપેય-(ગધેડીનું દૂધ વગેરે) બ્રાહ્મણ ક્યારેય પીએ નહિ, અભક્ષ્ય-(લસણ-ડુંગળી વગેરે) ક્યારેય ભક્ષણ કરે નહિ. મદ્ય-માંસની ગંધ પણ ક્યારેય લેવી નહિ. (૪૮) જો ક્યારેય અજ્ઞાનથી મદ્યમાંસની ગંધ સુંઘવાનું થાય તો સ્નાન કરીને વિષ્ણુનું સ્મરણ કરે. સાયંસંધ્યા ગામની બહાર તળાવમાં કરે. (૪૯) પત્નીના, પોતાના અને

बहिश्चरेत् ॥४९॥ जायाया आत्मनश्चापि पुत्रस्य दुहितुस्तथा । यथोचितं यथाकालं संस्कारान्विधिनाचरेत् ॥५०॥ कन्याया विक्रयो नैव कर्तव्यः क्वापि केनचित् । ब्राह्मणेन विशेषेण यत्कर्ता याति रौरवम् ॥५१॥ भक्षितं चाणुमात्रं यत्कन्याविक्रयजं धनम् । सकुलं तद्ग्रहीतारं नरकं नयति ध्रुवम् ॥५२॥ यद्वा वरं वदेत्कन्यामलङ्कृत्योद्वहेति च । निर्वाहार्थं स्वकन्याया वैषम्याद्देशकालयोः ॥५३॥ वरदत्ता ह्यलङ्कारा यथाशक्ति स्वकारितैः। अलङ्कारैर्युता देयाः कन्यायै तेऽखिला अपि ॥५४॥ एवं कृते न दोषोऽस्ति भीष्म इत्याह धर्मजम् । स्वार्थं नाण्वपि तद्ग्राह्यं धर्म एष सनातनः ॥५५॥ अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी । दशवर्षा भवेत्कन्या तत ऊर्ध्वं रजस्वला ॥५६॥ पितृगेहे तु या कन्या रजः पश्येदसंस्कृता । भ्रूणहा तत्पिता ज्ञेयो वृषली सापि कन्यका ॥५७॥ कुलं शीलं सनाथत्वं विद्या वित्तं वपुर्वयः । एतान्गुणान्वरे दृष्ट्वा काले दद्यात्सुतां ततः ॥५८॥ समीपस्थोऽतिदूरस्थो धनोद्धतश्च निर्धनः । वृत्तिहीनश्च मूर्खश्च वर्जनीयास्तु षड्वराः ॥५९॥ रविक्षेत्रगते जीवे जीवक्षेत्रगते रवौ । विवाहं न प्रशंसन्ति कन्या वैधव्यमेति यत् ॥६०॥ गोदाभागीरथीमध्ये नोद्वाहः सिंहगे गुरौ । मघास्थे सर्वदेशेषु तथा मीनगते रवौ ॥६१॥ भागीरथ्युत्तरे कूले गौतम्या दक्षिणे तथा । विवाहो व्रतबन्धश्च सिंहस्थेज्ये न दुष्यति ॥६२॥ आरभ्य सप्तमं वर्षं विवाहः सार्ववर्णिकः । दशदोषविहीने हि काले पुत्र्याः शुभो मतः ॥६३॥ विवाहचौलव्रतबन्धयज्ञे पट्टाभिषेके च तथैव राज्ञाम् । सीमन्तयात्रासु तथैव जाते नो चिन्तनीयः खलु घातचन्द्रः ॥६४॥

---

પુત્ર-પુત્રીના સંસ્કારો યથાવિધિ, યથાયોગ્ય કરે. તેમાં પત્નીના ગર્ભાધાન આદિ સંસ્કારો, પોતાના વિષ્ણુદીક્ષા ગ્રહણાદિ સંસ્કારો, પુત્રના સંસ્કારો જાતકર્માદિ, પુત્રીના સંસ્કારો કન્યાદાન-વિવાહાદિ જાણવા. (૫૦) કોઈ પણ ગૃહસ્થે ક્યારેય કન્યાવિક્રય ન કરવો, દ્રવ્ય લઈને કન્યાનો વિવાહ ના કરે. બ્રાહ્મણે તો વિશેષ આ નિયમ ધારવો. કન્યાવિક્રય કરનાર પિતા રૌરવ નર્કને પામે છે. (૫૧) કન્યાવિક્રયથી પ્રાપ્ત થયેલું ધન અને તેમાંથી મેળવેલા ભોજ્ય પદાર્થો ખાવાથી કુળ સહિત ગૃહસ્થ નર્ક પામે છે. (૫૨) અથવા દેશકાલના વૈષમ્યપણાથી પોતાની કન્યાના વિવાહ માટે 'યોગ્ય અલંકારો અર્પણ કરીને શોભાયમાન કરીને પરણો' એમ વરરાજાને કન્યાનો પિતા કહે. (૫૩) વર તરફથી મળેલા સમગ્ર અલંકારો, શક્તિ પ્રમાણે પોતે કરાવેલા અલંકારો સહિત કન્યાને અર્પવા. (૫૪) આ પ્રમાણે કરવાથી દોષ નથી. આ પ્રમાણે ભીષ્મે ભારતમાં યુધિષ્ઠિરને કહ્યું છે. પોતાના સ્વાર્થ માટે વરે આપેલાં અલંકારાદિ ધન લગારેય પણ ગ્રહણ ન કરવું; આ સનાતન ધર્મ છે. (૫૫) આઠ વર્ષની પુત્રી **'ગૌરી'** સંજ્ઞાવાળી થાય. નવ વર્ષની **'રોહિણી'** કહેવાય. દશ વર્ષની **'કન્યા'** સંજ્ઞા પ્રાપ્ત કરે. દશ વર્ષથી ઉપર **'રજસ્વલા'** સંજ્ઞાવાળી કહેવાય. ગૌર્યાદિ ત્રણના દાનમાં પુણ્ય છે અને રજસ્વલાના દાનમાં મહાપાતક છે. (૫૬) જે કન્યા વિવાહ વિનાની પિતૃગૃહે જ રજઃપુષ્પ જુએ તે કન્યાનો પિતા ગર્ભઘાતક જાણવો. કન્યા પણ **'વૃષલી'** સંજ્ઞાવાળી જાણવી. (૫૭) માટે કુળ, શીલ, સસ્વામિત્વ, વિદ્યાધ્યયન, ધન, શરીર, યૌવન આદિ સાત ગુણો વરમાં જોઈને ઉપર કહેલા સમયે કન્યાનો વિવાહ કરે. (૫૮) સમીપે રહેનાર, અતિ દૂર રહેનાર, ધનથી ઉદ્ધત, નિર્ધન, વૃત્તિ રહિત, મૂર્ખ આ છ પ્રકારના મુરતિયા ત્યાગવા. તેમને કન્યાદાન કરવું નહિ. (૫૯) ગુરુ, સૂર્યક્ષેત્ર અને સિંહરાશિમાં વર્તતા હોય તથા સૂર્ય, ગુરુભવન, ધન રાશિ, મીન રાશિમાં હોય ત્યારે પ્રાપ્ત થયેલ **વિવાહનું મુહૂર્ત** પ્રશંસાપાત્ર નથી. કારણ કે કન્યા વિધવા થાય. (૬૦) ગુરુ સિંહ રાશિમાં (દ્વિતીય, તૃતીય, ચર્તુર્થાંશમાં) હોય, ત્યારે ગોદાવરી, ભાગીરથી બેના મધ્યપ્રદેશમાં વિવાહ ન થાય. ગુરુ સિંહરાશિના પ્રથમ (મઘાનક્ષત્રરૂપ) અંશમાં વર્તતો હોય ત્યારે સર્વ દેશમાં વિવાહ ન થાય. તથા સૂર્ય મીનરાશિને પામે ત્યારે પણ સર્વ દેશમાં વિવાહ ન જ થાય. (૬૧) ગુરુ સિંહસ્થ હોય ત્યારે ગંગાના ઉત્તર તીરે, તથા ગોદાવરીના દક્ષિણ તીરે વિવાહ અને મૌંજિબંધન કાર્ય કરવામાં દોષ નથી. (આ પારાશર મત છે.) (૬૨) સાતમા વર્ષથી આરંભીને સર્વ વર્ણને યોગ્ય પુત્રીનો વિવાહ, વેધાદિ દશ દોષ રહિત કાલમાં શુભ માનેલો છે. વેધ, લત્તા, પાત, ખાર્જૂર વેધ, દશયોગ ચક્ર, યુતિ, જામિત્ર, ઉપગ્રહ, બાણ, વજ્ર-આ દશ દોષો છે. એમનાં લક્ષણ જ્યોતિષશાસ્ત્રથી જાણવાં. (૬૩) વિવાહ, ચૌલ, યજ્ઞોપવીત, યજ્ઞદીક્ષા, રાજાઓનો પટ્ટાભિષેક, સીમન્ત કર્મ તથા યાત્રા અને જાતકર્મમાં ઘાત ચંદ્ર, ચિંતવન ન કરવો. (૬૪)

**विशेषधर्माः कथिता मयेत्थं तुभ्यं गृहस्थाश्रमिवाडवस्य । तज्जीविकावृत्तिमथो वदामि समासतस्तां शृणु विप्रवर्य! ॥६५॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे ब्राह्मणस्य विशेषविधिनिरूपणनामा त्रयोदशोऽध्यायः ॥१३॥

श्रीनारायणमुनिरुवाच - **जीविकावृत्तयः पूर्वं कथिता या मयाऽनघ । ताभिरेव समुत्पाद्य द्रव्यं कुर्वीत सद्व्ययम् ॥१॥ समाश्रित्य द्विजो नित्यं स स्ववर्णानुसारिणीम् । वृत्तिं सम्पादयेद्द्रव्यं नीचसेवां तु नाचरेत् ॥२॥ गृहस्थस्य शिलोञ्छं च शालीनं सञ्चयस्तथा । वार्ता चेति चतस्रोऽत्र जीविकावृत्तयो मताः ॥३॥ उत्तरामुत्तरां हीनां तासु विद्याद्द्विजोत्तमः । देशकालौ स्वसामर्थ्यं दृष्ट्वैकां वृत्तिमाश्रयेत् ॥४॥ क्षेत्रपत्यक्तकणिशकणादानं शिलोञ्छनम् । अयाचितं तु शालीनं सञ्चयो याजनादिकम् ॥५॥ वार्ता कृष्यादिका वृत्तिः प्रोक्ताः सामान्यतस्त्विमाः । तथा विद्याप्रकर्षोऽपि द्रव्यं प्रापयति भृशम् ॥६॥ हव्यकव्यप्रदानैश्च नियमाभ्यासतस्तथा । प्रसन्ना देवता द्रव्यं ददत्येव भृशं क्वचित् ॥७॥ मणिस्वर्णाद्याकरेभ्यः क्वचिच्च प्राप्यते धनम् । ब्रह्मर्षीणां प्रसादेन क्वचिदाकस्मिकं तथा ॥८॥ एतत्सर्वं गृहस्थस्य द्रव्यं न्यायागतं मतम् । धर्मकार्येष्वेतदेव विहितं द्रव्यमुत्तमम् ॥९॥ क्षत्रियस्य नरेन्द्रस्य राजनीत्यागतं धनम् । धर्मोपयुक्तं कथितं नान्यदित्यपि विद्धि भोः! ॥१०॥ कुटुम्बपोषणाशक्तः स्ववृत्त्योत्तमया यदा । स्वावरस्य तदा वृत्तिं गृह्णीयान्न त्वनापदि ॥११॥ तत्रापि**

हे विप्रवर्य ! में गृहस्थ બ્રાહ્મણના વિશેષ ધર્મો તમોને કહ્યા. હવે તેમની જીવિકાવૃત્તિને કહું છું. અર્થાત્ ક્ષત્રિય, વૈશ્ય, શૂદ્રોની જીવિકાવૃત્તિને સંક્ષેપથી કહું છું, તે સાંભળો. (૬૫)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે ગૃહસ્થધર્મેષુ બ્રાહ્મણસ્ય વિશેષવિધિનિરૂપણનામા ત્રયોદશોઽધ્યાયઃ (૧૩)*

## અધ્યાય : ૧૪

**બ્રાહ્મણાદિ ચાર વર્ણોની જીવિકાવૃત્તિઓ શાસ્ત્ર પ્રમાણે (ફરીથી પણ) સારી રીતે નિરૂપણ કરી છે.**

**શ્રી નારાયણ મુનિ બોલ્યા :** હે અનઘ ! પહેલાં મેં વર્ણધર્મોમાં જે જીવિકાવૃત્તિઓ કહેલી છે, તે વૃત્તિઓથી જ દ્રવ્ય સંપાદન કરીને ગૃહસ્થ વિપ્ર સદ્‌વ્યય કરે. (૧) ગૃહસ્થાશ્રમી બ્રાહ્મણ હંમેશા પોતાના વર્ણને અનુસારે વૃત્તિનો સમાશ્રય કરી, દ્રવ્ય સંપાદન કરે. દ્રવ્યને માટે નીચની સેવા ના કરે. (૨) ગૃહસ્થ બ્રાહ્મણને શિલોઞ્છ, શાલીન, સંચય, ખેતી વગેરે વૃત્તિ કહી છે. આ ચાર, જીવિકાની વૃત્તિઓ આ લોકમાં માનેલી છે. (૩) દ્વિજોત્તમ આ ચાર પ્રકારની વૃત્તિઓમાં ઉત્તરોત્તર ન્યૂન જાણે. દેશ, કાલ અને પોતાનું સામર્થ્ય જોઈને એમાંથી કોઈ પણ એક વૃત્તિનો આશ્રય લે. (૪) ક્ષેત્રપતિએ ત્યાગ કરેલાં જે કણસલાં અને હાટ વગેરેમાં પડેલા ધાન્યના કણોનું ગ્રહણ કરવું, તેનાથી જીવન ચલાવે, તેને **શિલોઞ્છ** કહ્યું છે. યાચના વિના પ્રાપ્ત અન્ન **શાલીન** કહ્યું છે. યાજનાદિ **સંચય** કહ્યો છે. આદિથી યાયાવરાદિનું ગ્રહણ છે. પહેલાં યાયાવરનું શ્રેષ્ઠપણું કહેલું છે. અહીંયાં શાલીનનું શ્રેષ્ઠપણું છે. તે બે મતના આશ્રયથી (મતભેદથી) દોષ નથી. (૫) કૃષિ આદિ વૃત્તિઓ સામાન્યપણે કહેલી છે. **બ્રાહ્મણને પોતાની વૃત્તિ વિના, પ્રકારાન્તરથી પણ દ્રવ્યોપલબ્ધિ કહે છે :-** વિદ્યાપ્રકર્ષથી પણ બ્રાહ્મણ અતિ ધન પામે છે. હવ્ય-કવ્ય (દેવાન્ન-પિત્રન્ન) અર્પણ કરવાથી તેમ જ શૌચાદિ નિયમના અભ્યાસથી પ્રસન્ન થયેલા દેવતાઓ કદાચિત્ અત્યંત ધન આપે છે. (૬-૭) કદાચિત્ મણિ, સુવર્ણાદિની ખાણોથી ધન પ્રાપ્ત થાય છે. ક્યારેક બ્રહ્મર્ષિઓના અનુગ્રહથી ધનપ્રાપ્તિ થાય છે. તથા ક્યારેક અકસ્માત જ ધન પ્રાપ્ત થાય છે. (૮) આ સર્વ દ્રવ્ય ગૃહસ્થ દ્વિજાતિને ન્યાયથી આવેલું માનેલું છે. એ દ્રવ્ય ધર્મકાર્યોમાં ઉત્તમ કહેલું છે.(૯) હે બ્રાહ્મણ ! ક્ષત્રિય રાજાને રાજનીતિથી આવેલું ધન ધર્મકાર્યને યોગ્ય કહેલું છે. બીજું ધન ધર્મોપયોગી નથી. (૧૦) જ્યારે ઉત્તમ વૃત્તિથી કુટુંબનું પોષણ કરવા માટે સમર્થ ના હોય, તો પોતાની વૃત્તિથી **ન્યૂન વૃત્તિનું** ગ્રહણ કરે. આપત્કાલ વિના ગ્રહણ કરવી નહીં. (આ બ્રાહ્મણાદિ ચારે વર્ણને વિષે જાણવું.) (૧૧) તેમાં પણ બ્રાહ્મણ તો હિંસાદિ ક્ષાત્રવૃત્તિને ત્યાગ કરી, વૈશ્યવૃત્તિને જ ભજે. પોતાની ઉત્તમવૃત્તિથી ખેદ પામતો રાજા (ક્ષત્રિય) પણ વૈશ્ય વૃત્તિને ભજે. (ક્ષત્રિયને કહેલી વૃત્તિનું ફરીથી કથન તો આપત્કાલમાં

**ब्राह्मणो हिंस्रां क्षात्रवृत्तिं विहाय च । वैश्यवृत्तिं भजेदेव सीदन्राजाऽपि तां भजेत् ॥१२॥ सीदन्वैश्यश्च शूद्रस्य भजेद्वृत्तिं स चापदि । कार्वादिवृत्तिमाश्रित्य तरेदापदमात्मनः ॥१३॥ सर्वोऽप्यापद्विनिर्मुक्तः प्रायश्चित्तं विधाय च । स्वां स्वामेवोत्तमां वृत्तिं पुनः सम्यगुपाश्रयेत् ॥१४॥ कलौ युगेऽत्र विप्राणां क्षत्रियाणां च मानद! । स्ववर्णवृत्त्योत्तमया निर्वाहो नैव सम्भवेत् ॥१५॥ वैश्यवृत्तिं समाश्रित्य कुटुम्बातिथिपोषणम् । कुर्वीयातां ततस्तौ तु धर्मकार्येषु तत्परौ ॥१६॥ कृषेरभावे वाणिज्यं तदभावे कुसीदकम् । कष्टां पापीयसीं वृत्तिं कुसीदं ब्राह्मणस्त्यजेत् ॥१७॥ कुत्सितात्सीदतश्चापि निर्विशङ्कैः प्रगृह्यते । चतुर्गुणं चाष्टगुणं कुसीदाख्यमतः स्मृतम् ॥१८॥ उत्तमर्णाद्धनं क्वापि विप्रः प्राणापदं विना । गृह्णीयान्नैव धर्मार्थं न च कामसुखाप्तये ॥१९॥ निर्धनस्य गृहस्थस्य ब्राह्मणस्य विशेषतः । नोत्तमर्णसमं दुःखमन्यत्किञ्चन विद्यते ॥२०॥ पञ्चमेऽहनि षष्ठे वा शाकपत्राशनं वरम् । न तूत्तमर्णकदनं नृपतेरपि कर्हिचित् ॥२१॥ वैश्यवृत्तिष्वतस्त्वेकां ब्राह्मणः कृषिमाश्रयेत् । कलौ युगे स्वया वृत्त्या कुटुम्बं पातुमक्षमः ॥२२॥ द्विजोत्तमस्यापदि वैश्यवृत्तिः स्वजीविकार्थं विहितोत्तमैव । नारायणो नारदमेवमाह स्कान्दे पुराणे द्विजवर्य! पूर्वम् ॥२३॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे गृहस्थधर्मेषु जीविकावृत्तिनिरूपणनामा चतुर्दशोऽध्यायः ॥१४॥

---

મૃગયાથી જીવે અથવા વિપ્રના રૂપથી જીવે, એ જે પુરાણના વાક્યથી ક્ષત્રિયને કહેલી આપત્કાળની વૃત્તિ તેના નિષેધ માટે છે. એમ જાણવું) (૧૨) પોતાની વૃત્તિથી પીડાનો અનુભવ કરતો વૈશ્ય, શૂદ્રની વૃત્તિ જે પરિચર્યાત્મક છે. તેને ભજે. શૂદ્ર તો કારૂ વગેરેની (સાદડી ગૂંથવી, ટોપલા બનાવવા વગેરે) વૃત્તિનો આશ્રય લઈને આપત્કાલ વીતાવે. (૧૩) આપત્કાલથી મુક્ત થયેલા સર્વ વર્ણો શાસ્ત્રોક્ત યથાયોગ્ય પ્રાયશ્ચિત્ત કરીને ફરીથી પોત-પોતાની ઉત્તમ વૃત્તિનો જ સારી રીતે આશ્રય કરે. (૧૪) વળી હે માનદ ! કલિયુગમાં વિપ્રો અને ક્ષત્રિયોને પોતાના વર્ણની ઉત્તમ વૃત્તિથી નિર્વાહનો સંભવ ના હોય, માટે ધર્મકાર્યોમાં તત્પર બ્રાહ્મણ અને ક્ષત્રિય તો કૃષિ આદિ વૈશ્ય વૃત્તિનો આશ્રય કરીને કુટુંબ અને અતિથિનું પોષણ કરે. (૧૫-૧૬) કૃષિવૃત્તિથી પણ પોતાનો નિર્વાહ પરિપૂર્ણ ના થાય, તો શાસ્ત્રે નિષેધ કરેલા ક્રય-વિક્રયાદિનો ત્યાગ કરવાપૂર્વક વેચાતું લઈ, વેચાતું આપવું, વેપાર કરવો. તેનાથી પણ પરિપૂર્ણ નિર્વાહ ના થાય તો વ્યાજ-વટાવ કરે. પણ આ વ્યાજવટાવ બ્રાહ્મણ તો ના જ કરે. (૧૭) અંત્યજ થકી પણ તથા પોતાના કુટુંબના પોષણના અભાવથી ખેદ પામતા જનથી પણ શંકાએ રહિત ચાર ગણું કે આઠ ગણું જેમ ગ્રહણ થાય, તેમ લેણદાર પાસેથી ગ્રહણ કરે છે. માટે ‘કુસીદ’ નામથી કહેલું છે. (૧૮) ગૃહસ્થ વિપ્ર, આત્પકાલ પડ્યા વિના ક્યારેય પણ ધનના સ્વામી પાસેથી ધન ધર્મને માટે અને કામાદિ સુખની પ્રાપ્તિ માટે ગ્રહણ ના કરે. (૧૯) નિર્ધન ગૃહસ્થ બ્રાહ્મણને તો વિશેષપણે ધનસ્વામીએ કરેલી પીડા સમાન બીજું કંઈ પણ દુઃખ નથી. (૨૦) પાંચમા દિવસે અથવા છઠ્ઠા દિવસે ડોડીની ભાજી માત્રનું ભક્ષણ શ્રેષ્ઠ છે. પરંતુ રાજાને પણ ધનસ્વામીએ કરેલી પીડા શ્રેષ્ઠ નથી, તો બીજાની તો વાત જ શી કહેવી? અર્થાત્ દુઃખ પામે જ. (૨૧) માટે કલિયુગમાં પોતાની વૃત્તિથી કુટુંબનું રક્ષણ કરવા માટે અસમર્થ બ્રાહ્મણ, વૈશ્યવૃત્તિમાં એક કેવળ કૃષિનો જ આશ્રય કરે. (૨૨)

હે દ્વિજવર્ય ! ઉત્તમ બ્રાહ્મણને આપત્કાલમાં વૈશ્યવૃત્તિ જીવિકા માટે ઉત્તમ જ કહેલી છે. (સ્કંદપુરાણ અને વાસુદેવ માહાત્મ્યમાં કહી છે.) બદરીપતિ નારાયણ, નારદને આ મેં કહ્યા પ્રમાણે પૂર્વે કહેતા હતા. (૨૩)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે ગૃહસ્થ ધર્મેષુ જીવિકાવૃત્તિનિરૂપણનામા ચતુર્દશોऽધ્યાયઃ (૧૪)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – **इति श्रुत्वा हरेर्वाक्यं प्राप्तं संशयमात्मनि । पप्रच्छ तं स नृपते! ब्राह्मणस्तत्प्रियः पुनः ॥१॥** ब्राह्मण उवाच – **ब्राह्मणस्य कृषिः पूर्वं निषिद्धा भगवंस्त्वया । पुनश्च विहिताऽत्रेति संशयं छिन्धि मे प्रभो ! ॥२॥** श्रीनारायणमुनिरुवाच – **ब्राह्मणस्य निषिद्धं हि कृषिकर्म न संशयः । अनन्यगतिकत्वात्तत्साम्प्रतं विहितं द्विज! ॥३॥ न शिलोञ्छादिवृत्तिर्हि शक्याऽस्त्याचरितुं कलौ । न च यज्ञरुचिर्लोको नाध्येताऽपि धनी क्वचित् ॥४॥ न च कश्चिद्विशुद्धोऽत्र दाताऽपि पुरुषो भुवि । कृषिस्ततोऽभ्यनुज्ञाता पराशरमुनेर्मतात् ॥५॥ शूद्रवृत्तिं भजेद्विप्रो नीचाद्वापि प्रतिग्रहम् । कुर्यात्ततः कृषिरियं प्रोक्ता श्रेयस्करी मया ॥६॥ कृषिलब्धेन धान्येन पितृन्देवांश्च ब्राह्मणान् । पूजयेत्तेन ते तुष्टास्तद्दोषं नाशयन्ति हि ॥७॥ देवेभ्यश्च पितृभ्यश्च दद्याद्भागं तु विंशकम् । त्रिंशत्तमं च विप्रेभ्यो यः स दुष्येन्न कर्षकः ॥८॥ अत्यजन्स्वानि कर्माणि ब्राह्मणो नित्यकानि षट् । कृषिकर्म प्रकुर्वीत क्षत्रियश्च तथापदि ॥९॥ हीनाङ्गं दुर्बलं श्रान्तं रोगिणं क्षुधितं तथा । कृशाङ्गं स्थविरं चान्धमनड्वाहं न वाहयेत् ॥१०॥ स्थिराङ्गं नीरुजं तृप्तं साण्डं षण्ढत्ववर्जितम् । पुष्टाङ्गं सबलं मत्तं वृषभं वाहयेद्द्विजः ॥११॥ वाहयेद्दिवसस्यार्धं कुर्यात्स्नानादिकं ततः । सीरं युगं प्रतोदं च कुर्याच्छास्त्रोक्तमानतः ॥१२॥ हीनातिरिक्तं कर्तव्यं नैव किञ्चित् प्रमाणतः । न निर्दयस्तुदेत्क्रोधाद्बलीवर्दान्कदाचन ॥१३॥ न सीरं क्षीरवृक्षस्य न बिल्वपिचुमन्दयोः । द्विजः क्वापि प्रकुर्वीत कुर्वन्दारिद्र्यमाप्नुयात् ॥१४॥ गोभिश्च वृषभैरत्र गृहिणां हि गृहाश्रमः । वर्तते ताश्च तांस्तस्माद्द्विजो**

## અધ્યાય : ૧૫

### કલિયુગમાં ગૃહસ્થોને કહેલું, સુખને આપનારું, કૃષિકર્મનું વિધાન નિરૂપણ કરેલું છે.

**સુવ્રત મુનિ બોલ્યા** : હે પ્રતાપસિંહ રાજન્ ! આ પ્રકારે શ્રી નારાયણ મુનિનું વાક્ય સાંભળીને, શ્રીહરિ જેને પ્રિય છે, એવા શિવરામ વિપ્ર પોતાના મનમાં સંશય થતાં શ્રીહરિને ફરીથી પૂછતા હતા. (૧) **વિપ્ર બોલ્યા** : હે ભગવન્ ! તમોએ પ્રથમ બ્રાહ્મણને કૃષિ નિષેધ કરી અને ફરીથી વિધાન કરી. આ મારો સંશય તમે દૂર કરો. (૨) **શ્રી નારાયણ મુનિ કહે છે** : હે દ્વિજ ! બ્રાહ્મણને કૃષિકર્મ નિષિદ્ધ છે. એમાં સંશય નથી જ. હાલ કલિયુગમાં અનન્ય ગતિ હોવાથી તે કૃષિકર્મ મેં કર્તવ્યપણે કહ્યું છે. (૩) કલિયુગમાં શિલોંછાદિ વૃત્તિ આચરણ કરવા માટે શક્ય નથી જ. આદિ શબ્દથી શાલિન-યાયાવર વૃત્તિનું ગ્રહણ થાય છે. લોકો યજ્ઞાચરણમાં પ્રીતિવાળા નથી. જેથી યાજ્ય વૃત્તિથી નિર્વાહ થાય. કોઈ પણ ઠેકાણે ધનવાન પુરુષ વેદનું અધ્યયન કરતો નથી. (૪) આ કલિયુગમાં પૃથ્વીમાં કોઈ પોતાના ધર્મમાં વિશુદ્ધ નિષ્ઠાવાળો, અને પોતાની સેવાની અપેક્ષા રહિત દાતા પણ નથી. માટે પરાશર મુનિના મતથી કૃષિની મેં અભ્યનુજ્ઞા કરેલી છે. (૫) પોતાના કુટુંબનું પોષણ કરવા અસમર્થ બ્રાહ્મણ ત્રણ વર્ણની સેવાવૃત્તિનો આશ્રય કરે. અથવા નીચથી પણ પ્રતિગ્રહ કરે. માટે આ કૃષિ મેં શ્રેયસ્કરી કહી છે. (૬) કૃષિવૃત્તિથી પ્રાપ્ત થયેલા ધાન્યથી પિતૃઓ, દેવો અને બ્રાહ્મણોને પૂજે. તે પૂજનથી પ્રસન્ન થયેલા પિતૃઓ વગેરે કૃષિથી થયેલા પાપનો નાશ કરે છે, જ. (૭) જે કૃષિ કર્તા બ્રાહ્મણ દેવો અને પિતૃઓનો વીશમો ભાગ આપે, પછી ત્રીશમો ભાગ બ્રાહ્મણોને આપે તે ખેતી કરનાર કૃષિકાર દોષને પામતો નથી. (૮) વિપ્ર, પોતાનો સ્નાન સંધ્યાદિ ષટ્ કર્મનો ત્યાગ કર્યા વિના કૃષિકર્મ કરે. તથા ક્ષત્રિય પણ આપત્કાળમાં ષટ્કર્મનો ત્યાગ કર્યા વિના કૃષિકર્મ કરે. (૯) લંગડો, અપંગ, પૂર્વે થયેલા રોગાદિથી બલે રહિત, શ્રમયુક્ત, ભ્રમિત રોગવાળો, ભૂખ્યો, ભૂખથી સૂકાયેલા અંગવાળો, અને વૃદ્ધ તથા અંધ એવા બળદિયાને જોડે નહિ. તેનાથી ખેતી કરવી નહિ. (૧૦) દૃઢ શરીરવાળો, રોગે રહિત, તૃપ્ત થયેલો, અંડે સહિત, બલયુક્ત, પુષ્ટ અંગવાળો, યુવાન હોય એવા બળદને બ્રાહ્મણ ખેતી કરવાના ઉપયોગમાં લે. (૧૧) અર્ધા દિવસ સુધી વહન કરાવે, પછી સ્નાનાદિ કરે, હળ, ધૂંસરું, જોતરાં વગેરે અંગો શાસ્ત્રોક્ત માપથી વાપરે. (૧૨) બૃહદ્ પરાશરે કહેલા પ્રમાણથી ઓછું અથવા વધારે કંઈ પણ હળ વગેરે કરવું નહીં. ક્રોધથી નિર્દય થઈને ક્યારેય બળદિયાને પરોણા વગેરેથી વ્યથા પમાડવી નહીં. (૧૩) દ્વિજ ક્યારેય પણ રાયણના ઝાડમાંથી બનાવેલું હળ ન વાપરે. બીલી અને લીમડાના વૃક્ષનું હળ ન કરે. જો કરે છે તો દારિદ્ર્યને પામે છે. પીપળાના વૃક્ષનું હળ પણ ન કરવું. (૧૪)

यत्नेन पालयेत् ॥१५॥ वने शुष्कतृणान्यत्त्वा स्त्रवन्त्यनुदिनं पयः । हविर्भिर्दैवतोषिण्यो गावः पूज्याः सदा नृणाम् ॥१६॥ यदङ्गेष्वतिपुण्येषु सर्वे देवा वसन्ति हि । ताः पूजनीयाः सर्वेषां संरक्षेद्वा गृहाश्रमी ॥१७॥ गौरवत्सा न दोग्धव्या स्त्रवद्गर्भा च सन्धिनी । प्रसूता च दशाहात्प्राक् रोगिणी च द्विवत्ससूः ॥१८॥ दक्षिणाभिमुखा गाव उत्तराभिमुखाश्च वा । बन्धनीयाश्च वृषभा न प्राक्प्रत्यङ्मुखा द्विजैः ॥१९॥ गोवाजिवृषशालायां सुतीक्ष्णं लोहदात्रकम् । सर्वदा स्थापनीयं च दामबन्धविमोक्षकृत् ॥२०॥ यो गाः पूजयते भक्त्या वन्दते पोषयत्यपि । सोऽश्वमेधादियज्ञानां प्राप्नोति सहसा फलम् ॥२१॥ ताडयन्ति च ये पापाः क्रोशयन्ति च ताश्च ये । नरकाग्नौ प्रपच्यन्ते कोटिवर्षाणि ते ननु ॥२२॥ गवां यत्पालने पुण्यं प्रोक्तं दशगुणं ततः । पालने वृषभाणां च पुण्यं किल महर्षिभिः ॥२३॥ कृत्वा गोर्वृषणच्छेदं विप्रो भ्रश्यति जातितः । चण्डाल इव वर्ज्योऽसौ दैवे पित्र्ये च कर्मणि ॥२४॥ उत्पादयन्ति सस्यानि मर्दयन्ति वहन्ति च । आनन्दयन्ति लोकांश्च पूज्या हि वृषभास्ततः ॥२५॥ न भारखिन्ना जल्पन्ति पत्युरग्रेऽपि किञ्चन । स्वयं चरन्ति शुष्काणि तृणानि च कडङ्गरम् ॥२६॥ उक्षाण ईदृशा एते लोकानां वृद्धिहेतवः । पालनीयाः प्रयत्नेन पोषणीयाश्च सर्वथा ॥२७॥ गृहे बद्धान्पशून् यस्तु तृणतोयादिभिर्गृही । नानुवेलं प्रपुष्णीयात्स पतेद्रौरवादिषु ॥२८॥ पशूनां पालनेऽशक्तो दत्त्वा तान्धनिने स्वयम् । वनं गत्वा तपः कुर्यान्न तु तान्क्लेशयेद्वृथा ॥२९॥ धर्ममेवं विदित्वैव पोषयन्पालयन्वृषान् । वपेत्सर्वाणि बीजानि सर्ववापी न सीदति ॥३०॥ शालीक्षुशणकार्पासवार्ताकादीनि वापयेत् । तत्तत्स्थानं च तत्कालं विदित्वा धर्मशास्त्रतः ॥३१॥ धनवापी

ગાયો વનમાં સૂકાં તૃણોને ખાઈને દરરોજ દૂધનો સ્ત્રાવ કરે છે. દૂધ-દહીંથી દેવતાઓને સંતોષ પમાડનારી ગાયો થાય. માટે જ ગાયો મનુષ્યે સદા પૂજવી. અત્ર-મનુષ્યલોકમાં ગૃહસ્થાશ્રમીઓનો ગૃહસ્થાશ્રમ ગાયો વડે અને વૃષભો વડે શોભે છે. કારણ કે તેમના થકી જ હવ્ય-કવ્યની નિષ્પતિ થાય છે. દુગ્ધ-ઘૃત -અન્ન વડે તેની સિધ્ધિ થાય છે, તે તો તેમને અધીન છે. માટે ગૃહસ્થ તે પશુઓનું પ્રયત્નથી પરિપાલન કરે. (૧૫-૧૬) અતિ પવિત્ર જેના અંગોમાં સર્વે દેવતાઓ વસે જ છે. તે ગાયો સર્વેને પૂજનીય છે. માટે ગૃહસ્થાશ્રમી બ્રાહ્મણ ગાયોનું સંરક્ષણ કરે. (૧૭) ગાય, વાછરડું ના હોય તો દોહવી નહીં. ગર્ભ સ્ત્રવી ગયો હોય, તો ગાય દોહવી નહીં. પ્રસૂતા હોય તો દશ દિવસ પહેલાં દોહવી નહીં. રોગવાળી હોય તો દોહવી નહીં; બે વાછરડાવાળી દોહવી નહીં. (૧૮) બ્રાહ્મણોએ ગાયો અને બળદો દક્ષિણ દિશાના મુખવાળા અથવા ઉત્તર દિશાની સન્મુખ બાંધવા. પૂર્વ મુખે અથવા પશ્ચિમ મુખે બાંધવા નહિ. (૧૯) ગાયો, ઘોડા, બળદો, તેઓની શાળામાં દોરડાંનાં બંધનોને કાપવાનાં અતિ તીક્ષ્ણ લોઢાનાં દાતરડાં સદા રાખવાં. (૨૦) જે ગૃહસ્થ પુરુષ, ગાયોને અતિ ભક્તિથી પૂજે છે, વંદના કરે છે અને પોષણ કરે છે, તે અશ્વમેધાદિ યજ્ઞોનું ફળ તત્કાલ જ પામે છે. (૨૧) જે પાપી પુરુષો ગાયોને દૂધ દોહવા સમયે, લાકડી વગેરેથી પ્રહાર કરે છે અને ગાળો આપે છે તે પુરુષો કોટિ વર્ષ સુધી નરકાગ્નિમાં ખદબદે છે. (૨૨) મહર્ષિઓએ ગાયોના પાલનમાં જે પુણ્ય કહ્યું છે, તેથી દશગણું પુણ્ય બળદોના પાલનમાં કહ્યું છે. (૨૩) વિપ્ર જો વૃષભના વૃષણનો ઉચ્છેદ કરે, તો બ્રાહ્મણત્વ જાતિથી ભ્રષ્ટ થાય છે. આ બ્રાહ્મણ શ્વપચની માફક દેવ સંબંધી તથા પિતૃ સંબંધી કર્મમાં વર્જ્ય છે. (૨૪) વૃષભો  ડાંગર વગેરેના નાના પ્રકારનાં ધાન્યોને ઉત્પાદન કરે, પોતાની ખરીથી ચૂર્ણ કરે છે. ધાન્ય ભરેલું ગાડું ઘેર લાવવા માટે ખેંચે છે. સર્વ જનોને આનંદ આપે છે. માટે વૃષભો પૂજ્ય છે. (૨૫) વૃષભો ભાર ખેંચવાથી દુઃખી હોય છે તોપણ પોતાના સ્વામી આગળ કંઈ પણ બોલતા નથી. પોતે સૂકાં ઘાસ તથા ભૂસું ખાય છે. (૨૬) આવા ગુણવાળા બલિવર્દો (વૃષભો) લોકોની વૃદ્ધિમાં કારણ થાય છે. માટે પ્રયત્નથી પાલન કરવા અને સર્વ પ્રકારે પોષણ કરવા યોગ્ય છે. (૨૭)  જે ગૃહસ્થ બાંધેલાં પશુ જે ગાયો વગેરેને તૃણ અને જળ વડે સમયોસમય સારી રીતે પોષણ કરતા નથી, તે ગૃહસ્થ રૌરવ નરકમાં પડે છે. (૨૮) પશુપાલનમાં અશક્ત ગૃહસ્થ, તે પશુઓને પશુપાલન માટે જે  શક્તિમાન હોય તેને આપીને પોતે વનમાં જઈને તપ કરે. પણ પશુઓને નકામો ક્લેશ પહોંચાડે નહિ. (૨૯)  આ પ્રકારે ધર્મને જાણીને, વૃષભોને પોષણ આપીને, સર્વ બીજોને  વાવે. કારણ કે સર્વ બીજોને વાવનારો દુઃખ પામતો નથી. (૩૦)  તે તે વાવવાની ડાંગર આદિ વસ્તુઓની વાવવાભૂમિ અને તે વાવવાનો સમય ધર્મશાસ્ત્રથી જાણીને, ડાંગર, શેલડી, શણ, કપાસ, વૃંતાક વગેરે વાવે. (૩૧) ઘાટું વાવનારો, પ્રથમ વાવનારો, બળદિયાઓનું પોષણ કરનારો, બિયારણનો સંગ્રહ કરનાર, પ્રાતઃકાલમાં ખેતરમાં



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

चाग्रवापी गोपोषी बीजसङ्ग्रही । प्रभाते क्षेत्रगामी च कर्षको नावसीदति ॥३२॥ प्रथमं कृषिकर्ता तु विधानं शास्त्रसम्मतम् । कुयोगवर्जिते कुर्यात्प्रयतः शुभवासरे ॥३३॥ सीतायाः स्थापनं कृत्वा पराशरमृषिं स्मरन् । दधिदूर्वाक्षतैः पुष्पैः शमीपत्रैश्च पूजयेत् ॥३४॥ नीराजनं च नैवेद्यं दत्त्वा कुर्यात्प्रदक्षिणम् । स क्षेत्रपालमुख्येभ्यो बलीन्दद्यात्ततो गृही ॥३५॥ रक्तशृङ्गौ स्ववृषभौ कुङ्कुमेनाक्षतैस्तथा । पूजयेत्पुष्पमालाभिस्ततः संयोजयेद्धलम् ॥३६॥ सङ्घृष्य सीरफालाग्रं हेम्ना वा रजतेन च । मन्त्रमेतं समुच्चार्य कुर्वीत क्षेत्रकर्षणम् ॥३७॥ सीते! सौम्ये! कुमारि! त्वं देवि! देवैः श्रियेऽर्चिते! । शक्तिसूनोर्यथा सिद्धा तथा मे सिद्धिदा भव ॥३८॥ एष एव विधिर्ज्ञेयो वापने लवने तथा । प्रवेशने च धान्यानां खले गन्त्रीप्रवाहणे ॥३९॥ यत्नतः पालयन्नेव वृषभौ कर्षणं चरेत् । अपालयन्वाहयंस्तु कुम्भीपाके पतेद्ध्रुवम् ॥४०॥ अन्नार्थमसृजद्ब्रह्मा वृषभान्हर्यनुज्ञया । सर्वं जीवति चान्नेन त्रैलोक्यं सचराचरम् ॥४१॥ पालयद्भिरतस्तांस्तु कर्तव्यं कर्षणं द्विजैः । यथोक्तेन विधानेन लाङ्गलादेश्च योजनम् ॥४२॥ शक्तिसूनोर्विना नाम सीतायाः स्थापनं विना । विनाऽभ्युक्षणरक्षाभ्यां कृषिकर्म न सिध्यति ॥४३॥ सीमां श्मशानभूमिं च वृक्षच्छायाक्षितिं तथा । भूमिं निखातयूपां च कृषिकृन्नैव कर्षयेत् ॥४४॥ नोषरां वाहयेद्भूमिं न चाश्मशर्करावृताम् । वाहयेन्नाप्रदत्तां च न नदीपुलिनं तथा ॥४५॥ यद्येतां वाहयेद्भूमिं लोभाद्द्वेषाच्च वा द्विजः । नरकं घोरतामिस्त्रं प्राप्नुयात्स न संशयः ॥४६॥ एकाङ्गुलामपि धरां परकीयां य आहरेत् । तेन पापेन पुरुषो रौरवं नरकं व्रजेत् ॥४७॥ न दूरे वाहयेत् क्षेत्रं न चैवात्यन्तिके तथा । वाहयेन्न पथि क्षेत्रं वाहयन् दुःखभाग्भवेत् ॥४८॥ अनवद्यां शुभां स्निग्धां जलावगाहनक्षमाम् । निम्नां च वाहयेद्भूमिं विश्राम्येद्यत्र वै जलम् ॥४९॥ महतीं च वृत्तिं कुर्यात् क्षेत्रस्य परितो दृढाम् । यथा पशुमृगाद्याश्च प्रविशेयुर्न कर्हिचित् ॥५०॥ ज्ञात्वा क्षेत्रगुणान्सम्यक्तत्तत्स्थाने यथोचितम् । बीजानि

જઈને તેની સંભાવના કરનારો ખેડૂત દુઃખ પામતો નથી. (૩૨) ખેતી કરનારો પ્રયત્નપૂર્વક પ્રથમ શાસ્ત્રસંમત વિધાન કુયોગ રહિત શુભ દિવસે કરે. (૩૩) હળના અગ્રભાગથી ઉત્પન્ન થયેલાં સીતા દેવીનું સ્થાપન કરીને પરાશર ઋષિને સ્મરણ કરીને, દહીં, દૂર્વા અને અક્ષત-પુષ્પો તથા શમીપત્રો વડે સીતાનું પૂજન કરે. (૩૪) ગૃહસ્થ ખેડૂત, નૈવેદ્ય ધરીને નીરાજન (આરતી) અને પ્રદક્ષિણા કરે. પછી ક્ષેત્રપાલ વગેરેને જળથી ભીંજાએલા અડદ, ચણા વગેરે ધાન્યરૂપી બલિ-ભાગો અર્પણ કરે. (૩૫) બળદના શિંગડા સિંદૂરાદિ રંગોથી રંગીને, પોતાના બન્ને બળદોને કુંકુમ અને અક્ષત તથા પુષ્પની માલા વડે પૂજે, પછી હળ જોડે. (૩૬) સુવર્ણ અગર ચાંદીથી હળના અગ્રભાગને ઘસીને આ મંત્ર ઉચ્ચારણ કરીને ખેતરની ખેડ કરે. (૩૭) હે સીતે ! હે સૌમ્યે ! હે કુમારી ! હે દેવી ! લક્ષ્મીની પ્રાપ્તિ માટે દેવો વડે પૂજાએલા તમો શક્તિના પુત્ર પરાશર મુનિને જેમ સિદ્ધિ આપનારાં છો, તેમ સિદ્ધિદાતા થાઓ. (૩૮) આ જ વિધિ ધાન્યોને વાવવામાં, કાપવામાં અને ખળાંમાં લાવવામાં, તથા પ્રથમ ગાડું જોડવામાં જાણવો. (૩૯) બન્ને બળદવર્યોને પાલન કરીને જ ખેડ્ય કરે. બળદનું પોષણ કર્યા વગર ખેડ્ય કરવા જોતરે, તે નર્કમાં પડે છે. (૪૦) બ્રહ્મા, શ્રી વિષ્ણુની આજ્ઞાથી અન્ન ઉત્પન્ન કરવા, વૃષભોને સર્જતા હતા. ચરાચરે સહિત સર્વ ત્રિલોકી અન્નથી જીવે છે. (૪૧) માટે વૃષભોને પાલન કરતા દ્વિજોએ ઉપરોક્ત વિધિથી ખેતી કરવી. અને હળ વગેરેની યોજના કરવી. (૪૨) પરાશર મુનિના નામોચ્ચારણ વિના તથા સીતાસ્થાપન વિના તેમજ મંત્રોચ્ચારપૂર્વક પ્રોક્ષણ અને દઢ વાડ્ય વગેરેથી સંરક્ષણ કર્યા વિના કૃષિકર્મ સિદ્ધ થતું નથી. (૪૩) સીમાન્ત ભૂમિ, સ્મશાનભૂમિ, વૃક્ષની છાયાની ભૂમિ, તથા યજ્ઞસ્તંભની ભૂમિને કૃષિકાર ખેડે નહિ. (૪૪) ખારવાળી ભૂમિ ખેડે નહિ, કાંકરા તથા પથ્થરોવાળી ભૂમિ, કોઈએ નહીં આપેલી ભૂમિ, અને નદી કાંઠાની ભૂમિ ખેડે નહીં. (૪૫) બ્રાહ્મણ લોભથી અથવા દ્વેષથી આ સીમાદિ ભૂમિને જો ખેડે તો તે બ્રાહ્મણ ઘોર અંધકાર ભર્યા નરકને પામે, એમાં સંશય નથી. (૪૬) જે પુરુષ પારકી ભૂમિ એક આંગળ પણ ખેડે તે પુરુષ પાપ થકી રૌરવ નરકમાં જાય છે. (૪૭) દૂર પ્રદેશનું ખેતર ખેડે નહીં. અત્યંત સમીપનું ખેતર પણ ખેડે નહીં તથા માર્ગનું ખેતર ખેડે નહિ. આવાં ખેતર ખેડે તો દુઃખી થાય. (૪૮) ખારહીન, દોષે રહિત, કાંકરા રહિત, ચીકણી, જળ રહે તેવી નીચી ભૂમિને ખેડે. જે ભૂમિમાં જળ સ્થિર થઈને રહે, તેવી ભૂમિ ખેડે. (૪૯) ખેતરની ચોતરફ મોટી ઊંચી દઢ વાડ્ય કરે, જેથી ગાયો વગેરે ગામનાં પશુઓ, અરણ્યનાં પશુઓ, વનનાં વરાહાદિ પ્રાણીઓ ક્યારેય પણ ખેતરમાં પ્રવેશ કરે નહીં. (૫૦) ખેતી કરનાર બ્રાહ્મણ **અમાસના દિવસે** ખેડે નહીં. જો ખેડે તો

वापयेत्सीरी नित्योद्युक्तो भवेत्तथा ॥५१॥ अमावास्यादिने नैव गृही कुर्वीत कर्षणम् । कुर्वन्यातयते पितॄन्नरके च पतेत्स्वयम् ॥५२॥ सर्वसत्त्वोपकाराय सर्वयज्ञादिसिद्धये । नृपस्य कोशवृद्ध्यै च जायते कृषिकृन्नरः ॥५३॥ अतः क्षुधापीडितानां सत्त्वानां तृप्तये द्विजः । दद्यान्मुष्टिं मुष्टिमन्नं कृषिदोषोपशान्तये ॥५४॥ यावतोऽन्नकणान्क्षेत्रे प्राणिनो भक्षयन्ति च । तावतः पातकात्क्षेत्री मुच्यते नात्र संशयः ॥५५॥ अन्नदानेन कृषिकृत्कृषिदोषाद्विमुच्यते । ततः सीतामखं कुर्यात्सिद्धसस्ये खलागते ॥५६॥ खलस्य परितः कुर्यात्प्रोच्चामतिघनां वृतिम् । एकद्वारां खरोष्ट्रादेर्दुःप्रवेशां सुरक्षिताम् ॥५७॥ त्रिसन्ध्यमर्चयेत्सीतां पराशरमृषिं स्मरन् । धान्यानि प्रोक्षयेत्तेषां रक्षां कुर्याच्च भस्मना ॥५८॥ प्रेतभूतादिनामानि न वदेच्च खले गृही । सूतिकागृहवत्तत्र कुर्वीत परिरक्षणम् ॥५९॥ प्रशस्तदिनपूर्वाह्ने धान्योन्मानं प्रकल्पयेत् । यजेत खलभिक्षाभिः काले रौहिण एव हि ॥६०॥ देवान्महेन्द्रप्रमुखान्सोमपादीन्पितृंस्तथा । सनकादीन्मनुष्यांश्चाप्युद्दिश्यान्नं ददीत सः ॥६१॥ खले यज्ञे विवाहे च सङ्क्रान्तौ ग्रहणे तथा । पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम् ॥६२॥ पञ्चमः सप्तमो वापि नवमो द्वादशोऽथवा । शक्त्या देयो धान्यभागः सीरिणा तु खलक्रतौ ॥६३॥ ये केचिदागतास्तत्र पूज्यास्तेऽतिथिवद्द्विजाः । स्तोकशः सीरिभिः सर्वैः कृषिकैर्गृहमेधिभिः ॥६४॥ शूद्राश्च कारवोऽन्ये च पतिता नीचयोनयः । दीना अनाथाः क्लीबाश्च कुष्ठिनो दद्रुणास्तथा ॥६५॥ अन्धाश्च बधिरा मूकाः खञ्जाश्चण्डालपुष्कसाः । अन्नार्थिनश्च ये केचिच्छक्त्या तेभ्योऽन्नमर्पयेत् ॥६६॥ वाचा मधुरया तांश्च विसृज्याथ निजे गृहे । आनीय धान्यं कुर्वीत नवान्नेष्टिं यथाविधि ॥६७॥ राज्ञे दत्वा च षष्ठांशं देवताभ्यश्च विंशकम् । त्रिंशत्तमं च विप्रेभ्यः कृषिकर्ता न दोषभाक् ॥६८॥ वदन्ति ऋषयः केचित्कृष्यादीनां विशुद्धये ।

---

પિતૃઓ નરકમાં પડે; પોતે પણ નરકમાં પડે. (૫૧) કૃષિકાર દ્વિજ, ક્ષેત્ર ગુણોને સારી રીતે જાણીને, તે તે સ્થાનમાં યથાયોગ્ય યથાકાળ, બીજોને વાવે અને પછી તેની સંભાવનામાં નિત્ય ઉદ્યમશીલ રહે. (૫૨) ખેડૂત સમગ્ર પ્રાણીઓ પર ઉપકાર કરવા, બ્રાહ્મણાદિને યજ્ઞાદિ કાર્યમાં સિદ્ધિ માટે અને રાજાની કોશ વૃદ્ધિ માટે ખેતી કરે છે. (૫૩) માટે કૃષિકાર બ્રાહ્મણ, કૃષિદોષની શાંતિ માટે, ભૂખથી પીડાયેલાં પ્રાણીઓની તૃપ્તિ માટે એક મૂઠી માપવાળું અન્ન આપે. (૫૪) પ્રાણીઓ ખેતરમાં જેટલી સંખ્યાવાળા અન્ન કણોને ભક્ષણ કરે છે તેટલા પરિમાણવાળા પાતકથી ખેતર ખેડનારા મુકાય છે. એમાં સંશય નથી. (૫૫) ખેડૂત, અન્નદાનથી ખેતીના દોષથી મુક્ત થાય છે. માટે પાકેલું ધાન્ય ખળામાં આવે કે તુરત જ સીતાયજ્ઞ કરવો. (૫૬) ખળાની ચારે બાજુએ અતિ ઊંચી, ઘાટી, એક દ્વારવાળી, ગધેડાં, ઊંટ વગેરે ન પ્રવેશી શકે તેવી સારી રીતે રક્ષા કરનારી વાડ કરવી. (૫૭) પરાશર મુનિને યાદ કરી ત્રિકાળ સંધ્યામાં સીતાને પૂજે. મંત્રયુક્ત જળથી ધાન્યો પ્રોક્ષણ કરે અને તે ધાન્યોની ભસ્મથી રક્ષા કરે. (૫૮) ખેડૂત ગૃહસ્થે ખળામાં ભૂત-પ્રેતાદિનું નામ ઉચ્ચારવું નહીં. ખળાંનું રક્ષણ સૂતિકાગૃહની જેમ કરવું. (૫૯) યમઘંટ આદિ દોષ રહિત દિવસે પૂર્વાહ્નમાં તાજવાં વગેરેથી ધાન્યનું માપ કરવું. દિવસના નવમા મુહૂર્તમાં જ ખળાના યજ્ઞમાં ભિક્ષા માટે આવેલા બ્રાહ્મણોને ભિક્ષા આપવાથી દેવાદિનું યજન કરે જ. (૬૦) દેવેન્દ્ર વગેરે દેવો તથા સોમપાન કરનારા વગેરે પિતૃઓ તથા સનકાદિ અને મનુષ્યોને પણ ઉદ્દેશીને ખેડૂત અન્ન બ્રાહ્મણોને આપે. (૬૧) ખળાના યજ્ઞમાં, વિવાહ, સૂર્યની મકરાદિ રાશિ માત્રના સંક્રમણ, સૂર્ય અને ચંદ્રના ગ્રહણમાં, પુત્રજન્મ (જાતકર્મ) વેળાએ તથા તેર વ્યતીપાત યોગોમાં જે દાન થાય તે અક્ષય ફળ આપનારું થાય છે. (૬૨) ખેતી કરનાર ખેડૂતે ખળાયજ્ઞમાં-પાંચમો, સાતમો, નવમો, કે બારમો ધાન્યભાગ પોતાની શક્તિ પ્રમાણે આપવો. (૬૩) ગૃહસ્થાશ્રમી હળવાળા સર્વે ખેડૂતોએ ખળાયજ્ઞમાં જે કેટલાક બ્રાહ્મણો આવે, તે અતિથિ સમાન બ્રાહ્મણોને ખોબો, મુઠી વગેરે અલ્પ પરિમાણ અન્નના દાનથી પણ પૂજન કરવું. (૬૪) અને બીજા, ચોથા વર્ણના શૂદ્રો-સુથાર વગેરે શિલ્પીઓ, મહાપાપ વગેરેથી જાતિ-ભ્રષ્ટ, નીચ યોનિવાળા, દીન, અનાથ, નપુંસક-આઠ પ્રકારે કુષ્ઠ રોગવાળા, ધાધર રોગવાળા, આંધળા, બહેરા, મૂંગા, ખોડા, ચંડાલ અને પુષ્કસો-જે અન્નાર્થી હોય તેમને યથાશક્તિ અન્નદાન કરવું. (૬૫-૬૬) ખળાયજ્ઞમાં આવેલા બ્રાહ્મણો વગેરેને મધુર વાણીથી અન્નદાન આપી સત્કાર કરે, આદરપૂર્વક વિસર્જન કરે, પછી પોતાના ગૃહમાં ધાન્ય લાવીને યથાવિધિ **નવાન્ન ઇષ્ટિ** કરે. (૬૭) જો રાજા (વિપ્રનું હોવા છતાં) ગ્રહણ કરે, તો તેને છઠ્ઠો ભાગ આપીને દેવતાઓને વિશમો ભાગ અને વિપ્રોને ત્રીશમો ભાગ આપીને બ્રાહ્મણ કૃષિકાર દોષ મુક્ત થાય છે. (૬૮) કેટલાક ઋષિઓ, કૃષિ આદિની વિશુદ્ધિ માટે લાભનો અંશ (આગળ કહેશે તેમ ભાગનું) સમર્પણ કહે છે. જે સર્વેની શુદ્ધિ કરનાર

लाभस्यांशप्रदानं तत्सर्वेषां शुद्धिकृद्भवेत् ।।६९।। प्रतिग्रहाच्चतुर्थांशं वणिग्लाभात्तृतीयकम्। कृषितो विंशकं भागं ददतो नास्ति पातकम् ।।७०।। काऽपि वृत्तिः कृषेरन्या नास्त्येव सुकरा कलौ। न सुखं कृषितोऽन्यत्र यदि धर्मेण कर्षति ।।७१।। अवस्त्रत्वं निरन्नत्वं कृषितो नैव जायते। अनातिथ्यं च दुःस्थत्वं गोमतो न कदाचन ।।७२।। त्रैवर्णिकानां कृषिकर्मणो यो विधिः स ते विप्रवरोदितोऽसौ। पराशरस्यैव ऋषेर्मतेन द्विजैस्तथैवाचरणीय एषः ।।७३।। इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्र पञ्चमप्रकरणे धर्मोपदेशे गृहस्थधर्मेषु कृषिकर्मविधिनिरूपणनामा पञ्चदशोऽध्यायः ।।१५।।

श्रीनारायणमुनिरुवाच - मातापित्रोर्गुरूणां च पूजा बहुमता मम। या द्विजानां गृहस्थानामिहामुत्र सुखप्रदा ।।१।। यच्च तेऽभ्यनुजानीयुः स धर्म इति निश्चयः। एत एव त्रयो वेदास्त्रयो देवास्त्रयोऽग्नयः ।।२।। त्रिष्वेतेष्वप्रमाद्यन् यस्त्रींल्लोकान्स जयेद्ध्रुवम्। नैतान्क्वाप्यवमन्येत नित्यं ह्यनुसरेद्द्विजः ।।३।। तेषामनादरात्सर्वाः सत्क्रियाः स्युर्हि निष्फलाः। न चायं न परो लोकः शुभस्तदवमानिनः ।।४।। श्रोत्रियेभ्यो दशभ्यश्च सदाचार्योऽधिको मतः। तेभ्यो दशभ्य एकः स्यादुपाध्यायोऽधिकः किल ।।५।। तेभ्यो दशभ्यश्च पिता गौरवेणातिरिच्यते। पितुर्दशगुणं माता पूजनीया गरीयसी ।।६।। गुरुर्गरीयान्पितृतो

---

થાય. (૬૯) પ્રતિગ્રહથી પ્રાપ્ત થયેલા દ્રવ્યાદિથી ચોથો ભાગ, વાણિજ્યના લાભમાંથી ત્રીજો ભાગ, ખેતી દ્વારા ઉત્પન્ન થયેલા અન્નથી વીશમો ભાગ આપનાર બ્રાહ્મણને પાતક નથી. (૭૦) જો ધર્મપૂર્વક ખેતી કરે, તો કલિયુગમાં કૃષિ વિના બીજી કોઈ વૃત્તિ સારી નથી જ. કૃષિ સિવાય બીજી વૃત્તિમાં સુખ નથી. (૭૧) ખેતીના વ્યવસાયથી માણસ અન્નવસ્ત્ર વિના દુઃખી થતો નથી. ગાય અને વૃષભ રાખનાર અતિથિસત્કારમાં તત્પર રહે છે, તેથી કદી આપત્તિનો પ્રસંગ પણ ઉપસ્થિત થતો નથી. (૭૨)

હે વિપ્રવર્ય ! પરાશર ઋષિના મતથી જ બ્રાહ્મણાદિ ત્રણ વર્ણનો કૃષિકર્મનો જે વિધિ છે, તે વિધિ મેં તમોને કહ્યો. ત્રણ વર્ણવાળાએ આ કૃષિકર્મના વિધિ મુજબ જ આચરણ કરવું. (૭૩)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે ગૃહસ્થધર્મેષુ કૃષિકર્મ વિધિ નિરૂપણનામા પંચદશોઽધ્યાયઃ (૧૫)*

## અધ્યાય : ૧૬

## ધર્મપુત્ર શ્રીહરિએ ગુરુજનોનું સન્માન કેવી રીતે કરવું, એ આદિક ગૃહસ્થધર્મો સ્ફુટપણે નિરૂપણ કરેલા છે.

**શ્રી નારાયણ મુનિ કહે છે :** હે બ્રહ્મન્ ! માતા-પિતા અને ગુરુઓની પૂજા મેં અતિશય યોગ્ય માનેલી છે. જે માતા વગેરેની પૂજા ગૃહસ્થ દ્વિજોને આ લોકમાં અને પરલોકમાં મહાસુખ આપનારી છે. (૧) માતા વગેરે જે યથાવિધિ આજ્ઞા કરે, તે ધર્મ છે. એ નિશ્ચય વાત છે. માટે એ માતા-પિતા અને ગુરુઓ એજ ત્રણ વેદો- (ઋગ્-યજુ-સામવેદ) ને તુલ્ય છે. ત્રણ દેવો-બ્રહ્મા, વિષ્ણુ, મહેશના સમાન છે. તથા ત્રણ અગ્નિઓ- (દક્ષિણાગ્નિ વગેરે ત્રણ)ના સમાન છે. એ માતા વગેરે ત્રણ જો સદ્ધર્મમાં નિષ્ઠાવાળા હોય તો કહ્યા પ્રમાણે જાણવા. (જો એમ ન હોય તો, ત્યાગ કરવાનું પણ મનુએ કહેલું છે.) (૨) જે બ્રાહ્મણ માતાદિ ત્રણમાં, એમની સેવામાં પ્રમાદ કરે નહિ, તે ભૂમિ આદિક ત્રણ લોકને જીતે છે. માટે એ માતાદિ ત્રણની ક્યારેય પણ અવજ્ઞા કરે નહીં. નિત્ય એમની અનુવૃત્તિનું પાલન કરે. (૩) માતાદિ ત્રણના અનાદરથી સર્વે સત્ક્રિયાઓ નિષ્ફળ થાય જ. તેઓનું અપમાન કરનારને શુભ (સુખાકારી) આ લોક નથી, તેમજ શુભ પરલોક પણ નથી. (૪) દશ શ્રોત્રિય બ્રાહ્મણોથી ઉપનયનસંસ્કાર કરીને વેદાધ્યયન કરાવનાર આચાર્ય (ગાયત્રી મંત્ર પ્રદાતા) હંમેશા અધિક માનેલા છે. દશ આચાર્યોથી સર્વ ક્રિયાઓ કરીને વેદાધ્યાપક ગુરુ (ઉપાધ્યાય) અધિક માનેલા છે જ. (૫) તેવા દશ ઉપાધ્યાયોથી પિતાનું મહત્ત્વ અધિક છે. પિતાથી દશગણી માતા અતિ શ્રેષ્ઠ છે. માટે જ પૂજનીય છે. (ગર્ભધારણ અને બાળકનું પોષણ કરવાથી માતા વધુ ગૌરવવાળી ગણાય છે.) (૬) પિતા અને માતાથી પણ વિશેષ, મેં કહેલા ગુરુ આત્મા-



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मातृतश्चापि मे मतः । शरीरमेव सृजतः पितरौ धर्मकारणम् ॥७॥ गुरुस्तु ज्ञानदानेन शिष्यं शारीरबन्धनात् । विमोचयति तेनासौ गरीयानुच्यते ततः ॥८॥ दोषयुक्ता अपि च ते दूषणीया न सूनुना । न ताड्या भर्त्सनीया वा पूजनीया हि सर्वथा ॥९॥ उपदेशैर्निजाज्ञानं हृत्वा योऽ मृतमृच्छति । तस्मै न गुरवे द्रुह्येज्जानन्नस्य कृतं बुधः ॥१०॥ यतश्च विद्यामाप्नोति वाङ्मनः कर्मभिस्तु तम् । यो नार्चयति तस्य स्याच्छ्रुतं सर्वं हि निष्फलम् ॥११॥ गुरोरनादरं कुर्याद्यः पुमान्दर्पमोहितः । भ्रूणहत्याधिकं पापं प्राप्नुयात्स न संशयः ॥१२॥ प्रजापतिं प्रीणयति पितरं प्रीणयन्पुमान् । मातरं प्रीणयन्पृथ्वीं प्रीणयत्येव पूरुषः ॥१३॥ ब्रह्मैव पूजितं तेन गुरुर्येन प्रपूजितः । मातृतः पितृतश्चापि तस्मात्पूज्यतमो गुरुः ॥१४॥ मातरं पितरं तस्माद्गुरुं चानुसरेत्सदा। एषां त्रयाणां द्रोग्धा तु कुम्भीपाके पतेद्ध्रुवम् ॥१५॥ मित्रद्रुहः कृतघ्नस्य सीरघ्नगुरुघातिनोः । यत्पापं जायते पुंसो निष्कृतिर्नास्ति तस्य हि ॥१६॥ पित्रादिभिस्त्रिभिर्नैव गृहस्थः संवदेत्क्वचित् । तथर्त्विग्भिर्मातुलेन दासैश्चातिथिभिः सह ॥१७॥ वृद्धबालातुरकृशैर्ज्ञातिसम्बन्धिबान्धवैः । भ्रात्रा दुहित्रा पुत्रेण जामीभिर्भार्यया तथा ॥१८॥ गृहस्थ एतैः संवादं न कुर्वीत कदाचन । एतैर्जितस्तु जयति सर्वांल्लोकान्न संशयः ॥१९॥ स्वहितार्थी द्विजन्मा च नित्यं सच्छास्त्रसेवनम् । कुर्यात्तदर्थाज्ञाने तु सतः पृच्छेच्च तद्विदः ॥२०॥ यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं वा ऋषिभाषितम् । दूषयेदनभिज्ञाय स भवेद्ब्रह्मघातकः॥२१॥ यतेरन्नं न भोक्तव्यं प्राणैः कण्ठगतैरपि । गोमांसेन समं तत्तु सुराबिन्दुसमं जलम् ॥२२॥ यतीनां काञ्चनं दत्त्वा ताम्बूलं ब्रह्मचारिणाम् । चौराणामभयं दत्त्वा दातापि नरकं व्रजेत् ॥२३॥ यतिभ्यः श्रद्धया दद्याद्भिक्षां पात्रप्रपूरणीम् । सर्वै रसैरुपेतां च तत्पुण्यं स्यादनन्तकम् ॥२४॥ यो व्याधितानां भिक्षूणां कुर्यात्स्थानं

પરમાત્માના જ્ઞાન આપનારા, મેં અતિશ્રેષ્ઠ માનેલા છે; કારણ કે માતાપિતા ધર્મોત્પાદનમાં કારણભૂત શરીર જ ઉત્પન્ન કરે છે. (૭) ગુરુ તો જ્ઞાન આપવાથી શિષ્યને અનાદિ અવિદ્યામય કારણાદિ ત્રણ શરીરના બંધનથી મુકાવે છે. માટે ગુરુ માતાપિતાથી અતિશ્રેષ્ઠ છે. (૮) માતાદિ ત્રણેય દોષયુક્ત હોય, તો પણ પુત્રે દોષ પોતાને મુખે ઉચ્ચારવો નહિ. તાડન કરવાં નહીં. અને તિરસ્કાર કરવો નહીં. કારણ કે સર્વ પ્રકારે પૂજનીય છે જ. (૯) જે ગુરુ આત્મસ્વરૂપના જ્ઞાનના ઉપદેશોથી પોતાના શિષ્યનું અનાદિ અજ્ઞાન નાશ કરે છે, મોક્ષ પમાડે છે. વિદ્વાન શિષ્ય, આ ગુરુના ઉપકારને જાણીને મોક્ષદાયક ગુરુનો દ્રોહ ના કરે. (૧૦) જે શિષ્ય ગુરુથી જ્ઞાન પામે છે, તે ગુરુની જે શિષ્ય મન, વચન, કર્મથી પૂજા કરતો નથી, તે શિષ્યનું સર્વ શાસ્ત્રનું અધ્યયન નિષ્ફળ જ થાય છે. (૧૧) જે પુરુષ ગર્વથી મોહ પામીને ગુરુનો અનાદર કરે, તે પુરુષ બાળહત્યાથી અધિક પાપ પામે, એમાં સંશય નથી. (૧૨) પુરુષ, પિતાને પ્રસન્ન કરે એટલે બ્રહ્માને પ્રસન્ન કર્યા તુલ્ય છે. માતાને પ્રસન્ન કરનાર પુરુષ પૃથ્વીદેવીને પ્રસન્ન કરે છે. (૧૩) જે પુરુષે ગુરુને પૂજ્યા, તેણે બ્રહ્મ=વાસુદેવને પૂજ્યા છે. માટે ગુરુ, માતા અને પિતાથી પણ અતિશયપણે પૂજનીય છે. (૧૪) માટે માતાપિતા અને ગુરુને સદા અનુવર્તે. એ માતાદિ ત્રણના દ્રોહકર્તા પુરુષ તો કુંભીપાકમાં જ પડે છે. (૧૫) મિત્રનો દ્રોહ કરનાર પુરુષ, કૃતઘ્ની, કૃષિનો નાશકર્તા, ગુરુનો ઘાત કરનાર તથા માતા વગેરેનો દ્રોહ કરનાર પુરુષોને જે પાપ થાય છે, તે પાપનું પ્રાયશ્ચિત્ત જ નથી. (૧૬) ગૃહસ્થે પિતાદિ ત્રણની સાથે ક્યારેય પણ વિવાદ (ક્લેશ) કરવો નહિ તથા યાજક બ્રાહ્મણોની સાથે, મામા, દાસ, અતિથિઓની સાથે વિવાદ કરવો નહીં. (૧૭) વૃદ્ધ, બાળક, રોગી, દુર્બલ, જ્ઞાતિજનો, સંબંધી, બંધુજનો, ભાઈ, પુત્રી, પુત્ર, કુળની સ્ત્રીઓ અને બહેન તથા પત્નીની સાથે ગૃહસ્થ વિવાદ ક્યારેય ન કરે. એ પિતાદિએ જિતાયેલો સર્વ લોકોને જીતે છે. એમાં સંશય નથી. (૧૮-૧૯)

વળી, પોતાના હિતને ઈચ્છતો દ્વિજ, નિત્ય શ્રીમદ્ ભાગવતાદિ સદ્ગ્રન્થનું પઠન-પાઠન અભ્યાસ કરે. સત્ શાસ્ત્રના અર્થોનો બોધ ના હોય તો તેને જાણનારા સત્પુરુષોને પૂછે. (૨૦) જે દ્વિજ, પ્રવૃત્તિમાર્ગને જણાવનારી શ્રુતિ કે સ્મૃતિને, તેનો આશય નહીં જાણીને મંદમતિ પુરુષ જો તેની નિન્દા કરે, તો તેને **બ્રહ્મહત્યા**નું પાપ લાગે છે. (૨૧) કંઠમાં પ્રાણ આવેલા હોય, તો પણ સંન્યાસીનું અન્ન ખાવું નહીં. યતિનું અન્ન **ગોમાંસ** તુલ્ય છે. યતિનું જળ **સુરાબિન્દુ** તુલ્ય છે. (૨૨) યતિઓને સુવર્ણ, બ્રહ્મચારીઓને તાંબૂલ-પાનબીડી અને ચોરોને અભય આપીને દાતા પણ નર્કમાં પડે. (૨૩) યતિનું ભિક્ષાપાત્ર સર્વ રસો અને અન્નથી શ્રદ્ધાથી ભરી દે, તેનું અનંતગણું ફલ પ્રાપ્ત થાય છે. (૨૪) જે ગૃહસ્થ, રોગી ભિક્ષુઓનો શુભ મઠ કરે,



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

शुभं च तान् । पथ्यादिभिः परिचरेत्तस्य पुण्यमनन्तकम् ॥२५॥ यतिं दृष्ट्वा समुत्थाय नत्वा पाद्यासनादिभिः । मानयेद्यो गृही नैव तस्य पुण्यं निरर्थकम् ॥२६॥ भिक्षमाणो ब्रह्मचारी यतिस्त्यागी द्विजोऽपि वा । येनापमानित भिक्षामदत्त्वा स तु ब्रह्महा ॥२७॥ माता पिता गुरुः पत्नी स्वस्यापत्यानि चाश्रिताः । अभ्यागतोऽतिथिश्चाग्निः पोष्या नित्यममी नव ॥२८॥ दीनानाथविशिष्टेभ्यो दातव्यं भूतिकाम्यया। अदत्तदाना जायन्ते परभाग्योपजीविनः ॥२९॥ न्यायागतेन द्रव्येण कर्तव्यं पारलौकिकम् । दानं च विधिना देयं काले पात्रे च भावतः ॥३०॥ विधिहीनमपात्रे च यो ददाति प्रतिग्रहम् । न केवलं हि तद्याति शेषं तस्य विनश्यति ॥३१॥ अनृतेन क्षरेद्यज्ञस्तपो विस्मयतः क्षरेत् । क्षरेत्कीर्तनतो दानमायुर्विप्रावमानतः ॥३२॥ वयोवृद्धांस्तपोवृद्धाञ्जात्युत्कृष्टान्यथोचितम् । मानयेद्विनयेनैव गृही निर्मत्सरः सदा ॥३३॥ विप्राणां ज्ञानतो ज्यैष्ठ्यं बाहुजानां तु वीर्यतः । वैश्यानां धनधान्याभ्यामितरेषां तु जन्मतः ॥३४॥ पुरःस्थितं क्रमप्राप्तं ब्राह्मणं भोजनेऽर्चने । दाने चापि विहायान्यं न स्वीकुर्यात्कदाचन ॥३५॥ ब्राह्मणातिक्रमे दोषो मूर्खविप्रे न विद्यते । ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते ॥३६॥ यो मानयेद्गुरुजनान्विनयेन विप्रान् साधूंश्च सोऽत्र लभते महतीं हि कीर्तिम् । मृत्वा परत्र च निजेप्सितभूरिसौख्यं प्राप्नोति वै गृहिजनो द्विजवर्य! लोके ॥३७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे गृहस्थधर्मेषु गुरुजनसन्मानिरूपणनामा षोडशोऽध्यायः ॥१६॥

---

તે રોગી સંન્યાસીઓને પથ્ય અન્ન આપવા વગેરેથી પરિચર્યા કરે, તે ગૃહસ્થ અનંત પુણ્યવાન થાય. (૨૫) જે ગૃહસ્થ યતિને જોઈને ઊભા થઈને નમસ્કાર કરી, પાદપ્રક્ષાલન અર્થે જળ વગેરે ન આપે, સન્માન ન કરે તો તે ગૃહસ્થનું પુણ્ય નિષ્ફળ થાય. (૨૬) ભિક્ષાન્નની યાચના કરતા બ્રહ્મચારી, યતિ, અચ્યુત ગોત્રી સાધુ અથવા બ્રાહ્મણને ગૃહસ્થ ભિક્ષા ન આપે અને અપમાન કરે, તો તે ગૃહસ્થને બ્રહ્મહત્યા સમાન પાપ થાય. (૨૭) પોતાની માતા, પિતા, ગુરુ, પત્ની, પુત્રો, આશ્રય કરીને જીવતા, અભ્યાગત, અતિથિ, અગ્નિ : આ નવ પ્રતિદિન પોષણ કરવા યોગ્ય છે. (૨૮) પોતાના ઉદયની ઈચ્છાથી રાંક, અનાથ, તથા તપ વિદ્યા વગેરેથી શ્રેષ્ઠ-તેમને ગૃહસ્થે યથાશક્તિ અન્નાદિ આપવું. કારણ કે જે અન્નદાન નથી કરતા તે પારકાના ભાગ્યોથી જીવનારા થાય છે. (૨૯) માટે ન્યાયથી પ્રાપ્ત થયેલા દ્રવ્યથી પરલોકમાં હિત કરનારા યજ્ઞાદિક કરવા. દાનના સમયમાં સત્પાત્ર બ્રાહ્મણાદિને શ્રદ્ધાથી વિધિપૂર્વક દાન કરવું. (૩૦) જે ગૃહસ્થ શાસ્ત્રોક્ત વિધિ રહિત, જેમ હોય તેમ, સત્પાત્ર ગુણે રહિતને દાન આપે છે, તે ગૃહસ્થનું માત્ર અપાત્રે આપેલું જ દ્રવ્ય નાશ પામતું નથી, પરંતુ બાકી દ્રવ્ય પણ વિનાશ પામે છે જ. (૩૧) વિધિપુરઃસર યજ્ઞથી થયેલું સુકૃત વારંવાર અસત્ય બોલવાથી, છિદ્રવાળા ઘડામાંથી જેમ જળ ધીરે ધીરે સ્ત્રવી જાય છે, તેમ તપ પણ વિસ્મય-(અહો, મેં મોટું તપ કર્યું તેવા અહંકાર)થી નાશ પામે છે. દાન કીર્તિથી નાશ પામે છે. આયુષ્ય, બ્રાહ્મણના અપમાનથી નાશ પામે છે. માટે યજ્ઞાદિકમાં અસત્યાદિકનો પરિત્યાગ કરે. (૩૨) ગૃહસ્થે, મત્સર વર્જિત થઈને વયોવૃદ્ધ, તપોવૃદ્ધ જાતિશ્રેષ્ઠોને યથાયોગ્ય વિનયથી હંમેશા માન આપવું. (૩૩) બ્રાહ્મણોને વેદાદિ વિદ્યાથી શ્રેષ્ઠપણું, ક્ષત્રિયોને શરીર અને બુદ્ધિ વગેરેના સામર્થ્યથી શ્રેષ્ઠપણું છે. વૈશ્યોને ધનધાન્યથી મહત્પણું છે. શૂદ્રાદિનું માતાપિતાની શુદ્ધિથી મહત્પણું છે. માટે વિપ્રાદિએ જ્ઞાનાદિ ગુણો સંપાદન કરવા. (૩૪) ભોજન માટે પંક્તિમાં બેઠેલા બ્રાહ્મણોના પૂજનમાં અને દાનમાં પણ પોતાની આગળ રહેલા; અનુક્રમથી આવેલા બ્રાહ્મણોનો ત્યાગ કરીને, બીજા બ્રાહ્મણનો ક્યારેય સત્કાર કરવો નહિ. (૩૫) આગળ રહેલા બ્રાહ્મણના ઉલ્લંઘનમાં શાસ્ત્રમાં કહેલો દોષ, મૂર્ખ બ્રાહ્મણમાં જણાતો નથી. કારણ કે જાજવલ્યમાન અગ્નિનો ત્યાગ કરીને ભસ્મમાં હોમ થતો નથી. (૩૬)

હે દ્વિજવર્ય, જે ગૃહસ્થ અગાઉ કહેલાં ગુરુજનોને, વિપ્રોને તથા સાધુઓને વિનયથી માને તે આ લોકમાં મહાકીર્તિ પામે છે જ. અને મરીને પરલોકમાં પોતાને ઈચ્છિત અત્યંત સુખને પામે છે જ. (૩૭)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે ગૃહસ્થધર્મેષુ ગુરુજન સન્માનનિરૂપણ નામા ષોડશોડધ્યાયઃ (૧૬)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच - **वदाम्यथ सदाचारं गृहस्थानां हितावहम् । सद्भिराचर्यते यस्मात्सदाचारस्ततो मतः ॥१॥ आचारवन्तो मनुजा लभन्ते आयुश्च वित्तं च सुतांश्च सौख्यम् । धर्मं तथा शाश्वतमीशलोकमत्रापि विद्वज्जनपूज्यतां च ॥२॥ आचारेण सदा विद्वान्वर्तते यो जितेन्द्रियः । स ब्रह्म परमभ्येति वरेण्योऽमुत्र चेह च ॥३॥ आचारः परमो धर्म आचारः परमं तपः । आचाराद्वर्धते ह्यायुराचारात्पापसङ्क्षयः ॥४॥ रागविद्वेषरहिता अनुतिष्ठन्ति यं भुवि । विद्वांसस्तं सदाचारं धर्ममूलं विदुर्बुधाः ॥५॥ प्रथमं धर्मसर्वस्वं यमाश्च नियमा मताः । अतस्तेष्वेव कर्तव्यः प्रयत्नः सर्वथा बुधैः ॥६॥ सत्यं क्षमार्जवं ध्यानमानृशंस्यमहिंसनम् । दमः प्रसादो माधुर्यं मृदुतेति यमा दश ॥७॥ शौचं स्नानं तपो दानं मौनेज्याध्ययनं व्रतम् । उपोषणं ब्रह्मचर्यं दशैते नियमाः स्मृताः ॥८॥ कामं क्रोधं मदं मोहं मात्सर्यं लोभमेव च । अमून् षड्वैरिणो जित्वा सर्वत्र विजयी भवेत् ॥९॥ धर्ममेव सदा रक्षेत्परलोकसुखावहम् । नान्यः कोऽपि सहायोऽस्ति जनस्यामुत्र तं विना ॥१०॥ गृहेभ्योऽर्था निवर्तन्ते श्मशानात्पुत्रबाधन्वाः । स्वकृतं केवलं कर्म गच्छन्तमनुगच्छति ॥११॥ अनभ्यासात्तु वेदानां सदाचारस्य वर्जनात् । आलस्यादन्नदोषाच्च द्विजान्मृत्युर्जिघांसति ॥१२॥ ततोऽभ्यसेत्प्रयत्नेन सदाचारं सदा द्विजः । तीर्थान्यप्यभिवाञ्छन्ति सदाचारसमागमम् ॥१३॥ ब्राह्मे मुहूर्त उत्थाय चिन्तयेदात्मनो हितम् । रजन्या अन्तिमो यामो मुहूर्तो ब्राह्म उच्यते ॥१४॥ उपान्त्यो वा मुहूर्तोऽपि रजन्या ब्राह्मसंज्ञितः । तत्र निद्रा तु या नृणां सा पुण्यक्षयकारिणी ॥१५॥ सुप्त्वा प्रमादतस्तत्र तद्दोषस्यापनुत्तये । प्रायश्चित्तं प्रकुर्वीत पादकृच्छ्रं द्विजः खलु ॥१६॥ ध्यात्वा ततः स्वहृदये**

## અધ્યાય : ૧૭

### ગૃહસ્થ બ્રાહ્મણોના સદાચાર તથા આહ્નિક વિધિનું સર્વ પ્રકારે નિરૂપણ કરેલું છે.

**શ્રીનારાયણમુનિ બોલ્યા :** હે બ્રહ્મન્ ! હવે ગૃહસ્થોને હિતકારક સદાચાર કહું છું. જે માટે સજ્જનોએ જે આચરણ કરાય છે તે સદાચાર માનેલો છે. (૧) આચારવાળા મનુષ્યો, દીર્ઘાયુષ, વિત્ત, સુત, સુખ અને ધર્મ તથા સનાતન વિષ્ણુલોકને પામે છે. (૨) જે વિદ્વાન, જિતેન્દ્રિય થઈને સદાચારપૂર્વક વર્તે છે, તે પરમ બ્રહ્મ શ્રીવાસુદેવને પામે છે. આ લોકમાં અને પરલોકમાં શ્રેષ્ઠ થાય છે. (૩) આચાર છે તે પરમ ધર્મ છે. આચાર પરમ તપ છે. આચારથી આયુષ્ય વૃદ્ધિ પામે છે. આચારથી પાપનો નાશ થાય છે. (૪) રાગ અને દ્વેષે રહિત, વિદ્વાનો પૃથ્વીમાં જે સદાચારને આચરે છે, વિદ્વાનો તે સદાચારને ધર્મનું મૂલ જાણે છે. (૫) પ્રથમ ધર્મના રહસ્યરૂપ યમો અને નિયમો માનેલા છે. માટે વિદ્વાનોએ યમો અને નિયમો પાળવામાં જ સર્વ પ્રકારે શ્રમ કરવો. (૬) સત્ય, ક્ષમા, આર્જવ, (સરલતા) પોતાના ઈષ્ટદેવનું ચિંતન, અક્રૂરતા, અહિંસા, દમ, પ્રસાદ, માધુર્ય (હિતકર અને પ્રિય બોલવું), મૃદુતા; - આ દશ **યમો** કહેલા છે. (૭) શૌચ, (આહારાદિની શુદ્ધિ) સ્નાન, તપ, દાન, મૌન, પોતાના ઈષ્ટદેવનું આરાધન, અધ્યયન (યથાશક્તિ સત્શાસ્ત્ર-પઠન) વ્રત (એકાદશી વગેરે) ઉપવાસ, બ્રહ્મચર્યપાલન, આ દશ **નિયમો** કહેલા છે. (૮) કામ, ક્રોધ, મદ, મોહ, મત્સર, લોભ; આ વૈરીઓને જીતીને સર્વ સ્થાનો પર વિજયી થાય. (૯) પરલોકમાં સુખ કરનારો ધર્મ સદા રક્ષણ કરે. તે ધર્મ વિના પરલોકમાં માણસને બીજો કોઈ સહાયક નથી. (૧૦) ધન ગૃહમાં જ રહે છે. પુત્ર અને બંધુજનો સ્મશાનથી પાછા વળે છે. કેવળ ધર્મ અને અધર્મ દેહનો ત્યાગ કરતા પુરુષ સાથે પરલોકમાં સાથે જ જાય છે. (૧૧) વેદાભ્યાસ ન કરવાથી, સદાચાર ત્યાગ કરવાથી, નિષિદ્ધ અન્નના ભોજનથી, સ્નાન-સંધ્યા-અનુષ્ઠાનમાં પ્રતિદિન આળસ કરવાથી બ્રાહ્મણો અનર્થને નોતરી, પતન પ્રાપ્ત કરે છે. તેવાઓને યમરાજા હણવા ઈચ્છે છે. માટે હિતેચ્છુ જનોએ આ ચાર દોષ વર્જવા. (૧૨) તેથી દ્વિજે, સદાચાર, સંત-સમાગમ, વેદાભ્યાસ, તીર્થોનું સેવન કરી સદાચારલાભ મેળવવો, તીર્થો પણ સદાચારી પુરુષોનો સમાગમ ઈચ્છે છે. (૧૩) બ્રાહ્મમુહૂર્તમાં ઊઠીને પોતાના હિતનું ચિંતવન કરે, બ્રાહ્મમુહૂર્ત એટલે રાત્રિના અંતની સમીપનું મુહૂર્ત. (૧૪) તે બ્રાહ્મ સંજ્ઞાવાળું કહેવાય છે. **બ્રાહ્મમુહૂર્તની નિદ્રા પુરુષના પુણ્યનો ક્ષય કરનારી** કહી છે. (૧૫) બ્રાહ્મમુહૂર્તમાં રોગાદિ આપત્કાલ વિના નિદ્રા કરી હોય, તેવા બ્રાહ્મણે નિદ્રાચરણના પાપની નિવૃત્તિ માટે **'પાદકૃચ્છ્ર'** પ્રાયશ્ચિત્ત કરવું. (૧૬) પછી પોતાના હૃદયમાં પરમાર્થ પ્રદાતા હરિનું ધ્યાન કરી અને તેમનું નામ-સ્મરણ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सद्गुरुं प्रणमेद्धरिम् । भक्तानां तस्य नामानि कीर्तयन्प्रणमेन्मुदा ॥१७॥ तद्विभूतीस्तथा देवान्महर्षींश्चापि संस्मरन् । पुण्यक्षेत्राणि गङ्गाद्याः सरितः प्रणमेत्स च ॥१८॥ प्रातः स्मरामि भवभीतिमहार्तिशान्त्यै नारायणं गरुडवाहनमब्जनाभम् । ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥१९॥ प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादारविन्दयुगलं परमस्य पुंसः । नारायणस्य नरकार्णवतारकस्य पारायणप्रवरविप्रपरायणस्य ॥२०॥ प्रातर्भजामि भजतामयभयंकरं तं प्राक्सर्वजन्मकृतपापभयापहत्यै । यो ग्राहवक्त्रपतिताङ्घ्रिगजेन्द्रघोरशोकप्रणाशनकरो धृतशङ्खचक्रः ॥२१॥ श्लोकत्रयमिदं पुण्यं प्रातःप्रातः पठेन्नरः । लोकत्रयपतिस्तस्मै दद्यादात्मपदं हरिः ॥२२॥ ततः पुमान्स उत्थाय कुर्याद्विण्मूत्रकर्म च । नैर्ऋत्यां शरविक्षेपमितां भूमिमतीत्य वै ॥२३॥ अन्तर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा । कुर्यान्मूत्रपुरीषे तु शुचौ देशे च निर्जने ॥२४॥ दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः । कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ॥२५॥ छायायामन्धकारे वा रात्रावहनि वा द्विजः । यथासुखमुखः कुर्यात्प्राणबाधाभयेषु च ॥२६॥ बहिर्ग्रामान्न गन्तव्यं निशि तूत्सर्गकर्मणे । कार्यं गृहसमीपादौ तथा रोगिजनेन तत् ॥२७॥ मलोत्सर्गविधिं कृत्वा याम्यायां दिशि वा पुमान् । मृदाम्बुना चरेच्छौचं विशुद्धेऽथ जलाशये ॥२८॥ न तिष्ठन्नाप्सु नो विप्रगोवह्न्यर्केन्दुसम्मुखः । न फालकृष्टभूभागे न मार्गे न नदीतटे ॥२९॥ गवां मध्ये धान्यमध्ये जीर्णदेवालये क्वचित्। विण्मूत्रष्ठीवनं नैव कुर्यात् स्त्रीसम्मुखस्तथा ॥३०॥ शतहस्तं परित्यज्य मूत्रं कुर्याज्जलाशयात् । शतद्वयं पुरीषे तु तीर्थे चैतच्चतुर्गुणम् ॥३१॥ गृह्णीयान्न मृदं मार्गान्नोषराद्विट्स्थलादपि । शौचोच्छिष्टां

---

કરીને નમસ્કાર કરે. શ્રીહરિના ભક્તોનાં નામોનું સંકીર્તન કરતાં કરતાં હર્ષ પૂર્વક પ્રણામ કરે. (૧૭) તે બ્રાહ્મણ શ્રીહરિની વિભૂતિરૂપ બ્રહ્માદિ દેવોને તથા સનકાદિ મુનિઓ, દ્વારિકા આદિ પુણ્યક્ષેત્રો, ગંગાદિ નદીઓને સંભારતાં સંભારતાં પ્રણામ કરે. (૧૮) ગરુડ ઉપર બેઠેલા, કમલનાભ, ગજગ્રાહમાં પરાભવ પામતાં ગજેન્દ્રને મોક્ષ અપાવી રહેલા, સુદર્શન ચક્રધારી, નવીન કમળના પત્ર સમાન નેત્રોવાળા, નારાયણ શ્રી વાસુદેવનું સંસૃતિના ભયની મહાપીડાની નિવૃત્તિ માટે પ્રાતઃકાલમાં સ્મરણ કરું છું. (૧૯) પરમ પુરુષ, નરકરૂપી સમુદ્રને પાર પમાડનાર, મુમુક્ષુજનોને આશ્રય કરવા યોગ્ય શ્રેષ્ઠ બ્રાહ્મણો જે નારદાદિ તેમને પણ આશ્રય કરવા યોગ્ય, શ્રી નારાયણના બંને ચરણકમળને મન-વાણી અને મસ્તકથી પ્રાતઃકાલમાં નમસ્કાર કરું છું. (૨૦) પોતાની ભક્તિ કરનાર જનોને સંસારાદિ મહાભયનો નાશ કરનાર, તે નારાયણને પૂર્વ જન્મમાં થયેલાં સર્વ પાપોના ભયની નિવૃત્તિ માટે પ્રાતઃકાલમાં નમસ્કાર કરું છું : જે નારાયણ ગજગ્રાહ વેળાએ ગજેન્દ્રનો મોક્ષ કરનાર, તેના ઘોર શોકને નિવૃત્ત કરતા હતા તે શંખ, ચક્રધારી નારાયણને હું નમસ્કાર કરું છું. (૨૧) જે માનવી પાવિત્ર્યકારી આ ત્રણ શ્લોકનો સવારે પાઠ કરે, ત્રિલોકીના એક સ્વામી શ્રીહરિ તે માણસને પોતાના નિવાસસ્થાન ગોલોકમાં સ્થાન આપે છે. (૨૨) પછી તે પુરુષ ઊઠીને ગામથી નૈર્ઋત્ય દિશામાં, ધનુષ્યથી છૂટેલા બાણની ગતિ હોય, તેટલી પૃથ્વી ઉલ્લંઘન કરીને મળમૂત્રનો ત્યાગ કરવા જાય. (૨૩) તૃણથી ભૂમિને ઢાંકીને, વસ્ત્રખંડથી મસ્તકને ઢાંકીને જનસંચારે રહિત દેશમાં મળત્યાગ કરે. (આ અંગિરા મુનિનો મત છે.) (૨૪) જમણા કાને ઉપવીત આરોપણ કરેલો બ્રાહ્મણ દિવસે અને સંધ્યાસમે ઉત્તરાદે મુખે મળમૂત્ર કરવા જાય. રાત્રિએ મળમૂત્ર કરે તો દક્ષિણાભિમુખ થઈ કરે. (આ યાજ્ઞવલ્કયનો મત છે.) (૨૫) બ્રાહ્મણ, પ્રાણના વિપત્તિજનક ભય સમયે રાત્રે કે દિવસે, છાયા કે અંધકારમાં જેમ પોતાને અનુકૂળ પડે અને રક્ષણ થાય તેમ મુખ રાખીને મળવિસર્જન કરે. (આ મનુ અને દેવલનો મત છે.) (૨૬) રાત્રિમાં તો મળમૂત્રનો ત્યાગ કરવા માટે ગામથી બહાર ન જવું. તે ઉત્સર્ગ-કર્મ ગૃહની સમીપે કરી લેવું, તથા રોગી માણસે ગામથી બહાર ન જવું. (૨૭) અથવા - મનુષ્ય દક્ષિણ દિશાએ મલોત્સર્ગ કરીને પછી શુદ્ધ જળાશયમાં મૃત્તિકા અને જળથી શુદ્ધિ કરે. (૨૮) ઊભા ઊભા મળમૂત્ર વિસર્જન કરે નહીં. જળમાં-બ્રાહ્મણ, ગાય, અગ્નિ, સૂર્ય, ચંદ્ર વગેરેની સન્મુખે-ખેડેલી જમીનમાં, માર્ગ અને નદીતટે, ગાયોની મધ્યે, ધાન્યની મધ્યે, જીર્ણ દેવાલયમાં- ક્યારેય પણ મળમૂત્ર કરે જ નહિ. સ્ત્રીની સન્મુખે પણ ના કરે. (૨૯-૩૦) જળાશયથી સો હાથ દૂર મૂત્ર-ત્યાગ કરે, અને બસો હાથ દૂર વિષ્ટાનો ત્યાગ કરે. તીર્થોમાં ચારસો હાથ દૂર મળમૂત્ર ત્યાગ કરે. (૩૧) માર્ગ-ઉષર ભૂમિ- અને વિષ્ટાના સ્થાનથી શુદ્ધિને માટે મૃત્તિકા ગ્રહણ ના કરવી.



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सजन्तुं च तथा वल्मीकसम्भवाम् ॥३२॥ एका लिङ्गे गुदे तिस्रो दश वामकरे मृदः । देयाः सप्तोभयोर्दोष्णोस्तिस्रस्तिस्रश्च पादयोः ॥३३॥ एतदर्धं तु नारीणां शूद्राणां चापि कीर्तितम् । कुर्यान्निशीत्थं विप्रोऽपि पथि शूद्रवदाचरेत् ॥३४॥ कुर्याद्द्वादश गण्डूषान् पुरीषोत्सर्जने द्विजः । मूत्रोत्सर्गे तु षट् कुर्याच्चतुरो वापि धर्मवित् ॥३५॥ पीतशेषं शौचशेषं नाचामेदुदकं द्विजः । पात्रान्तरस्याभावे तत्किञ्चित्त्यक्त्वा तदाचरेत् ॥३६॥ एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् । त्रिगुणं वनिनां प्रोक्तं यतीनां तु चतुर्गुणम् ॥३७॥ आर्तः कुर्याद्यथाशक्ति शक्तः कुर्याद्यथोदितम् । शौचमेतत्प्रयत्नेन देशकालानुसारतः ॥३८॥ कृते मूत्रपुरीषेऽपि यदि नैवोदकं भवेत् । तदा यर्ह्युदकाप्तिः स्यात्तदा स्नायात्सचैलकः ॥३९॥ अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि । कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो न दुष्यति ॥४०॥ कर्तव्यं यत्नतः शौचं शौचमूला द्विजातयः । शौचाचारविहीनानां सर्वाः स्युर्निष्फलाः क्रियाः ॥४१॥ तत्सद्भिर्द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा । मृदम्बुभ्यां भवेद्बाह्यं भावशुद्धिस्तथान्तरम् ॥४२॥ न शुद्ध्येद्बाह्यशौचेन शौचमाभ्यन्तरं विना । तस्मादुभयथा शौचं यः करोति स शुध्यति ॥४३॥ स्त्रियां द्रव्ये च लुब्धस्य प्राणिद्रोहरतस्य च । अवाच्यवक्तुः किं शौचैर्मृत्कूटैश्च नदीजलैः ॥४४॥ मुखस्य शुद्धये कुर्यात्प्रत्यहं दन्तधावनम् । अजन्तुना तु काष्ठेन कनिष्ठाग्रसमेन च ॥४५॥ द्वादशाङ्गुलमानं तत्सार्द्रं विप्रस्य कीर्तितम् । एकैकाङ्गुलह्रासं च क्षत्रादीनां क्रमान्मतम् ॥४६॥ प्रतिपद्दर्शषष्ठीषु व्रताहे श्राद्धवासरे । सङ्क्रान्तावपि काष्ठेन न कुर्याद्दन्तधावनम् ॥४७॥ अलाभे दन्तकाष्ठस्य निषिद्धे च तथाऽहनि । अपां द्वादश गण्डूषैर्विदध्याद्दन्तधावनम् ॥४८॥

---

તથા જે કોઈએ શૌચક્રિયા કરતા બાકી રહેલી અને સૂક્ષ્મ જંતુવાળી તથા રાફડાની મૃત્તિકા શુદ્ધિ માટે ગ્રહણ ન કરવી. (૩૨) એક વાર મૃત્તિકા લઈને લિંગ ધોવું, ત્રણ વાર મૃત્તિકાથી ગુદા ધોવી, આ બે ગુદા પ્રક્ષાલન સમયે કરવું. ડાબો હાથ મૃત્તિકાથી દસ વાર ધોવો અને બન્ને હાથમાં સાત વાર મૃત્તિકા આપવી. બંને પગમાં ત્રણ ત્રણ વાર મૃત્તિકા આપવી. (૩૩) નારીઓ અને શૂદ્રોને પણ અરધી શુદ્ધિ કહેલી છે. બ્રાહ્મણ પણ રાત્રિમાં શૂદ્રની માફક અરધી શુદ્ધિ કરે. તેમજ માર્ગમાં પણ શૂદ્રના સમાન શુદ્ધિ કરે. (૩૪) ધર્મજ્ઞ બ્રાહ્મણ મળવિસર્જન પછી બાર કોગળા કરે. મૂત્રત્યાગ બાદ છ અથવા ચાર કોગળા કરે. (૩૫) દ્વિજ પીવામાંથી બાકી રહેલું, હાથ-પગ ધોવામાંથી બાકી રહેલું જળ પીએ નહિ. બીજા પાત્રનો અભાવ હોય તો, તે પાત્રનું જળ પૃથ્વીમાં લગારેક રેડીને તેનું જળપાન કરવું. (૩૬) ગૃહસ્થોને માટે આ(પૂર્વોક્ત) શુદ્ધિ એક વાર કહેલી છે. બ્રહ્મચારીઓને તેથી બમણી શુદ્ધિ કહેલી છે. વાનપ્રસ્થોને ત્રણ ગણી મૃત્તિકા ગ્રહણ કરવી. સંન્યાસીઓએ ચાર ગણી મૃત્તિકા(માટી) ગ્રહણ કરવી. (૩૭) આ શુદ્ધિ ક્રિયા રોગાદિથી અશક્ત હોય. તે શક્તિ પ્રમાણે કરે. શક્તિમાન પુરુષ ઉપર કહ્યા પ્રમાણે શૌચવિધિ દેશકાલને અનુસરીને પ્રયત્નપૂર્વક કરે. (૩૮) મળમૂત્ર વિસર્જન પછી જળ ન હોય, તો જ્યારે જળ પ્રાપ્ત થાય ત્યારે વસ્ત્રે સહિત સ્નાન કરે. (૩૯) જળે રહિત અરણ્યમાં, રાત્રિમાં અને ચોર-વ્યાઘ્રથી ભયાનક માર્ગમાં જળાશય નહિ મળતાં, મળમૂત્રનો ઉત્સર્ગ કરે તો પણ જો યત્કિંચિત્ પદાર્થ હાથમાં હોય તો શૌચ નહિ કરવાના દોષથી પુરુષ લેપાતો નથી. જળાશય મળતાં પછી યથાવિધિ શૌચ કરે. (૪૦) શુદ્ધિ પ્રયત્નપૂર્વક કરવી, કારણકે દ્વિજજાતિ શુદ્ધિના આશ્રયવાળી હોય છે. શૌચાચાર રહિત દ્વિજોની સર્વ ક્રિયા, સંધ્યા વંદનાદિ કર્મો નિષ્ફળ થાય છે. (૪૧) તે શુદ્ધિ સજ્જનોએ બાહ્ય અને આભ્યંતર-એમ બે પ્રકારે કહી છે. તેમાં મૃત્તિકા અને જળથી **બાહ્ય શુદ્ધિ** થાય. તથા કામાદિ દોષે રહિત અંતઃકરણ તે **આભ્યંતર શુદ્ધિ** કહેવાય. (૪૨) આભ્યંતર શુદ્ધિ વિના, બાહ્ય શુદ્ધિથી શુદ્ધ થાય નહિ. માટે જે દ્વિજ બન્ને પ્રકારની શુદ્ધિ કરે છે તે શુદ્ધ છે. (૪૩) પરસ્ત્રી અને પારકા ધનમાં ભોગની અભિલાષા યુક્ત, પ્રાણીઓના દ્રોહમાં પ્રીતિવાળો તથા અવાચ્ય શબ્દો બોલનાર માણસને મૃત્તિકાના ઢગલા કે સમગ્ર નદીઓના જળ વડે કરાયેલી શુદ્ધિથી કંઈ જ વળે નહીં; તેમ કરવાથી કંઈ જ ફળ મળે નહિ, કે પ્રાયશ્ચિત્ત થાય નહિ. (૪૪)

મુખશુદ્ધિ માટે દરરોજ જન્તુ વિહીન જળ વડે, કનિષ્ઠિકા આંગળીના અગ્રભાગ સમાન સ્થૂલ કાષ્ઠથી દાતણ કરવું. (૪૫) બ્રાહ્મણ માટે દાતણ લીલું બાર આંગળનું કહેલું છે. ક્ષત્રિયાદિ માટે એકેક આંગળ ઓછું માનેલું છે. અર્થાત્ ક્ષત્રિયને અગિયાર, વૈશ્યને દશ આંગળ અને શૂદ્રને નવ આંગળ સમજવું. (૪૬) પ્રતિપદા, અમાવાસ્યા, ષષ્ઠી તિથિઓ અને એકાદશીઓ આદિ વ્રતને દિવસે, શ્રાદ્ધ દિને તથા સંક્રાંતિ-સૂર્ય જ્યારે મેષાદિ સંક્રાંતિ કરે ત્યારે કાષ્ઠથી દાતણ ન કરે. (૪૭) કાષ્ઠનું દાતણ ના મળે ત્યારે તથા પ્રતિપદાદિ નિષિદ્ધ દિવસે જળના બાર કોગળાથી દાતણ કરે. (૪૮) જે દ્વિજ

यस्तु गण्डूषसमये तर्जन्या दन्तधावनम् । करोति स तु मूढात्मा युज्यते पापकर्मणा ॥४९॥ नवाऽऽवश्यककर्माणि द्विजानां प्रतिवासरम् । स्नानं सन्ध्या जपो होमः स्वाध्यायो देवतार्चनम् ॥५०॥ वैश्वदेवं तथातिथ्यं नवमं पितृतर्पणम् । हीनः कर्मभिरेतैस्तु ज्ञेयश्चण्डाल एव सः ॥५१॥ उत्साहमेधासौभाग्यरूपसम्पत्प्रवर्तकम् । मनःप्रसन्नताहेतुः प्रातःस्नानं प्रशस्यते ॥५२॥ प्रातःस्नानं हरत्यंहो दारिद्र्यं ग्लानिमेव च । अशुचित्वं च दुःस्वप्नं तुष्टिं पुष्टिं प्रयच्छति ॥५३॥ जलाशये च कुत्रापि भूरिजन्तुसमाकुले । आपद्यपि न कर्तव्याः स्नानशौचादिकाः क्रियाः ॥५४॥ जलाशये निर्मलेऽपि नीचजात्युपसेविते । स्नानादिका क्रिया नैव कर्तव्यापद्यपि क्वचित् ॥५५॥ न नीचजातिसम्बन्धी वृक्षो वासाय च स्थलम् । उपलिप्तमपि क्वापि स्वीकर्तव्यं द्विजातिना ॥५६॥ अन्नं वासस्थलं चाम्बु यस्य स्यात्तस्य तत्त्वतः । जात्यादिकमपृष्ट्वैव स्वीकार्यं नैव कर्हिचित् ॥५७॥ सन्ध्याहीनोऽशुचिर्विप्रो ह्यनर्हः सर्वकर्मसु । यदन्यत्कुरुते पुण्यं न तस्य फलभाग्भवेत् ॥५८॥ विधियज्ञाः पाकयज्ञा ये चान्ये बहवो मखाः । सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ॥५९॥ धनोपार्जनसक्तो यो नादधात्यनलं द्विजः । सायं प्रातर्न वा होमं कुर्यात्स नरकं व्रजेत् ॥६०॥ यथाशक्ति न यो वेदं तदङ्गं वाऽपि भारतम् । पुराणं वा हरेः स्तोत्रं पठेत्स ब्रह्महा द्विजः ॥६१॥ यो न पूजयते नित्यं भक्त्या देवं जगत्प्रभुम् । स रासभत्वं लभते ततः शूकरतां द्विजः ॥६२॥ माध्याह्निकं वैश्वदेवं गृहस्थः स्वयमाचरेत् । पत्नी सायं बलीन् दद्यात्सिद्धान्नैर्मन्त्रवर्जितम् ॥६३॥ अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजाधमाः । इह लोकेऽन्नहीनाः स्युः काकयोनिं व्रजन्त्यथ ॥६४॥ निष्पावान् कोद्रवान्माषानाढकीश्चणकांस्तथा । तैलपक्वं लवणयुग्वैश्वदेवे विवर्जयेत् ॥६५॥ हुतेन लीयते पापं स्वाध्यायाच्छान्तिमेति च । देवार्चनेन लभते दिव्यं लोकमभीप्सितम् ॥६६॥ अन्नार्थिनि समायाते पात्रापात्रं न चिन्तयेत् । अपि श्वपाके शुनि वा नैवान्नं निष्फलं भवेत्

---

કોગળા સમયે તર્જની આંગળીથી દાતણ કરે છે, તે મૂઢાત્મા તો પાપકર્મથી લેપાય છે. (૪૯) દ્વિજ માટે દરરોજ નવ કર્મો આવશ્યક હોય છે. તે આ પ્રમાણે છે - સ્નાન, સંધ્યા, જપ, હોમ, સ્વાધ્યાય, દેવતાર્ચન, વૈશ્વદેવ, આતિથ્ય અને પિતૃતર્પણ- આ કર્મો રહિત બ્રાહ્મણને **ચાંડાલ** જ જાણવો. (૫૦-૫૧) ઉત્સાહ, મેધા, સૌભાગ્ય, રૂપ તથા સંપત્તિઓનું પ્રવર્તક અને મનની પ્રસન્નતાનું કારણ એવું **પ્રાતઃસ્નાન** વખાણવા યોગ્ય છે. (૫૨) તે પ્રાતઃસ્નાન પાપ, દારિદ્ર્ય, શરીરગ્લાનિ, અશુદ્ધિપણું અને નઠારા સ્વપ્નનો નાશ કરે છે. સંતોષ અને શરીરની પુષ્ટિને આપે છે. (૫૩) બહુ સૂક્ષ્મ જંતુઓથી યુક્ત, કોઈ પણ જળાશયમાં, આપત્કાલમાં પણ સ્નાન-શૌચ આદિ ક્રિયાઓ કરવી નહિ. (૫૪) જળાશય ભલે નિર્મળ હોય, છતાં જો નીચ જાતિ વડે સેવાયેલું હોય, તો આપત્કાલમાં પણ સ્નાનાદિ ક્રિયા ક્યારેય પણ કરવી નહિ. (૫૫) નીચ જાતિથી સંબંધ પામેલું વૃક્ષ અને લીંપેલું સ્થળ પણ દ્વિજોએ નિવાસ કરવા માટે ક્યારેય સ્વીકારવું નહીં. (૫૬) અન્ન, જળ અને નિવાસસ્થાન - જેનું હોય તેની જાતિ વગેરે યથાર્થપણે પૂછ્યા વગર ક્યારેય પણ સ્વીકાર કરવું નહિ. (૫૭) સંધ્યાએ રહિત માટે જ અપવિત્ર બ્રાહ્મણ સર્વ કર્મમાં અયોગ્ય છે, તે સંધ્યા વિનાનું બીજું જે કાંઈ પુણ્ય કરે છે તે પુણ્યના ફળનો ભોક્તા થઈ શકતો નથી. (૫૮) જે યજ્ઞવિધિઓ-ક્રિયાકાંડ યુક્ત યાગો, પાકયજ્ઞ, આગ્રયણઈષ્ટિ આદિક છે અને વિવિધ યાગો છે, તે સર્વે (ગાયત્રી જપ રૂપ) જપયજ્ઞની સોળમી કળાને પણ યોગ્ય થતા નથી. (આ જપયજ્ઞની પ્રશંસા તેની આવશ્યકતાને જણાવે છે.) (૫૯) જે દ્વિજ ધનના ઉપાર્જનમાં આસક્ત રહીને અગ્નિનું આધાન કરતો નથી અને સાયં પ્રાતઃ હોમ કરતો નથી, તે બ્રાહ્મણ નરકમાં જાય. (૬૦) જે દ્વિજ, વેદ અથવા તેના અંગ શિક્ષાદિ અથવા ભારત, પુરાણ તથા હરિના સ્તોત્રો, શક્તિ પ્રમાણે ન ભણે તે દ્વિજ બ્રહ્મહત્યારો થાય છે. (૬૧) જે બ્રાહ્મણ નિત્ય, જગતના એક નાથ શ્રી વાસુદેવને ભક્તિથી પૂજતો નથી, તે **ગર્દભ** જાતિમાં જન્મે છે. પછી શૂકર યોનિને પામે છે. (૬૨) ગૃહસ્થ બ્રાહ્મણ મધ્યાહ્ને અન્નશુદ્ધિ નિમિત્ત કર્તવ્ય વૈશ્વદેવ-પંચમહાયજ્ઞો પોતે આચરણ કરે, સાયંકાળે (પતિની અસન્નિધિમાં) પત્ની, સિદ્ધાન્નોથી મંત્ર રહિત બલિ આપે. (૬૩) જે અધમ દ્વિજ, વૈશ્વદેવ કર્યા વિના ભોજન કરે છે, તે આ લોકમાં અન્ને રહિત થાય છે, અને મરણ પછી કાગડાની યોનિને પામે છે. (૬૪) વાલ, કોદરા, અડદ, તુવેર, ચણા, તેલમાં પકવેલું અન્ન, તથા લવણ મિશ્રિત અન્ન વૈશ્વદેવમાં ત્યાગ કરવાં. (૬૫) હોમથી પાપ નાશ પામે છે, સ્વાધ્યાયથી શાંતિને પામે છે. દેવના પૂજનથી પોતે ઈચ્છેલો દિવ્ય લોક પ્રાપ્ત થાય છે. (૬૬) વૈશ્વદેવના અંતમાં જો અન્નાર્થી આવી જાય તો પાત્ર-અપાત્રનું ચિંતવન કરવું નહીં. કારણ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

॥६७॥ यो न तर्पयते पितॄनुदकाञ्जलिभिर्द्विजः। तदङ्गरुधिरं ते च पिबन्ति प्रत्यहं ननु ॥६८॥ प्रागेव भुक्तेः शृणुयात्पुराणं चेत्संहितामात्रमसौ शृणोतु। सार्थं तु भुक्त्वा निशि वाऽ पराह्ले द्विजानुघस्त्रं शृणुयाद्गृहस्थः ॥६९॥ समागमं चाच्युतभक्तिभाजां यथावकाशं प्रतिवासरं सः । कुर्यात्सतां धर्मपरायणानां सद्बुद्धिलब्धिस्तत एव यत्स्यात् ॥७०॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे सदाचारेषु द्विजानामाह्निकविधिनिरूपणनामा सप्तदशोऽध्यायः ॥१७॥

श्रीनारायणमुनिरुवाच - **प्रातःकृत्यं विधायैव प्रत्यहं गुरुवन्दनम् । गृही कुर्याच्च गुरवस्तस्मै दद्युः शुभाशिषः ॥१॥ आचार्यं स्वमुपाध्यायं मातरं पितरं गुरुम् । धर्मवृद्धं वयोवृद्धमभिवन्देत सर्वथा ॥२॥ लौकिकं वैदिकं वापि ज्ञानमाध्यात्मिकं तथा । आददीत यतस्तं तु पूर्वमेवाभिवादयेत् ॥३॥ पाषण्डिनं च पतितं नास्तिकं पापदूषितम् । साधुद्रुहं कृतघ्नं च न नमेद्गुरुमप्यसौ ॥४॥ धावन्तं च प्रमत्तं च स्नान्तमुत्सर्गकर्म च । कुर्वन्तं दन्तधावं च वमन्तं नाभिवादयेत् ॥५॥ जपयज्ञव्रतस्थं च समित्पुष्पकुशानलान् । उदपात्रं च भैक्षं च वहन्तं नाभिवादयेत् ॥६॥ देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा च वैष्णवम् । सद्यः कुर्यान्नमस्कारं प्रायश्चित्त्यन्यथा भवेत् ॥७॥ एवं योषापि श्वश्र्वाद्या योषाश्च प्रणमेद्गुरुम् । उदक्यां सूतिकां नारीं सा न वन्देत पापिनीम् ॥८॥ अभिवादनशीलस्य नित्यं वृद्धोपसेविनः । चत्वारि सम्यग्वर्धन्ते आयुः प्रज्ञा यशो बलम् ॥९॥ कायेन त्रिविधं कर्म वाचा चापि चतुर्विधम् । मनसा त्रिविधं चेति दश कर्मपथांस्त्यजेत् ॥१०॥ प्राणिनां हिंसनं स्तैन्यं**

કે શ્વપચ અથવા કૂતરાને આપેલું અન્ન પણ નિષ્ફળ જતું નથી. (૬૭) જે બ્રાહ્મણ જલાંજલિથી પિતૃઓને તર્પણ કરતો નથી તેના અંગનું રૂધિર તેના પિતૃઓ દરરોજ પીએ છે. અર્થાત્ રૂધિરપાન તુલ્ય દુઃખ નિશ્ચય પામે છે. (૬૮) આ ગૃહસ્થ ભોજન પહેલાં જ પુરાણ સાંભળે, તો સંહિતા માત્ર સાંભળે ( પુરાણના શ્લોક માત્ર સાંભળે.) અર્થ સહિત પુરાણ સાંભળે ત્યારે તો દરરોજ ભોજન કરીને અપરાહ્ન સમયે અથવા રાત્રે સાંભળે. (૬૯)

ગૃહસ્થ દરરોજ ભગવાનની ભક્તિને કરનારા-ધર્મપરાયણ સાધુઓનો સમાગમ પોતાના અવકાશ પ્રમાણે કરે. કારણ કે પોતાના કલ્યાણની બુદ્ધિની પ્રાપ્તિ સંત-સમાગમથી જ થાય. (૭૦)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે, ધર્મશાસ્ત્રે પંચમ પ્રકરણે, ધર્મોપદેશે સદાચારેષુ દ્વિજાનામ્ આહ્નિક વિધિ નિરૂપણ નામા સપ્તદશોઽધ્યાયઃ (૧૭)*

## અધ્યાય : ૧૮

### શ્રીહરિએ સદાચારોમાં ત્યાજ્ય અને ગ્રાહ્ય કર્મનું નિરૂપણ સારી રીતે સ્પષ્ટ કરેલું છે.

**શ્રી નારાયણમુનિ બોલ્યા** : હે વિપ્ર ! ગૃહસ્થ, દરરોજ પ્રાતઃ સ્નાનાદિ કર્મ કરીને પોતાના ગુરુનું અભિવંદન કરે. અને ગુરુઓ, નમસ્કાર કરનાર ગૃહસ્થને શુભાશીર્વાદો આપે. (૧) ઉપનયન સંસ્કાર આપીને વેદ ભણાવનાર આચાર્યને, વેદનો એક દેશ ભણાવનાર ઉપાધ્યાયને, માતા-પિતા, જ્ઞાનોપદેશ કરનાર ગુરુ, ધર્મ-વૃદ્ધ અને વયોવૃદ્ધ સર્વને સર્વ પ્રકારે નમસ્કાર કરે. (૨) જે ગુરુથી લૌકિક તથા વૈદિક, વેદોક્ત કર્મ સંબંધી તથા આત્મા પરમાત્મા સંબંધી જ્ઞાન ગ્રહણ કરે, તે ગુરુને પ્રથમથી જ વંદન કરે. (૩) પાખંડમાર્ગમાં પ્રીતિવાળો, પતિત, નાસ્તિક, પાપોથી દૂષિત, ભગવાનના એકાંતિક ભક્તોનો દ્રોહ કરનાર અને કૃતઘ્ન એવા ગુરુને પણ નમસ્કાર ન કરે - ત્યાગ કરે. (૪) કાર્યને વશ થઈ ઉતાવળા ચાલતા, રોગાદિથી વિક્ષિપ્ત ચિત્તવાળા, સ્નાન કરતાં, ઉત્સર્ગકાર્ય મગ્ન, દાતણ કરતા, ઊલટી કરતા, જપ અને યજ્ઞ કાર્યમાં જોડાયેલા, વ્રત-નિયમમાં વ્યસ્ત, સમિધ, પુષ્પો, દર્ભો, અગ્નિ, જલપૂર્ણ પાત્ર, ભિક્ષાન્ન વગેરે વહન કરતા ગુરુને તે વેળા અભિવાદન કરવું નહિ. (૫-૬) દેવતાની પ્રતિમાને જોઈને તથા સંન્યાસી અને ભગવાનના ભક્ત સાધુને જોઈને તત્કાલ જ નમસ્કાર કરે. જો નમસ્કાર ન કરે તો **પ્રાયશ્ચિત્તી** થાય. (૭) આ પ્રકારે સ્ત્રીઓ પણ પોતાની સાસુ તથા દીક્ષા આપનારી ગુરુ પત્નીને પ્રણામ કરે. પ્રણામ કરનારી સ્ત્રી, રજસ્વલા-સૂતિકા અને પાપવાળી નારીને પ્રણામ કરે નહિ. (૮) હંમેશાં ગુરુ વગેરેને અભિવંદન કરવાના સ્વભાવવાળાનું અને વૃદ્ધોનું સેવન કરનારાનું આયુષ્ય, પ્રજ્ઞા, બલ, યશ એ ચાર સારી રીતે વૃદ્ધિ પામે છે. (૯) શરીરથી ત્રણ પ્રકારનાં કર્મ, વાણીથી ચાર પ્રકારનાં કર્મ, મનથી ત્રણ પ્રકારનાં કર્મ, આમ કુલ દશ પ્રકારના કર્મનો ત્યાગ કરે. (૧૦) પ્રાણીઓને તાડન, પરધન અપહરણ, પરદારા સંગ, આ ત્રણ કર્મો શરીરથી સર્વ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

परदाराभिमर्शनम्। एतानि त्रीणि कायेन सर्वथा परिवर्जयेत् ॥११॥ असत्प्रलापं पारुष्यं पैशुन्यमनृतं तथा । चत्वारि वाचां कर्माणि वर्जयेच्च प्रयत्नतः ॥१२॥ अभिध्यानं परस्वस्य परस्यानिष्टचिन्तनम् । वेदवादेषु नास्तिक्यं मनसा त्रीणि सन्त्यजेत् ॥१३॥ अरावप्युचितं कार्यमातिथ्यं गृहमागते । छेत्तुमप्यागते छायां नोपसंहरति द्रुमः ॥१४॥ न निषिद्धतिथौ भार्यामुपगच्छेन्न पुष्पिणीम् । अप्राप्तरजसं नैव व्रतस्थां न रोगिणीम् ॥१५॥ व्रतस्थायाः स्वभार्याया यो गृही काममोहितः । व्रतभङ्गं कारयति कुम्भीपाके स पच्यते ॥१६॥ लशुनं श्वेतवृन्ताकं पलाण्डुं गृञ्जनं तथा । न भक्षयेद्द्विजो धीमान् कलिङ्गं च कदाचन ॥१७॥ उद्यन्तं च न वीक्षेत नास्तं यान्तं न मध्यगम् । न राहुणोपसंसृष्टं न चाम्बुस्थं दिवाकरम् ॥१८॥ देवतायतनं विप्रं धेनुं मधु मृदं घृतम् । जातिवृद्धं वयोवृद्धं विद्यावृद्धं तपस्विनम् ॥१९॥ अश्वत्थं चैत्यवृक्षं च गुरुं जलभृतं घटम् । सिद्धान्नं दधि सिद्धार्थान् गच्छन् कुर्यात्प्रदक्षिणम् ॥२०॥ वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम् । मत्तोन्मत्तत्यागिनां च पन्था देयो हि वर्त्मनि ॥२१॥ अध्वनीनं श्रोत्रियं च त्यागिनं क्षुधितं तथा । भोजयेत्परया प्रीत्या मानयेच्च यथोचितम् ॥२२॥ यस्य कोष्ठगतं त्वन्नं वेदाभ्यासेन जीर्यते । स तारयति दातारं दशपूर्वान्दशावरान् ॥२३॥ सम्भोज्य भक्तानतिथीनाग्रामान्तादनुव्रजेत् । सर्वत्र विनयः कार्यः सद्भक्तेषु विशेषतः ॥२४॥ परपाकरुचिर्न स्यादनिन्द्यामन्त्रणादृते । वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनम् ॥२५॥ चतुरस्त्रं त्रिकोणं च वर्तुलं चेत्यनुक्रमात् । विप्राद्यैर्मण्डलं कार्यं पात्राधस्तात्तु भोजने ॥२६॥ प्राणाग्निहोत्रविधिना दद्यादादौ षडाहुतीः । स्वाहान्तैः प्रणवाद्यैश्च सात्मप्राणादिनामभिः

પ્રકારે ત્યાગે. (૧૧) ગ્રામ્યવાર્તાદિ મિથ્યા પ્રલાપ, કડવી કઠોર વાણી, એકની રહસ્યમય વાત બીજાને કહેવારૂપ ચાડિયાપણું તથા અસત્યકથન : આ ચાર **વાણી-કર્મો** ત્યાગવાં. (૧૨) પરદ્રવ્યની પ્રાપ્તિ માટે ચિંતન, પારકાના અનિષ્ટનું ચિંતન, વેદોક્ત અર્થમાં નાસ્તિકતા, આ ત્રણ મનના કર્મને ત્યાગે. (૧૩) પોતાનો શત્રુ ગૃહમાં આવ્યો હોય, તો યોગ્ય આતિથ્યસત્કાર કરવો; કારણ કે વૃક્ષ પોતાનું છેદન કરવા જે (મજૂર વગેરે) પુરુષ આવ્યો હોય, તેને પહેલાં પોતાની છાયામાં આરામ કરવા દે છે. છાયા સંકેલી લેતું નથી. (૧૪) અમાવાસ્યાદિ નિષિદ્ધ તિથિમાં તથા રજસ્વલા ભાર્યાનું સેવન કરવું નહીં. ઋતુ જેને પ્રાપ્ત ન થઈ હોય તેવી સ્ત્રીનું સેવન કરવું નહીં. વ્રતમાં રહેલી-ચાન્દ્રાયણાદિ વ્રતવાળી, તથા જ્વરાદિ રોગવાળી સ્ત્રીઓ પ્રત્યે ગમન કરવું નહીં. (આ ચાર પ્રકારની સ્ત્રી, પોતાની સ્ત્રી હોય તે માટે નિયમ છે. બીજી સ્ત્રીઓનો સર્વ પ્રકારે ધર્મશાસ્ત્રમાં નિષેધ છે. (૧૫) જે ગૃહસ્થ કામથી મોહ પામેલો - મોહાંધ થઈને વ્રતધારિણી ભાર્યાને સંભોગ માટે, વ્રતનું ખંડન કરાવે તે કુંભીપાકમાં રંધાય છે. (૧૬) લસણ, શ્વેત વૃન્તાક, ડુંગળી, ગૂંજન-લસણ જેવા આકારવાળો કંદવિશેષ; (પણ ગાજર નહીં.) તથા કાલિંગડું વગેરે બુદ્ધિમાન દ્વિજ ક્યારેય ગ્રહણ કરે નહીં, ભક્ષણ કરે નહીં. (૧૭) ઉદય પામતા સૂર્યને જુએ નહિ. અસ્ત પામતા સૂર્યને જુએ નહિ. મધ્યાહ્નના સૂર્યને જુએ નહિ. રાહુએ સ્પર્શ કરેલા સૂર્યને જુએ નહિ. જળમાં પ્રતિબિંબિત થયેલા સૂર્યને જુએ નહિ. (૧૮) માર્ગમાં ચાલતાં સન્નિધિમાં આવતાં, દેવમંદિર, બ્રાહ્મણ, ગાય, મધ, મૃત્તિકા, ઘી, જાતિવૃદ્ધ, વયોવૃદ્ધ, વિદ્યાવૃદ્ધ, તપોવૃદ્ધ આદિક તથા પીપળો, દેવાલયમાં પૂજન માટે રાખેલું - ચૈત્યવૃક્ષ, ગુરુ, જળસભર કુંભ, પકવાન્ન, દહીં, સર્ષપ આટલી વ્યક્તિ અને વસ્તુઓની પ્રદક્ષિણા કરે. (૧૯-૨૦) વૃદ્ધ, ભારવાળો, રાજા, વિદ્યા સ્નાતક, વ્રત સ્નાતક, સ્ત્રી, રોગી, વર, ગાડાવાળો, મદ્યપાનથી વિક્ષિપ્ત ચિત્તવાળો, ઉન્મત્ત, ત્યાગી-સાધુ વગેરેને માર્ગે ચાલતાં રસ્તો કરી આપવો. (૨૧) થાકેલો વટેમાર્ગુ, શ્રોત્રિય, સાધુ અને ક્ષુધાતુરને પરમ પ્રીતિથી ભોજન કરાવે; અને યથાયોગ્ય માન આપે. (અભિવંદન, અભિનંદન યથાવ્યક્તિ આપે.) (૨૨) જેના ઉદરમાં પડેલા અન્નનું વેદનો અભ્યાસ કરવાથી સુપાચન થાય છે તે શ્રોત્રિય-પોતાને, અન્ન આપનારાને તથા તેના દશ પૂર્વજો, દશ અનુજો- એમ એકવીશ પુરુષોને સંસારસાગર થકી તારે છે. (૨૩) ભગવાનના ભક્ત અતિથિઓને ભોજન કરાવીને ગામના સીમાડા પર્યંત પાછળ વળાવવા જાય. સર્વજનો સાથે વિનયથી વર્તન કરવું અને ભગવદ્‌ભક્ત એકાંતિક સાધુઓ સાથે વિશેષ વિનય યુક્ત વર્તન કરવું. (૨૪) પારકા અન્ન ઉપર પ્રીતિ ન રાખવી. જો કોઈ અનિંદિત જન આમંત્રણ આપે, તો તે આમંત્રણને માન આપીને જમવા જવું. વાણી, હાથ, પગ અને નેત્ર વગેરે ઇન્દ્રિયોની ચપળતા ત્યાગવી. અતિ ભોજનનો ત્યાગ કરવો. (કારણ કે, આરોગ્યને હાનિ કરનારું છે) (૨૫) ભોજન સમયે, વિપ્રાદિ ચાર વર્ણોએ ભોજનના પાત્ર નીચે ચતુષ્કોણ, ત્રિકોણ, ગોળાકાર કે અર્ધચન્દ્રકાર મંડળ અનુક્રમે કરવું. (૨૬) ભોજનના આરંભમાં પ્રથમ ૐકાર અને અંતે 'સ્વાહા' શબ્દ યુક્ત-

॥२७॥ तर्जनीमध्यमाङ्गुष्ठैः प्राणस्याहुतिरीरिता । कनिष्ठानामिकाङ्गुष्ठैरपानस्याहुतिः स्मृता ॥२८॥ मध्यमानामिकाङ्गुष्ठैर्व्यानस्य परिकीर्तिता । मध्यमानामिकान्याभिरुदानस्याहुतिर्मता ॥२९॥ समानस्य तु सर्वाभिराहुतिश्चान्तरात्मनः । एता दन्तैः स्पृशेन्नैव ग्रसेद्रसनया द्विजः ॥३०॥ यतिवृद्धब्रह्मचारिगर्भिण्यातुरबालकान् । सम्भोज्यातिथिभृत्यांश्च भुञ्जीयातां तु दम्पती ॥३१॥ कृष्णरामोपेन्द्रजन्मदिनेष्वेकादशीषु च । शिवरात्र्यां च नाश्नीयाद्गृहस्थोऽन्नं विनाऽऽपदम् ॥३२॥ व्रतेष्वेतेषु च क्वापि वैष्णवैर्व्यावहारिकम् । कर्म नैव प्रकर्तव्यं पारतन्त्र्यापदौ विना ॥३३॥ नाश्नीयाद्भार्यया सार्धं नैनामीक्षेत चाश्नतीम् । क्षुवन्तीं जृम्भमाणां च न चासीनां यथासुखम् ॥३४॥ नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम् । न पश्येत्प्रसुवन्तीं च न मेहन्तीं स्त्रियं क्वचित् ॥३५॥ न सन्ध्ययोर्न दिवसे न निश्याद्यन्तयामयोः । शयीत नाशुचिः क्वापि नाश्नीयात्सन्ध्ययोर्द्वयोः॥३६॥ रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम् । शयने यः स्मरेत् नित्यं स दुःस्वप्नं न पश्यति ॥३७॥ नाचक्षीत धयन्तीं गां नैन्द्रं चापं च दर्शयेत् । नैकः स्वपेत् क्वचिच्छून्ये नैकलश्च पथि व्रजेत् ॥३८॥ स्त्रीधर्मिण्या नाभिवदेन्न रहश्च परस्त्रिया । एकाकिनीं व्रजन्तीं च भाषयेन्न परस्त्रियम् ॥३९॥ अपेयं न पिबेत् क्वापि नैवाभक्ष्यं च भक्षयेत् । अदेयं नैव दद्याच्च कुर्यान्नाकार्यकर्म च ॥४०॥ अभाष्यान्नैव भाषेत न विक्रीणीत गर्हितान् । अत्याज्यानि त्यजेन्नैव पतिताद्यैर्न संविशेत् ॥४१॥ काणानन्धांश्च कुब्जांश्च केकराक्षान् कुणींस्तथा । खञ्जान्मूकांश्च

અર્થાત્ પ્રણવ આદિ જેમાં છે અને સ્વાહાંત એવા પ્રાણાદિ પાંચ પ્રાણવાયુના નામો વડે તથા પ્રણવાદિ, સ્વાહાંત એવા આત્મશબ્દ વડે છ આહુતિઓ અનુક્રમે પ્રાણાગ્નિહોત્ર વિધિથી હોમે, **'ૐ આત્મને સ્વાહા' 'ૐ પ્રાણાય સ્વાહા'** એવી રીતે અપાન, વ્યાન અને ઉદાનને આહુતિ આપવી. (૨૭) હવે આહુતિ આપવાના પ્રકાર કહે છે - તર્જની, મધ્યમા અને અંગૂઠાથી પ્રાણની આહુતિ આપવી. કનિષ્ઠિકા, અનામિકા અને અંગુષ્ઠ વડે અપાનની આહુતિ આપવી. મધ્યમા, અનામિકા અને અંગુષ્ઠથી વ્યાનની આહુતિ આપવી. મધ્યમા અને અનામિકા-કનિષ્ઠિકા અને અંગુષ્ઠ રાખી, તર્જનીનો ત્યાગ કરવો, આ ઉદાનની આહુતિ કહેવાય છે. (૨૮-૨૯) અંગુષ્ઠ સહિત, સર્વ આંગળીઓથી સમાનની અને (આત્મ શબ્દથી બતાવેલા) અંતર્યામીની આહુતિ આપવી. આ છ આહુતિઓને દ્વિજ દાંતોથી સ્પર્શ કરે નહિ. જિહ્વાથી જ ગળે. (કેટલાક આંગળીઓનો ભેદ કરે છે, તે શાખાભેદથી છે, એમ જાણવો.) (૩૦) સંન્યાસી, વૃદ્ધ, બ્રહ્મચારી, રોગાતુર, બાળક, અતિથિ અને સેવકો તેમને જમાડીને પતિ-પત્ની ભોજન કરે. (૩૧) કૃષ્ણ, રામ તથા વામન ભગવાનના જન્મ-દિવસો, શ્રાવણ વદી અષ્ટમી, ચૈત્ર સુદી નવમી, ભાદરવા સુદી દ્વાદશી અને સર્વે એકાદશીની તિથિઓમાં, તથા માઘ વદી ચૌદશ-શિવરાત્રિએ ગૃહસ્થ આપત્કાલ વિના અન્ન જમે નહિ. (૩૨) વિષ્ણુ ભક્તોએ પરાધીનતાની આપત્તિ વિના, ઉપરોક્ત વ્રતોમાં ખરીદ-વેચાણ વગેરે વ્યવહારિક કાર્ય ક્યારેય પણ કરવું નહીં. (૩૩) ગૃહસ્થ પોતાની પત્ની સાથે ભોજન કરે નહીં. તે સ્ત્રીને (પોતાની પત્નીને) ભોજન કરતી જુએ નહીં. તથા છીંક ખાતી, બગાસું ખાતી, સુખપૂર્વક બેઠેલી સ્ત્રીને જુએ નહીં. (૩૪) પોતાના નેત્રને કાજળથી આંજણ કરતી સ્ત્રીને ક્યારેય પણ જુએ નહિ. નિર્વસ્ત્રા, પ્રસવ કરતી, મળ-મૂત્રોત્સર્ગ કરતી સ્ત્રીને જુએ નહિ. (૩૫) પ્રાતઃ સંધ્યા અને સાયં સંધ્યા-બન્ને સમયે શયન કરે નહિ. દિવસે સૂએ નહિ. રાત્રિના આદિ અને અંતમાં સૂએ નહિ. અપવિત્ર અંગ સહિત ન સૂએ. બન્ને સંધ્યા વેળાએ જમે નહિ. (૩૬) પરશુરામ, કાર્તિક, હનુમાન, ગરુડ તથા ભીમસેનને જે પુરુષ હંમેશા શયન સમયે સ્મરણ કરે, તે દુઃસ્વપ્ન જોતો નથી. (૩૭) પોતાના દૂધનું પાન કરતી ગાય જોઈને બીજાને કહે નહિ, તેને તેમ કરતી અટકાવે નહિ અથવા ('न ब्रूयाद्धाययन्तीं गाम्' એવો પાઠ હોય તો) વાછરડાને સ્તનપાન કરાવતી ગાયને જોઈ, તેના સ્વામીને જાણ કરે નહિ. વર્ષાઋતુમાં થતું ઈંદ્રધનુષ્ય બતાવે નહિ, શૂન્ય સ્થાનમાં એકલો ક્યારેય પણ શયન કરે નહિ. માર્ગમાં એકલો ચાલે નહિ. (૩૮) રજસ્વલા સાથે કંઈ પણ બોલે નહિ. એકાંત સ્થળમાં પારકી સ્ત્રી સાથે બોલે નહિ. એકલી ચાલતી પરસ્ત્રીને બોલાવે નહિ. (૩૯) ક્યારેય પણ મદ્ય, ગધેડીનું દૂધ વગેરે પીએ નહિ, અભક્ષ્ય માંસાદિનું ભક્ષણ કરે નહિ. અદેય-ન્યાસ, સ્ત્રીધનાદિક પદાર્થો આપે નહિ. અકાર્ય-ચોરકર્મ વગેરે કરે નહિ. કોઈને તાડન કરે નહિ. (૪૦) નાસ્તિકોની સાથે બોલે નહિ. નિંદિત ચર્મ, નીલી લાખ વગેરેને વેચે નહિ. અત્યાજ્ય-પોતાનો ધર્મ, સ્ત્રી, પુત્રાદિનો ત્યાગ કરે નહિ. પતિત (જાતિ ભ્રષ્ટ) વગેરે મહાપાપી, મનુષ્યો સાથે બેસે નહિ. (૪૧) કાણા,



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

बधिरान्नार्तांश्चाधिक्षिपेत्क्वचित् ॥४२॥ दम्पत्योर्विप्रवह्न्योश्च शिवोक्ष्णोर्विष्णुतार्क्ष्ययोः । अन्तरा नैव गच्छेच्च स्त्रियोश्च गुरुशिष्ययोः ॥४३॥ दान आचमने होमे भोजने देवतार्चने । स्वाध्याये गुरुदेवाग्रे प्रौढपादो भवेन्नहि ॥४४॥ आसनारूढपादश्च जानुनोर्वापि जङ्घयोः । ऊर्वोश्च कृतपादो यः प्रौढपादः स उच्यते ॥४५॥ आत्मनाम गुरोर्नाम नामातिकृपणस्य च । आयुःकामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः ॥४६॥ गुरुं तपस्विनं वृद्धं विद्यावन्तं च सद्गुणम् । नाभाषयेद्वैष्णवं च त्वङ्कारेण नराधिपम् ॥४७॥ परक्षेत्रे चरन्तीं गां सूचयेन्नैव पूरुषः । अपायितोदकान् क्वापि बध्नीयान्न पशून्निशि ॥४८॥ न देवगुरुविप्रेभ्यो दीयमानं निवारयेत् । नात्मश्लाघां प्रकुर्वीत परनिन्दां च वर्जयेत् ॥४९॥ न शस्त्रसर्पैः क्रीडेच्च न कूपोत्प्लवनं चरेत् । न पादक्षालनं कुर्यात्पादेनैव पुमान्क्वचित् ॥५०॥ अग्नौ न प्रक्षिपेदग्निं न गुरोर्दुष्कृतं वदेत् । सुहृन्मरणमार्तिं वा न स्वयं श्रावयेत्परान् ॥५१॥ प्रत्यक्षं लवणं नैव गृह्णीयाद्भोजने सुधीः । सूर्यं पश्यन्स्मरेद्विष्णुं दुराचारस्य दर्शने ॥५२॥ श्रुतिस्मृतिविरुद्धं च पाषण्डं हैतुकं तथा । अनीश्वरं च यच्छास्त्रं तत्त्यजेद्दूरतः पुमान् ॥५३॥ श्वस्पृष्टं शकुनोच्छिष्टं केशकीटाद्युपाहतम् । भार्योच्छिष्टं गवाघ्रातमन्नं नैव च भक्षयेत् ॥५४॥ मद्यमांसादिसंस्पृष्टं तथा स्पृष्टमुदक्यया । अन्नं नाद्याच्च शाकादि विड्जातं परिवर्जयेत् ॥५५॥ चैत्यवृक्षं च न छिन्द्यान्मार्गे छायातरुं तथा । शय्यासने न चाक्रामेत्स्वस्मादुत्कृष्टनीचयोः ॥५६॥ न चामङ्गल्यशीलः स्यान्नैवामङ्गल्यवागपि । न चाधर्मोपदेशेन द्रव्यं कस्यचिदाहरेत् ॥५७॥ न वञ्चयेत्कर्मकरान्साधयित्वाऽर्थमात्मनः । न लोभयेत्स्त्रियं काञ्चिन्मादकं नैव भक्षयेत् ॥५८॥ न धर्मं ख्यापयेद्विद्वान्न

---

આંધળા, વાંકા અંગવાળા, કૂબડા, ખોડા, મૂંગા, બહેરા, આર્ત-રોગાદિથી પીડિત વગેરેનો ક્યારેય પણ તિરસ્કાર કરે નહિ. (૪૨) સ્ત્રી અને પુરુષ, બ્રાહ્મણ અને અગ્નિ, શિવ અને નંદિ, વિષ્ણુ અને ગરુડ, બે સ્ત્રીઓ; આ બધાની વચ્ચેથી પસાર થઈને ચાલવું નહિ. (૪૩) દાન, આચમન, હોમ, ભોજન, દેવપૂજન, સ્વાધ્યાય વેળાએ તથા ગુરુ સમીપે પગ ઉપર પગ મૂકીને બેસવું નહિ. (૪૪) આસન ઉપર જેમણે બન્ને પગના તળ મૂકેલા હોય અને ઢીંચણ વચ્ચે અથવા જંઘાની વચ્ચે અથવા બન્ને સાથળોની મધ્યમાં એક પગ મૂકેલો હોય તે **પ્રૌઢપાદ** કહેવાય છે. (૪૫) પોતાનું નામ, ગુરુનું નામ, અતિ કૃપણનું નામ, મોટા પુત્રનું નામ, મોટી પુત્રીનું નામ અને સ્ત્રીનું નામ, આયુષ્યની ઈચ્છાવાળો ગ્રહણ ના કરે. (૪૬) ગુરુ, તપસ્વી, વૃદ્ધ, વિદ્યાવાન, સદ્‌ગુણોથી યુક્ત, વૈષ્ણવ ભક્ત અને રાજાને તુંકારે બોલાવવા નહિ. (૪૭) પુરુષ, પારકા ખેતરમાં ચરતી ગાયને જોઈને તેના ક્ષેત્રના સ્વામીને કહે નહિ. રાત્રે પાણી પાયા વિના પશુઓને ક્યારેય બાંધે નહિ. (૪૮) દેવ, ગુરુ અને બ્રાહ્મણોને દાન આપવા માટે તૈયાર થયેલાને અટકાવે નહિ, પોતાના ગુણો બીજાને કહેવા નહિ અને પરનિંદાનો ત્યાગ કરવો. (૪૯) પુરુષે, ક્યારેય પણ તરવાર વગેરે આયુધો અને સર્પોની સાથે ખેલ કરવો નહિ. (૫૦) અગ્નિમાં બીજો અગ્નિ ફેંકે નહિ. ગુરુએ ભૂલથી આચરણ કરેલું દુષ્કર્મ કોઈની આગળ બોલે નહીં. (એકાન્તમાં ગુરુને કહેવું, કે તમે અયોગ્ય વર્તન કર્યું હતું.) કોઈના મિત્રનું મરણ, અને ભવિષ્યમાં થનારા કોઢ, ક્ષયરોગ વગેરેના લક્ષણથી પોતે જાણીને, થનારી પીડા, પોતે બીજાને સંભળાવે નહિ. (૫૧) બુદ્ધિમાન, ભોજનમાં પ્રત્યક્ષ લવણ ગ્રહણ કરે નહિ. મદ્યપાન કરનાર વગેરે દુરાચારીના દર્શને થયે સતે સૂર્યને જોઈને વિષ્ણુનું સ્મરણ કરે. (૫૨) જે શાસ્ત્ર શ્રુતિ-સ્મૃતિ વિરુદ્ધ હોય, (તેવા કૌલાગમાદિ) તથા પાખંડ, (નાસ્તિકોના ગૌતમ સૂત્રો-વગેરે), ધર્મમાં અધર્મ તત્ત્વને પ્રતિપાદન કરનારું તથા જે ઈશ્વરનો અભાવ પ્રતિપાદન કરનારું શાસ્ત્ર હોય, તે શાસ્ત્રનો દૂરથી જ ત્યાગ કરે. (૫૩) જે અન્ન કૂતરા વડે સ્પર્શ કરાયેલું, ચકલી વગેરે પક્ષીઓએ જમતાં બાકી રહેલું, કેશ-કીટ આદિથી યુક્ત ભાર્યા વડે કૃત ભોજનથી બાકી રહેલું - ઉચ્છિષ્ટ અન્ન તથા ગાયોએ સૂંઘેલું અન્ન ન ખાય. (૫૪) મદ્ય-માંસાદિએ સંસ્પર્શ થયેલું, રજસ્વલા સ્ત્રીએ સ્પર્શ કરેલું અન્ન ન ખાય. વિષ્ટામાં ઉત્પન્ન થયેલા શાકાદિનો ત્યાગ કરે. (૫૫) ચૈત્ય વૃક્ષ તથા માર્ગમાં છાયાનું વૃક્ષ કાપવું નહીં. પોતાનાથી ઉત્તમ અને નીચની શય્યા કે આસન ઉપર બેસવું નહીં. (૫૬) અપ્રશસ્ત આચરણના સ્વભાવવાળો ન થાય. અશુભ વાણીવાળો પણ ન થાય. અધર્મના ઉપદેશથી કોઈનું દ્રવ્ય લેવું નહિ. (૫૭) પોતાનો ભાર વહન કરનાર મજૂરને, મજૂરી કરાવીને ઓછા નાણાં આપી છેતરવો નહીં. તેમને યથાયોગ્ય મજૂરી આપવી. કોઈ સ્ત્રીને, તેને ઈષ્ટ પદાર્થોનું દાન કરીને પોતાની અભિલાષા ઉત્પન્ન કરાવે નહિ. માદક વસ્તુ ખાવી નહિ. (૫૮) ડાહ્યો માણસ, પોતે કરેલું દાન, યજ્ઞાદિ આચરણ રૂપ પુણ્ય કોઈને કહે નહીં. (કીર્તિને માટે કરેલો ધર્મ નિષ્ફળ છે.) તથા પરાંગનાનો પ્રસંગ, પર દ્રવ્યનું અપહરણ વગેરે

पापं गोपयेत्तथा । कृष्णभक्तस्य साधोश्च पुरतस्तन्निवेदयेत् ॥५९॥ प्रायश्चित्तं यथाशक्ति कुर्याद्दुष्कर्मणो द्रुतम् । कुर्वीतात्महितं नित्यं सर्वभूतानुकम्पनम् ॥६०॥ वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च । देहस्य वाचो बुद्धेश्च योग्यं कर्म समाचरेत् ॥६१॥ ब्रह्मस्वमथ देवस्वं प्राणान्तेऽपि न चाहरेत् । अधिकं कालकूटाद्धि तद्विषं परिचक्षते ॥६२॥ अदत्तं कस्यचिद्वस्तु गृह्णीयान्नैव किञ्चन । नहि स्तेयसमं पापमन्यज्जीवातिदुःखदम् ॥६३॥ काष्ठं फलं तृणं पुष्पं प्रकाशं वै हरेत्क्वचित् । केवलं धर्मकृत्यार्थमन्यथा पतितो भवेत् ॥६४॥

मिथ्यापवादं कस्यापि न ब्रूयात्कर्हिचित्पुमान् । ब्रुवन्पतति पूयोदे यावच्चन्द्रदिवाकरौ ॥६५॥ सत्यमेव सदा ब्रूयादन्यद्रोहो न तेन चेत् । नास्ति सत्यसमं पुण्यमित्युवाच प्रजापतिः ॥६६॥ अश्वमेधसहस्रं च सत्यं च तुलया धृतम् । पुरा विरिञ्चिना तत्र सत्यमेवात्यरिच्यत ॥६७॥ स्त्रीषु नर्मणि वृत्त्यर्थे विवाहे प्राणसङ्कटे । गोविप्रगुरुकार्यार्थे नानृतं चापि दुष्यति ॥६८॥ भद्रमेव सदा ब्रूयाद्भद्रमेव विचिन्तयेत् । भद्रैरेवेह संसर्गं कुर्यान्नाभद्रपूरुषैः ॥६९॥ नोद्वृत्तोन्मत्तमत्तैश्च नाविनीतैश्च कर्हिचित् । कुर्यान्मैत्रीं न चाशीलैर्नैव चौर्यादिदूषितैः ॥७०॥ न चातिव्ययशीलैश्च न लुब्धैर्नातिवैरिभिः । नासत्यवादिभिः क्रूरैर्न स्त्रैणैर्लोकनिन्दकैः ॥७१॥ न द्यूतसक्तैर्न न्यूनैर्न वेश्यागामिभिः क्वचित् । सहासीत न निःस्वैश्च न च दैवपरैर्नरैः ॥७२॥ कुर्वीत साधुभिर्मैत्रीं सदाचारावलम्बिभिः । विद्याविनयसम्पन्नैर्नित्यमुद्योगशालिभिः ॥७३॥ नागाधाम्ब्ववगाहेत न प्रदीप्तं गृहं विशेत् । नारोहेद्वृक्षशिखरं दन्तान्सङ्घर्षयेन्न च ॥७४॥ चतुष्पथं चैत्यतरुं श्मशानोपवनानि च । दुष्टस्त्रीसन्निकर्षं च

---

પાપને ગુપ્ત રાખવું નહીં. સર્વે ઠેકાણે પ્રકાશે નહિ, પરંતુ ભગવાનના ભક્ત સાધુની આગળ તે પાપ નિવેદન કરે. (૫૯) પાપનું પ્રાયશ્ચિત્ત યથાશક્તિ, તત્કાલ જ કરવું. નિત્ય આત્માનું હિત કરવું. સર્વ પ્રાણીઓ ઉપર, જેમ પોતાને બંધન ન થાય તેવી દયા કરવી. (૬૦) તારુણ્યાદિ અવસ્થા, વર્ણાશ્રમને યોગ્ય ક્રિયા, પોતાનું ધન, શાસ્ત્રાધ્યયન, કુટુંબ, શરીરબળ, વાણી અને બુદ્ધિ-બળને અનુરૂપ કર્મનું આચરણ કરે.(૬૧) **બ્રાહ્મણ અને દેવનું ધન પ્રાણાન્તે પણ લેવું નહિ.** કારણ કે તે આહરણ કરેલું, બ્રાહ્મણ અને દેવનું ધનરૂપ ઝેર હલાહલ વિષથી પણ અધિક છે તેમ વ્યાસાદિ મુનિઓ કહે છે. (૬૨) કોઈની કંઈ પણ વસ્તુ, તેના સ્વામીએ આપ્યા વિના ગ્રહણ કરવી નહીં. કારણ કે જીવને દુઃખ આપનાર ચોરી સમાન બીજું કોઈ પાપ નથી. (૬૩) કાષ્ઠ, ફળ, પુષ્પ, તૃણ વગેરે જો ધર્મકાર્ય માટે વાપરવું હોય તો પણ, તેના માલિકને જાણ કરવી, પછી જ ગ્રહણ કરવું. બીજી રીતે તો પતિત થાય. (૬૪) પુરુષ કોઈને પણ મિથ્યાપવાદ ક્યારેય પણ આરોપણ ન કરે. જે મિથ્યાપવાદ (ખોટા આરોપ) કરે છે, તે સૂર્ય-ચન્દ્રની હયાતિ સુધી (યાવત્ ચન્દ્રદિવાકરૌ) નરકમાં પડે છે. (૬૫) સદા સત્ય જ બોલે. જો તે સત્યથી બીજાનો દ્રોહ ના થતો હોય, ત્યારે તો સત્ય સમાન પુણ્ય નથી. આ પ્રમાણે પ્રજાપતિ બ્રહ્મા બોલ્યા છે. (૬૬) પૂર્વે બ્રહ્માએ  હજાર અશ્વમેધ યજ્ઞો અને સત્ય ત્રાજવાથી તોળ્યાં, તે બેમાં સત્ય જ વધારે થયું. (૬૭) સ્ત્રીઓમાં, પરિહાસની કથામાં, વૃત્તિ માટે, વિવાહકાર્યમાં, પ્રાણસંકટમાં, ગાય, બ્રાહ્મણ અને ગુરુના કાર્ય માટે અનૃત ભાષણ પણ દોષજનક થતું નથી. (૬૮) સદા મંગલ જ બોલવું. અન્યનું પણ મંગલ ચિન્તન કરે. લોકમાં મંગલ મનુષ્યો સાથે સંસર્ગ રાખે, અમંગળ પુરુષો સાથે નહીં. (૬૯) શાસ્ત્રની મર્યાદાનું ઉલ્લંઘન કરનારો, ઉન્મત્ત, મદ્યપાન-મત્ત વગેરેની સાથે મૈત્રી કરવી નહીં. (૭૦) અત્યંત ખર્ચ કરનારા -ઉડાઉની સાથે ન બેસે. દાન પાત્રમાં દાન સમયે પણ અર્થના વ્યયથી બીક પામનારાની સાથે બેસે નહિ. અતિ વૈરવાળાની સાથે બેસે નહીં. સર્વદા અસત્ય વચનવાળાની સાથે ના બેસે. ક્રૂર સ્વભાવવાળાની સાથે ના બેસે. જેઓ સ્ત્રીવશ્ય હોય અને લોકોમાં નિંદિત થયેલા હોય તેની સાથે પણ બેસે નહીં. (૭૧) દ્યુતમાં આસક્ત જનોની સાથે બેસે નહીં. પોતાનાથી ગુણ અને જાતિથી નીચ જનોની સાથે બેસે નહીં. (૭૨) સદાચારનું અવલંબન કરીને વર્તતાં, વિદ્યાવિનયથી સંપન્ન, હંમેશા ઉદ્યોગશાલી-આ લોક અને પરલોકમાં સુખના કારણભૂત સાધુઓની સાથે મૈત્રી કરે. (૭૩) અપાર જળમાં સ્નાન કરવા માટે કે તરવા માટે પેસવું નહીં. ગૃહમાં એક સ્થાને કે સર્વત્ર પ્રજ્વલિત અગ્નિ હોય ત્યારે અતિ પ્રિય વસ્તુ ગ્રહણ કરવા માટે પ્રવેશવું નહીં. વૃક્ષની છેલ્લી ટોચે ચઢે નહીં. દાંતોને પરસ્પર ઘસે નહીં. (દાંતનો ‘કચડાટ’ અવાજ ન કરે.) (૭૪)  સર્વ કાળે રાત્રિમાં ચાર માર્ગનો સંગમ, ચૈત્યતરુ(ઉદ્દેશ વૃક્ષ)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

वर्जयेन्निशि सर्वदा ॥७५॥ अप्यर्थहानिः सोढव्या वैरेणार्थागमं त्यजेत् । नोच्चासनं गुरोरग्रे सेवेत च कदाचन ॥७६॥ शमं नयति यः क्रुद्धान्सर्वान्बन्धूनमत्सरी । भीतांश्चाश्वासयेद्यस्तु स्वर्गस्तस्याल्पकं फलम् ॥७७॥ जिह्वा भार्या सुतो भ्राता मित्रदाससमाश्रिताः । यस्यैते विनयाढ्याः स्युस्तस्य सर्वत्र गौरवम् ॥७८॥ नोर्ध्वं न तिर्यग्दूरं वा वीक्षमाणश्च पर्यटेत् । युगमात्रं महीपृष्ठं नरो गच्छेद्विलोकयन् ॥७९॥ अन्वये सति सर्वस्वं भार्यां च शरणागतम् । कुलवृत्तिं च पुत्रांश्च दद्यान्नापद्यपि क्वचित् ॥८०॥ ऋणशुद्धिं स्ववंशं च वस्तूनां क्रयविक्रयौ । कन्यादानं गुणोत्कर्षं गोपयेन्नैव बुद्धिमान् ॥८१॥ संस्कारान्नं न भुञ्जीत प्रेतश्राद्धान्नमेव च । श्राद्धं कृत्वा परश्राद्धे भोक्तुं नैव व्रजेत्तथा ॥८२॥ तौर्यत्रिकप्रियो न स्यान्नाद्यादातृप्ति रात्रिषु। नारोहेच्च गवां पृष्ठे बाहुभ्यां न नदीं तरेत् ॥८३॥ नाधार्मिके वसेद्ग्रामे न पाषण्डिजनाकुले । पीडिते दुष्टराज्ञा च जीविकारहिते तथा ॥८४॥ यत्र राजा धर्मनिष्ठः श्रोत्रियः सजला नदी । ऋणप्रदाता वैद्यश्च पुरे तत्र वसेद्गृही ॥८५॥ पौराः सुसंहता यत्र सततं न्यायवर्तिनः । यत्रामत्सरिणो लोका वासस्तत्र सुखावहः ॥८६॥ नोत्पाटयेल्लोम नखं दशनैश्च कदाचन । करजैः करजच्छेदं तृणच्छेदं च वर्जयेत् ॥८७॥ शुभाय न यदायत्यां तत्त्यजेत्कर्म यत्नतः । अद्वारेण न गच्छेच्च स्ववेश्मपरवेश्मनोः ॥८८॥ क्रीडेन्नाक्षैर्न धर्मघ्नैः सहासीत क्वचित्पुमान् । न शयीत तथा नग्नो न नग्नो जलमाविशेत् ॥८९॥ न स्पृशेदनिमित्तेन खानि स्वानि त्वनातुरः । गुह्यजान्यपि लोमानि यत्स्पर्शादशुचिर्भवेत् ॥९०॥ पादधौतोदकं

સ્મશાનો, બગીચાઓ, દુષ્ટા સ્ત્રીના સાન્નિધ્યનો ત્યાગ કરવો. (૭૫) અર્થની હાનિને પણ સહન કરવી, પરંતુ વૈરથી ધનની આવકનો ત્યાગ કરે. (જે કોઈની સાથે વૈર કરવાથી અર્થ પ્રાપ્તિ થતી હોય તો પણ તે આવકના ત્યાગરૂપ અર્થહાનિ સહન કરવી.) ગુરુની સમક્ષ ઉચ્ચ આસને ક્યારેય ન બેસે. (૭૬) જે ગૃહસ્થ મત્સરે રહિત થઈને, ક્રોધ યુક્ત સર્વ બંધુઓને શાંતિ પમાડે અને જે બીક પામેલાંઓને આશ્વાસન આપે, (આ અર્થમાં - 'તમારે બીક રાખવી નહિ, ધૈર્યથી બધું જ સિદ્ધ થશે' આવી ધીરજ આપે.) તેને સ્વર્ગ ફળ તો થોડું છે, તેને સ્વર્ગથી પણ અધિક ફળ પ્રાપ્ત થાય છે. (૭૭) જેની જીભ, ભાર્યા, સુત, ભાઈ, મિત્ર, ગૃહના નોકરો, પોતાના આશ્રિતો વગેરે જો વિનય યુક્ત અને મધુરભાષી હોય, તેનું સર્વ સ્થાનમાં પણ મહત્ત્વ વધે છે. (મીઠી જીભ-મધુર વાણીથી મહત્ત્વ થાય છે.) (૭૮) માર્ગમાં ચાલતો પુરુષ ઊંચું જોતાં જોતાં ચાલે નહીં, આસપાસ જોતાં જોતાં અને દૂર જોતાં જોતાં ભ્રમણ કરે નહીં, ચાર હાથ પૃથ્વીને જોતો થકો ચાલે. ('ધનુષ્ય-દૃષ્ટિ' રાખે.) (૭૯) વંશ હોય તો સમગ્ર ધનાદિ-ઘરની સામગ્રી માત્ર આપત્કાલમાં પણ ક્યારેય આપે નહીં. ભાર્યા તેમજ, શરણાગત, (પોતાનાં સ્થાનમાં આવેલા), કુળની વૃત્તિ તથા પુત્રોને આપત્કાળમાં પણ કોઈને આપે નહિ. (૮૦) ધનવાન પાસેથી લીધેલા ધનને પાછું આપ્યું હોય તે - 'ઋણશુદ્ધિ', પોતાનો વંશ, ક્રયવિક્રય, (આદાન-પ્રદાન,) કન્યાદાન, ગુણોત્કર્ષ- આટલી બાબતોને બુદ્ધિમાન નર જાહેર કરી દે, ગુપ્ત રાખે નહિ. (૮૧) જાતકર્મ-સંસ્કારનું ભોજન, પ્રેતશ્રાદ્ધ, (નવ શ્રાદ્ધાન્ન) ન જમે. પોતે શ્રાદ્ધ કરીને બીજાના શ્રાદ્ધમાં જમવા જવું નહિ. (આ સમીપ સંબંધી થકી બીજાના ગૃહમાં જાણવું.) (૮૨) વાદ્ય, ગ્રામ્યગીત અને નૃત્યમાં આસક્તિ કરે નહીં. રાત્રિઓમાં તૃપ્તિ પર્યન્ત ભોજન કરે નહીં. બળદોની પીઠ ઉપર બેસે નહીં. બાહુથી નદી તરે નહીં. (૮૩) જે ગામમાં ઘણા અધર્મી જનો રહેતા હોય, ત્યાં રહેવું નહીં. પાખંડી જનોના સમુદાયવાળા ગામમાં વસવું નહીં. દુષ્ટ રાજાએ પીડાયેલા ગામમાં વસવું નહીં, તેમ જ જીવિકારહિત ગામમાં નિવાસ કરવો નહિ. (૮૪) જે પુરમાં ધર્મનિષ્ઠ રાજા, શ્રોત્રિય બ્રાહ્મણ, જલયુક્ત નદી, ઋણદાતા અને વૈદ્ય હોય - તે ગામમાં ગૃહસ્થ નિવાસ કરે. (૮૫) જે પુરમાં નગરજનો પરસ્પર મળીને નિરંતર ન્યાય પ્રમાણે વર્તતાં હોય, જ્યાં લોકો મત્સરે રહિત હોય, ત્યાં નિવાસ મળે તે સુખ પમાડનારો હોય છે. (૮૬) પોતાના દાંતોથી રોમ અને નખ ક્યારેય ઉપાડે નહીં. નખોથી નખ અને તૃણ છેદે નહીં (૮૭) જે કર્મ ઉત્તરકાલમાં શુભ ફળની પ્રાપ્તિ માટે ના થાય. તે કર્મ પ્રયત્નથી ત્યાગ કરે. પોતાના કે પારકા ગૃહમાંથી આપત્કાળે નીકળવા માટે રાખેલા અલ્પદ્વારથી પસાર થાય નહીં. (૮૮) પુરુષ પાસાઓથી ક્યારેય રમે નહિ. ધર્મનો નાશ કરનારાઓની સાથે ક્યારેય બેસે નહીં. નગ્ન થઈ ને શયન કરે નહીં. જળમાં નગ્ન થઈને પ્રવેશ કરે નહિ. (૮૯) રોગાદિપીડાઓ જેવા કારણ વિના પોતાની ઇન્દ્રિયોનાં છિદ્રોનો સ્પર્શ કરે નહીં. ગુહ્યેન્દ્રિયના રૂંવાડાનો પણ સ્પર્શ કરે નહીં. તેના સ્પર્શથી અપવિત્ર થવાય છે. (૯૦) ચરણપ્રક્ષાલનનું જળ, મૂત્ર, ઉચ્છિષ્ટ-અન્ન-જળ,

मूत्रमुच्छिष्टान्नोदकानि च । निष्ठीवनं च श्लेष्माणं गृहाद्दूरे विनिक्षिपेत् ।।९१।। कण्डूयनं च शिरसो बाहुभ्यां न समाचरेत् । आताडनं कराभ्यां च क्रोशनं केशलुञ्चनम् ।।९२।। पूर्वर्द्धिभिः परित्यक्तमात्मानं नावमानयेत् । सदोद्यमवतां यस्माच्छ्रियो विद्या न दुर्लभाः ।।९३।। सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् । प्रियं च नानृतं ब्रूयादेवं धर्मोऽस्ति मानद! ।।९४।। नागालितं पिबेत् क्षीरं न चाम्भो दीर्घधारया। न तिष्ठन् वामदोष्णा च भोजनावसरं विना ।।९५।। पय ऐकशफं हेयं तथा क्रामेलकाविकम् । गोपीयूषस्तथा वर्ज्यो रात्रौ च दधिभोजनम् ।।९६।। मद्यं नैव च पातव्यं नित्यं त्रैवर्णिकेन वै । न भक्षणीयं मांसं च हिंसा नरकदा यतः ।।९७।। यो जन्तूनात्मपुष्ट्यर्थं हिनस्ति ज्ञानदुर्बलः । दुराचारस्य तस्येह नामुत्रापि सुखं भवेत् ।।९८।। हन्ताऽनुमन्ता संस्कर्ता भोक्ता क्रेता च विक्रयी । उपहर्ता घातयिता हिंसको ह्यष्टधा मतः ।।९९।। आर्द्रा वल्लास्तथाढक्यो भृष्टाः स्युर्यद्यनिस्तुषाः। पुम्भिः स्त्रीभिर्न भक्ष्यास्ते सूक्ष्मजीवान्तसम्भवात् ।।१००।। न स्वर्गकाम्यया कुर्यात्तीर्थेष्वपि कदाचन । आत्मघातं गृहस्थस्तु न च क्रोधाद्विषादिभिः ।।१०१।। ब्राह्मणं कुशलं पृच्छेद्बाहुजातमनामयम् । वैश्यं सुखं समागम्य शूद्रं सन्तोषमेव च ।।१०२।। पैशुन्यं परदारांश्च क्रोधं द्रोहं तथाऽनृतम् । स्तेयं द्वेषं च दम्भं च त्यजेन्मायां च दूरतः ।।१०३।। जन्मर्क्षं मैथुनं मन्त्रं गृहच्छिद्रं च वञ्चनम् । आयुर्धनं चापमानं स्त्रियं चेति सुगोपयेत् ।।१०४।। श्रुतिभूदेवदेवानां नृपसाधुतपस्विनाम् । पतिव्रतानां नारीणां निन्दां कुर्यान्न कर्हिचित् ।।१०५।। न मनुष्यस्तुतिं

થૂંક, નાસિકાનો મળ; ઘરથી દૂર નાંખવાં. (૯૧) પોતાના બન્ને હાથોથી માથાને ખંજોળવું નહીં. પોતાના બન્ને હાથોથી પોતાના અંગને મૃદંગની માફક તાડન કરવું નહીં. નિમિત્ત વિના બૂમો પાડવી નહીં. નખોથી દાઢી - મૂછના વાળોને ઊખેડવા નહીં. (૯૨) પૂર્વે પ્રાપ્ત થયેલી સંપત્તિઓ દૈવયોગે નાશ પામે, તોપણ નિર્વેદ ન પામે. ઐશ્વર્યથી ભ્રષ્ટ થતાં આપઘાતનો વિચાર ન કરે. પોતાનો અનાદર ન કરે. કારણ કે ઉદ્યોગીને સંપત્તિ કે વિદ્યા દુર્લભ નથી. (૯૩) હે માનદ ! સત્ય બોલવું, તે પણ પ્રિય બોલવું. અપ્રિય સત્ય બોલવું નહીં. પ્રિય અસત્ય પણ બોલવું નહિ. આ પ્રકારનો ધર્મ છે. (૯૪) વસ્ત્રથી ગાળીને પવિત્ર કરેલું ન હોય, તેવું દૂધ ન પીવું. ગાળ્યા વિનાનું જળ ન પીએ. જળ દીર્ઘ ધારાથી પણ ન પીએ. (મુખથી જળપાત્રનો સ્પર્શ ન કરે.) ઊભો ઊભો જળ ન પીએ. ભોજનના સમય વિના ડાબા હાથથી જળ ન પીએ. (આપત્કાલે ડાબા હાથે પિવાય.) (૯૫) એક ખરીવાળાં ઘોડી, ઊંટડી, ઘેટી વગેરે પ્રાણીઓનું દૂધ ભોજન વગેરેમાં ત્યાગવું. દશ દિવસ ના થયા હોય તેવી ગાયનું દૂધ ભોજન વગેરેમાં ત્યાગવું. દશ દિવસ ના થયા હોય તેવી ગાયનું દૂધ ત્યાગવું. અને દહીં રાત્રિ ભોજનમાં ત્યાગવું. (૯૬) હંમેશા ત્રણ વર્ણના જનોએ મદ્ય-પાન કરવું નહિ. સુરાપાન, માંસભક્ષણ કરવું નહિ. કારણ કે હિંસા નરકના ભોગને આપનારી છે. (૯૭) જ્ઞાન-દુર્બલ, અવિવેકી જે પુરુષ, માંસના ભોજનથી પોતાના દેહની પુષ્ટિ માટે સસલાં વગેરે પ્રાણીઓની હિંસા કરે છે, દુરાચારી તે પુરુષને આ લોકમાં અને પરલોકમાં પણ સુખ થાય નહિ. (૯૮) તરવાર વગેરેથી સાક્ષાત્ પશુને મારનારો, પ્રાણીઓને મારવાનો ધંધો કરનારને પ્રેરણા આપનારો, મસાલા નાંખીને રાંધનારો, ભોજન કરનારો, મૂલ્ય આપીને લેનારો, મૂલ્ય ગ્રહણ કરીને વેચનારો, વેચાણ-ક્રિયામાં જોખીને તોલ કરનાર- 'તોલાટ' તથા ક્રેતાએ લીધેલાને લઈ ઊંચકીને તેના અર્થીને આપનાર- ઉપહર્તા - કહેવાય છે. વેચવા માટે અજાદિ (બકરી આદિ)ને મરાવનારો ઘાતયિતા કહેવાય છે : આવા **આઠ પ્રકારના હિંસકો** છે. (૯૯) લીલા વાલની પાપડીઓ, તેવી તુવેરની લીલી શીંગો, છાંડા સહિત માટલામાં મૂકીને ઊંધિયું કરેલું હોય, તો પુરુષો અને સ્ત્રીઓએ ભક્ષણ કરવું નહિ. (તેની અંદર ઉત્પન્ન થયેલા સૂક્ષ્મજંતુઓનો વિનાશ સંભવે છે. માટે માંસ-ભક્ષણનો દોષ થાય, તેથી જમવું નહિ.) (૧૦૦) ગૃહસ્થ સ્વર્ગની ઈચ્છાથી પ્રયાગાદિ તીર્થોમાં પણ ક્યારેય આત્મઘાત કરે નહિ. ક્રોધથી વિષ ભક્ષણ કરે નહિ. ગળાટૂંપો દઈને આત્મઘાત કરે નહિ. (૧૦૧) બ્રાહ્મણને મળીને - 'કુશળ છો' એમ પૂછે, ક્ષત્રિયને મળીને અનામય પૂછે, વૈશ્યને મળીને સુખ-સંબંધી પ્રશ્ન પૂછે, શૂદ્રને મળીને સંતોષ પૂછે. (૧૦૨) ચાડિયાપણું, ક્રોધ, પરસ્ત્રી, દ્રોહ, મિથ્યા ભાષણ, ચોરીનું કર્મ, વૈર, દંભ તથા કપટ આ સર્વ દોષોને દૂરથી ત્યાગે. (૧૦૩) પોતાના જન્મનું નક્ષત્ર, મૈથુન, મંત્ર, ગૃહનું છિદ્ર, પરકૃત ઠગાઈ, આયુષ્યનું પ્રમાણ, પોતાના દ્રવ્યનું પ્રમાણ, અપમાન અને પોતાની પત્ની - આ સર્વને ગુપ્ત રાખવાં. પત્નીને આવરણવાળી કરે, લાજ કઢાવે. (૧૦૪) શ્રુતિ, દેવ, બ્રાહ્મણ, રાજા, સ્વધર્મનિષ્ઠ સાધુ, તપસ્વીઓ તથા પતિવ્રતા સ્ત્રીઓની નિંદા ક્યારેય કરવી નહીં. (૧૦૫) મનુષ્યની સ્તુતિ કરે નહીં. પોતાને નિંદે નહિ. બહુ ભાષણ, મનોવેગ, અને

कुर्यान्नात्मानमपमानयेत् । वाचोवेगं मनोवेगं जिह्वावेगं च वर्जयेत् ॥१०६॥ सङ्कटे महति प्राप्ते यस्य कस्यापि देहिनः । यद्दीयते धनं तत्स्यादिहामुत्राप्यनन्तकम् ॥१०७॥ मातापितृविहीनं यो मौञ्जीपाणिग्रहादिभिः । संस्कारयेन्निजैरर्थैस्तस्य श्रेयस्त्वनन्तकम् ॥१०८॥ अग्निहोत्रैर्न तच्छ्रेयो नाग्निष्टोमादिभिर्मखैः । यच्छ्रेयः प्राप्यते मर्त्यैरेकस्मिन्हि द्विजे कृते ॥१०९॥ यो ह्यनाथस्य विप्रस्य विवाहं कारयेत् कृती । इह सौख्यमवाप्याथ सोऽक्षयं स्वर्गमेति च ॥११०॥ सुराज्ये वसतिं कुर्यात्सुमित्रे मैत्र्यमाचरेत् । सुभार्यायां वसेद्गेहे सुशिष्यं बोधयेद्रहः ॥१११॥ कुराजराज्ये ह्यभयं कुतः स्यात्कुमित्रमैत्र्ये स्वहितं कुतः स्यात् । कुभार्यया निर्वृतता कुतः स्यात्कुशिष्यबोधेन सुखं कुतः स्यात् ॥११२॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे सदाचारेषु हेयोपादेयनिरूपणनामाष्टादशोऽध्यायः॥१८॥

श्रीनारायणमुनिरुवाच – दुःस्वप्ने दुर्जनस्पर्शे श्मश्रुकर्मणि मैथुने । सद्यः स्नानं प्रकुर्वीत शवादिस्पर्शने तथा ॥१॥ वेदबाह्यमतान् स्पृष्ट्वा बौद्धादीन्नास्तिकानपि । कृत्वा स्नानं विलोक्यार्कं नामानि प्रजपेद्धरेः ॥२॥ शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतम् । रजस्वलादिसंस्पर्शे स्नानमेव कुमारके ॥३॥ प्राक् चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः । कुमारकस्तु विज्ञेयो यावन्मौञ्जीनिबन्धनम् ॥४॥ खलक्षेत्रगतं धान्यं कूपवाप्यादिषूदकम् । स्पर्शदुष्टमपि ग्राह्यं यच्च गोष्ठगतं पयः ॥५॥ आपश्च सक्तवो धाना दधि तक्रं घृतं पयः । शूद्रहस्तादपि ग्राह्यं द्विजेनेत्यब्रवीन्मनुः ॥६॥ शुद्धयेच्च

---

જીભના વેગનો ત્યાગ કરવો. (૧૦૬) જે કોઈ પણ શરીરધારીને જો મહાસંકટ પ્રાપ્ત થયું હોય, ત્યારે તે સંકટગ્રસ્ત મનુષ્યને, પાછું નહિ લેવાની બુદ્ધિથી દયાપૂર્વક દાન કરે છે, તે ધન આ લોકમાં અને પરલોકમાં પણ અનંતગણા ફળને આપનારું થાય છે. (૧૦૭) માતા-પિતા રહિત દ્વિજાતિની વ્યક્તિને ઉપનયનસંસ્કાર, વિવાહાદિ સંસ્કારો પોતાના ધન દ્વારા કરાવે, તેનું અનંતગણું પુણ્ય થાય છે. (૧૦૮) એક બ્રાહ્મણાદિ કુમારને ઉપનયનસંસ્કાર કરાવે, તેથી જે સુકૃતરૂપ ધર્મ પમાય છે, તે ધર્મ અગ્નિહોત્રીથી પમાતો નથી. અગ્નિષ્ટોમાદિ યજ્ઞોથી તે શ્રેય પમાતું નથી. (૧૦૯) ધર્મનિષ્ઠ જે પુરુષ પિત્રાદિ રહિત એવા બ્રાહ્મણનો વિવાહ કરાવે, તે આ લોકના સુખને પામીને, પછી અક્ષય સ્વર્ગને પામે છે. (૧૧૦) સુંદર રાજ્યવાળા દેશમાં નિવાસ કરે, સન્મિત્રમાં મિત્રભાવ કરે, પતિવ્રતાદિ ગુણયુક્ત પત્ની હોય, તો ગૃહમાં નિવાસ કરે. સુશિષ્યને રહસ્યાર્થનો બોધ આપે. (૧૧૧)

કુત્સિત રાજાના રાજ્યમાં, તેના દેશમાં રહેનારને નિર્ભયપણું ક્યાંથી હોય ? કૃતઘ્ની શિષ્યને ભણાવવાથી સુખ ક્યાંથી થાય ? નઠારા મિત્રની સાથે મૈત્રી કરે તો પોતાનું હિત ક્યાંથી થાય ? કુભાર્યા સાથે ગૃહમાં વસનારને સુખ ક્યાંથી હોય ? માટે આ ચાર બાબતોથી દૂર રહેવું. (૧૧૨)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે સદાચારેષુ હેયોપાદેય નિરૂપણ નામાષ્ટાદશોઽધ્યાયઃ (૧૮)*

## અધ્યાય : ૧૯

### પ્રત્યક્ષ શ્રીહરિએ, સદાચારોમાં શુદ્ધિવિધિનું સ્પષ્ટ નિરૂપણ કર્યું છે, તે કહ્યું છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે વિપ્ર ! નઠારા સ્વપ્નમાં સ્ત્રીના સંગથી વીર્યપાત થયો હોય, પતિત વગેરે દુષ્ટજનોનો સ્પર્શ થયો હોય, મુંડન કરાવ્યું હોય, સ્ત્રી સમાગમ કર્યો હોય, શબસ્પર્શ કર્યો હોય ત્યારે તેમ જ ચાંડાલ, રજસ્વલા, વિધવાના સ્પર્શમાં તત્કાલ જ સ્નાન કરે. (૧) વેદબાહ્ય મત-જૈન, બૌદ્ધાદિક નાસ્તિકોનો સ્પર્શ થાય ત્યારે સ્નાન કરી, સૂર્યનું દર્શન કરી, શ્રીકૃષ્ણના નામનો જપ કરે. (૨) રજસ્વલાના સંસ્પર્શમાં શિશુને જળનું પ્રોક્ષણ કહ્યું છે. બાલકને આચમન કહ્યું છે. કુમારને સ્નાન કહ્યું છે. (૩) ચૌલ-સંસ્કાર કરાવ્યા પહેલાં બાળ જાણવો. અન્ન પ્રાશન સંસ્કાર કર્યા પહેલાં શિશુ જાણવો. ચૌલકર્મથી આરંભીને યજ્ઞોપવીત સંસ્કાર સુધી કુમાર જાણવો. (૪) ખળામાં રહેલું ધાન્ય તથા ખેતરમાં રહેલું જે ધાન્ય, કૂવો, વાવ, વગેરે મહાસરોવરાદિમાં રહેલું જળ તથા ગાયોના સ્થાનમાં રહેલું જે દૂધ તે (અસ્પૃશ્યના) સ્પર્શથી દુષ્ટ હોય, તો પણ (શુદ્ધિનિરપેક્ષ) ગ્રહણ કરવું. (૫) જળ, દહીં, છાશ, દૂધ, ઘી, સાથવો - આ બધું શૂદ્રના હાથથી ત્રણ વર્ણના માણસે ગ્રહણ કરવું. આ પ્રકારે મનુ કહે છે. (આ આપત્કાલમાં જાણવું.) (શેકેલું ધાન્ય દળવામાં આવે, ત્યારે સાથવો કહેવાય



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कारुहस्तस्थं पण्यं यत्स्यात्प्रसारितम् । भैक्षं च प्रोक्षणाच्छुद्ध्येत्स्पृष्टिः साक्षान्न यस्य तत् ॥७॥ धान्यानां वायुना शुद्धिर्घृतादीनां च वह्निना । कालेन गजदन्तादेर्भवेच्छुद्धिश्च चर्मणाम् ॥८॥ शुद्धिश्च यज्ञपात्राणां भवेदुष्णोदकेन वै । काष्ठानामथ तन्तूनां वाससामुदकेन च ॥९॥ अल्पे जलाशये शुद्ध्येत् त्र्यहेणैव नवोदकम् । दशाहेनैव महति गत्यभावे दिनान्तरे ॥१०॥ लेपोल्लेखाच्चाम्बुसेकाद्गृहं शुद्ध्येच्च लेपनात् । अमेध्यलिप्तं मृत्तोयैर्गन्धापहरणेन वै ॥११॥ ऊर्णा कौशेयकुतपपट्टक्षौमदुकूलकाः । एते शुद्धा भवन्त्येव शोषणप्रोक्षणादिभिः ॥१२॥ तूलिकामुपधानं च पुष्परक्ताम्बराणि च । शोषयित्वातपे किञ्चिन्मुहुर्हस्तेन मार्जयेत् ॥१३॥ पश्चाच्च वारिणा प्रोक्ष्य विनियुञ्जीत कर्मणि । अधिके सति मालिन्ये शोधयेत्तानि वारिणा ॥१४॥ उदुम्बरस्य चाम्लेन क्षारेण त्रपुसीसयोः । भस्माम्बुभिश्च कांस्यस्य रीतेः शुद्धिश्च मृज्जलैः ॥१५॥ शुद्ध्येत्तु भस्मना कांस्यं न चेन्मद्येन लेपितम् । सुरामूत्रादिसंस्पृष्टं शुध्येदुल्लेखनेन वै ॥१६॥ ताम्रमम्लेन शुध्येच्च न चेदामिषलेपनम् । आमिषेण तु यल्लिप्तं तत्तु दाहेन शुध्यति ॥१७॥ गवाघ्रातानि कांस्यानि श्वपाकोपहतानि च । शुध्यन्ति दशभिः क्षारैः शूद्रोच्छिष्टानि यानि च ॥१८॥ प्रभूतो ह्यन्नराशिश्चेत् श्वादिनोपहतस्तदा । अग्रमात्रं समुत्सृज्य शेषः स्यात्प्रोक्षणाच्छुचिः ॥१९॥ रजोऽग्निरश्वो गौश्छाया रश्मयो विप्लुषो मही । वायुर्जलं मक्षिकाद्या दुष्टसङ्गाददोषिणः ॥२०॥ दर्भाः कृष्णाजिनं मन्त्रो गावोऽग्निर्ब्राह्मणास्तिलाः । नैते निर्माल्यतां यान्ति नियोक्तव्याः पुनः पुनः ॥२१॥

---

છે.) (૬) ધોબીના હાથમાં રહેલું જે ધૌત વસ્ત્ર, દુકાને વેચાણ અર્થે ટોપલામાં રાખેલું ધાન્ય, માધુકરીથી મળેલું પકવાન્ન તે સર્વ માત્ર પ્રોક્ષણથી જ શુદ્ધ થઈ જાય છે. ભિક્ષાન્ન જો સાક્ષાત્ અસ્પૃશ્ય ચંડાળાદિકના સ્પર્શે રહિત હોય તો પ્રોક્ષણ માત્રથી શુદ્ધ થાય, સ્પર્શેલું શુદ્ધ થાય નહિ. (માર્ગમાં ભિક્ષાર્થે ભમતા યતિના હાથમાં રહેલું માર્ગસંચરણ પ્રયુક્ત દોષથી દૂષિત પણ પ્રોક્ષણ માત્રથી શુદ્ધ થાય છે.) (૭) અંત્યજના સ્પર્શવાળા ધાન્યોની વાયુથી શુદ્ધિ થાય. તેણે સ્પર્શ કરેલાં ઘૃતાદિકની શુદ્ધિ અગ્નિમાં તપાવવાથી થાય છે. હાથીદાંત અને મૃગચર્મની શુદ્ધિ કાળ દીર્ઘતાથી જે પ્રમાણે ગંધલેપ ન રહે તે દ્વારા થાય છે. (૮) યજ્ઞપાત્રો-સ્ત્રુક્, સ્ત્રુવા આદિકની શુદ્ધિ, ઉષ્ણ જળથી થાય. કાષ્ઠ અને સૂતર કે સૂતરાઉ કાપડને અસ્પૃશ્યનો સ્પર્શ થતાં જળ વડે શુદ્ધ કરાય. (૯) જળાશયમાં વર્ષા ઋતુમાં આવેલું નવું જળ ત્રણ દિવસ જતાં શુદ્ધ ગણાય. મહાજળાશયમાં દશ દિવસ પછી નવું જળ શુદ્ધ થાય. વાવ, કૂવાનું ગતિહીન જળ એક જ દિવસમાં શુદ્ધ થાય. (૧૦) ગૃહની શુદ્ધિ આ રીતે થાય : પ્રાક્તન લેપ, ગાર ઉખાડીને ખોદી નાંખવાથી, જળસેચન કરવાથી અને ફરી લીંપવાથી ગૃહ શુદ્ધ થાય. અપવિત્ર પદાર્થના લેપવાળું તો મૃત્તિકા યુક્ત જળ વડે ગંધ કાઢી નાંખવાથી શુદ્ધ થાય. (૧૧) કંબલ, રેશમી વસ્ત્ર, પર્વતીય બોકડાના રોમમાંથી બનાવેલો કામળો(કુતપ), જે નેપાળમાં બને છે; તથા વલ્કલ, ક્ષૌમ એટલે અતસી તંતુમાંથી બનાવેલો વસ્ત્રવિશેષ, દૂકુળ - બહુ મૂલ્યવાળા વસ્ત્રો; આ સર્વે વાયુઆતપમાં શોષણ અને પ્રોક્ષણાદિથી જ શુદ્ધ થાય છે. (૧૨) તળાઈ, રજાઈ, ઓશીકું, પુષ્પના રંગવાળાં વસ્ત્રો (કસુંબા આદિકથી રંગેલા વસ્ત્રો) તડકામાં લગારેક સૂકવીને હાથથી વારંવાર ખંખેરવા અને પછી જળ પ્રોક્ષણ કરવાથી શુદ્ધ થાય. રજાઈ વગેરે વધારે મેલા હોય તો જળથી ધોઈ શુદ્ધ કરીને તેને ઉપયોગમાં લેવાં. (૧૩-૧૪) ત્રાંબાની શુદ્ધિ આંબલીથી થાય; કલઈ અને સીસું ક્ષાર વડે શુદ્ધ થાય. કાંસાની શુદ્ધિ ભસ્મ અને જળથી થાય. પિત્તળની શુદ્ધિ મૃત્તિકા અને જળથી થાય. (૧૫) કાંસુ જો મદ્યથી લેપાયું ન હોય તો ભસ્મથી શુદ્ધ થાય. સુરા અને મૂત્રાદિના સંસ્પર્શવાળું હોય તે છોલવાથી, ઘસવાથી શુદ્ધ થાય; કેવળ ભસ્મ વડે પરિમાર્જન કરવાથી શુદ્ધ ન થાય. (૧૬) જો માંસાદિથી લેપ ના થયો હોય તો ત્રાંબું આંબલીથી શુદ્ધ થાય. માંસથી લેપાયેલું હોય તો ત્રાંબું અગ્નિના દાહ વડે શુદ્ધ થાય. (૧૭) જે કાંસાની થાળી વગેરે વાસણો, ગાયે સુંઘેલાં, ચંડાલે સ્પર્શેલાં હોય. શૂદ્રનાં ઉચ્છિષ્ટ હોય, તે કાંસાની થાળી વગેરે દશ વાર ક્ષાર અને જળથી શુદ્ધ થાય. (૧૮) જો ઘણો મોટો અન્નનો ઢગલો કૂતરાં કે ભૂંડ વગેરે જંતુએ દૂષિત કર્યો હોય, તો જ્યાં સ્પર્શ થયો હોય તે સ્થાનનો આગલો ભાગ ત્યાગ કરીને બાકીના અન્નરાશિને પ્રોક્ષણ કરવાથી શુદ્ધિ થાય જ. (૧૯) ધૂળ, અગ્નિ, ઘોડો, ગાય, છાયા, કિરણો, હિમબિન્દુઓ, પૃથ્વી, વાયુ, નદીઓનું જળ, મક્ષિકા, ગાયનું વાછરડું તથા બાળક વગેરે અસ્પૃશ્યોના સંગથી દૂષિત થતાં નથી.(૨૦) દર્ભો, કૃષ્ણમૃગનું ચર્મ, વેદાદિ મંત્ર, ગાયો, અગ્નિ, બ્રાહ્મણો, તલ, આ સર્વ એકવાર ઉપયોગમાં લીધા હોય તો પણ નિર્માલ્યપણાને પામતા નથી; માટે વારંવાર કર્મમાં લેવા. (૨૧) દર્ભો પિંડોમાં નિર્માલ્ય થાય છે. બ્રાહ્મણો પ્રેતભોજનથી, મંત્ર શૂદ્રોથી અને હુતાશન = અગ્નિ સંન્યાસીઓમાં નિર્માલ્ય

दर्भाः पिण्डेषु निर्माल्यं ब्राह्मणाः प्रेतभोजने । मन्त्रः शूद्रेषु निर्माल्यं सन्न्यासिषु हुताशनः ॥२२॥ अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति । विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ॥२३॥ द्विविधस्याप्याशौचस्य शुद्धिं वक्ष्यामि ते त्वथ । वर्णाश्रमोचितां विप्र! सङ्क्षेपादृषिसम्मताम् ॥२४॥ जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते । दशाहं सूतकं तस्य कर्मानर्हत्वलक्षणम् ॥२५॥ पुत्रस्य जननी शुध्येदेकविंशतिवासरैः । कन्याया जननी शुध्येन्मासेनैकेन निश्चितम् ॥२६॥ सपिण्डानां च सर्वेषां दशाहं सूतकं मतम् । त्रिरात्रं सोदकानां च मुनिभिः परिकीर्तितम् ॥२७॥ सूतके सूतिकावर्जं संस्पर्शो न निषिध्यते । संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते ॥२८॥ प्रथमे दिवसे षष्ठे दशमे दिवसे तथा । त्रिष्वेतेषु पितुर्नास्ति सूतकं पुत्रजन्मनि ॥२९॥ अतो न विद्यते दोषः कर्तुर्जातककर्मणः । तस्माद्गोभूहिरण्यादिदानं च प्रतिगृह्णताम् ॥३०॥ दशाहं शावमाशौचं सपिण्डेषु विधीयते । सोदकानां तु सर्वेषां त्रिरात्रं तदुदीरितम् ॥३१॥ दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः। शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते ॥३२॥ आदन्तजननात्स्नानमादाहादह उच्यते । चौलोत्तरं त्रिरात्रं च पञ्चमाब्दात्परं तथा ॥३३॥ अहस्त्वदत्तकन्याया दत्तायाश्च दिनत्रयम् । आशौचं च व्रतादेशाद्द्विजानां स्वस्वजातिजम् ॥३४॥ दिनानि दश विप्रस्य द्वादश क्षत्रियस्य तु । विशः पञ्चदशाशौचं मासं शूद्रस्य कथ्यते ॥३५॥ सामान्यतो दशाहं वा चातुर्वर्ण्यस्य तत्स्मृतम् । आपत्काले तु नियमो दशाहस्यापि नास्ति वै ॥३६॥ त्रिरात्रमाहुराशौचमाचार्ये संस्थिते तथा

---

થાય છે. (૨૨) શારીરિક અવયવો જળથી શુદ્ધ થાય છે. મન સત્યથી શુદ્ધ થાય છે. અહંકાર વિદ્યાભ્યાસ અને તપથી શુદ્ધ થાય છે. બુદ્ધિ જ્ઞાનથી શુદ્ધ થાય છે. (આનો વિસ્તાર પ્રમાણ વાક્યો સહિત મિતાક્ષરા યુક્ત યાજ્ઞવલ્ક્ય સ્મૃતિના દ્રવ્યશુદ્ધિ-પ્રકરણથી જાણવો. (૨૩)

હે વિપ્ર ! હવે વર્ણાશ્રમને યોગ્ય, સ્મૃતિકારોએ પ્રતિપાદન કરેલી **જન્માશૌચ** અને **મૃતાશૌચ** એમ બે પ્રકારની શુદ્ધિ તમોને સંક્ષેપથી કહું છું.(૨૪) પુત્ર-જન્મ સમયે પિતા પહેરેલા વસ્ત્રો સહિત સ્નાન કરે. નવ-જાત શિશુનો પિતા, સમંત્રક સ્નાન-સંધ્યાદિ કર્મમાં અયોગ્ય ગણાય છે. તે માટે દશ દિવસનું અહોરાત્ર પર્યંત સૂતક પાળે. (૨૫) પુત્રની માતા ઉપરોક્ત દશ દિવસ ઉપરાંત એકવીશ દિવસે શુદ્ધ થાય. કન્યાની માતા (દશ દિવસ ઉપરાંત) એક માસ વડે શુદ્ધ થાય.(૨૬) સર્વ સપિંડોને (સાત પુરુષ સુધીનાને) દશ દિવસનું સૂતક માનેલું છે. આઠમા પુરુષથી (આઠમી પેઢીથી) આરંભીને ચૌદ પુરુષ સુધીનાને ત્રણ રાત્રિ સૂતક મુનિઓએ કહેલું છે. (૨૭) જન્મના આ શૌચમાં સૂતિકાએ રહિત સંસ્પર્શ નિષેધ નથી. સૂતિકાના સંસ્પર્શમાં તો સ્નાન કહેલું છે. (૨૮) પુત્ર જન્મને દિવસે, છઠે દિવસે તથા દશમે દિવસે આ ત્રણેય દિવસોમાં પિતાને સૂતક નથી. તે નિમિત્તે દાનાદિ અધિકારમાં સૂતક નથી. (આ વ્યાસનો મત છે.) (૨૯) તે હેતુથી જાતકકર્મ કરતા પિતાને અર્ચન કરવા યોગ્ય દેવનું પૂજન, દાનકરણ મંત્રોચ્ચારણ વગેરેમાં દૂષણ નથી. માટે જાતકર્મ કર્તાથી ગાય, પૃથ્વી, હિરણ્યાદિ દાન ગ્રહણ કરનારાઓને દોષ નથી. (૩૦) સપિંડ સાત પુરુષો પર્યન્ત, મરણ સંબંધી અશુદ્ધિ દશ દિવસ માટે ગણાય છે. તે મરણની અશુદ્ધિ નિમિત્તે આઠમી પેઢીથી આરંભીને ચૌદમી પેઢી સુધી સર્વને માટે ત્રણ રાત્રિનું સૂતક કહેલું છે. (૩૧) દશ દિવસની મધ્યમાં મરણ પામે તો તે બાળકનું બાંધવોએ મરણસૂતક પાળવું નહી. પ્રસવ નિમિત્ત સૂતક પાલન કરવું. (૩૨) દાંત ઉત્પન્ન થયા પહેલા બાળક મરણ પામે, તો સ્નાન માત્રથી શુદ્ધિ થાય. ત્રીજા વર્ષમાં કર્તવ્ય ચૌલસંસ્કાર પહેલાં મરણ પામે તો, એક અહોરાત્ર સૂતક થાય. ચૌલસંસ્કાર પછી ત્રણ રાત્રિ, પાંચ વર્ષ પછી આગળ પણ ત્રણ રાત્રિનું સૂતક છે ઉપનયન સંસ્કાર પછી દશ દિવસનું સૂતક લાગે. ઉપનયનસંસ્કાર ના થયો હોય, ત્યાં સુધી ત્રણ દિવસનું સૂતક છે. (૩૩) વાગ્દાનથી નહિ અપાયેલી કન્યા મરણ પામે, તો એક દિવસનું સૂતક લાગે. વાગ્દાનથી અપાયેલી કન્યાના મરણમાં ત્રણ અહોરાત્ર આશૌચ કહેલું છે. ત્રણ વર્ણોને ઉપનયનથી આરંભીને પોતપોતાની જાતિમાં કહેલું આશૌચ થાય. (૩૪) બ્રાહ્મણને દશ દિવસ, ક્ષત્રિયને બાર દિવસ, વૈશ્યને પંદર દિવસ, શૂદ્રને ત્રીસ દિવસનું સૂતક કહેલું છે. (૩૫) અથવા ચાર વર્ણને સામાન્યપણે દશ દિવસનું સૂતક કહેલું છે. આપત્કાલમાં તો દશ દિવસનો પણ નિયમ નથી જ. (આપત્કાલમાં તો તત્કાલ શુદ્ધિ થાય છે. )(૩૬) આચાર્ય, માતાના પિતા, દીકરીનો પુત્ર, અને પોતાનો યજમાન તથા બહેનનો પુત્ર મરણ પામે તો

। मातामहे च दौहित्रे स्वयाज्ये भगिनीसुते ॥३७॥ मातुलस्य च मातुल्याः श्वश्रूश्वशुरयोरपि । जामातुश्च भगिन्याश्च त्रिरात्रं स्वगृहे मृतौ ॥३८॥ अन्यथा पक्षिणी प्रोक्ता तथा पितृष्वसुर्मृतौ । मातृष्वसुः श्यालकस्य तथा सन्मित्रशिष्ययोः ॥३९॥ निजदेशाधिपादीनामेकाहाशौचमुच्यते । स्वल्पेऽपि सति सम्बन्धे स्नानं वासोयुतं मतम् ॥४०॥
त्रिधा विभज्य रजनीमाद्यभागद्वये मृतौ । जन्मादौ च दिनं पूर्वं ग्राह्यमन्त्ये तथोत्तरम् ॥४१॥ इत्थं केचिद्बुधाः प्राहुस्तथा केचिन्महर्षयः । निशीथात्प्राक् पूर्वदिनं प्राग्वा सूर्योदयाद्विदुः ॥४२॥ साग्नेर्दाहदिनादेव निरग्नेर्मृतिवासरात् । अशौचदिनसङ्ख्यापि विज्ञेया गृहिभिर्नृभिः ॥४३॥ सूतेर्ज्ञाने दशाहोर्ध्वं पुनर्नास्त्येव सूतकम् । शावाशौचे तु विज्ञेया व्यवस्थेत्थं द्विजोत्तम! ॥४४॥ आत्रिमासात्त्रिरात्रं स्यात्षण्मासावधि पक्षिणी । एकाहं नवमासान्तमूर्ध्वं स्नानेन शुद्ध्यति॥४५॥ देशान्तरमृते केचित्स्नानमात्रं महर्षयः । इच्छन्ति च तथा प्रेते यतौ वैखानसेऽपि च ॥४६॥ महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः। वाचो यत्र विभिद्यन्ते तद्देशान्तरमुच्यते ॥४७॥ स्वदेशे परदेशे वा ह्यूर्ध्वं संवत्सरादपि । मातुः पितुः स्त्रियाः पत्युः पूर्णमाशौचमुच्यते ॥४८॥ युद्धे मृतस्य नाशौचं गोद्विजार्थे मृतस्य च । प्राप्तश्च यो दुर्मरणमप्रमादेन तस्य च ॥४९॥ जनने जननं चेत्स्यान्मरणे मरणं तथा । पूर्वशेषेण शुद्धिः स्यादुत्तराशौचवर्जनम् ॥५०॥ दशाहिकं पतेदन्यत्सूतकं दशमेऽह्नि चेत्। रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे भवेत्त्र्यहात् ॥५१॥ शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् । शावेन

---

ત્રણ રાત્રિનું સૂતક કહેલું છે. (૩૭) માતાનો ભાઈ, મામી, સાસુ, સસરો, જમાઈ, તથા બહેન પોતાના ઘરમાં મરણ પામે તો ત્રણ રાત્રિનું સૂતક છે. (૩૮) મામા વગેરે પોતાને ઘેર મરણ પામે, તો દોઢ દિવસ સૂતક કહ્યું છે. ફોઈ, માસી, સાળો, સન્મિત્ર અને શિષ્યના મરણમાં દોઢ દિવસ સૂતક કહ્યું છે. (૩૯) પોતાના દેશનો અધિપતિ વગેરેના મરણમાં એક દિવસનું સૂતક કહેવાય છે. દિવસે મરેલા હોય તો નક્ષત્રદર્શનથી અને રાત્રે મરેલા હોય તો સૂર્યદર્શનથી શુદ્ધિ થાય છે. લગારેક સંબંધ હોય તો સવસ્ત્ર સ્નાનથી શુદ્ધિ થાય છે. (૪૦) રાત્રિના ત્રણ ભાગ કરવા. તેની ઘડીઓના ત્રણ ભાગ ગણવા. તેના પહેલા બે ભાગમાં મરણ તથા જન્મ અને રજસ્વલાપણું થયું હોય તો પૂર્વનો દિવસ ગ્રહણ કરવો તથા રાત્રિના બીજા ભાગમાં મરણ-જન્મ અને રજોદર્શન થયું હોય તો ઉત્તરનો દિવસ ગ્રહણ કરવો. આ પ્રકારે કેટલાક પંડિતો કહે છે તથા કેટલાક મહર્ષિઓ મધ્યરાત્રિના પહેલાં પૂર્વ દિવસ કહે છે. અથવા કેટલાક સૂર્યોદયથી પહેલાં પૂર્વ દિવસ જાણે છે. આ ત્રણ પક્ષમાં પણ દેશાચારથી વ્યવસ્થા જાણવી. (૪૧-૪૨) આવસથ્યાદિ અગ્નિવાળાના દાહના દિવસથી આરંભીને જ આશૌચ દિવસની સંખ્યા ગૃહસ્થોએ જાણવી. અગ્નિએ રહિતના મરણથી આરંભીને જ આશૌચના દિવસની સંખ્યા જાણવી. (૪૩) હે દ્વિજોત્તમ ! પુત્રાદિની પ્રસૂતિથી દશ દિવસ પછી જ્ઞાન થાય તો ફરીથી સૂતક નથી. મરણના સૂતકમાં તો આગળ કહીએ છીએ તે પ્રમાણે નિર્ણય જાણવો. (૪૪) મરણ પામેલાનું અગિયાર દિવસથી આરંભીને ત્રણ માસની સમાપ્તિ પર્યંત ત્રણ રાત્રિનું સૂતક થાય. ચાર માસથી આરંભીને છ માસ સુધી દોઢ દિવસનું સૂતક જાણવું. સાત માસથી આરંભીને નવ માસની સમાપ્તિ સુધી એક દિવસનું સૂતક જાણવું. દશ માસથી આરંભીને વર્ષ પર્યંત સ્નાનથી શુદ્ધ થાય છે. ( આ માધવીય અને દેવલ મતથી કહ્યું છે.) પ્રથમ પક્ષ આપત્કાળ વિનાના વિષયવાળો છે. બીજો પક્ષ આપત્કાળના વિષયવાળો છે. આ એક દેશના મરણ વિષયક જાણવું. (૪૫) કેટલાક મહર્ષિઓ દેશાંતરના મરણમાં સ્નાન માત્ર ઈચ્છે છે. તથા સંન્યાસી અને વાનપ્રસ્થના મરણમાં (તેના ગોત્રીઓને) સ્નાન માત્ર ઈચ્છે છે. (૪૬) જે દેશમાં મહા નદીનું વ્યવધાન હોય, અથવા કોઈ પર્વતનું વ્યવધાન હોય, જે દેશમાં દેશની ભાષા ભેદ પામતી હોય, તે **દેશાંતર** કહેવાય છે. (૪૭) પોતાના દેશમાં અથવા પરદેશમાં, વર્ષથી પછી પણ માતા-પિતા અને પત્ની-સ્વામીનું મરણ જે દિવસે સાંભળ્યું, તે દિવસથી આરંભીને દશ દિવસ સૂતક કહેવાય છે. (૪૮) રણસંગ્રામમાં મરેલા અને ગૌ-બ્રાહ્મણને ખાતર મરેલાનું સૂતક લાગતું નથી. પોતે આપઘાત કરવા અગ્નિ-સ્નાન કર્યું હોય કે વિષભક્ષણથી મૃત્યુ થયું હોય તો આવા અપમૃત્યુથી સૂતક લાગતું નથી. (૪૯) જો જન્મના સૂતક સાથે બીજું જન્મનું સૂતક આવી જાય, તથા મરણના સૂતક સાથે બીજું મરણસૂતક આવી જાય, તો પૂર્વના સૂતકના બાકી દિવસોથી શુદ્ધિ થાય. પછીના સૂતકનું બાકીના દિવસોનું સૂતક પાળવું નહીં. (૫૦) જો દશમે દિવસે દશ દિવસનું સૂતક આવે, જો રાત્રિ માત્ર બાકી હોય તો તે દશમા દિવસથી અધિક બે દિવસમાત્રથી શુદ્ધિ થાય; જો ત્યારે પહોર માત્ર બાકી હોય તો ત્રણ દિવસથી શુદ્ધિ થાય. (૫૧) મરણનું સૂતક ચાલતું હોય ત્યારે દશ દિવસનું જન્મનું સૂતક પ્રાપ્ત થાય,



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

शुध्येत्सूतिस्तु न सूतिः शावशोधिनी ॥५२॥ स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि । न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुध्यति ॥५३॥ सूतकान्तरसम्प्राप्तावपि पुत्रादिना द्विज! । नवश्राद्धानि देयानि यथाकालं यथाक्रमम् ॥५४॥ आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि । कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥५५॥ ऋषिभिर्बहुधैवात्र सूतकाशौचविस्तरः । कृतोऽस्तीति ततो ज्ञेयो विशेषोऽन्यस्तु सन्मते ! ॥५६॥ नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् । नाशौचं कीर्तितं सद्भिः शावं सौत्यं च सुव्रत ! ॥५७॥ मातुः पितुर्गुरोश्चैते निशम्य मरणं ततः । कुर्युः सवसनं स्नानं न त्वन्यस्य कदाचन ॥५८॥ व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे । आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥५९॥ प्रारम्भो वरणं यज्ञे सङ्कल्पो व्रतसत्रयोः । नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया ॥६०॥ सूतके वर्तमाने च श्राद्धप्राप्तौ मनीषिभिः । कर्तव्यं सूतकान्ते तदमायां वा यथाविधि ॥६१॥ आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम् । स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्तितम् ॥६२॥ सूतके कर्मणां त्यागो नित्यानामपि कथ्यते । प्रारब्धानि तु काम्यानि कर्तव्यानि यथाविधि ॥६३॥ सन्ध्या तु मानसी कार्या कुशवारिविवर्जिता । विप्रो दशाहमासीत वैश्वदेवविवर्जितः ॥६४॥ श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात् । अशुद्धः पुनरेव स्यात्स्मार्तं त्वन्येन कारयेत् ॥६५॥ लवणे फलपुष्पादौ घृततैलपयःसु च । पण्येषु चैव सर्वेषु न दोषो मृतसूतके ॥६६॥ आतुरे स्नान उत्पन्ने दशवारमनातुरः । स्नात्वा स्नात्वा स्पृशेदेनमातुरः शुद्धिमाप्नुयात् ॥६७॥ ज्वराभिभूता या नारी रजसा च परिप्लुता । तां चापीत्थं स्पृशेदन्या नारी स्नायात्पुनः

---

ત્યારે તે જન્મના સૂતકની મરણના સૂતકની સમાપ્તિથી શુદ્ધિ થાય. પરંતુ જન્મનું સૂતક મરણના સૂતકની શુદ્ધિ કરનારું નથી. (૫૨) જો ત્રિરાત્રિના અલ્પશૌચના મધ્યમાં દશ દિવસનું સૂતક પ્રાપ્ત થાય ત્યારે તો પૂર્વના સૂતકની સમાપ્તિથી મોટા સૂતકની નિવૃત્તિ થાય નહિ. પરંતુ દશ અહોરાત્રિના દિવસ રૂપથી શુદ્ધિ થાય. (૫૩) હે વિપ્ર ! જન્મ અથવા મરણમાં કોઈ પણ સૂતક આવે તો પણ પુત્રાદિ દ્વારા નવ શ્રાદ્ધો યથા સમયે ક્રમ પ્રમાણે કરવાં. (૫૪) બીજા સૂતકથી અશુદ્ધ હોય તો પણ અગિયારમે દિવસે પહેલું શ્રાદ્ધ કરે. શ્રાદ્ધ કરનારને તત્કાલ શુદ્ધિ થાય. શ્રાદ્ધકર્તા શ્રાદ્ધની સમાપ્તિ પછી અશુદ્ધ છે. (૫૫) હે સન્મતે ! આ અર્થમાં ઋષિઓએ સૂતકના અશૌચનો વિસ્તાર ઘણા પ્રકારે કરેલો છે. માટે બીજો વિસ્તાર તો ઋષિ પ્રણીત ગ્રંથોથી જાણવો. (૫૬) હે સુવ્રત ! નૈષ્ઠિક બ્રહ્મચારીઓ, વાનપ્રસ્થો, સંન્યાસીઓ તથા ઉપકુર્વાણ બ્રહ્મચારીઓને, મુનિઓએ જન્મ-મરણનું સૂતક કહ્યું નથી. (૫૭) માટે એ નૈષ્ઠિકાદિ પોતાના માતા, પિતા અને ગુરુનું મરણ સાંભળીને વસ્ત્રે સહિત સ્નાન કરે. બીજાનું મરણ સાંભળીને સ્નાન કરે નહિ. (૫૮) વ્રતો, યજ્ઞો, વિવાહોમાં, શ્રાદ્ધ-હોમ, પૂજન, (નિયત દેવપૂજા) જપ, (પુરશ્ચરણ,) પૂર્વે શ્રવણ કરવા માટે સંકલ્પ કરેલા સત્શાસ્ત્ર હરિવંશ વગેરેનો આરંભ કરેલો હોય તો સૂતક ન થાય; બંને પ્રકારનું સૂતક લાગે નહીં. આરંભ ના કર્યો હોય તો સૂતક પ્રાપ્ત થાય. (૫૯) યજ્ઞમાં બ્રાહ્મણની વરણી એ **આરંભ** જાણવો. ઋત્વિજોનું વરણ, એ યજ્ઞમાં આરંભ કહેવાય છે. વ્રતસત્રમાં વ્રત અને સત્ર(=સદાદાન)નો સંકલ્પ (તિથિ, વાર નક્ષત્રાદિ નિર્દેશપૂર્વક - આ હું કરીશ એવો સંકલ્પ કર્યો હોય) તે આરંભ કહેવાય છે. વિવાહ વગેરેમાં નાન્દી શ્રાદ્ધ તે આરંભ તથા શ્રાદ્ધમાં પાક ક્રિયા-રસોઈ માટે ચુલા ઉપર પાત્રનું આરોપણ આદિકનો ઉદ્યોગ તે આરંભ કહેવાય છે. (૬૦) સૂતક વર્તતું હોય, ત્યારે શ્રાદ્ધ કરવાનું પ્રાપ્ત થાય, તો ડાહ્યા પુરુષોએ તે શ્રાદ્ધ સૂતકની સમાપ્તિમાં યથાવિધિ કરવું, અથવા અમાસને દિવસે કરવું. (૬૧) આપત્કાળ પામેલાને તો (સૂતક હોવા છતાં) સૂતક છે જ નહીં. આ સર્વ સૂતકો સ્વસ્થ મનુષ્યે જ પાળવાનાં છે. સૂતકમાં નિત્યકર્મો-સમંત્રક સ્નાનસંધ્યાદિક ન કરવાં. નૈમિત્તક તો પ્રારંભેલા, પુત્રજન્માનુબંધી જાતેષ્ટિ આદિક યથાવિધિ કરવાં જ. (૬૨-૬૩) વિપ્રે, સૂતકની પ્રાપ્તિના દિવસથી આરંભી દશ દિવસ સુધી દર્ભ અને ઉદકથી રહિત માનસિક સંધ્યા કરવી. બ્રાહ્મણ દસ દિવસ વૈશ્વદેવ રહિત રહે. (૬૪) શ્રૌત કર્મ-અગ્નિહોત્રમાં તો તત્કાળ આ સૂતકી સ્નાનથી શુદ્ધ થાય છે. આહુતિ આપ્યા પછી ફરીથી અશુદ્ધ જ થાય. જાત-કર્માદિ સ્માર્ત કર્મ-બીજાની પાસે કરાવે. (૬૫) લવણ, ફલ-પુષ્પાદિ, ઘી, તેલ, દૂધ અને સર્વ હાટડીમાં પ્રસારેલ વેચવાની ચીજોમાં મૃત્યુ-સૂતક દોષ નથી. (૬૬) રોગી મનુષ્યને મરણ નિમિત્તે સ્નાન આવે તો રોગાદિ રહિત પુરુષ સ્નાન કરીને રોગી માણસને દશ વાર સ્પર્શ કરે તેથી રોગી માણસ શુદ્ધ થાય છે. (૬૭) જે નારી જ્વર પીડિત હોવાથી સ્નાન કરવા અસમર્થ હોય;



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

पुनः ॥६८॥ राजा च राजकीयाश्च सत्रिणो व्रतिनस्तथा । स्नानाच्छुद्धाः स्वस्वकार्ये भिषक्छिल्प्यादयोऽपि च ॥६९॥ द्विविधाशौचमित्युक्तं सङ्क्षेपेण मया द्विज! । तथैव चात्र विज्ञेयं तृतीयं राहुसूतकम्॥७०॥ सर्वेषामेव वर्णानां सूतकं राहुदर्शने । स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत् ॥७१॥ आरनालं पयस्तक्रं दधि स्नेहाद्यपाचितम् । मणिकस्थोदकं चैव तिलदर्भैर्न दुष्यति ॥७२॥ सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम् । चन्द्रग्रहे च यामांस्त्रीन्बालवृद्धातुरान्विना ॥७३॥ ग्रस्तोदये च सूर्यस्य पूर्वरात्रौ न भोजनम् । ग्रस्तोदये विधोः पूर्वं नाह्नि भोजनमाचरेत्॥७४॥ ग्रस्तास्ते सति तिग्मांशोरहोरात्रमुपोषणम् । कुर्यात्परेऽह्नि दृष्ट्वाऽर्कं ततः कुर्वीत भोजनम् ॥७५॥ ग्रस्ते चास्तं गते त्विन्दौ ज्ञात्वा मुक्त्यवधारणम् । स्नानहोमादिकं कुर्याद्भुञ्जीतेन्दूदये पुनः ॥७६॥ बालवृद्धातुराणां च रवीन्द्वोर्ग्रहणात्पुरा । याम एको वर्जनीयो भोजनादावपि ध्रुवम् ॥७७॥ अज्ञानाद्ग्रहकाले यो भुङ्क्ते स तु नराधमः । प्राजापत्येन शुध्येद्वै वेधकाले त्र्यहेण च ॥७८॥ रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा । चूडामणिरिति ख्यातः स योगः पुण्यवृद्धिकृत् ॥७९॥ वारेष्वन्येषु यत्पुण्यं ग्रहणे चन्द्रसूर्ययोः । तत्पुण्यं कोटिगुणितं योगे चूडामणौ स्मृतम् ॥८०॥ ग्रस्यमाने स्मृतं स्नानं ग्रस्ते होमः सुरार्चनम् । मुच्यमाने तथा दानं मुक्ते स्नानं विधीयते ॥८१॥ मुक्तौ यस्तु न कुर्वीत स्नानं ग्रहणसूतके । स सूतकी भवेत्तावद्यावत्स्यादपरो ग्रहः ॥८२॥ शीताम्बूष्णोदकात्पुण्यमपारक्यं परोदकात् । भूमिस्थमुद्धृतात्पुण्यं ततः प्रस्त्रवणोदकम् ॥८३॥ ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलम् । तत महानदीतोयं पुण्यं पुण्यस्ततोऽम्बुधिः ॥८४॥ यथासम्भवतः

એવી રજસ્વલા નારીને ચોથે દિવસે શુદ્ધ બીજી નારી જો આ જ ક્રમથી (પૂર્વે પુરુષને કહ્યા પ્રમાણે દશવાર) સ્નાન કરીને સ્પર્શ કરે તો તે પણ શુદ્ધ થાય છે. (૬૮) રાજા અને રાજાના માણસો, અન્ન સત્રમાં પ્રવર્તેલા, વ્રતધારીઓ તથા વૈદ્યો, શિલ્પીઓ, સુથારો, ચટ્ટાઈ વગેરે કરનારાઓ તે પણ સ્નાનથી પોતપોતાના કાર્યમાં **શુદ્ધ** થાય છે. (૬૯)

હે વિપ્ર ! આ રીતે બે પ્રકારનું સૂતક મેં સંક્ષેપથી કહ્યું. આ પ્રકરણમાં ત્રીજું સૂતક રાહુનું (ઉપરાગ-સંબંધી) જાણવું. (૭૦) રાહુનાં દર્શન થતાં, બ્રાહ્મણાદિ સર્વ વર્ણોને પણ સૂતક છે. ગ્રહણના આરંભમાં ઠંડા પાણીથી સ્નાન કરી જપાદિ કરે. રાંધેલા અન્નનો ત્યાગ કરે. (૭૧) અથાણું, દૂધ, છાશ, દહીં, ઘી અને તેલથી પકવેલાં પદાર્થ, તથા માણમાં રહેલું જળ, તિલ અને દર્ભોથી યુક્ત કરવું, જેથી દોષ લાગતો નથી. (અહીં જળમાં જે દોષાભાવ કહ્યો તે તો આપત્કાળમાં અથવા ગંગાજળમાં જાણવો, કેમ કે સ્મૃત્યંતરમાં તેનો નિષેધ કર્યો છે.) (૭૨) બાળકો અને વૃધ્ધો સિવાયનાએ સૂર્યગ્રહણમાં ઉપરાગના પહેલા ચાર યામ (બાર કલાક), ચન્દ્રગ્રહણમાં ત્રણ યામ (નવ કલાક) પહેલા ભોજન કરવું નહિ. (૭૩) ગ્રસિત સૂર્યનો ઉદય થવાનો હોય, તો પૂર્વ રાત્રિમાં ભોજન કરવું નહિ. ચન્દ્ર ગ્રસિત ઉદય પામવાનો હોય, તો પ્રથમ દિવસે-આગલે દિ'-ભોજન કરે નહિ. (૭૪) સૂર્ય, ગ્રસેલો આથમે તો અહોરાત્ર ઉપવાસ કરે, બીજે દિવસે સૂર્યનાં દર્શન કરીને પછી ભોજન કરે. (૭૫) ચંદ્ર ગ્રસિત આથમે તો મોક્ષનો નિર્ણય જાણીને સ્નાન-હોમાદિ કરે. ફરી ચન્દ્રનો ઉદય થાય, ત્યારે ભોજન કરે. (૭૬) સૂર્ય અને ચંદ્રનાં ગ્રહણથી પહેલાં એક યામ (ત્રણ કલાક) બાળક, વૃદ્ધ અને રોગાતુર પણ ભોજનનો ત્યાગ કરે જ. (૭૭) જે પુરુષ અજ્ઞાનથી ભોજન કરે છે તે તો ત્રણ દિવસના ઉપવાસથી શુદ્ધ થાય. **'પ્રાજાપત્યવ્રત'**થી શુદ્ધ થાય. (૭૮) જો રવિવારે સૂર્યગ્રહણ અને સોમવારે ચંદ્રગ્રહણ થાય, તો **'ચુડામણિયોગ'** કહેવાય. તે યોગ પુણ્યની વૃદ્ધિ કરનારો થાય છે. (૭૯) બીજા વારોમાં સૂર્ય અને ચન્દ્રગ્રહણમાં જે પુણ્ય કહેલું છે, તે પુણ્ય ચુડામણિયોગમાં કરોડગણું કહેલું છે. (૮૦) ગ્રહણના આરંભમાં સ્નાન કહેલું છે. ગ્રસ્ત થાય ત્યારે હોમ તથા દેવનું પૂજન કહેલું છે. મુકાવાની તૈયારી હોય ત્યારે દાન કહેલું છે તથા મુક્ત થાય ત્યારે સ્નાનનું વિધાન છે. (૮૧) જે પુરુષ ગ્રહણના સૂતકમાં, સૂર્ય અને ચન્દ્ર મુક્ત થાય ત્યારે સ્નાન નથી કરતો, તે પુરુષ જ્યાં સુધી બીજું ગ્રહણ થાય ત્યાં સુધી સૂતકી રહે છે. (૮૨)ઉષ્ણ જળથી શીતલ જળ પવિત્ર છે. બીજાએ લાવેલા જળથી પોતે લાવેલું જળ પુણ્ય આપનારું છે. કૂવામાંથી કાઢેલા જળ કરતાં, તળાવનું જળ પવિત્ર છે. ભૂમિમાં રહેલાં જળ કરતાં પર્વતથી નીકળેલા નિર્ઝરનું જળ પવિત્ર છે. (૮૩) તેથી મહા સરોવરનું જળ પવિત્ર છે, તેનાથી સામાન્ય નદીનું જળ પુણ્યકારી છે, તેથી મહાનદીનું-પુણ્યકારી પવિત્ર છે અને તેથી સમુદ્રનું જળ અધિક પુણ્યકારી છે. (૮૪) પોતાના આત્માની શુદ્ધિ, ઉપરાગ આશૌચની નિવૃત્તિ નિમિત્તે શુદ્ધિ માટે જે સમયે જે જળ મળે તેનાથી

स्नानं कर्तव्यं स्वस्य शुद्धये । दानं देयं यथाशक्ति गोभूहेमतिलादि च ॥८५॥ भूप्रदो मण्डलाधीशः सर्वत्र सुखितोऽन्नदः । भवेच्च कीर्तिमान्भूमौ रूपवान् रूप्यदो भवेत् ॥८६॥ दीपदो निर्मलाक्षश्च गोदाता स्वर्गलोकभाक् । स्वर्णदाता च दीर्घायुस्तिलदः स्याच्च सुप्रजाः ॥८७॥ वेश्मदोऽत्युच्चसौधः स्याद्वस्त्रदश्चन्द्रलोकभाक् । हयदो दिव्ययानश्च लक्ष्मीवान्वृषभप्रदः ॥८८॥ सुभार्यः शिबिकादाता सुपर्यङ्कप्रदोऽपि च । भवेत्ततः श्रद्धयैव दानं दद्यात्स्वशक्तितः ॥८९॥ श्रद्धया प्रतिगह्णाति श्रद्धया यो ददाति च । तावुभौ स्वर्गिणौ स्यातामन्यथा विफलं हि तत् ॥९०॥ चन्द्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत् । तेनैव सकला पृथ्वी दत्ता भवति निश्चितम् ॥९१॥ रात्रौ श्राद्धे न दोषोऽस्ति ग्रहणे शशिनः किल । आशौचिनोऽपि ग्रहणे श्राद्धादिर्विहिता क्रिया ॥९२॥ एवं सदाचारविधिर्मया तुभ्यं प्रदर्शितः । गृहाश्रमस्थितानां हि सर्वेषां सुखदायकः ॥९३॥ श्रीविष्णुभक्त्या सहितं य एतं नित्यं सदाचारमिहानुतिष्ठेत्। स प्राप्नुयात्कीर्तिमतीव शुद्धामन्ते च गोलोकपदं द्विजेन्द्र! ॥९४॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे सदाचारेषु शुद्धिविधिनिरूपण नामैकोनविंशोऽध्यायः ॥१९॥

श्रीनारायणमुनिरुवाच – **श्राद्धानि च यथाशक्ति यथाकालं यथाधनम् । यथाविधि प्रकुर्वीत गृहस्थो नियमान्वितः ॥१॥ प्रेतं पितॄंश्च निर्दिश्य भोज्यं दानं च तत्प्रियम् । श्रद्धया दीयते पुंसा यत्तच्छ्राद्धं प्रकीर्त्यते ॥२॥ नित्यं नैमित्तिकं काम्यं**

---

સ્નાન કરવું. અને ગાય, પૃથ્વી, સુવર્ણ, તલ વગેરેનું દાન યથાશક્તિ આપવું. (૮૫) પૃથ્વી આપનારો સામન્ત-નરેશોનો રાજા થાય છે. અન્ન આપનારો સુખી થાય, ચાંદી આપનારો પૃથ્વીમાં કીર્તિમાન અને રૂપવાન થાય. (૮૬) દીપ આપનારો તિમિરાદિ રોગે રહિત નેત્રવાળો થાય, ગાયનો દાતા સ્વર્ગને પામે, સુવર્ણદાતા દીર્ઘાયુષ્યવાળો થાય, તલ આપનારો સત્પુત્રાદિ પ્રજાવાળો થાય છે. (૮૭) ઉપસ્કરે સહિત ગૃહ આપનારો, સ્વર્ગલોકમાં અતિ ઊંચા મહેલવાળો થાય. વસ્ત્ર આપનારો ચન્દ્રલોકને ભજનારો થાય. ઘોડો આપનારો વિમાનાદિ દિવ્ય વાહનવાળો થાય. બલિવર્દને આપનારો લક્ષ્મીવાન થાય. (૮૮) શિબિકા વાહન અને પલંગ આપનારો પણ ગુણવતી પત્નીવાળો થાય. માટે પોતાની શક્તિ પ્રમાણે શ્રદ્ધાથી જ દાન આપે. (૮૯) જે શ્રદ્ધાથી પ્રતિગ્રહણ કરે છે અને જે શ્રદ્ધાથી આપે છે, તે બન્ને સ્વર્ગને ભજનારા થાય. શ્રદ્ધા વિના તો તે દાન ફલશૂન્ય જ થાય. (૯૦) જે પુરુષ સૂર્ય-ચન્દ્રના ગ્રહણ સમયે, યથાવિધિ શ્રાદ્ધ કરે, તે પુરુષને સમગ્ર પૃથ્વીનું દાન આપ્યા બરોબર પુણ્ય થાય છે. (૯૧) ચન્દ્રગ્રહણની રાત્રિએ શ્રાદ્ધનો દોષ નથી. ગ્રહણાદિ સૂતકવાળાને પણ ગ્રહણમાં શ્રાદ્ધાદિ ક્રિયા કહેલી છે. (૯૨) આ પ્રમાણે મેં ગૃહસ્થાશ્રમમાં રહેલાઓને સુખ આપનારો સદાચારનો વિધિ તમોને યથાર્થ નિરૂપણ કરી બતાવ્યો છે. (૯૩)

હે બ્રાહ્મણશ્રેષ્ઠ ! આ લોકમાં જે પુરુષ મેં કહેલા આ સદાચારનું શ્રી વિષ્ણુની ભક્તિ સહિત હંમેશા આચરણ કરે, તે અતિશય શુદ્ધ કીર્તિને પામે અને દેહના અવસાનમાં ગોલોક પદને પામે. (૯૪)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે, ધર્મશાસ્ત્રે, સદાચારેષુ શુદ્ધિવિધિ નિરૂપણનામા એકોનવિંશોऽધ્યાયઃ (૧૯)*

## અધ્યાય : ૨૦

**આસ્તિક બુદ્ધિદાતા શ્રીહરિએ આ અધ્યાયમાં શ્રાદ્ધવિધિનું નિરૂપણ સારી રીતે કર્યું છે.**

**શ્રીનારાયણ મુનિ કહે છે :** હે વિપ્ર ! ગૃહસ્થ બ્રહ્મચર્યાદિ નિયમતત્પર થઈને યથાશક્તિ; પોતાના શરીરના બલનું ઉલ્લંઘન કર્યા વિના, સમય સમય પ્રમાણે, ધનની શક્તિ અનુસાર, શ્રદ્ધાસહિત વિધિપૂર્વક શ્રાદ્ધો કરે. (૧) પોતાના મૃત પિતૃઓને ઉદ્દેશીને તેમને પ્રીતિ ઉત્પાદક અન્નાદિ અને સુવર્ણાદિ દાન-શ્રદ્ધાપૂર્વક પુત્રાદિ દ્વારા અપાય તેને શ્રાદ્ધ કહેવાય. (૨) **શ્રાદ્ધના પ્રકાર :-** નિત્ય-શ્રાદ્ધ- દરરોજ નિયમથી કરવા યોગ્ય શ્રાદ્ધાદિ તથા નૈમિત્તિક શ્રાદ્ધ, કામ્ય શ્રાદ્ધ, વૃદ્ધિ શ્રાદ્ધ, સપિંડીકરણ શ્રાદ્ધ, ગોષ્ઠિ શ્રાદ્ધ, પાર્વણ શ્રાદ્ધ, (ચતુર્દશી, અષ્ટમી, અમાવાસ્યા, પૂર્ણિમા તથા રવિના સંક્રમણમાં કરવા યોગ્ય) તથા આઠમું શ્રાદ્ધ-શુદ્ધિ શ્રાદ્ધ ઘણા વિદ્વાનો દ્વારા પિતૃતૃપ્તિને ઉદ્દેશીને, સુખસંપત્તિ માટે બ્રહ્મભોજનથી

वृद्धिश्राद्धं सपिण्डनम् । गोष्ठीश्राद्धं पार्वणं च शुद्धिश्राद्धं तथाऽष्टमम् ॥३॥ कर्माङ्गं नवमं श्राद्धं दैविकं दशमं स्मृतम् । पौष्टिकं यात्रिकं चेति श्राद्धानि द्वादशैव तु ॥४॥ एकोद्दिष्टं पार्वणं च वृद्धिश्राद्धं सपिण्डनम् । श्राद्धमेवं चतुर्धेति वदन्ति मुनयोऽपरे ॥५॥ दक्षिणाप्रवणे देशे तीर्थादौ स्वगृहेऽपि च । भूसंस्कारादिसंयुक्ते श्राद्धं कुर्यात्प्रयत्नतः ॥६॥ तुलसीकाननच्छाया यत्र स्थाने भवेद्द्विज! । तत्र श्राद्धं प्रदातव्यं पितृणां तृप्तिहेतवे ॥७॥ शमीपत्रप्रमाणेन पिण्डं दद्याद्गयाशिरे । उद्धरेत्सप्तगोत्राणां कुलान्येकोत्तरं शतम् ॥८॥ म्लेच्छदेशे तथा रात्रौ सन्ध्यायां विप्रवर्जितः । न श्राद्धमाचरेद्विद्वान्नान्तरिक्षे कदाचन ॥९॥ आहुः षण्णवतिं श्राद्धान्यृषयः पितृतृप्तये । देशकालानुकूल्ये हि सत्यां च श्राद्धसंपदि ॥१०॥ अमामनुयुगक्रान्तिधृतिपातमहालयाः । आद्यन्ततिथिसंयुक्ता अष्टकाश्चेति तानि तु ॥११॥ भाद्रकृष्णत्रयोदश्यां मघास्विन्दौ करे रवौ । गजच्छायाभिधो योगस्तत्र श्राद्धं महाफलम् ॥१२॥ महानदीषु सर्वासु तीर्थेषु च गयामृते । जीवत्पितापि कुर्वीत श्राद्धं पार्वणधर्मवित् ॥१३॥ दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकम् । न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव च ॥१४॥ तीर्थयात्राप्रसङ्गेन गयाप्राप्तौ तु धर्मवित् । तीर्थश्राद्धं तत्र कुर्याच्छ्राद्धार्थं न तु तां व्रजेत् ॥१५॥ उद्वाहे पुत्रजनने पुत्रेष्ट्यां सौमिके मखे । तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः ॥१६॥ महालये गयायां च वृद्धौ चान्वष्टकासु च । श्राद्धं द्वादशदैवत्यं शेषं षाट्पौरुषं विदुः ॥१७॥ विषुवायनसङ्क्रान्तिमन्वादिषु युगादिषु । विहाय पिण्डनिर्वापं श्राद्धं

કરવાનું; (૩) તથા નિષેકાદિ કર્મના નિમિત્ત પ્રમાણે કહેલું નવમું શ્રાદ્ધ છે. દેવોને ઉદ્દેશીને દશમું શ્રાદ્ધ કહેલું છે. શરીર ધનાદિની પુષ્ટિ માટે કરવાનું તે પૌષ્ટિક શ્રાદ્ધ છે. તીર્થ દેશાંતરાદિમાં જવાના સમયે જે કરવા યોગ્ય છે તે યાત્રિક શ્રાદ્ધ; આ પ્રમાણે બાર શ્રાદ્ધ કહેલાં છે. (આ નિત્યાદિ શ્રાદ્ધનો લક્ષણ-પ્રપંચ ભવિષ્યાદિ પુરાણોમાંથી જાણવો). (૪) એકોદ્દિષ્ટ, પાર્વણ, વૃદ્ધિ શ્રાદ્ધ, સપિંડ આ ચાર પ્રકારે શ્રાદ્ધ થાય છે આવી રીતે બીજા મુનિઓ કહે છે. (૫) તીર્થાદિમાં અને પોતાના ગૃહમાં પણ મૃત્તિકા અને ગોમયથી લીંપેલી, સંસ્કારવાળી ભૂમિના દક્ષિણ દિશાના ભાગમાં લગારેક નીચેના દેશમાં પ્રયત્નપૂર્વક શ્રાદ્ધ કરે. (૬) હે વિપ્ર ! જે સ્થાનમાં તુલસીના વનની છાયા હોય, તે સ્થાનમાં પિતૃઓની તૃપ્તિ માટે શ્રાદ્ધ કરવું. (૭) જે પુરુષ ગયાશિર નામક તીર્થક્ષેત્રમાં સમડીના પગના પ્રમાણથી પિંડ આપે તે પુરુષ સાત ગોત્રના, એકસો એક કુળોનો ઉદ્ધાર કરે. (પિતાના ગોત્રમાં ૨૪, માતાના ગોત્રમાં ૨૦, ભાર્યાના ગોત્રમાં ૧૬, બહેનના ગોત્રમાં ૧૨, દીકરીના ગોત્રમાં ૧૧, પિતાના બહેન (ફોઈ)ના ગોત્રમાં ૧૦, માતાની બહેન (માસી)ના ગોત્રમાં - ૮; આ ક્રમથી સાત ગોત્રના ક્રમથી, કુલ ૧૦૧ થાય.) (૮) વિદ્વાન મ્લેચ્છપ્રચુર દેશમાં, રાત્રિમાં, સંધ્યાકાલે તથા અંતરિક્ષમાં (મેડા ઉપર-ગૃહની અંદર રચેલા સ્થાનમાં) ક્યારેય શ્રાદ્ધવિધિ ના કરે. વિપ્ર રહિત શ્રાદ્ધ ક્યારેય ન કરે. (૯) દેશકાળની અનુકૂળતા હોય અને શ્રાદ્ધયોગ્ય સંપત્તિ હોય તો દર વર્ષે પિતૃઓની તૃપ્તિ માટે ૯૬ (છન્નુ) શ્રાદ્ધો કરવા, એમ મહર્ષિઓ કહે છે. (૧૦) બાર અમાવાસ્યા, ચતુર્દશ મન્વાદિ તિથિઓ, ચાર યુગની તિથિઓ, બાર સૂર્યના મેષાદિ રાશિસંક્રમણ દિવસો, તેર વિધૃતિ યોગો, તેર વ્યતીપાતના યોગો, ભાદ્રપદ માસના કૃષ્ણ પક્ષના સોળ દિવસો, સપ્તમી અને નવમીથી સંબંધિત બાર અષ્ટકાઓ આ પ્રમાણે ૯૬ શ્રાદ્ધ દિવસો જાણવા. અમાદિ શબ્દોથી પ્રતિવર્ષ આ તિથિઓમાં કર્તવ્ય શ્રાદ્ધો જાણવાં. (૧૧) ભાદરવા વદી ત્રયોદશી ને મઘા નક્ષત્રમાં ચન્દ્ર હોય ત્યારે, હસ્ત નક્ષત્રમાં સૂર્ય હોય ત્યારે **ગજછાયા** નામનો યોગ કહેલો છે, તે યોગમાં શ્રાદ્ધ મહાફળને આપનારું થાય. (૧૨) સર્વે મહાનદીઓમાં ગયાશિર વિના તીર્થોમાં પાર્વણ શ્રાદ્ધને જાણનાર, (ધર્મજ્ઞ, વિદ્વાન-પુરુષ) જીવતા પિતાનું પણ શ્રાદ્ધ કરે. (૧૩) જેના પિતા જીવંત છે, એવો પુરુષ અમાવાસ્યા શ્રાદ્ધ ગયા શ્રાદ્ધ અને ભાદરવા વદી પક્ષ પ્રાપ્ત શ્રાદ્ધ ન કરે. અને તિલોથી તર્પણ પણ ન કરે. (૧૪) તીર્થયાત્રાના પ્રસંગથી ગયાજી ગયા હોઈએ તો ધર્મજ્ઞ પુરુષ ગયામાં તીર્થ શ્રાદ્ધ કરે. કેવલ શ્રાદ્ધ કરવા માટે જ ગયામાં ન જવું. (જેના પિતા જીવંત હોય, તે પુરુષ ન જાય.) (૧૫) પુત્ર; પુત્રીના વિવાહમાં, પુત્રજન્મમાં, પુત્રોત્પત્તિ વગેરે નિમિત્તે ઈષ્ટિમાં, સોમ સંજ્ઞાવાળા યજ્ઞમાં, તીર્થમાં તથા સદ્‌ધર્મનિષ્ઠ બ્રાહ્મણ આવે ત્યારે; આ છ પ્રસંગોમાં જેના પિતા જીવંત હોય તે પુરુષ શ્રાદ્ધ કરે. (૧૬) ભાદ્રપદ માસના કૃષ્ણપક્ષના (મહાલય-શ્રાદ્ધના) સોળ દિવસોમાં, ગયા શ્રાદ્ધે, વૃદ્ધિશ્રાદ્ધમાં, ચાર અષ્ટકાઓનાં બીજા દિવસે વર્તતી ચાર નવમીઓમાં, બાર દેવતા, (પિતા, પિતામહ વગેરેને બાર દેવતા કહ્યા છે તે) સંબંધી શ્રાદ્ધને જાણવાં. તે વિના બીજા છ પુરુષનાં શ્રાદ્ધ કરવા. (૧૭) વિષુવ=મેષ અને તુલાના સંક્રમણમાં, ઉત્તરાયન, દક્ષિણાયન, સંક્રાંતિ=વૃષાદિરાશિમાં સૂર્યના સંક્રમણમાં

कुर्वीत धर्मवित् ॥१८॥ अन्वष्टकासु वृद्धौ च गयायां च क्षयेऽहनि । कार्यं मातुः पृथक् श्राद्धमन्यत्र पतिना सह ॥१९॥ स्वधर्मनिरतो विप्रः श्राद्धे भोजनमर्हति । वेदशास्त्रार्थवेत्ताऽपि दुराचारो न कर्हिचित् ॥२०॥ यत्र वेदास्तपो यत्र यत्र वृत्तं द्विजाग्रजे । पितृश्राद्धेषु तं यत्नाद्विद्वान्विप्रं समर्चयेत् ॥२१॥ गायत्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः । नायन्त्रितश्चतुर्वेदी सर्वाशी पापकर्मकृत् ॥२२॥ तीर्थेषु ब्राह्मणं नैव परीक्षेत कदाचन । अन्नार्थिनमनुप्राप्तं भोज्यं तं मनुरब्रवीत् ॥२३॥ विद्यादिगुणसम्पन्नो न लभ्येत यदि द्विजः । मातामहादयोऽप्यर्च्यास्तदा यदि सुलक्षणाः ॥२४॥ मातामहोऽथ दौहित्रो भागिनेयश्च मातुलः । मातृष्वसेयस्तज्जश्च मातुलेयस्तथैव च ॥२५॥ जामाता श्वशुरश्चैव भार्याभ्राता च तत्सुतः । ऋत्विग्गुरुरुपाध्याय आचार्यः श्रोत्रियस्तथा ॥२६॥ सुवृत्ताश्च सदाचारा एते श्राद्धेषु पावनाः । दुराचारा यदैते स्युस्त्याज्यास्तेऽपि तदा किल ॥२७॥ युगानुरूपतो यस्तु विद्याचारादिसंयुतः। न निन्द्यकर्मकर्ता चेच्छ्राद्धे पूज्यः स वाडवः ॥२८॥ हरेर्भक्तो यतिर्यत्र श्राद्धे भुङ्क्ते तदा तु तत् । परिपूर्णं भवेच्छ्राद्धं विनापि श्राद्धसम्पदम् ॥२९॥ यो वै यतीननादृत्य भोजयेदितरान्द्विजान् । विजानन्वसतो ग्रामे कव्यं तद्याति राक्षसान्॥३०॥ दैवे कर्मण्युदक्संस्थान् प्राङ्मुखानुपवेशयेत् । उदङ्मुखान् द्विजान् पित्र्ये प्राक्संस्थानुपवेशयेत् ॥३१॥ द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा । भोजयेत्सुसमृद्धोऽपि न प्रसज्जेत विस्तरे ॥३२॥ सत्क्रियां देशकालौ च शौचं ब्राह्मणसम्पदम् । पञ्चैतान्विस्तरो हन्ति तस्मान्कुर्यान्न विस्तरम् ॥३३॥ भिक्षुको ब्रह्मचारी वा भोजनार्थमुपस्थितः । उपविष्टेषु विप्रेषु कामं तमपि भोजयेत्

---

તથા મન્વાદિ અને યુગાદિ તિથિઓમાં પિંડ પ્રદાન થકી બીજું શ્રાદ્ધકર્મ ધર્મજ્ઞ પુરુષ કરે, માત્ર પિંડ પ્રદાન ન કરવું. (૧૮) હેમન્ત અને શિશિરના કૃષ્ણપક્ષની નવમીઓમાં, નાન્દી શ્રાદ્ધમાં, ગયા શ્રાદ્ધમાં, ક્ષયના દિવસમાં-વાર્ષિક મૃત્યુ તિથિમાં, માતાનું જુદું શ્રાદ્ધ કરવું. આ શ્રાદ્ધો વિના બીજા શ્રાદ્ધોમાં પતિએ સહિત (=પોતાના પિતાની સાથે) કરવું. (૧૯) સ્વધર્મનિષ્ઠ બ્રાહ્મણ સર્વકાળે શ્રાદ્ધમાં ભોજનને યોગ્ય છે. વેદ શાસ્ત્રનો જ્ઞાતા પણ દુરાચારી હોય તો તે બ્રાહ્મણ ક્યારેય પણ શ્રાદ્ધમાં ભોજનને યોગ્ય નથી. (૨૦) જે બ્રાહ્મણમાં વેદો, તપ-વ્રત, સદાચાર હોય તે વિપ્રને વિદ્વાન, પિતૃશ્રાદ્ધોમાં પ્રયત્નપૂર્વક પૂજન કરે. (૨૧) કેવલ ગાયત્રી જપ, માત્રના બલવાળો પણ બ્રાહ્મણ પોતાના નિયમેયુક્ત હોય તો શ્રાદ્ધ કર્મમાં શ્રેષ્ઠ છે. ચાર વેદને ભણેલો હોય, પણ સ્વનિયમથી ભ્રષ્ટ, સર્વના અન્નને ખાનારો હોય, પાપકર્મ કરનારો બ્રાહ્મણ - શ્રાદ્ધ કર્મમાં શ્રેષ્ઠ નથી. (૨૨) તીર્થ શ્રાદ્ધમાં ક્યારેય પણ બ્રાહ્મણની પરીક્ષા કરવી નહિં. ઈશ્વર ઈચ્છાથી પ્રાપ્ત થયેલા અન્નાર્થી વિપ્ર, શ્રાદ્ધ કર્મમાં શ્રેષ્ઠ છે. એમ મનુ ઋષિ કહે છે. (૨૩) જ્યારે વિદ્યાદિ ગુણસંપન્ન બ્રાહ્મણ શ્રાદ્ધમાં પ્રાપ્ત ન થાય ત્યારે, માતાના પિતા વગેરે પણ જો સ્વધર્મનિષ્ઠ હોય તો શ્રાદ્ધમાં પૂજનીય છે. (૨૪) માતાના પિતા, અને દીકરીનો દીકરો, બહેનનો દીકરો, મામા, માતાની બહેનનો દીકરો, માસીના છોકરાનો છોકરો, તથા મામાનો પુત્ર, જમાઈ, સસરો, સાળો, સાળાનો પુત્ર, યજ્ઞ કરનાર બ્રાહ્મણ, ઉપનયન-સંસ્કાર કરીને વેદનું અધ્યયન કરાવનાર આચાર્ય તથા એક વેદ ભણાવનાર આચાર્ય તથા શ્રોત્રિય વિપ્ર, માતામહ વગેરે સુશીલ, સદાચાર નિષ્ઠ હોય, તો શ્રાદ્ધમાં પવિત્ર છે. અર્થાત્ ભોજન કરાવવા યોગ્ય છે જો તેઓ દુષ્ટ આચરણશીલ હોય તો ત્યાગ કરવો. (૨૫-૨૬-૨૭) જે બ્રાહ્મણ કલિયુગના ધર્મને અનુસરીને (અતિ ઉત્કૃષ્ટ ન હોય તેવા સામાન્ય) વિદ્યા આચારાદિ યુક્ત હોય અને (તેમ છતાં મુખ્યત્વે) જો નિંદ્ય કર્મ કર્તા ના હોય તો તે શ્રાદ્ધમાં પૂજ્ય છે. (૨૮) જે શ્રાદ્ધમાં હરિનો ભક્ત યતિ ભોજન કરે, ત્યારે તો તે શ્રાદ્ધ અધિક સંપત્તિ વિના પણ **પરિપૂર્ણ** થાય. (૨૯) જે પુરુષ ગામમાં રહેલા યતિઓને જાણતો હોય, છતાં તેઓનો અનાદર કરીને તેમને ભોજન ન કરાવે, બીજા બ્રાહ્મણોને જમાડે તે શ્રાદ્ધમાં પિત્રિઓને આપેલું અન્ન રાક્ષસો પામે છે. (૩૦) દેવકર્મમાં ઉત્તર ભાગમાં રહેલા બ્રાહ્મણોને પૂર્વમુખે બેસાડે, પિતૃસંબંધી કર્મમાં પૂર્વ દિશામાં બેઠેલા બ્રાહ્મણોને ઉત્તર મુખે બેસાડે. (૩૧) દેવકર્મમાં બે બ્રાહ્મણોને ભોજન કરાવે, પિતૃકર્મમાં ત્રણ બ્રાહ્મણોને જમાડે અથવા બન્ને દેવ અને પિતૃ કર્મમાં એક એક બ્રાહ્મણને જમાડે. સમૃદ્ધિ યુક્ત હોય તો પણ અધિક વિસ્તારના આચરણમાં આસક્તિ ન કરે. (૩૨) સત્ ક્રિયા, દેશકાલની શુદ્ધિ, પાવિત્ર્ય, બ્રાહ્મણની ગુણસંપત્તિ-વગેરે ગુણોનો, વિસ્તારથી નાશ થાય છે. માટે વિસ્તાર ન કરે. (દેશ,કાલ, દ્રવ્ય, પાત્ર, અને પૂજાનાં ઉપકરણો વગેરે વિસ્તારથી યથાશાસ્ત્ર ન જ થાય. આવું સ્કંદ પુરાણમાં કહ્યું છે.) (૩૩) બ્રાહ્મણો શ્રાદ્ધ ભૂમિમાં ભોજન

॥३४॥ दन्तधावनताम्बूलं तैलाभ्यङ्गमभोजनम् । रत्यौषधपरान्नं च श्राद्धकृत्सप्त वर्जयेत् ॥३५॥ पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् । दानं प्रतिग्रहं होमं श्राद्धभुक्चाष्ट वर्जयेत् ॥३६॥ भोक्ष्यन्करिष्यन् श्वः श्राद्धं पूर्वरात्रौ प्रयत्नतः । भोजनं च व्यवायं च ऋतावपि विवर्जयेत् ॥३७॥ श्राद्धं दत्त्वा च भुक्त्वा च पुमान् यस्तु स्त्रियं व्रजेत् । पितरस्तस्य तन्मासे तस्मिन्रेतसि शेरते ॥३८॥ अन्नक्षीरघृतक्षौद्रैरैक्षवेण च तर्पिताः । प्राप्नुवन्त्यक्षयां तृप्तिं सर्वे पितृगणा अपि ॥३९॥ पलपैतृकमुक्तं यत्क्वचित्तत्तु कलौ युगे । निषिद्धमस्ति निगमे कर्तव्यं तन्न कर्हिचित् ॥४०॥ पराशरो मुनिश्रेष्ठः प्राहातः सकलान्मुनीन् । अनुव्रतान्सुव्रतादीन्मुख्या यस्य स्मृतिः कलौ ॥४१॥ अन्नं क्षीरं घृतं क्षौद्रमैक्षवं कालशाकवत् । ऐतैस्तु तर्पितैर्विप्रैस्तृप्यन्ति पितरो नृणाम् ॥४२॥ यस्तु प्राणिवधं कृत्वा मांसेन तर्पयेत्पितॄन् । सोऽविद्वांश्चन्दनं त्यक्त्वा कुर्यादङ्गारलेपनम् ॥४३॥ क्षिप्त्वा कूपे यथा किञ्चिद्बाल आदातुमिच्छति । पतत्यज्ञानतः सोऽपि मांसेन श्राद्धकृत्तथा ॥४४॥ इति तद्वचनान्नित्यं श्राद्धे मांसं विवर्जयेत् । धर्मशास्त्रमुपाश्रित्य वर्तमानः सुधीः पुमान् ॥४५॥ निर्दोषं पायसं तस्मादृषिधान्यानि च द्विजः । अर्पयेत्सर्वपितृभ्यस्तेन तुष्यन्ति ते खलु ॥४६॥ पयो दधि घृतं चैव गवां श्राद्धेषु पावनम् । महिषीणां घृतं श्रेष्ठं प्राहुर्न तु पयः क्वचित् ॥४७॥ कालः कुतुपसंज्ञश्च तथा नेपालकम्बलः । रौप्यं दर्भास्तिलाः श्राद्धे दौहित्रश्चेति पावनाः ॥४८॥ गोत्रनाम्नी समुच्चार्य क्षणदानादिकं चरेत् । सकारेण च वक्तव्यं गोत्रं सर्वत्र धीमता ॥४९॥ गोत्रस्य त्वपरिज्ञाने काश्यपं गोत्रमुच्चरेत् । यस्मादाह श्रुतिः सर्वाः प्रजाः कश्यपसम्भवाः ॥५०॥ पृथिवीषत्पिता प्रोक्तस्तत्पिता चान्तरिक्षसत् । अभिधानापरिज्ञाने दिविषत्प्रपितामहः ॥५१॥ विभक्तिभिस्तु यत्किञ्चित्पित्रादिभ्यः प्रदीयते । तत्सर्वं

માટે બેઠેલા હોય, તે સમયે સંન્યાસી અથવા બ્રહ્મચારી ભોજન માટે આવેલો હોય તો તેને પણ ઇચ્છા પ્રમાણે જમાડે. (૩૪) કાષ્ઠથી દંતધાવન, તાંબુલચર્વણ, તૈલ અભ્યંગ, ઉપવાસ અને સ્ત્રીસંગ, ઔષધભક્ષણ, પારકું ભોજન; આ **સાત કર્મો**ને શ્રાદ્ધ કરનાર ત્યાગ કરે. (૩૫) પુનઃ ભોજન, ગ્રામાન્તર-ગમન નિમિત્તે રસ્તામાં ચાલવું અને ભારવહન, અધ્યયન, મૈથુન, દાન દેવું, દાન ગ્રહણ કરવું, હોમ આ **અષ્ટ કર્મો**ને શ્રાદ્ધ જમનારો ત્યાગ કરે. (૩૬) બીજે દિવસે શ્રાદ્ધમાં જમનારો કે શ્રાદ્ધ કરાવનારો, પૂર્વ રાત્રિએ ભોજન અને ઋતુકાળમાં પણ ભાર્યાગમન પ્રયત્નપૂર્વક ત્યજે. (૩૭) જે પુરુષ શ્રાદ્ધ આપીને કે ભોજન કરીને ભાર્યાગમન કરે છે, તેના પિતૃઓ તે માસમાં તેના વીર્યમાં સુવે છે. (૩૮) સર્વ પિતૃગણો ઓદનાદિ અન્ન-દૂધ, ઘી, મધ અને ગુડાદિથી તર્પણ કરાવવાથી ક્ષયરહિત-અક્ષય તૃપ્તિ પામે છે. (૩૯) પિતૃકર્મ માંસથી ન કરવું. કોઈ સ્મૃતિગ્રંથોમાં એવું કહેલું હોય તો પણ કળિયુગમાં, તે વેદ નિષિદ્ધ બાબત છે. માટે માંસ વડે પિતૃકર્મ ક્યારેય પણ ન કરવું. (૪૦) માંસ, શ્રાદ્ધમાં નિષેધ છે, માટે મુનિશ્રેષ્ઠ પરાશર પોતાને અનુસરેલા સુવ્રતાદિને, સકલ મુનિઓને (આગળ કહે છે એવા ત્રણ શ્લોકથી) એ પ્રમાણે કહે છે. જે પરાશરની સ્મૃતિ કળિયુગમાં મુખ્ય છે. (૪૧)

અન્ન, દૂધ, ઘી, મધ, સમયને અનુસારે પ્રાપ્ત શાક, એ અન્નાદિથી તૃપ્તિ પામેલા બ્રાહ્મણોથી મનુષ્યના પિતૃઓ તૃપ્ત થાય છે. (૪૨) સત્શાસ્ત્રના હૃદય-હાર્દ-ને નહિ જાણનાર, જે પુરુષ પ્રાણીવધ, શશાદિ જંતુઓનો ઘાત કરીને માંસથી પિતૃઓને તૃપ્ત કરે છે, તે ઘસેલા ચંદનના લેપનો ત્યાગ કરીને ઘસેલા કોલસાનો અંગે લેપ કરે છે, અર્થાત્ **મૂર્ખ** છે. (૪૩) જેમ બાળક, કોઈ વસ્તુ કૂવામાં ફેંકીને અજ્ઞાનથી ગ્રહણ કરવા ઇચ્છે છે ! તે બાળક કૂવામાં પડે છે, તેમ માંસથી શ્રાદ્ધ કરનારો અધોગતિને પામે છે. (૪૪) હે દ્વિજ, આ પ્રકારે પરાશર મુનિના વાક્યથી ધર્મશાસ્ત્રને આશરીને વર્તતો પુરુષ સર્વદા જ શ્રાદ્ધમાં માંસનો ત્યાગ કરે. (૪૫) માટે વિપ્ર દોષે રહિત દૂધપાક અને ઋષિધાન્યો જે નિવારાદિ મુનિઅન્નો, સર્વ પિતૃઓને અર્પણ કરે જેથી સર્વ પિતૃઓ નિશ્ચે પ્રસન્ન થાય છે. (૪૬) શ્રાદ્ધોમાં ગાયનું દૂધ, દહીં, ઘૃત, પવિત્ર છે. તેમજ ભેંસનું ઘી શ્રેષ્ઠ કહ્યું છે પરંતુ દૂધ ક્યારેય પણ શ્રેષ્ઠ કહ્યું નથી. (૪૭) કુતપકાળ, અર્થાત્ દિવસના પંદર મુહૂર્ત છે તેમાં બપોર પછીનું આઠમું મુહૂર્ત, નેપાળ દેશનો કામળો, રૂપાનું પાત્ર, દર્ભ, તિલ, દીકરીનો દીકરો આટલા શ્રાદ્ધમાં પાવન છે. (૪૮) ગોત્ર અને નામ સમુચ્ચારણ કરીને ક્ષણદાનાદિ કરે. બુદ્ધિમાન શ્રાદ્ધકર્તાએ સર્વ એવા ગોત્રોચ્ચારણ સ્થાનમાં સકાર અક્ષરની સાથે ગોત્ર કહેવું. (જેમ કે 'काश्यपसगोत्र पराशरसगोत्र' એ રીતે જાણવું.) (૪૯) ગોત્રનું પરિજ્ઞાન ન હોય, તો કાશ્યપ ગોત્ર ઉચ્ચારણ કરે; કારણ કે શ્રુતિ સર્વ પ્રજાઓને કાશ્યપ ગોત્ર સંભવ કહે છે. (૫૦) પોતાના પિતાનું નામ ન જાણતા હોય, તો પિતા **'પૃથ્વીષત્'** એમ કહેવું તેના પિતા **'અંતરિક્ષસત્'** આ નામથી કહેલા છે. પ્રપિતામહ **'દિવિષત્'** આ નામથી કહેલા છે. (આ બૌદ્ધાયનનો મત છે.) (૫૧) પિત્રાદિને જે કંઈ પણ વિભક્તિથી અપાય છે, તે બધું સફલ થાય છે. વિપરીત

सफलं ज्ञेयं विपरीतं निरर्थकम् ॥५२॥ अक्षय्यासनयोः षष्ठी द्वितीयावाहने तथा । अन्नदाने चतुर्थी स्याच्छेषाः सम्बुद्धयः स्मृताः ॥५३॥ विसर्गश्चालकश्चैव विकिरः पङ्क्तिवारणम् । करशुद्धिरपोशानं पितृपूर्वाणि षट् सदा ॥५४॥ स्वागते स्वस्तिवचने गोत्रशेषे प्रदक्षिणे । अर्घ्ये च दक्षिणादाने षट्सु सव्यं विधीयते ॥५५॥ अगस्त्यं भृङ्गराजं च तुलसी शतपत्रिका । चम्पकं तिलपुष्पं च पितॄणां वल्लभानि षट् ॥५६॥ केतकीं करवीरं च बकुलं कुन्दकं तथा । पाटलां चैव जातीं च श्राद्धे यत्नेन वर्जयेत् ॥५७॥ अनग्निरधनो वापि तथैव व्यसनान्वितः । आमश्राद्धं द्विजः कुर्याद्वृषलस्तु सदैव हि ॥५८॥ मृताहं स सपिण्डं च गयाश्राद्धं महालयम् । आपन्नोऽपि न कुर्वीत श्राद्धमामेन वै द्विजः ॥५९॥ आवाहने स्वधाकारे मन्त्राश्चोह्या विसर्जने । अन्यकर्मण्यनूह्याः स्युरामश्राद्धविधौ बुधैः ॥६०॥ आमान्नस्याप्यभावे तु श्राद्धं कुर्वीत बुद्धिमान् । धान्याच्चतुर्गुणेनैव हिरण्येन सुरोचिषा ॥६१॥ पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान् । न पक्वेन न चामेन कल्याणान्यभिकामयन् ॥६२॥ समग्रं यस्तु शक्नोति कर्तुं नैवेह पार्वणम् । स तु सङ्कल्पविधिना श्राद्धकाले तदाचरेत् ॥६३॥ आवाहनं स्वधाशब्दमर्घ्याग्नौकरणे तथा । विकिरं पिण्डदानं च साङ्कल्पे षड्विवर्जयेत् ॥६४॥ पिण्डमात्रं प्रदातव्यमभावे द्रव्यविप्रयोः । श्राद्धीयाहनि सम्प्राप्ते भवेन्निरशनोऽथवा ॥६५॥ उदकुम्भं प्रदद्याद्वा ब्राह्मणाय फलान्वितम् । तृणानि वा गवे दद्यान्न तु शून्यं दिनं नयेत् ॥६६॥ श्राद्धात्पूर्वं ब्रह्मयज्ञं न कुर्यात्तर्पणं तथा । पित्रोः श्राद्धानन्तरं तु द्वयं कुर्वीत बह्वृचः ॥६७॥ महालयादिकं श्राद्धमार्तवे सति योषितः । पञ्चमेऽह्नि प्रकर्तव्यममावास्यादिनेऽथवा ॥६८॥ पुष्पवत्स्वपि दारेषु वार्षिकं मासिकानि च । मृताह एव कार्याणि पाकेनैव यथाविधि ॥६९॥ व्रतोपवासदिवसे श्राद्धप्राप्तौ

---

વિભક્તિથી અર્પણ કરેલું નિષ્ફળ થાય છે. (૫૨) અક્ષય્ય અને આસનમાં 'पितृणाम् अक्षय्यम्' 'पितृणाम् इदम् आसनम्' એમ છઠ્ઠી વિભક્તિ વાપરવી. આવાહનમાં દ્વિતીયા વિભક્તિ વપરાય. અન્નદાનમાં ચતુર્થી વિભક્તિ વાપરવી. બાકીની સમ્બુદ્ધિ કહેલી છે. (આ નારદી મતમાં છે.) (૫૩) વિસર્જન, પાત્રનું ચાલન, વિકિર, પંક્તિ વારણ, હસ્ત પ્રક્ષાલન, જળપાન, આ છ કર્મો સદા પિતૃપૂર્વક જાણવાં. (બીજું તો દેવ પ્રથમ જેમાં હોય એમ કરવું) (૫૪) સ્વાગત, સ્વસ્તિવાચન, ગોત્ર શેષ, પ્રદક્ષિણા, અર્ઘ્યપ્રદાન - આ છ કર્મોમાં **'સવ્ય'** કરવું. અન્યત્ર અપસવ્ય (જમણે ખભે જનોઈ) કરવું. (૫૫) અગથિયાનાં પુષ્પ, ભાંગરાના પત્રો, તુલસીનાં બે પાંદડાએ સહિત મંજરી, શતપત્રિકા (ધાત્રીનાં પત્રો) ચંપાનાં પુષ્પો, તિલનાં પુષ્પો આ છ વસ્તુઓ પિતૃઓને વહાલી છે. (૫૬) કેતકી, કરેણ, બોરસલી, મોગરો, પાડળ, જાઈ આ છ પુષ્પો શ્રાદ્ધમાં પ્રયત્નથી ત્યાગ કરવાં. (૫૭) આવસથ્યાદિ અગ્નિ રહિત અથવા નિર્ધન, વિપત્તિવાળો બ્રાહ્મણ અપક્વ અન્નથી શ્રાદ્ધ કરે. શૂદ્ર તો સદા આમ જ શ્રાદ્ધ કરે. (૫૮) સાંવત્સરિક શ્રાદ્ધ, સપિંડીકરણ શ્રાદ્ધ, ગયા શ્રાદ્ધ, મહાલય શ્રાદ્ધ, ભાદ્રપદ કૃષ્ણપક્ષનું શ્રાદ્ધ, આપત્કાલમાં આવેલો દ્વિજ, કાચા અન્નથી પણ ન કરે. (૫૯) આવાહન, સ્વધાકાર અને વિસર્જનમાં મંત્રો પંડિતોએ જે દેશ કાલ-તિથિ વગેરે હોય તે પ્રમાણે કલ્પના કરીને બોલવા. (જેમ કે આવાહનમાં हविषे अत्तवे ના સ્થાને हविषे स्वीकर्तवे આવા પદની કલ્પના કરવી.) બીજાં કર્મો અને આમ શ્રાદ્ધથી વિધિમાં મંત્રો કલ્પીને બોલવા નહીં. (૬૦) આમાન્નનો પણ અભાવ હોય તો બુદ્ધિમાન આમાન્નના ચાર ગણા મૂલ્યથી, શુદ્ધ સુવર્ણથી શ્રાદ્ધ કરે. (૬૧) પોતાના મંગલોને ઇચ્છતો બુદ્ધિમાન, પુત્રજન્મમાં સુવર્ણથી જ શ્રાદ્ધ કરે. રાંધેલા અન્નથી ના કરે. અથવા કાચા અન્નથી ના કરે. (૬૨) જે પુરુષ સમગ્ર શ્રાદ્ધ પર્વના શ્રાદ્ધ કરવા માટે શક્તિમાન થતો નથી, તે તો શ્રાદ્ધ કાળમાં **'સંકલ્પ શ્રાદ્ધ'**ના વિધાનથી, તે પર્વનું શ્રાદ્ધ ઉજવે. (૬૩) આવાહન, સ્વધાશબ્દ, અર્ઘ્ય, અગ્નિમાં કરણ, અને વિકિર, તથા પિંડદાન-આ છ કર્મો સંકલ્પ શ્રાદ્ધમાં ત્યાગ કરવાં. (૬૪) દ્રવ્ય અને વિપ્રના અભાવમાં પિંડ માત્ર આપવો. શ્રાદ્ધ યોગ્ય દિવસો પ્રાપ્ત થતાં અન્નાદિ આહાર ન કરવો. (૬૫) અથવા ફલયુક્ત જલથી પૂર્ણ ઘડો બ્રાહ્મણને આપે, અથવા ગાયને ઘાસ આપે. શ્રાદ્ધ દિન સુકૃતે રહિત જવા દેવો નહીં. (૬૬) બહુ ઋચાઓને (ઋગ્વેદીને) આ નિયમ છે કે શ્રાદ્ધથી પહેલાં બ્રહ્મયજ્ઞ તથા તર્પણ ન કરે, પરંતુ શ્રાદ્ધ કર્મની પરિસમાપ્તિ કરીને પછી તે બન્ને કરવા. (૬૭) પત્ની રજસ્વલા થઈ હોય, તો મહાલયાદિ શ્રાદ્ધ સ્ત્રીને ઋતુ પ્રાપ્તિથી પાંચમા દિવસે અથવા ભાદ્રપદ કૃષ્ણ-અમાસને દિવસે કરવું. (૬૮) પત્ની રજસ્વલા થઈ હોય છતાં પણ સાંવત્સરિક શ્રાદ્ધ અને માસિક શ્રાદ્ધો મૃત્યુ તિથિએ જ પકવાન્નથી યથાવિધિ કરવાં. (૬૯) વ્રતના

यथाविधि । श्राद्धं विधायोपवसेदाघ्राय पितृसेवितम् ॥७०॥ वैष्णवैस्तु विशेषेण श्राद्धमेकादशीभवम् । द्वादश्यामेव कर्तव्यं पितरो वैष्णवा यतः ॥७१॥ सन्न्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथाविधि । महालये तु यच्छ्राद्धं द्वादश्यां पार्वणं हि तत् ॥७२॥ आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं तु मध्यतः । पार्वणं त्वपराह्णे स्यात्प्रातर्वृद्धिनिमित्तकम् ॥७३॥ मृताहं मृतमासं वा पित्रादेर्यो न वेत्ति सः । मार्गे माघेऽथवाऽमायां श्राद्धमाब्दिकमाचरेत् ॥७४॥ यज्ञोद्वाहप्रतिष्ठासु मेखलाबन्धमोक्षयोः । निषेकादौ च दीक्षायां वृद्धिश्राद्धं समाचरेत् ॥७५॥ वृद्धौ तीर्थे च सन्न्यस्ते ताते च पतिते सति । येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥७६॥ अर्घ्यमावाहनं चैव द्विजाङ्गुष्ठनिवेशनम् । तृप्तिप्रश्नं च विकिरं तीर्थश्राद्धे विवर्जयेत् ॥७७॥ श्राद्धेष्वेतेषु सर्वेषु प्राप्ता अतिथयो द्विज! । भोजनीयाः प्रयत्नेन यत्स्याच्छ्राद्धस्य पूर्णता ॥७८॥ ब्रह्मचारी स्वपित्रोस्तु कुर्यादेवौर्ध्वदैहिकम् । मासिकान्याब्दिकाद्यं च श्राद्धं सर्वं यथाविधि ॥७९॥ सन्न्यासी तु न कुर्वीत मातापित्रोरपि क्वचित् । मृताशौचं चाश्रुपातं श्राद्धपिण्डोदकक्रियाम् ॥८०॥ स्वाधिकारानुसारेण यथाशक्ति सदैवतान् । नार्चयेद्यः पितॄन्काले स पतेन्नरके ध्रुवम् ॥८१॥ अरोगः प्रकृतिस्थश्च चिरायुः पुत्रपौत्रवान् । अर्थवानर्थभोगी च श्राद्धकर्ता भवेन्नरः ॥८२॥ क्व सन्ति पितरश्चेति कृत्वा मनसि यो नरः । श्राद्धं न कुरुते तस्य रक्तं क्रुद्धाः पिबन्ति ते ॥८३॥ यथा गोषु प्रनष्टो वै वत्सो विन्दति मातरम् । एवं श्राद्धान्नमुद्दिष्टं मन्त्रः प्रापयते पितॄन् ॥८४॥ देवो यदि पिता जातः शुभकर्मानुयोगतः । तस्यान्नममृतं भूत्वा नूनं तत्रोपतिष्ठते ॥८५॥ मर्त्यत्वे भोज्यरूपेण पशुत्वे च तृणं भवेत् । श्राद्धान्नं वायुरूपेण नागत्वेऽप्यनुगच्छति ॥८६॥ तत्तदन्नतयैवेत्थं श्राद्धान्नं सर्वयोनिषु । प्राप्यते प्राणिभिस्तस्माच्छ्राद्धं कार्यं प्रयत्नतः ॥८७॥

---

ઉપવાસને દિવસે શ્રાદ્ધ પ્રાપ્ત થાય, તો શ્રાદ્ધ વિધિ કરીને પિતૃઓએ સેવન કરાયેલા અન્નને સૂંઘીને ઉપવાસ કરે. પિતૃઓને ધરેલા અન્નને સૂંઘવું. (૭૦) વૈષ્ણવોએ તો એકાદશીને દિવસે પ્રાપ્ત થયેલું શ્રાદ્ધ વિશેષપણે દ્વાદશીમાં જ કરવું. કારણ કે પિતૃઓ વૈષ્ણવો છે. (૭૧) સંન્યાસીનું વાર્ષિક વગેરે શ્રાદ્ધને પુત્ર યથાવિધિ કરે. તેમનું જે મહાલય - (ભાદરવા વદી પક્ષમાં આવતું જે) શ્રાદ્ધ તે તો બારસને દિવસે કરે. તેથી તે શ્રાદ્ધ 'પાર્વણ' થાય છે. (૭૨) આમશ્રાદ્ધ તો દિવસનાં પૂર્વ ભાગમાં થાય. એકોદ્દિષ્ટ શ્રાદ્ધ તો મધ્યાહ્નને થાય. પાર્વણ શ્રાદ્ધ તો બપોર પછી થાય. વૃદ્ધિ નિમિત્તક શ્રાદ્ધ તો પ્રાતઃકાલે થાય. (૭૩) પિત્રાદિનો મૃત્યુદિન જે ન જાણતા હોય તે વાર્ષિક શ્રાદ્ધ માગશરમાસ, માઘમાસ અથવા કોઈ પણ અમાવાસ્યા તિથિમાં કરે. (૭૪) યજ્ઞ, વિવાહ અને દેવપ્રતિષ્ઠામાં, ઉપનયન, સમાવર્તન, ગર્ભાધાન આદિ સંસ્કારો તથા દીક્ષા, આટલાંને વિષે નાન્દી શ્રાદ્ધ કરે. (૭૫) પિતા સંન્યાસી થયા હોય, કે પતિત થયો હોય તો પૂર્વે પિતાએ જે પિત્રિઓને આપ્યું હોય, તેમને જ પુત્ર વૃદ્ધિ શ્રાદ્ધમાં અને તીર્થશ્રાદ્ધમાં આપે. (પણ પોતાના પિતાને ન આપે, આ કાત્યાયનના મતથી છે.) (૭૬) તીર્થશ્રાધ્ધમાં 'या दिव्या आपः' ઈત્યાદિ મંત્રોથી અર્ઘ્યપ્રદાન, 'विश्वे देवास आगता' વગેરે ઋચાઓથી આવાહન, 'ईदं विष्णुर्विचक्रमे' આ ઋચાઓથી અન્નમાં દ્વિજના અંગૂઠાને મુકાવવો; તૃપ્તિપ્રશ્ન=બ્રાહ્મણોને પૂછવું કે 'तृप्ताः स्थ' તૃપ્ત થયાને ? તથા 'येऽग्नि दग्धा ।' આ ઋચાથી પૃથ્વીમાં અન્ન પ્રદાન : આટલાનો ત્યાગ કરે. ( આ હેમાદ્રિના મતથી છે.) (૭૭) હે દ્વિજ ! આ સર્વે શ્રાદ્ધોમાં પ્રાપ્ત થયેલા અતિથિઓ પ્રયત્નપૂર્વક જમાડવા. અતિથિ ભોજનથી શ્રાદ્ધની પૂર્ણતા થાય. (૭૮) બ્રહ્મચારી પોતાની માતા અને પિતાના મરણાન્તર પછી કરવા યોગ્ય માસિક શ્રાદ્ધ અને વાર્ષિક શ્રાદ્ધ વગેરે સર્વ શ્રાદ્ધ યથાવિધિ કરે. (૭૯) સંન્યાસી તો માતા પિતાનું પણ મરણનું સૂતક, અશ્રુપાત અને શ્રાદ્ધ -પિંડોદક ક્રિયાને ક્યારેય પણ ન કરે. (૮૦) જે પુરુષ પોતાના અધિકારને અનુસારે શક્તિ પ્રમાણે, તે તે શ્રાદ્ધ-સમયમાં વિશ્વદેવોએ સહિત પિતૃઓને પૂજે નહિ, તે નિશ્ચે નરકમાં જ પડે છે. (૮૧) જે મનુષ્ય શ્રાદ્ધ કરે છે, તે નીરોગી, કોઈ પ્રકારની ખોડ વગરનો, પૂર્ણ આયુષ્યવાળો, પુત્ર અને પૌત્રવાળો, ધનવાન, પ્રાપ્ત થયેલા ધનને ભોગવનારો થાય. (૮૨) 'પિતૃઓ ક્યાં છે ?' આ પ્રમાણે મનમાં અવધારણ કરીને જે મનુષ્ય શ્રાદ્ધ કરતો નથી તો તે માણસનું રુધિર તેના પિતૃઓ ક્રોધીષ્ટ થઈને પાન કરે છે. (૮૩) જેમ પોતાની માતાથી જુદો પડેલો વાછરડો ઘણી ગાયોમાં, પોતાની માતાને જ પામે છે; તેમ પોતાના પિતૃઓને ઉદ્દેશીને આપેલું શ્રાદ્ધ-અન્ન પિતૃઓને પામે છે. અને તે મંત્ર જ પમાડે છે. (૮૪) જો પિતા શુભ કર્મના યોગથી દેવ થયા હોય, તો શ્રાદ્ધમાં આપેલું અન્ન અમૃત થઈને દેવલોકમાં દેવભાવને પામેલા પિતાને જ પ્રાપ્ત થાય છે. (૮૫) શ્રાદ્ધાન્ન, પિતાદિ જો મનુષ્યભાવને પામેલા હોય તો અન્નરૂપ થઈને તેને પ્રાપ્ત થાય, પશુયોનિમાં ગયા હોય તો તૃણરૂપે મળે, સર્પ યોનિમાં ગયા હોય તો વાયુરૂપે પહોંચે. (૮૬) આ પ્રમાણે શ્રાદ્ધાન્ન સર્વ પશુપક્ષ્યાદિ યોનિ માત્રમાં તે તે ભોજ્યરૂપે થઈને પ્રાણીઓને પામે છે, માટે શ્રાદ્ધ પ્રયત્નથી કરવું જ. (૮૭)

इत्येष ते विप्र! मया समासाच्छ्राद्धस्य सर्वोऽपि विधिर्यथावत् । प्रकीर्तितोऽथर्षिगणैः स्मृतेषु धर्मेषु वक्ष्ये कलिवर्ज्यधर्मान् ॥८८॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे श्राद्धविधिनिरूपणनामा विंशोऽध्यायः ॥२०॥

श्रीनारायणमुनिरुवाच - धर्माः स्त्रीणां च पुंसां च धर्मशास्त्रेषु भूरिशः । विस्तराद्वर्णिताः सन्ति वर्णाश्रमवतां पृथक् ॥१॥ युगानुसारिणस्तत्र धर्मा ग्राह्या न चेतरे । भीष्मोऽत्र भारते प्राह युधिष्ठिरमिदं वचः ॥२॥ अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे । अन्ये कलियुगे धर्मा यथाशक्ति कृता हि ते ॥३॥ त्याज्यान् धर्मान् कलियुगे कतिचित्ते वदाम्यहम् । ये निषिद्धाः पुराणेषु स्मृतिष्वपि च सर्वथा ॥४॥ गोमेधो नरमेधश्च वाजिमेधस्तथा मखः । मद्यपानं सुरापानं त्याज्यमाहुः कलौ युगे ॥५॥ सौत्रामण्यामपि मखे घ्राणेनापि सुराग्रहः । देवातिथिवरार्थं च नैव कार्यः पशोर्वधः ॥६॥ मांसदानं पितृभ्यश्च श्राद्धे कार्यं न कर्हिचित् । अग्निहोत्रं च सन्न्यासो न कर्तव्यस्तथा कलौ ॥७॥ ऊढानां द्विजकन्यानामक्षतानां मृते पतौ । पुनर्विवाहकर्मापि न कर्तव्यं कलौ युगे ॥८॥ न धार्यश्चाम्बुपानार्थं मृत्तिकायाः कमण्डलुः । सुतार्थं भ्रातृजायायां न नियोज्यश्च देवरः ॥९॥ बृहद्धर्मं यथाशास्त्रं यो न पालयितुं क्षमः । दीर्घकालं ब्रह्मचर्यं न धार्यं तेन च क्वचित् ॥१०॥ देहपातो भवेद्येन प्रायश्चित्तं तु तादृशम् । वानप्रस्थाश्रमश्चापि वर्जनीयः कलौ युगे ॥११॥ आततायिद्विजवधो धर्मयुद्धेऽपि कर्हिचित् । न कर्तव्यस्तथा यज्ञो यत्र स्यात्पशुहिंसनम् ॥१२॥ स्वर्गार्थमपि वार्धक्ये स्त्रिया पुंसा च कर्हिचित् । न

---

હે વિપ્ર ! આ પ્રકારે મેં આ સર્વ શ્રાદ્ધવિધિનો સંક્ષેપ યથાર્થ રીતે તમોને કહ્યો. હવે ઋષિઓના સમુદાયોએ સ્મૃતિમાં નિરૂપિત કરેલા જે **કળિવર્જ્ય ધર્મો** તેનું નિરૂપણ કરું છું. (૮૮)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે શ્રાદ્ધવિધિ નિરૂપણનામા વિંશોઽધ્યાયઃ (૨૦)*

## અધ્યાય : ૨૧

### કલિવર્જ્ય ધર્મો, અને ધર્મવંશી બ્રાહ્મણોના વિશેષ ધર્મનું, નિરૂપણ કર્યું છે.

**શ્રી નારાયણ મુનિ બોલ્યા** : યુગને અનુસરીને ધર્મો ગ્રહણ કરવા. મનુસ્મૃતિ આદિ ધર્મશાસ્ત્રોમાં પુરુષોના અને સ્ત્રીઓના વર્ણાશ્રમ મુજબ બહુ ધર્મો વિસ્તારથી પૃથક્પૃથક્ વર્ણવ્યા છે. યુગાનુસારી ધર્મો જ ગ્રહણ કરવા, બીજા ન જ કરવા. આ વિષયમાં ભીષ્મે યુધિષ્ઠિર પ્રતિ મહાભારતમાં આ વચન કહ્યું છે. (૧-૨) સત્યયુગના ધર્મો ભિન્ન છે. ત્રેતાયુગમાં ધર્મો ભિન્ન છે. દ્વાપર યુગના ધર્મો ભિન્ન છે. કલિયુગના ધર્મો ભિન્ન છે. - માટે તે ધર્મો, યુગપુરુષો-યુગજનોની સામર્થીને અનુસરીને સ્મૃતિ, ઈતિહાસ, પુરાણોમાં કહેલા છે. યુગને અનુસારે ધર્મનું અનુષ્ઠાન કરવું. યુગભેદથી જનોની શક્તિમાં વિભેદ થાય, તેમ ધર્મ પણ ભિન્નતા પામે. (૩) હે દ્વિજ ! કળિયુગમાં ત્યાગ કરવા યોગ્ય, કેટલાક ધર્મો તમોને હું કહું છું; જે ધર્મો પુરાણોમાં અને સ્મૃતિઓમાં પણ સર્વ પ્રકારે નિષિદ્ધ છે. (૪) ગોમેધ યજ્ઞ, નરમેધ યજ્ઞ, અશ્વમેધ યજ્ઞ, અગિયાર પ્રકારનું મદ્યપાન; ગૌડી, માધવી અને પેષ્ટી - આ ત્રણ પ્રકારની સુરા - એ સર્વે કલિયુગમાં ત્યાગ કરવા યોગ્ય કહેલાં છે. (૫) સૌત્રામણિ યજ્ઞમાં સુરાને સુંઘવી પણ નહિ. દેવ, અતિથિ, વરરાજા વગેરે માટે પણ પશુવધ કરવો નહિ. (૬) કળિયુગમાં પિતૃઓને માંસદાન ક્યારેય ન કરવું, તથા અગ્નિહોત્ર અને સંન્યાસ ન કરવો. (૭) કળિયુગમાં રજસ્વલા ન થઈ હોય તેવી બ્રાહ્મણની કન્યાનો પતિ, વેવિશાળ થયા પછી મૃત્યુ પામે, તો કન્યાનો વિવાહ ફરીથી ન કરવો. (૮) જલપાન કરવા માટે મૃત્તિકાનું કમંડલુ સ્નાતકોએ ધારણ કરવું નહિ. પુત્રની ઉત્પત્તિ માટે દિયર-નિયોગ ભોજાઈનું દિયરવટું કરવું નહિ. (૯) જેઓ નૈષ્ઠિક બ્રહ્મચર્યનું પાલન શાસ્ત્રોક્ત વિધિ મુજબ ન કરી શકે, તેમણે આજીવન બ્રહ્મચર્ય વ્રત લેવું નહિ. (૧૦) કલિયુગમાં જે પ્રાયશ્ચિત્તથી દેહ પડી જાય, તેવું પ્રાયશ્ચિત્ત કરવું નહિ. તથા વાનપ્રસ્થાશ્રમનો પણ ત્યાગ કરવો. (૧૧) ધર્મયુદ્ધમાં પણ આતતાયી બ્રાહ્મણનો ક્યારેય વધ ન કરવો. પશુ - હિંસા થાય તેવો યજ્ઞ ન કરવો. (અગ્નિ મૂકનાર, ઝેર આપનાર, શસ્ત્રધારી, ધન હરણ કરનાર, ક્ષેત્ર હરનાર, સ્ત્રી હરનાર - આ બધા આતતાયી કહેવાય છે.) (૧૨) સ્વર્ગની પ્રાપ્તિ માટે પણ સ્ત્રી કે પુરુષે, વૃદ્ધાવસ્થા ભલે હોય, છતાં અગ્નિ- પ્રવેશ કે પર્વતના શિખર ઉપરથી પડીને આપઘાત

कार्योऽग्निप्रवेशश्च भृगुपातस्तथैव च ॥१३॥ महाप्रस्थानगमनं नैव कार्यं हिमालये । न गङ्गादिप्रवाहे च हेयं क्वापि निजं वपुः ॥१४॥ प्रच्छन्नं च महापापे क्वचिज्जातेऽपि निष्कृतिः । जपाद्यैस्तस्य कर्तव्या मृत्यूपायो न तु क्वचित् ॥१५॥ अपवादे दुःसहे च प्राप्ते संभावितेन तु । छन्नं स्थेयं मनुष्येण न तु नाश्यं निजं वपुः ॥१६॥ तथा स्थातुमशक्तेन गम्यं देशान्तरं द्रुतम् । न तु कार्यो ह्यात्मघातः पुरुषेणापि योषिता ॥१७॥ दिनत्रये व्यतीतेऽपि धान्यादिप्राप्तिमन्तरा । चौर्यं तु नैव कर्तव्यं पुरुषेण कलौ युगे ॥१८॥ पितृष्वसुश्च तनया मातुलस्य सुता तथा । असवर्णस्य कन्या च नैवोद्वाह्या कदाचन ॥१९॥ घृतपक्वं पयःपक्वं कन्दुपक्वं च शूद्रतः । नैव ग्राह्यं ब्राह्मणेन सदाचाररतादपि ॥२०॥ शिष्येण गुरुपत्न्यां च नैव वृत्यं गुराविव । सन्न्यासिभिर्न कर्तव्यं चातुर्वर्ण्ये च भिक्षणम् ॥२१॥ गुरवे दक्षिणा देया शक्त्या न तु तदीप्सिता । अद्भिर्गोपीतशिष्टाभिः कार्यं नाचमनं तथा ॥२२॥ अशौचस्य न सङ्कोचो वेदादिगुणयोगतः । कार्योऽस्थिचयनादूर्ध्वमङ्गस्पर्शश्च न क्वचित् ॥२३॥ इत्यादयः कलियुगे धर्मा वर्ज्यतयोदिताः । एषां तु विधिवाक्यानि युगान्तरपराणि हि ॥२४॥ तत्राग्निहोत्रं सन्न्यासो द्विजानां द्विजसत्तम ! । धार्मिकाणां विरक्तानां शक्तानां विहितावपि ॥२५॥ यावद्वर्णविभागः स्याद्यावद्वेदश्च भूतले । भवेत्तावत्कलौ शास्त्रे द्वयमेतदुदीरितम् ॥२६॥ धर्मपालनसामर्थ्यं वैराग्यं यस्य चोत्तमम् । न स्यात्तस्य निषिद्धं वै सर्वथैतन्महर्षिभिः ॥२७॥ गृहस्थधर्मा इत्येते मया सर्वे समासतः । कथितास्ते द्विजश्रेष्ठ ! पालनीयाः प्रयत्नतः ॥२८॥ गृहस्थेष्वपि येऽत्र स्युर्ब्राह्मणा धर्मवंशजाः । स्थिता गुरुपदे तेषां धर्माः

---

ન કરવો. (૧૩) હિમાલયમાં મહાપ્રસ્થાન - ગમન કરવું નહિ પોતાનું શરીર ગંગાદિ નદીના પ્રવાહમાં તણાતું ન મૂકવું. (૧૪) ક્યારેક ગુપ્ત રીતે પણ મહા પાપ થઈ ગયું હોય, તો જપાદિથી તે મહાપાપનું પ્રાયશ્ચિત્ત કરવું. ક્યારેય પણ શાસ્ત્રમાં કહેલા અગ્નિપ્રવેશાદિ જેવા મૃત્યુના ઉપાયો ન કરવા. (૧૫) લોકલાજવાળા સંભાવિત મનુષ્યે આક્ષેપ-અપવાદ પ્રાપ્ત થયે, ગુપ્તપણે રહેવું; પણ પોતાનું શરીર ત્યાગવું નહિ. (૧૬) ગુપ્ત નિવાસ કરવા માટે અશક્ત હોય, તેવાં સ્ત્રી-પુરુષે તત્કાલ દેશાન્તર કરવું. પરંતુ આત્મઘાત ક્યારેય ન કરવો. (૧૭) કલિયુગમાં ત્રણ દિવસ સુધી અનાજ ન મળે, તોપણ ચોરી કરવી નહિ. ઉપાયાન્તર કરવો, ઉપાયો શોધવા. (૧૮) પિતાના બહેનની પુત્રી, મામાની પુત્રી, તથા અસમાન વર્ણની કન્યાને ક્યારેય પણ પરણે નહિ. (૧૯) સદાચારમાં પ્રીતિવાળા, એવા પણ શૂદ્ર જાતિથી સ્પર્શ થયેલું અન્ન બ્રાહ્મણ જાતિએ ન લેવું; ભલે તે ઘીમાં અથવા દૂધમાં પકવેલું હોય, કઢાયામાં અથવા તપેલીમાં (અથવા માટીના પાત્રમાં ભરીને ઊંધુ વાસણ કરીને તાપથી) પકવેલું હોય, તોપણ ગ્રહણ ન કરવું. (૨૦) શિષ્યે ગુરુની જેમ, ગુરુપત્ની સાથે ન વર્તવું. સંન્યાસીઓએ ચાર વર્ણની ભિક્ષા ન કરવી. (૨૧) ગુરુને શક્તિ પ્રમાણે દક્ષિણા આપવી પણ ગુરુએ ઈચ્છિત (ગુરૂની ઈચ્છાને અનુગુણ દક્ષિણા શિષ્યે આપવી' એમ જે કહ્યું છે તે પ્રમાણે) દક્ષિણા ન આપવી. ગાય વડે પીધેલા જળથી બાકી વધેલા જળથી આચમન ન કરવું. (૨૨) વેદાદિ ગુણ યોગથી મરણના સૂતકનો સંકોચ ન કરવો. અસ્થિચયન થકી ઊર્ધ્વ (પછી) અંગ સ્પર્શ ક્યારેય ના કરવો. (૨૩) આ બધા યુગાન્તરમાં વિધિ રૂપે કહેલા ધર્મો કલિયુગમાં વર્જ્ય કહ્યા છે. આ વગેરે બીજા પણ સ્મૃતિમાં કહેલા ધર્મનાં વાક્યો અને વિધિ યુગાન્તર પરક જ જાણવા જ. (૨૪) હે દ્વિજસત્તમ ! કલિયુગમાં નિષિધ કર્મોમાં અગ્નિહોત્ર અને સંન્યાસ, આ બંને વારંવાર સ્નાનાદિમાં સામર્થ્યવાળા, ધાર્મિક અને વૈરાગ્યવાળા બ્રાહ્મણોને કહ્યા છે. તેમાં કર્મકાંડ માત્રમાં નિષ્ઠાવાળા ધાર્મિકોને અગ્નિહોત્ર, તથા આત્મા-પરમાત્માના જ્ઞાન માટે, સાંસારિક વિષયમાંથી વૈરાગ્ય પામેલા બ્રાહ્મણોને સંન્યાસ પણ કહેલો છે. (૨૫) પૃથ્વીમાં જ્યાં સુધી વર્ણ વિભાગ હોય, જ્યાં સુધી વેદ વિહિત કર્મની પ્રવૃત્તિ હોય ત્યાં સુધી કલિયુગમાં આ બંને (અગ્નિહોત્ર અને સંન્યાસ), શાસ્ત્રમાં શક્ત અને વિરક્ત-દ્વિજવિશેષને માટે કર્તવ્ય છે. (૨૬) તે દેવલ મુનિએ કહ્યું છે - 'यावद् वर्ण विभागोऽस्ति यावद्वेदः प्रवर्तते । संन्यासं चाग्निहोत्रं च तावत्कुर्यात् कलौ युगे ॥' જેને ધર્મપાલનનું સામર્થ્ય ન હોય અને જેને ઉત્તમ વૈરાગ્ય ન હોય, તેને મહર્ષિઓએ તે બન્નેનો નિષેધ સર્વથા (વેદ અને વર્ણવિભાગ હોવા છતાં પણ) કરેલો છે જ. (૨૭) હે દ્વિજ શ્રેષ્ઠ ! આ પ્રકારે પ્રયત્નથી પાલન કરવા યોગ્ય આ સર્વે ગૃહસ્થધર્મો તમોને મેં સંક્ષેપમાં કહ્યાં. (૨૮)

सामान्यतस्त्विमे ॥२९॥ विशेषधर्मो यस्तेषां तं च तुभ्यं वदाम्यहम् । कृष्णानिवेदितं यत्स्यात्प्राश्यं तन्नैव किञ्चन ॥३०॥ सम्बन्धिभिन्नयोषा याः सधवा अपि ताश्च तैः । न स्पृश्या नैव भाष्याश्च नोपदेश्याश्च कर्हिचित् ॥३१॥ विधवायास्तु संसर्गत्यागः सामान्यतोऽस्ति हि । विशेषधर्म एतावान् ज्ञेयस्तेषां द्विजोत्तम! ॥३२॥ राज्ञो गृहस्थाश्रमिणोऽथ धर्मानविशेषतस्ते कथयामि सर्वान् । यानाश्रितो भूपतिरत्र लोके परत्र चाप्नोति यशश्च सौख्यम् ॥३३॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे कलिवर्ज्यधर्मनिरूपणनामैकविंशोऽध्यायः ॥२१॥

श्रीनारायणमुनिरुवाच – नृपासनस्थो राजन्यो नित्यं रञ्जयति प्रजाः । धर्मेण यः स एवोक्तो राजेत्यन्वर्थसंज्ञया ॥१॥ देवब्राह्मणभक्तश्च सत्यवादी जितेन्द्रियः । बहुप्रदः प्रसन्नास्यो धर्मनिष्ठो भवेन्नृपः ॥२॥ नातितीक्ष्णो नातिमृदुर्भवेद्राजा विचक्षणः । वासन्तार्क इव श्रीमान्प्रजानां हितकारकः ॥३॥ मृदुर्हि राजा सततं लङ्घ्यो भवति मानवैः । तीक्ष्णाच्चोद्विजते लोकः समवृत्तिस्ततो भवेत् ॥४॥ परीक्षेत नरान्राजा स्वान्परांश्चापि लक्षणैः । प्रत्यक्षेणानुमानेन तथौपम्यागमैः सदा ॥५॥ मृगयाऽक्षा दिवास्वप्नः परीवादमदस्त्रियः । तौर्यत्रिकं सुरापानं पैशुन्यं द्रोहसाहसे ॥६॥ वाग्दण्डयोश्च पारुष्ये ईर्ष्याऽसूयार्थदूषणम् त्यजेदष्टादशैतानि व्यसनानि नृपोऽर्थवित् ॥७॥ गणः कामज आद्यानि दशान्यान्यष्ट कोपजः । उभौ

---

આ લોકમાં ગૃહસ્થોમાં પણ જે મારા આશ્રિતજનોના આચાર્યપદમાં રહેલા, ધર્મવંશમાં ઉત્પન્ન થયેલા બ્રાહ્મણો હોય તેમને સામાન્યપણે તો આ પૂર્વે કહેલા ધર્મો છે. (૨૯) તે ધર્મવંશી બ્રાહ્મણોનો **વિશેષ ધર્મ** છે તે પણ હું તમોને કહું છું. તેમણે જે વસ્તુ પરમાત્માને નિવેદિત ન કરેલી હોય તે કંઈ પણ ખાવી નહીં. (૩૦) પોતાના સંબંધીથી ભિન્ન સ્ત્રી હોય તેવી સધવાને પણ ધર્મવંશી બ્રાહ્મણોએ ક્યારેય સ્પર્શ ન કરવો, તેમની સાથે બોલવું નહીં, તેમ જ ઉપદેશ આપવો નહીં. (૩૧) હે દ્વિજોત્તમ ! વિધવાના સંસર્ગનો ત્યાગ તો સામાન્યપણે કહેલો જ છે : આટલો અહીં ધર્મવંશી-બ્રાહ્મણોનો વિશેષ ધર્મ જાણવો. (૩૨)

હવે રાજાના સર્વે ધર્મો વિશેષપણે કહું છું. જે ધર્મો વડે રાજા આ લોકમાં યશ પામે છે અને પરલોકમાં મહાસુખ પામે છે. (૩૩)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે કલિવર્જ્ય ધર્મનિરૂપણ નામૈકવિંશોऽધ્યાયઃ (૨૧)*

## અધ્યાય : ૨૨

### રાજધર્મોમાં ત્યાગ કરવા યોગ્ય અઢાર પ્રકારનાં વ્યસનો વગેરેનું વિસ્તારપૂર્વક (આઠ અધ્યાયોથી) નિરૂપણ કરેલું છે.

**શ્રી નારાયણમુનિ બોલ્યા** : હે બ્રહ્મન્ ! જે ક્ષત્રિય રાજ્યાસન ઉપર બેસીને ધર્મથી નિત્ય પ્રજાઓને આનંદિત કરે છે, પ્રસન્ન રાખે છે, તેને રાજા કહેવાય. 'रंजयति इति राजा' એ પ્રકારે 'રાજા' સંજ્ઞા સાર્થક કરે તે રાજા કહેવાય છે. (૧) રાજા-દેવ અને બ્રાહ્મણ ભક્ત, સત્યવાદી, શૂર, દાનવીર, જિતેન્દ્રિય, પ્રસન્ન મુખ અને ધર્મનિષ્ઠ થાય. (૨) સંપત્તિયુક્ત, નીતિપ્રવીણ, પ્રજાઓને હિતકારક રાજા વસંતઋતુના સૂર્યની માફક અતિ તીક્ષ્ણ સ્વભાવવાળો ન થાય, અત્યંત મૃદુ સ્વભાવવાળો ન થાય. (૩) કારણ કે નિરંતર કોમળ રાજા મનુષ્યોને ઉલ્લંઘન કરવા યોગ્ય થાય છે. તીક્ષ્ણ રાજાથી લોક, ઉદ્વેગને પામે છે, માટે સમવૃત્તિવાળો થાય. (૪) ઉપકાર અને અપકાર રૂપ, નેત્ર અને મુખના વિકારાદિ રૂપ, તથા બીજા કાર્ય દર્શનાદિ રૂપ, સામુદ્રિક શાસ્ત્રમાં કહેલા શબ્દાદિરૂપ આ ચાર પ્રકારનાં લક્ષણોથી પોતાના અને પારકા નરોની સદા પરીક્ષા રાજાએ કરવી. (૫) મૃગયા, પાસાની રમત, દિવસે નિદ્રા, નિન્દા, મદ, પરાંગના, ગીત, નૃત્ય, વાદ્ય, સુરાપાન, ચાડિયાપણું, પ્રાણીપીડન, દુઃસાહસ, કઠોર વાણી, દંડપારુષ્ય, (કઠોર દંડ), ઈર્ષા, ગુણોમાં દોષનું આરોપણ (અસૂયા), અર્થદોષ (પોતાના અને પારકા અર્થનું ખંડન કરવું) આ અઢાર વ્યસનરૂપ દોષોને સ્વાર્થસિદ્ધિને સમજનારો રાજા ત્યાગ કરે. (૬-૭) મૃગયાદિ દશ વ્યસનો **કામ**થી ઉત્પન્ન થયેલો ગણ છે. બીજો પિશુનતા (તથા પ્રાણીપીડાચરણ) વગેરે આઠ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

गणौ निरयदौ ज्ञात्वा सज्जेत नैतयोः ॥८॥ गर्भिणी स्वप्रियं त्यक्त्वा कुर्याद्गर्भहितं यथा । राजा तथा लोकहितं कुर्यात्त्यक्त्वात्मनः प्रियम् ॥९॥ परिहासः परिजनैः कार्यो राज्ञा न वै भृशम् । अतिसंश्लेषतो यस्मान्मर्यादामुत्त्यजन्ति ते ॥१०॥ न तिष्ठन्ति निजस्थाने क्रुद्ध्यन्त्युच्चैर्वदन्ति च । विकल्पन्ते प्रेष्यमाणास्तद्वचो लङ्घयन्त्यपि ॥११॥ स्त्रीरक्षिभिः प्रसज्जन्ते चेष्टन्ते निस्त्रपं पुरः । समानवेषा नृपतेरभिरोहन्ति वाहनम् ॥१२॥ बहुनात्र किमुक्तेन सभायामपि भूपतिम् । तिरस्कुर्वन्ति सावज्ञं निर्बलान्पीडयन्ति च ॥१३॥ तस्मान्न हर्षुलो राजा भवेदुचितमाचरेत् । नित्योद्यतो भवेद्धीरः शत्रूणां भयवर्धनः ॥१४॥ स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च । राज्याङ्गानि प्रकृतयस्तद्द्रोग्धारं सुशिक्षयेत् ॥१५॥ करार्थं परधान्यादिनाशो वृष्ट्यादिना यथा । न स्यात्तथाचरेद्राजा देयं काले च दापयेत् ॥१६॥ सत्यान्नैव च्यवेत्क्वापि शास्त्रानुगतनिश्चयः । पुरुषार्थानसम्बाधं सेवेत जितरुड् नृपः ॥१७॥ वर्णाश्रमाणां ये धर्मा रक्षितव्याः प्रयत्नतः । सर्वत्र विश्वसेन्नैव परहार्दमबुद्ध्य च ॥१८॥ द्वन्द्वीभूतगजाश्वादियुद्धभूमीश्च लक्षणैः । जानीयाच्चतुरो यात्राकालान्धर्मांस्तथापदि ॥१९॥ सन्धिविग्रहयानानि द्वैधीभावः समाश्रयः । स्थानं चेति गुणाः षट् च कुर्यात्तन्निश्चयं स्वयम् ॥२०॥ शृणुयाद्धर्मशास्त्राणि पुराणानि च नित्यशः । स्वपक्षे परपक्षे च चारांस्तीर्थेषु योजयेत् ॥२१॥ चमूपतिर्द्वारपालः

વ્યસનો **ક્રોધ**થી ઉત્પન્ન થયેલો ગણ છે. બંને ગણો નર્કને પમાડનારા જાણી રાજા એ ગણોમાં આસક્તિ ન રાખે. (૮) જેમ ગર્ભવતી સ્ત્રી, પોતાના પ્રિયનો ત્યાગ કરીને ગર્ભનું હિત કરે છે, તેમ રાજાએ પોતાના પ્રિયનો ત્યાગ કરીને લોકોનું હિત કરવું. (૯) રાજાએ પોતાના અનુયાયીઓ સાથે હાસ્યવિનોદ ન કરવો. કારણ કે અતિ પરિચયથી તે પરિજનો મર્યાદાનો ત્યાગ કરે છે. (૧૦) (હાસ્યવિનોદ કરે તો-) સ્વસ્થાને રહેતા નથી, ક્રોધ કરે છે, ઊંચેથી બોલે છે, રાજાએ કોઈ કાર્ય માટે પ્રેરણા આપી હોય, છતાં અનેક પ્રકારના વિકલ્પો કરે છે. રાજાની આજ્ઞા મુજબ વચન પાલન કરતા નથી, ઉલ્લંઘન કરીને વર્તે છે. (૧૧) સ્ત્રીઓની રક્ષા કરવા માટે નિયુક્ત કરેલા અંતઃપુરના રક્ષક પુરુષોની સાથે પ્રસંગ કરે છે. રાજાની આગળ નિર્લજ્જ થઈને મર્યાદારહિત જેમ તેમ ચેષ્ટા કરે છે. રાજાના સમાન વેશ ધારણ કરીને રાજાને આરોહણ કરવા યોગ્ય ઘોડા-હાથી-રથ વગેરે વાહનોમાં ચઢી બેસે છે. (૧૨) આ માટે વધુ કહેવાથી શું અર્થ છે ? સભામાં પણ રાજાનું અપમાન અને તિરસ્કાર કરે છે. અને નિર્બળ પુર-જનો તથા દેશવાસીઓને પીડા કરે છે. (૧૩) માટે રાજા પરિહાસના સ્વભાવવાળો ન થાય, યથાયોગ્ય પરિહાસ આચરે, નિત્ય ઉદ્યોગપરાયણ; ધૈર્યયુક્ત, શત્રુઓને ભય વધારનારો થાય. (૧૪) સ્વામી, અમાત્ય, મિત્ર, ધનભંડાર, દેશ, દુર્ગ, સૈન્યબલ (હાથી-ઘોડા-રથ-પદાતિ) આ **રાજ્યનાં સાત અંગો** રાજ્યને અતિ ઉત્તમ કરે છે, પ્રકૃષ્ટ કરે છે; તેથી **'પ્રકૃતિ'** એવી સંજ્ઞાથી પણ ઓળખાય છે. રાજ્યનાં આ મહત્ત્વનાં અંગોને બાધા કરનારને અત્યન્ત શિક્ષા કરે. (૧૫) ખેતરમાં જે ધાન્ય પાકે, તે વધુ વરસાદથી નાશ ન પામે તેનું આયોજન રાજા કરે. ખેતરના માલિકનો ધાન્યભાગ તેને ઘેર લઈ જવા દેવો. પોતાનો કરભાગ પોતે ગ્રહણ કરે. (૧૬) શાસ્ત્ર અનુસાર સર્વ કર્તવ્ય અર્થનો નિશ્ચય કરી જિતક્રોધ રાજા ક્યારેય પણ- આપત્તિ વેળાએ પણ સત્યરૂપ ધર્મ ત્યજી, અસત્ય ધર્મનું આચરણ ના કરે. ધર્મ અર્થ કામને પરસ્પર, બાધ ન થાય, તે પ્રમાણે સમય સમય પ્રમાણે સેવે. દિવસના પૂર્વ ભાગમાં ધર્મનું આચરણ કરે. બપોરે અર્થ ઉપાર્જન કરે, સાયંકાલે કામનું આચરણ કરે. (૧૭) વર્ણાશ્રમના જે ધર્મો તે પ્રયત્નથી પોતે રક્ષણ કરવા અને પ્રજાઓ દ્વારા રક્ષણ કરાવવા. બીજાનો અભિપ્રાય જાણ્યા વિના, સર્વે જનોમાં વિશ્વાસ ન કરે. (૧૮) કુશળ રાજા યુદ્ધમાં ગજ, અશ્વ, રથ, પદાતિ- આ ચાર ચતુરંગ સૈન્ય-બળને યુદ્ધ કરાવવા માટે લાયક પ્રદેશોને લક્ષણ વડે જાણે. ચાર પ્રકારનો યાત્રાનો સમય, શત્રુ જીતવા માટે પ્રયાણસમયોને જાણે આપત્કાલનાં ધર્મોને જાણે. (પોતાના પક્ષે મિત્રવૃદ્ધિ અને કોશવૃદ્ધિ હોય, પરપક્ષમાં કોશહાનિ, મિત્રક્ષય હોય આ ચાર યાત્રાકાળ છે. (૧૯) સુવર્ણાદિ આપીને શત્રુઓની પ્રીતિ ઉત્પન્ન કરી સંધિ કરવી. પારકા મંડલમાં દાહ, લૂંટ વગેરે અપકારરૂપ વિગ્રહ, શત્રુઓને જિતવા માટેની ઈચ્છાથી ગમનને પ્રયાણ કહે છે, 'યાન' પણ કહે છે - તે, બલવાનની સાથે સંધિ, અને નિર્બલ સાથે વિગ્રહ - આ બે પ્રકારનો 'દ્વૈધીભાવ', શત્રુઓથી પીડા ઉત્પન્ન થતાં, બલવાન રાજાનો આશ્રય કરવો અર્થાત્ 'સમાશ્રય', શક્તિ હોવા છતાં કિલ્લા વગેરેનું નિર્માણ કરીને સમયની પ્રતીક્ષા કરવી - અર્થાત્ 'આસન' - આ છ ગુણોનો રાજાએ નિશ્ચય કરવો. (૨૦) દરરોજ ધર્મશાસ્ત્રો અને પુરાણો સાંભળે, સ્વપક્ષ અને પરપક્ષમાં તીર્થોમાં-સેનાપતિ વગેરેમાં ગુપ્તચરોની યોજના કરે. (૨૧) યુદ્ધમાં સૈન્યની વ્યવસ્થા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

प्रदेष्टान्तःपुराधिपः । कारागाराधिकारी च कृत्याकृत्यार्थयोजकः ॥२२॥ कोशाध्यक्षः पुराध्यक्षः कार्यनिर्माणकृत्तथा । धर्माध्यक्षः सभाध्यक्षो दण्डपालश्च राष्ट्रपः ॥२३॥ दुर्गपालोऽटवीपालस्तीर्थानि दश पञ्च च । रक्षेत्स्वपक्षे शत्रूणां चारेभ्यो बुद्धिमान्नृपः ॥२४॥ परपक्षे तथा मन्त्रियुवराजपुरोहितैः । सहितेष्वेषु तीर्थेषु चारान्गूढान्नियोजयेत् ॥२५॥ अमात्यराष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चमः । इति स्वपक्षेऽन्यत्रापि ज्ञेयं प्रकृतिपञ्चकम् ॥२६॥ एतस्मिन्दशके वर्गे स्थानं वृद्धिं क्षयं तथा । निश्चित्यैवोद्यमं कुर्यात्प्रतिपक्षजयाय च ॥२७॥ उपासीत सदा वृद्धान्सतां वृत्ते स्थितो नृपः । अलोलुपश्चारचक्षुः स्मितपूर्वाभिभाषिता ॥२८॥ भवेद्भर्ता चाभृतानामन्वीक्षेत भृतानपि । स्वयं प्रहर्ता दाता च विशुद्धाचारवान्भवेत् ॥२९॥ सर्वाभिशङ्की क्रोधी च यश्च सर्वहरो नृपः । स क्षिप्रमनृजुर्लुब्धः स्वजनेनैव वध्यते ॥३०॥ अरोगिणः कुलीनांश्च भक्तान् शूरान्विवेकिनः । अप्रतार्यान्परैः शिष्टान्मानिनो मानदांस्तथा ॥३१॥ विद्याविदो लोकविदः परलोकविदोऽचलान् । स्वधर्मनिष्ठान्कुर्वीत सहायान्नृपतिः शुचीन् ॥३२॥ तैश्च तुल्यो भवेद्भोगैश्छत्राज्ञाभ्यां ततोऽधिकः । प्रत्यक्षं परोक्षं यस्तुल्यस्तेषु न खिद्यति ॥३३॥ केतनानां च जीर्णानामवेक्षां चैव सीदताम् । नित्योत्थानं च कुर्वीत सेवां

કરનાર-સેનાપતિ, દ્વારપાલ, સૈનિકોને ઉપદેશ આપનાર, અંતઃપુરનો અધિપતિ, કારાગારનો અધિકારી, રાજ્યમાં કરવા યોગ્ય અને નહીં કરવા યોગ્ય અર્થનો પ્રયોજક, કોશાધિપતિ, નગરરક્ષક, કાર્યનિર્માણને અંતે પગાર ચૂકવનાર શ્રોફ, ધર્માધ્યક્ષ, સભાપતિ, દાવાઓનો નિર્ણય કરનાર ન્યાયાધીશ, દુષ્ટોને દંડ દેનાર દંડક, રાષ્ટ્રનું રક્ષણ કરનાર રાષ્ટ્રપતિ, દુર્ગપાલ, ( આ છ પ્રકારના કિલ્લાઓનો રક્ષક), વન સંરક્ષક, આ પંદર તીર્થની પરના ચારો થકી બુદ્ધિમાન રાજા રક્ષા કરે. તેમાં પોતાના ચારોને મોકલીને તેમની ગુપ્તચરરૂપે- આરક્ષકો વડે રક્ષા કરે. (૨૨-૨૩-૨૪) તથા પરપક્ષમાં, અમાત્ય, યુવરાજ, પુરોહિતો સહિત સેનાપતિ વગેરે પંદર તીર્થોમાં મોકલાવેલા આ સર્વ રક્ષકો જાણે નહીં, તેમ ગુપ્તચરો મોકલવાની યોજના કરે. ગુપ્તચરોથી શત્રુઓનું મન જાણી લે. પોતાની પ્રજાને અભયદાન આપી પ્રસન્ન કરે, શત્રુની પ્રજાને પોતાના વહીવટથી આકર્ષે અને પોતાના રાજ્યને વૃદ્ધિ પમાડે. (૨૫) મંત્રી, દેશ, દુર્ગ, કોશ અને દંડ - આ 'પંચ પ્રકૃતિ'ને પોતાના પક્ષમાં અને પરપક્ષમાં કેટલી છે ? તેની માહિતી રાખે. (૨૬) આ દશ વર્ગમાં સ્થાન, (વૃદ્ધિ-ક્ષય રહિત સ્થિતિ) વૃદ્ધિ તથા ક્ષયનો નિશ્ચય કરીને જ શત્રુના ઉપર વિજય માટે ઉદ્યમ કરે. ઉપરોક્ત અમાત્યાદિ 'પ્રકૃતિ પંચક'ના સ્વ-પર ભેદથી થયેલા દશક ગણ મધ્યે જ્યારે પોતાના પંચકની વૃદ્ધિ થાય અને પર પંચકનો ક્ષય હોય, ત્યારે શત્રુ ઉપર વિજય મેળવવા જવું, તેથી વિપરીત સ્થિતિમાં ન જવું. (૨૭) ધર્મશીલોના આચારમાં રહેલો, વિષયની લાલચથી રહિત, ગુપ્તચરો રૂપી નેત્રવાળો, મંદ હાસ્યપૂર્વક ભાષણ કરનાર રાજા હંમેશાં વૃદ્ધોની ઉપાસના કરે. (૨૮) પોષણ માટે જે નિયુક્ત કરેલા માણસો હોય, તેઓએ જેમને પોષણ કરવું બાકી રાખ્યું હોય, તેનું પોષણ કરે. અર્થાત્ બરાબર દેખરેખ રાખે તેમજ પોષ્ય-માણસો વડે પોષક માણસોને પણ જુએ. અર્થાત્ પોષ્ય પોષકની (પરસ્પર મિત્રતાને કારણે અયોગ્ય પોષણ ન કરે તેની) બરાબર દેખરેખ રાખે. અપરાધીઓને દંડ આપનારો રાજા પોતે જ થાય, કારણ કે પોતાના પરોક્ષમાં બીજાએ કરેલા દંડમાં ન્યૂનાધિકપણું થાય તો પોતાને દોષાપત્તિ આવે. તથા જે કોઈ પારિતોષિક પદાર્થને આપવા યોગ્યમાં આપનારો પોતે જ થાય. અન્યથા પારિતોષિક આપવામાં અધિકારીઓ, યોગ્યતા અનુસાર ન્યૂનાધિક ન આપે તો દોષાપત્તિ પોતાના ઉપર આવે. સ્વાર્થની હાનિ થાય. માટે રાજા વિશુદ્ધ આચારવાળો થાય. (૨૯) જે રાજા સર્વજનોથી શંકાવાન, ક્રોધી, યથાયોગ્ય ભૃત્યોને આપ્યા વગર સમગ્ર પદાર્થ લેનાર, સ્તબ્ધ (અનમ્ર), બદ્ધ-મુષ્ટિ (લોભી) થાય - તે રાજા પોતાના જનોથી જ હણાય છે. (૩૦) નીરોગી, કુલીન, પોતાને ભજતા શૂરવીર, વિવેકી, શત્રુઓથી નહીં છેતરાતા, ઊલટા બીજાઓને છેતરનારા, શિષ્ટપણે પ્રસિદ્ધ, કુલ-શીલાદિના અભિમાનવાળા, માન આપનારા, બીજાઓને પણ માન આપીને રાજાના પક્ષમાં દૃઢ કરનારા, ચૌદ પ્રકારની વિદ્યાઓને જાણનારા, બાહ્ય અને અંદરથી શુદ્ધઃ આ પ્રમાણે પંદર લક્ષણોથી સંપન્ન પુરુષોને રાજા પોતાના સહાયપણે સ્વીકારે. (૩૧-૩૨) વસ્ત્ર, અલંકાર, ભોજ્યાદિ વડે તો પોતાના જનોની સાથે સમાન વ્યવહારવાળો થાય. છત્ર અને આજ્ઞા બંને બાબતોમાં સહાય કરનારાઓથી અધિક થાય. જે રાજા પ્રત્યક્ષ અથવા પરોક્ષ સહાય-જનોમાં સમાન વૃત્તિવાળો થાય તે રાજા ક્યારેય પણ ખેદ ન પામે. (૩૩) જે ગૃહો જીર્ણ-જર્જરિત થયેલાં હોય,

**बुद्धिमतामपि ॥३४॥ क्षिप्रकारी सुप्रसादो गम्भीरश्च महामनाः । निश्छद्म पालयेद्राजा प्रजाः पुत्रानिवौरसान् ॥३५॥ अगूढविभवा हृष्टा निर्भया धार्मिकाः प्रजाः । यस्य राज्ये भवेयुश्च स राजा राज्यमर्हति ॥३६॥ प्रजानां रक्षणं राज्ञः परमो धर्म उच्यते । सुकृतस्य चतुर्थांशं तासां तेनैव विन्दति ॥३७॥ धर्माणां विप्लवे जाते निर्मितो विष्णुना भुवि । पुरा राजा ततस्तेन कर्तव्यं धर्मपालनम् ॥३८॥ अधार्मिकान्दण्डयित्वा धृत्वा हत्वा च तस्करान्। धर्ममार्गे स्थापनीया भीषयित्वा प्रजा निजाः ॥३९॥ दण्ड्यानदण्ड्यांश्च स नीतिशास्त्रात्सम्यग्विदित्वाऽथ यथार्हमेव। दण्ड्येषु पुत्रे च रिपौ निदध्याद्दण्डं द्विजेन्द्रेतरथा तु नैव ॥४०॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे राजधर्मेष्वष्टादशव्यसनादि-निरूपणनामा द्वाविंशोऽध्यायः ॥२२॥

श्रीनारायणमुनिरुवाच-**नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रताम् । अदर्शनं ज्ञानवतामालस्यं पञ्चवृत्तिताम् ॥१॥ एकचिन्तनमर्थानामनर्थज्ञैश्च चिन्तनम् । निश्चितानामनारम्भं मन्त्रस्यापरिरक्षणम् ॥२॥ मङ्गलाद्यप्रयोगं च प्रत्युत्थानं च सर्वशः। एतांस्त्यजेत्प्रयत्नेन राजा दोषांश्चतुर्दश ॥३॥ बालेन स्थविरेणापि भीरुणा दीर्घरोगिणा । ज्ञातित्यक्तेन लुब्धेन तथा लुब्धजितेन च ॥४॥ विरक्तेन भयकृता विषयासक्तचेतसा। अनेकचित्तमन्त्रेण देवब्राह्मणगर्हिणा ॥५॥ दैवौपहतकेनापि दैवचिन्तापरेण च । दुर्भिक्षव्यसनार्तेन बलव्यसनिना तथा ॥६॥ सत्यधर्मविहीनाभ्यामदेशस्थेन दम्भिना । विंशत्या पुरुषैरेतैर्नृपः सन्धिं न चाचरेत् ॥७॥ कुर्यान्मन्त्रं न षट्कर्णं स्वपेद्यामद्वयं निशि । ब्राह्मे मुहूर्त उत्थाय**

તેની સંભાળ રાખવી અને અન્નવસ્ત્રાદિના અભાવથી દુઃખી થતા નોકરોની અન્નાદિ આપવાથી તેના દુઃખની નિવૃત્તિ કરી, નિરીક્ષણ કરવું. શત્રુઓને બીક પમાડવા માટે નિત્ય યુદ્ધાદિનું ઉત્થાન કરે. વૃદ્ધ-બુદ્ધિમાનોની સેવા કરે. જેથી અનેક અજ્ઞાત અર્થો જાણવા મળે. (૩૪) આવશ્યક કર્તવ્ય જે હોય, તેને જલદી કરે. વિલંબ ન કરે. સુખથી પ્રસન્ન - ગંભીર - ઉદાર ચિત્તવાળો રાજા - પોતાની પત્નીથી ઉત્પન્ન થયેલા પુત્રોની માફક પ્રજાનું કપટે રહિત પાલન કરે. (૩૫) જે રાજાના રાજ્યમાં લોકોને ચોરભય ન હોય, અને તેથી જ વૈભવોને લોકો છૂપાવે નહીં; પ્રજા હર્ષ પામેલી, નિર્ભય, ધાર્મિક હોય તે રાજા રાજ્યપદને યોગ્ય છે. (૩૬) પ્રજાનું રક્ષણ કરવું તે રાજાનો પરમ ધર્મ છે. રક્ષણ કરવાથી પ્રજાઓના પુણ્યનો ચોથો ભાગ રાજા પામે છે. (૩૭) પૂર્વે પૃથ્વીમાં ધર્મોનો નાશ થયો. ત્યારે પ્રજાના પાલન માટે ધર્મરક્ષણમાં તત્પર, વિષ્ણુ ભગવાને રાજા નિર્માણ કર્યો. માટે રાજાએ ધર્મનું પાલન કરવું. આ કથા ભારતમાં છે. (૩૮) અધર્મીજનોને દંડીને, ચોરોને પકડી અને હણીને, પોતાની પ્રજાને ભય પમાડીને પણ ધર્મમાર્ગમાં સ્થાપવી. (૩૯)

હે વિપ્રેન્દ્ર ! રાજા નીતિશાસ્ત્રથી દંડ કરવા યોગ્ય, અને દંડ નહીં કરવા યોગ્ય, તેને સારી રીતે જાણીને પછી દંડ કરવા યોગ્ય પુત્ર, શત્રુ અને પાખંડીને યથાયોગ્ય જ દંડ કરે. અદંડ્યને દંડ ના કરે. (૪૦)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે રાજધર્મેષ્વષ્ટાદશવ્યસનાદિ નિરૂપણ નામા દ્વાવિંશોऽધ્યાયઃ (૨૨)*

## અધ્યાય : ૨૩

### રાજધર્મોમાં, ચૌદ દોષ વગેરેનું સારી રીતે વિસ્તારપૂર્વક - નિરૂપણ કરેલું છે.

**શ્રી નારાયણમુનિ બોલ્યા** : હે બ્રહ્મન્ ! નાસ્તિકતા, અસત્ય ભાષણ, ક્રોધ, પ્રમાદ, દીર્ઘસૂત્રીપણું, નીતિશાસ્ત્રાદિ જ્ઞાનવાળાઓની ઉપેક્ષા, આલસ્ય, ચક્ષુરાદિ પંચેન્દ્રિયને આધીનપણું. (૧) કર્તવ્ય અર્થોનું સ્વયં એકાકી જ ચિંતન, અનર્થજ્ઞ- વિપરીતપણે અર્થોને જાણનારાઓની સાથે અર્થોનું ચિંતન, નિર્ણય કરેલા અર્થોનો અનારંભ, મંત્રપરીક્ષણનો અભાવ. (૨) દેવ-પૂજાદિ ઉત્સવોનું અનુષ્ઠાન ન કરવું. એક સાથે સર્વ શત્રુઓને લક્ષ્ય બનાવી યુદ્ધ માટેની પ્રવૃત્તિ : આ **ચૌદ દોષો**નો રાજા પ્રયત્નપૂર્વક ત્યાગ કરે. (૩) પંદર વર્ષની ઉંમરવાળો પુરુષ, એંસી વર્ષની ઉંમરવાળો, ભયના સ્વભાવવાળો, દીર્ઘ રોગયુક્ત, જ્ઞાતિએ ત્યાગ કરેલો, લોભી, ધનના લોભિયાઓએ જીતી લીધેલો, વૈરાગ્યવાન, બીજાએ ભય પમાડેલો, સર્વદા વિષયાસક્ત ચિત્તવાળો, અવ્યવસ્થિત ચિત્ત અને મંત્રવાળો, દેવ-બ્રાહ્મણની નિંદા કરનારો, દૈવથી હણાયેલો, દૈવની ચિન્તાપરાયણ, દુર્ભિક્ષના દુઃખથી પીડિત હોય, સૈન્યના દુઃખવાળો, સત્ય અને ધર્મથી રહિત, વિદેશવાસી, દંભી - આ વીશ જણાની સાથે સંધિ કરવી નહીં. (૪-૫-૬-૭) છ કર્ણ સુધી પહોંચેલો મંત્ર ન કરવો. અર્થાત્

मन्त्रमालोचयेत्स्वयम् ॥८॥ कुमाराश्चैव योद्धारः शिक्षणीयाः सुपण्डितैः । सहस्रैश्चापि मूर्खाणां क्रीणीयादेकपण्डितम् ॥९॥ सदा विनयसम्पन्नः कुलपुत्रो बहुश्रुतः । अनसूयुरसङ्कीर्णो राज्ञा कार्यः पुरोहितः ॥१०॥ तथैवाङ्गेषु निष्णातं ज्योतिषः प्रतिपादकम् । उत्पातेषु च सर्वेषु कुर्याद्दैवज्ञमुत्तमम् ॥११॥ राज्ञो वैद्यश्च निपुणो भवेद्बुद्धिवयोधिकः । अष्टाङ्गायां चिकित्सायां कुशलश्चानुरागवान् ॥१२॥ दैवं च मानुषं बुध्वा पञ्चपञ्चविधं भयम् । शत्रोः पराजये हेतुं ततो यात्रां समाचरेत् ॥१३॥ प्रयच्छेद्बलमुख्येभ्यः पराराष्ट्रे तथा नृपः । उपच्छन्नानि रत्नानि भेदायैव यथोचितम् ॥१४॥ जितेन्द्रियः स्वमात्मानमादौ जित्वा ततो रिपून् । जेतुं समिच्छेन्नृपतिः प्रमत्तानजितेन्द्रियान् ॥१५॥ परराष्ट्रे लवं मुष्टिं ज्ञात्वा जेतुमुपक्रमेत् । स्वभोज्यवस्त्रगन्धादीन्विश्वस्तै रक्षयेन्नरैः ॥१६॥ कोशं कोष्ठं वाहनं च द्वारमायं तथायुधम् । रक्षयेत्कृतकल्याणैर्निजभक्तैर्नरैर्नृपः ॥१७॥ आभ्यन्तरेभ्यो बाह्येभ्यो रक्षेत्स्वं च सुधीः सदा । पुत्रामात्यादितस्तांश्च रक्षेत्सर्वान्मिथस्तथा ॥१८॥ सुभिक्षसाम्यदुर्भिक्षेष्वपि सम्पूरयेद्व्ययम् । आयैकद्वित्रिपादैश्च कोशं निःशेषयेन्न तु ॥१९॥ ज्ञातीन्वृद्धान् गुरुन्राजा वणिजः शिल्पिनः श्रितान् । अभीक्ष्णमनुगृह्णीयाद्धनधान्येन दुर्गतान् ॥२०॥ हितकामान्प्रियान्प्रौढानज्ञवाक्यात्क्वचिन्नृपः । च्यावयेन्नाधिकाराच्च विना तद्दोषदर्शनम् ॥२१॥ धर्मकृत्येषु धर्मज्ञानर्थकृत्येषु पण्डितान् । स्त्रीषु क्लीबान्नियुञ्जीत

---

મંત્રનું ઉચ્ચારણ છ કાન સુધી પહોંચે તેમ ન કરવું. षट् कर्णो भिद्यते मंत्रः । રાત્રિના મધ્ય ભાગે બે પ્રહર નિદ્રા કરે. રાત્રિના અંતિમ પ્રહર-બ્રાહ્મમુહૂર્ત-માં ઊઠીને અમાત્ય આદિ સાથે કરેલી મંત્રણાનું સૂક્ષ્મ દૃષ્ટિથી સારાસારનું પર્યાલોચન કરે. (૮) યુદ્ધકલાનું શિક્ષણ - પંદર વર્ષના ઉદ્યમી કુમારોને કુશલ યુદ્ધશાસ્ત્રી દ્વારા શિક્ષણ અપાવવું. સહસ્ત્ર મૂર્ખાઓ ત્યજીને (આપી દઈને) એક પંડિત ગ્રહણ કરવા. (૯) સદા વિનયસંપન્ન, કુલીન, ઘણાં શાસ્ત્રોના અભિપ્રાયને જાણનાર, અસૂયાથી રહિત, સત્ અને અસત્‌ના વિવેકવાળો - આ પાંચ ગુણયુક્ત પુરોહિત રાજાએ રાખવો. (૧૦) જેમ પુરોહિત કરવો, તેમ જ્યોતિષશાસ્ત્રી પણ સ્થાપવો. આ જ્યોતિષશાસ્ત્રી સામુદ્રિકશાસ્ત્રનો જાણકાર, અંગપરીક્ષામાં કુશળ, સર્વ ધૂમકેતુ, ભૂકંપ, વામ-નેત્રનું સ્ફૂરણ આદિ આગામી અશુભ શુકનોમાં, શાંતિની વિધિ કરનાર, જ્યોતિઃશાસ્ત્રનો પ્રતિપાદક - આ ત્રણ ગુણયુક્ત જ્યોતિષી હોવો જોઈએ. (૧૧) આર્યુવેદના તત્ત્વને જાણનાર, બુદ્ધિ અને અવસ્થાથી અધિક અષ્ટાંગયુક્ત ચિકિત્સામાં કુશળ, પોતાનામાં પ્રીતિવાળા વૈદ્યને રાજવૈદ્યની જગાએ નિમણૂક આપે. (૧૨) અગ્નિ, જલ, વ્યાધિ, દુર્ભિક્ષાદિજન્ય તથા મરકી આ પાંચ પ્રકારનો દેવ સંબંધી તથા ચોર-ઠગાદિ જન્ય, શત્રુઓથી તથા રાજાના વાલેસરીઓ તથા રાજાનો લોભ આ પાંચ - મનુષ્ય સંબંધી મળીને દશ પ્રકારનો ભય શત્રુપરાજયમાં કારણરૂપ છે. તેનો પ્રસાર શત્રુ-દેશમાં થયેલો જાણીને પછી વિજયયાત્રાને કરે. (૧૩) શત્રુના રાજ્યમાં સેનાધિપતિને બીજા ન જાણે તેમ ઉત્કૃષ્ટ રત્નો, ભેદ પેદા કરવા માટે યથાયોગ્ય રીતે આપે. (૧૪) જિતેન્દ્રિય રાજા પ્રથમ પોતાના મનને જીતીને પછી અસાવધાન, અજિતેન્દ્રિય શત્રુઓને જીતવા ઈચ્છે. (૧૫) પરરાજ્યમાં ધાન્ય કાપવાનો સમય, કે ધાન્યોના દુર્ભિક્ષનો સમય જાણીને શત્રુને પરાભવ કરવા આયોજન કરે. પરીક્ષાર્થી વિશ્વાસુ માણસો દ્વારા પોતાના ભોજન, વસ્ત્ર, ગંધાદિનું રક્ષણ કરાવે. (એમ ના કરે, તો તેણે કરેલા ઝેર આપવાના કાર્યથી મૃત્યુ થાય.) (૧૬) રાજા, સંચિત દ્રવ્યરાશિનું, ધાન્ય ભંડારોનું, રથ, ઘોડા, વાહન, દરવાજા, ધનરત્નાદિકની આવક, ધનુષ્યાદિ આયુધોની શાળા, આ સર્વનું પોતાના કલ્યાણકારી વિશ્વાસુ સેવકો દ્વારા રક્ષણ કરાવે. (૧૭) બુદ્ધિશાળી રાજા, આભ્યન્તર રસોઈયા વગેરે અને બહારથી સેનાપતિ વગેરેથી પોતાની જાતનું સદા રક્ષણ કરે. પુત્ર અમાત્યાદિથી આંતરિક અને બાહ્યોનું રક્ષણ કરે, તથા પરસ્પર રક્ષણ કરે. આ પ્રકારે સર્વનું રક્ષણ કરે. (૧૮) કોશાગારથી જો ધનનો વ્યય થાય, તો તેને પૂરવા માટે યત્ન કરવો. સારો પાક અને આવક થઈ હોય ત્યારે ત્રણ ભાગથી પૂરે, સમાન વર્ષ પાકે ત્યારે અર્ધાંશથી વ્યયને પૂરે, દુર્ભિક્ષ હોય ત્યારે ચતુર્થાંશથી પૂરે. બાકીનું કોશાગારમાં મૂકે. પરંતુ ક્યારેય ખાલી ન કરે. (૧૯) દેશકાળના વૈષમ્યથી દારિદ્ર્યને પામેલા-જ્ઞાતિજનો, વૃદ્ધો, ગુરુઓ, વણિકો, શિલ્પીઓ અને આશ્રિતજનોને રાજા વારંવાર ધન અને ધાન્યથી અનુગ્રહ કરે. (૨૦) પોતાના હિતેચ્છુ, પોતાને વિષે હેતવાળા, કાર્યકુશળ પુરુષોને, અજ્ઞાનીની વાતો શ્રવણ કરીને, તેઓના દોષની સમીક્ષા કર્યા વિના, અધિકારથી ક્યારેય પણ પદભ્રષ્ટ કરવા નહીં. (૨૧) ધર્મને જાણનારાઓને ધર્મકાર્યોમાં જોડવા, અર્થશાસ્ત્રમાં કુશળ હોય તેમને આર્થિક કાર્યોમાં યોજવા, સ્ત્રીઓના

नीचान्नीचेषु कर्मसु ॥२२॥ लुब्धान्मूर्खांश्च पुरुषान्कामेऽर्थे च न योजयेत् । अलुब्धान्बुद्धिसम्पन्नान्सर्वकार्येषु योजयेत् ॥२३॥ मूर्खो ह्यधिकृतोऽर्थेषु कार्याणामविशारदः । प्रजाः क्लिश्नात्ययोगेन कामक्रोधसमन्वितः ॥२४॥ सन्ध्यामुपास्य शृणुयान्निशि चारोदितं रहः । परराष्ट्रजनं चापि कुर्वीत स्ववशे बुधः ॥२५॥ अर्थेन लुब्धं मानेन स्तब्धं भीरूं भयेन च । याथातथ्येन विद्वांसं वशीकुर्याद्यथोचितम् ॥२६॥ यस्मिन्देशे य आचारो व्यवहारः कुलस्थितिः । तथैव परिपाल्योऽसौ परराष्ट्रे वशंगते ॥२७॥ बृहन्ति च तडागानि सर्वपेयोदकानि च । स्वराष्ट्रे तत्रतत्राथ भागशो विनिवेशयेत् ॥२८॥ प्रतिग्रामं कृतप्रज्ञान्पञ्च पञ्च स्वनुष्ठितान् । संहत्य कर्म कुर्वाणान् शूरान्संस्थापयेत्तथा ॥२९॥ घोषांश्च ग्रामवत्कुर्याद्ग्रामान्नगरवत्तथा । क्रमेण द्रव्यं गृह्णीयाद्घोषादीनां नृपः स्वयम् ॥३०॥ स्त्रियः सुरक्षिताः कुर्यात्सान्त्वयेत्ताश्च तद्वचः । न श्रद्दध्याच्च न ब्रूयाद्रहस्यं तत्पुरः क्वचित् ॥३१॥ आत्मनश्च परेषां च परीक्ष्यात्र बलाबलम् । अष्टौ सन्धाय कर्माणि सेवेत नृपतिः परैः ॥३२॥ साध्यानल्पव्ययेनार्थानारभेत महोदयान् । कृष्यादिविघ्नं वैश्यादेर्न कुर्यात्कोशहानिकृत् ॥३३॥ कुर्यात्सर्वाणि दुर्गाणि धनधान्यायुधोदकैः । यन्त्रैश्च परिपूर्णानि तथा शिल्पिधनुर्धरैः ॥३४॥ नित्यं हृष्टश्च शूरश्च

સમૂહોમાં નપુંસકોની યોજના કરવી, નીચ કર્મોમાં નીચોની યોજના કરવી. (૨૨) લોભિયા અને મૂર્ખ પુરુષોને કામ સંબંધી કાર્યમાં અને અર્થ સંબંધી કાર્યમાં નિયુક્ત કરવા નહિ. સર્વ પણ કાર્યોમાં કુશળ બુદ્ધિવાળા અલુબ્ધ જનોને જોડવા કારણ કે લોભી ધન લઈ લે અને મૂર્ખ ધનનો નાશ કરે. (૨૩) માટે તેઓની નિયુક્તિ ના કરે. કારણ કે નિયુક્ત કરેલો કર્તવ્યાર્થમાં મૂર્ખ અધિકારી પ્રજાને, તેમના ઇષ્ટ કાર્યોની સિદ્ધિ ન થાય, તેથી ક્લેશ પમાડે. (૨૪) વિદ્વાન નૃપતિ સંધ્યાની ઉપાસના કરે. (સામાન્ય રીતે પ્રાપ્ત સંધ્યાનું વચન ફરીથી કહ્યું છે, તેતો માત્ર વિસ્મરણ ન થાય, તે માટે છે.) ગુપ્તચરો દ્વારા રાત્રિએ વિગતો સાંભળે અને પરરાષ્ટ્રને પોતાના વશમાં કરે. (૨૫) લોભીજનને અર્થ આપીને, અનમ્ર–(માની) ને બહુમાન આપવાથી, ભીરુને ભય બતાવવાથી અને પંડિતને યથાર્થ કહેવાથી જ યથાયોગ્ય વશ કરે. (૨૬) પરરાષ્ટ્ર પોતાને વશમાં થતાં, તે દેશમાં જે આચાર, વ્યવહાર અને કુળની સ્થિતિ હોય, રાજા તેનું તે પ્રકારે જ પરિપાલન કરે. જો તે શાસ્ત્ર વિરુદ્ધ ના હોય તો પરિપાલન કરે. (૨૭) અને પોતાના રાષ્ટ્રમાં, તે તે સ્થાનમાં સર્વેને પીવા યોગ્ય પાણી માટે મહાન તળાવો, વિભાગ પ્રમાણે સંપાદન કરે. (૨૮) તે જ પ્રકારે શિક્ષિત, બુદ્ધિશાળી, સત્કર્મના અનુષ્ઠાનવાળાં જનોને ભેગાં કરી રાજાએ નિવેદન કરેલાં ગામના કાર્યો કરનારા શૂરવીર પાંચ હોદ્દેદારોની દરેક ગામે સ્થાપના કરે. (જેમકે- પ્રશાસ્તા,(શિક્ષક), સમાહર્તા, લેખક, સંવિધાતા અને સાક્ષી.) તેમાં જે શિક્ષક તે **'પ્રશાસ્તા'** કહેવાય. પ્રજા પાસેથી દ્રવ્ય એકઠું કરી રાજાને અર્પનાર **'સમાહર્તા'** કહેવાય. પ્રજા અને સમાહર્તાને એક વાક્યતાની ઘટના કરી આપનારો **'સંવિધાતા'** કહેવાય, દ્રવ્યનો હિસાબ રાખનાર **'લેખક'** કહેવાય. સર્વેના સાક્ષીકર્મ કરનારો તે **'સાક્ષી'** કહેવાય. આવા પંચની દરેક ગામે સ્થાપના કરે. (૨૯) રાજા ઘોષોને અર્થાત્ આહીરજનોના નેસ- ઝૂંપડાંઓને ગામ સમાન કરે. (અનેક જનોના અધિષ્ઠાનવાળા કરે, તેમાં શૂદ્રોને પણ વસાવે) તથા ગામોને નગર સમાન કરે અર્થાત્ તેની વસાહતને નગર જેવી હાટ, ચોક વગેરેથી રચના કરે. આહીરજનો પાસેથી અલગ દ્રવ્ય કર રૂપે અનુક્રમથી ગ્રહણ કરે. તેમાં ઉપક્રમ એવો રાખે કે, ઘોષાધિપતિ, ગ્રામાધિપતિને અને ગ્રામાધિપતિ, નગરાધિપતિને અને નગરાધિપતિ, દેશાધિપતિને અને દેશાધિપતિ રાજાની રૂબરૂમાં જઈ કર-દ્રવ્ય રજૂ કરે. (૩૦) અંતઃપુરની સ્ત્રીઓનું સારી રીતે રક્ષણ કરે. તે સ્ત્રીઓને આંતરિક ક્લેશ, વિખવાદમાંથી મુક્ત કરી આનંદિત રાખે. તેઓનાં વાક્યોને સત્ય માને નહીં. રહસ્ય વૃત્તાન્ત સ્ત્રીજનો સમક્ષ ક્યારેય ન કહે. (૩૧) પોતાના અને શત્રુઓના બલાબલની પરીક્ષા કરીને શત્રુઓની સાથે યુવરાજ-અમાત્યાદિ 'સપ્ત પ્રકૃતિ'ની સાથે સંધિ કરીને રાજા આ લોકમાં **આઠ કર્મોનું સેવન** કરે. (ખેતી, વણિકમાર્ગને પ્રોત્સાહન, દુર્ગનું રક્ષણ, નદીઓના પુલનું રક્ષણ, હાથીઓને બાંધવા માટે હસ્તિશાળા, રત્નાદિને ઉત્પન્ન કરવાની ખાણ તથા આકર=સુવર્ણાદિને ઉત્પન્ન કરવાનું સ્થાન, વિષમ દેશકાલાદિથી ગ્રામાન્તર કરાવી આવાસોનું ફરીથી નિર્માણ કરવું. આ સ્વામી અમાત્યાદિ 'સપ્ત પ્રકૃતિ'ના અનુગ્રહથી કૃષિ વગેરે અષ્ટ કર્મની સિદ્ધિ થાય. તેથી કોશવૃદ્ધિ થાય, તે તાત્પર્ય છે.) (૩૨) અલ્પ ખર્ચથી ઘણાં ફળદાયી આર્થિક કાર્યોનો આરંભ કરે, કોશહાનિ કરે એવું, વૈશ્યાદિની કૃષિ વગેરેમાં વિઘ્ન કરે નહિ. (૩૩) સર્વ દુર્ગો-ધનધાન્ય, આયુધ, ઉદક, આગ્નેયાદિ યંત્ર-સમૂહોથી તથા શિલ્પીઓ, સુથારો અને ધનુર્ધરો વડે પરિપૂર્ણ કરે. (૩૪) નિત્ય ધનમાનાદિની પ્રાપ્તિથી હર્ષ પામેલો, શૂર, મતિમાન, સંગ્રામમાં ધૈર્યયુક્ત, રાજાના કાર્યમાં શુદ્ધ માનસવાળો, સારા કુટુંબમાં જન્મેલો, પોતાને વિષે અનુરાગવાળો આ

मतिमान्धृतिमाञ्छुचिः । कुलीनश्चानुरक्तश्च कार्यः सेनापतिस्तथा ॥३५॥ कृत्वा पुरुषकारेण स्वोक्तं कर्म समागतम् । मानयेद्दानमानाभ्यां दद्याच्चाधिकवेतनम् ॥३६॥ तथा विद्याविनीतांश्च शास्त्रशिल्पविशारदान् । यथार्हं वित्तवस्त्राद्यैर्मानयेच्चतुरो नृपः ॥३७॥ परराष्ट्रे स्थापनीया बुद्धियुक्तिविचक्षणाः । तत्रत्यवृत्तज्ञानार्थं दद्यात्तद्वेतनं रहः ॥३८॥ दृष्टदुष्टक्रियं स्तेनं निगृह्य स्थापयेन्नृपः । यथेष्टाचरणायैनं न लोभाद्विसृजेत्क्वचित् ॥३९॥ आदौ दरिद्रं पश्चाच्च दैवात्प्राप्तधनं जनम् । मिथ्यापवादैर्नो दुष्येद्रक्षेन्मन्त्र्यादितश्च तम् ॥४०॥ दूरादभ्यागतेभ्यश्च वणिग्भ्यो लोभकारणात् । करं यथोक्तमादद्याद्रक्षेत्तान् शुल्कजीवितः ॥४१॥ नित्यं धर्मार्थविज्ञानां वृद्धानां शृणुयाद्वचः । पुरुषं कृतकर्माणं सत्सभायां स्तुवीत च ॥४२॥ द्रव्योपकरणं यच्च सर्वदा सर्वशिल्पिनाम् । चातुर्मास्यावरं सम्यक् प्रयच्छेन्नियतं नृपः ॥४३॥ रक्षोग्निव्याघ्ररुक्सर्पभयाद्राष्ट्रं च पालयेत् । पितेव चान्धान्मूकांश्च व्यङ्गान्पङ्गूंश्च पालयेत् ॥४४॥ त्याज्या अनर्थाः षड्राज्ञा विशेषेण सुबुद्धिना । निद्रालस्यं भयं क्रोधो मार्दवं दीर्घसूत्रता ॥४५॥ अध्येतव्यं नीतिशास्त्रमादौ राज्ञा प्रयत्नतः । पण्डिताद्ब्राह्मणात्तस्य लक्षणं च वदामि ते ॥४६॥ इतिहासपुराणज्ञो न्यायविद्धर्मतत्त्ववित्। षडङ्गवेदविद्वक्ता प्रगल्भो बुद्धिमान्कविः ॥४७॥ परावरविभागज्ञो नीतिज्ञः स्मृतिमांस्तथा । प्रमाणैर्धर्मकामार्थमोक्षाणां कृतनिश्चयः ॥४८॥

---

સપ્તગુણે યુક્ત **'સેનાપતિ'** કરવો. (૩૫) પોતે ચીંધેલું કાર્ય, પોતાના પરાક્રમથી સફળ કરીને આવતા જનને દાન, ભેટ, પારિતોષિક અર્પણ કરી, સભામાં સત્કાર કરવો. એ રીતે માન આપી પગાર વધારી આપવો. (૩૬) વિદ્યાદિકુશલ રાજા, વિદ્યાથી વિનય યુક્ત અને શાસ્ત્રો-સ્થાપત્યાદિ ગ્રંથો અને શાસ્ત્રોમાં કહેલી ક્રિયાઓમાં વિશારદ પુરુષોને યથાયોગ્ય વિત્ત-વસ્ત્રાદિ વડે સત્કારે. (૩૭) પરરાજ્યમાં પ્રતિભાના અતિશયથી, નાના પ્રકારના પ્રવીણ પુરુષોને ત્યાંનું વૃત્તાન્ત જાણવા માટે સ્થાપન કરવા. બીજા ન જાણે તેમ તેઓને વેતન આપવું. (૩૮) રાજા સાક્ષાત્ જોયેલા, પરાંગનાનો સંગાદિ કરનાર દુષ્ટને અને ચોરને પકડીને કારાગારમાં મૂકે. તેમણે અર્પણ કરેલા ધનના લોભથી - એ બન્નેમાંથી કોઈ પુરુષને યથેષ્ટાચરણ માટે, ફરી તેવા પ્રકારનું કર્મ ઈચ્છા પ્રમાણે કરવા માટે ક્યારેય પણ એને છોડી મૂકે નહીં. (૩૯) પ્રથમ દરિદ્રતાયુક્ત, પછીથી દૈવયોગે અલ્પ પ્રયાસથી પ્રાપ્ત ધનવાળા જનને મિથ્યા અપવાદોથી દૂષિત કરવા નહીં. તેવા માણસનું મંત્રી-અમાત્યાદિથી રક્ષણ કરે. (૪૦) લોભથી પ્રેરાઈને દૂર દેશાવરથી વેપાર માટે પોતાના દેશમાં આવેલા વાણિયાઓથી યથાયોગ્ય કર ગ્રહણ કરવા. અને વાણિયાઓને પોતાના નગરમાં રહેલા ઘાટ વગેરેમાં જગતના ધનજીવી અધિક લોભી વાણિયાઓથી રક્ષા કરે. (૪૧) ધર્મ-અર્થનાં કાર્યોમાં વિશેષ કુશલ વૃદ્ધોનાં વચન નિત્ય સાંભળે. જેમણે મહાન કાર્ય સંપાદિત કર્યું હોય, એવા પુરુષનું સત્પુરુષોની સભામાં બહુમાન કરે. પ્રશંસા કરે. (૪૨) સર્વે શિલ્પકલામાં પ્રવૃત્ત શિલ્પીઓને, તેમની જરૂરી ચીજ વસ્તુઓ, પગાર, વગેરે ચાર માસ પર્યન્ત ચાલે તેમ અધિક આપવાનો સમયોચિત નિર્ણય કરે. ચિત્રકારોને પણ રંગ-દ્રવ્યાદિ તે મુજબ આપે. (૪૩) રાક્ષસ, અગ્નિ, વ્યાઘ્ર, મરકી વગેરેની વ્યાધિ, સર્પ, વગેરેના ભયથી પોતાના દેશનું રક્ષણ - પરિપાલન કરે. અંધ, મૂંગા, અંગે ખોડવાળા વગેરેનું પિતાની જેમ પાલન કરે. (૪૪) બુદ્ધિમાન રાજાએ નિદ્રા - આલસ્ય - ભય - ક્રોધ - મૃદુતા - દીર્ઘસૂત્રતા; આ **છ અનર્થો** વિશેષપણે ત્યાગ કરવા. (૪૫)

રાજાએ પ્રથમ પંડિત બ્રાહ્મણથી નીતિશાસ્ત્ર પ્રયત્નપૂર્વક ભણવું. **અધ્યાપક બ્રાહ્મણનું લક્ષણ** તમોને કહું છું. (૪૬) ઈતિહાસ, (મહાભારત) પદ્માદિ પુરાણોને જાણનારો, પૂર્વ મીમાંસા અને ઉત્તર મીમાંસાનાં અધિકરણોને જાણનારો (વિષયી, વિષય, પૂર્વ પક્ષ, ઉત્તર પક્ષ અને સંગતિ - આ પાંચ અંગને અધિકરણ કહે છે.) ધર્મતત્ત્વને જાણનારો, છ અંગોએ સહિત વેદને જાણનારો, તેમજ તે વેદનો અધ્યાપક, પ્રતિભાશાળી, બુદ્ધિમાન, કવિ, પર અને અપર વિભાગને જાણનાર (જ્ઞાનકાંડ અને કર્મકાંડને જાણનાર.) નીતિજ્ઞ, સ્મૃતિમાન, શાસ્ત્રના પ્રમાણથી ધર્માદિના સ્વરૂપનો નિર્ણય કરનાર, ભૂગોલના તત્ત્વને જાણનાર, સંધિ-વિગ્રહાદિ વિભાગને જાણનાર, બૃહસ્પતિ જેવા સાથે પણ ઉત્તરોત્તર પ્રતિવાદ કરવા મહાસમર્થ-તેના વચન ઉપર પોતાનું વચન રાખનારો; ઐક્યમાં વિશારદ=ભિન્ન ભિન્ન જગાએ છૂટાં છૂટા રહેલાં અવાંતર વાક્યોને મહાવાક્યમાં એક કરીને તેના તાત્પર્ય નિર્ણયમાં સમર્થ, સર્વ શાખા પ્રત્યય ન્યાયથી એકાર્થપણાના અવબોધનમાં સમર્થ, બે અર્થના તાત્પર્યથી પ્રયોજેલા એક વાક્યમાંથી અર્થનું તાત્પર્ય જાણનાર; એક કાર્યમાં અનેક ધર્મોનો અને તેના ફળનો સમન્વય કરી તેનું નિરૂપણ કરવામાં સમર્થ; પ્રતિજ્ઞા-હેતુ-ઉદાહરણ-ઉપનયન અને નિગમન - નામના પાંચ અંગોવાળા ન્યાયપ્રયોગોમાં સમર્થ; પોતે કે બીજાએ પ્રયોજેલા હેતુના ગુણદોષને; તેના વિભાગને જાણનારો, સાંખ્યયોગમાં નિષ્ણાંત, ગાંધર્વવિદ્યા, ધનુર્વિદ્યા, યુદ્ધકલામાં કુશળ - એવા ગુણો વડે સંપન્ન વિપ્ર રાજાનો અધ્યાપક થાય. (૪૭-૫૧)

भूगोलतत्त्ववित्सन्धिविग्रहादिविभागवित् । उत्तरोत्तरवक्ता च वदतोऽपि बृहस्पतेः ॥४९॥ एक्ये संयोगनानात्वे समवाये विशारदः । पञ्चावयववाक्यस्य निष्णातो गुणदोषयोः ॥५०॥ साङ्ख्ये योगे च गान्धर्वशास्त्रे युद्धक्रियास्वपि । निष्णातो यो धनुर्वेदे स राज्ञोऽध्यापको भवेत् ॥५१॥ एवंविधात्तु विदुषो राजाऽधीयीत यत्नतः । धनुर्वेदं नीतिशास्त्रं शास्त्राण्यन्यान्यपि स्वयम् ॥५२॥ हस्त्यश्वरथसूत्राणि यन्त्रसूत्रं च सर्वशः । प्रयोगं सोपसंहारमन्त्राणां च यथाविधि ॥५३॥ अध्यापकं बहुविधैर्वसनैश्च रत्नैर्यानैः सदाभरणरौप्यकमुद्रिकाभिः । नानाविधोपकरणै रुचिरैश्च हैमैः सम्प्रीणयेद्द्विज! नृपः शुभवेश्मना च ॥५४॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे राजधर्मेषु चतुर्दशदोषादिनिरूपणनामा त्रयोविंशोऽध्यायः ॥२३॥

श्रीनारायणमुनिरुवाच - **धर्मो यशस्करो राज्ञां धर्मः स्वर्गप्रदस्तथा । धर्मेणैव जयेच्छत्रूंस्ततो धर्मरतो भवेत् ॥१॥ चित्तं देश उपायाश्च सहायाः कालकर्मणी । षड्वर्गोऽयं राजनीत्या भवेत्तद्धर्ममाचरेत् ॥२॥ धर्मकामार्थमोक्षाणां विद्या विद्याच्च पार्थिवः । त्रयीं वार्तां दण्डनीतिं तुर्यामान्वीक्षिकीं तथा ॥३॥ उपायांश्चतुरः साम भेदं दानं च निग्रहम् । यथोचित्तं प्रयुञ्जीत पञ्चमं चाप्युपेक्षणम् ॥४॥ हीनमध्योत्तमान्सन्धीन्भीसत्कारधनग्रहैः । विद्यादर्थजयं धर्म्यं जयं**

આવા પ્રકારના વિદ્વાનથી સ્વયં રાજા ધનુર્વિદ્યા, નીતિશાસ્ત્ર અને બીજાં પણ શાસ્ત્રો પ્રયત્નથી ભણે. (૫૨) હાથી, ઘોડા, રથ તેનાં સૂત્રો, લક્ષણપરીક્ષા, ચિકિત્સા, ઔષધ, ઉદ્દીપન, ભોજ્ય પદાર્થોના ગુણદોષ વગેરેનું પ્રતિપાદન કરનારા ગ્રન્થોના સિદ્ધાંત માત્રના સંક્ષેપે યુક્ત હોવાથી-સૂત્ર સંજ્ઞાવાળાં શાસ્ત્રો તથા યંત્રો-અગ્નિ તથા ઔષધબળથી સીસાના, કાંસાના, પથ્થરના ગોળા ફેંકવાના, લોહમય યંત્રો જે નાળ-તોપ આદિ સંજ્ઞાથી પ્રસિદ્ધ છે, તેને સૂચવનારું શાસ્ત્ર, તથા સર્વ આગ્નેયાદિ શસ્ત્રોના ઉપસંહાર સહિત, યથાવિધિ મંત્રો સહિત પ્રયોગોને જાણે અર્થાત્ તેનો **અભ્યાસ** કરે. (૫૩)

હે દ્વિજ ! રાજા ઘણા પ્રકારનાં વસ્ત્રો, રત્નો, વાહનો, સુંદર આભૂષણો રજત મુદ્રાઓ (રૂપિયા), સુવર્ણમય સુંદર પૂજા પાત્રાદિ બહુવિધ ઉપકરણો, ઉત્તમ મહેલ, ઈત્યાદિ દક્ષિણા-દ્રવ્યો વડે અધ્યાપક વિપ્રને પ્રસન્ન કરે. (૫૪)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે રાજધર્મેષુ ચતુર્દશદોષાદિ નિરૂપણનામાત્રયોવિંશોડધ્યાય: (૨૩)*

## અધ્યાય : ૨૪

### છ વર્ગાદિ રૂપ, ધર્મોપયોગી રાજનીતિનું વિસ્તારથી વર્ણન કરેલું છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે બ્રહ્મન્ ! આ રાજાઓને યશોદાયી ધર્મ, સ્વર્ગને આપનારો થાય છે. શત્રુઓને ધર્મથી જ જીતે, માટે રાજા સ્વધર્મમાં પ્રીતિવાળો થાય. (૧) લોકોનું મન, દેશ, પોત-પોતાને જીવનના ઉપાયો, સહાય કરનારા મંત્રી વગેરે, સત્યયુગાદિ કાલ; કર્મ - આ છ નો વર્ગ રાજાની નીતિને અનુસારે થાય છે. માટે રાજા ધર્મ આચરે. રાજા પોતે ધર્મ પાળી, ધર્મને પ્રવર્તાવે; તો અધર્મનિષ્ઠ એવા પણ લોકોનાં મન ધર્મમાં જ પ્રવર્તે. નઠારો દેશ પણ સારો થાય તથા ઉપાયો પણ ધર્મને અનુસરીને થાય. સહાય-મંત્રી વગરે પણ અધર્માચરણને ના કરે. કલિકાલનો સમય પણ રાજાએ પ્રવર્તાવેલા ધર્મથી સતયુગ સમાન થાય. કર્મ પણ ધર્મની પાછળ ચાલે. માટે રાજાએ ધાર્મિક જ થવું જોઈએ. (૨) રાજા, ઋગ્, યજુ અને સામરૂપી વેદત્રયી તથા કૃષિ, વાણિજ્ય, પશુપાલન-વિદ્યા તેમજ અર્થ, યોગ-ક્ષેમમાં ઉપયોગી રૂપ દંડનીતિ તથા ચોથી આત્મવિદ્યાને જાણે-કારણ કે ચારેય અનુક્રમે ધર્મ, અર્થ, કામ અને મોક્ષની વિદ્યા છે. (૩) સામ=પ્રિય ભાષણ, ભેદ =સામન્ત વગેરેને પરસ્પર વૈર ઉત્પન્ન કરીને જુદા કરે, ને દાન =સુવર્ણાદિનું, નિગ્રહ=દંડ અને પ્રકાશથી ધન અપહરણ આદિ વધ પર્યન્ત અપકાર; આ ચાર ઉપાયો-વશીકરણ સાધનો અને પાંચમી ઉપેક્ષા વગેરેથી યથાયોગ્ય યોજના કરવી. (૪) ભય અને સત્કારના આચરણથી તથા ધનગ્રહણથી હીન, મધ્યમ અને ઉત્તમ સંધિઓને જાણે. તેમાં ભયથી સંધિ તે કનિષ્ઠ છે, સત્કારથી મધ્યમ અને ધનગ્રહણ કરીને ઉત્તમ છે. અર્થજય, ધર્મ્યજય, આસુરજય-આ પ્રકારના જયોને જાણે.



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

चासुरमित्यपि ॥५॥ रथा नागा हयाः पद्गा विष्टिर्नाविश्चरास्तथा । देशिकाश्चेति जानीयात्प्रकाशं दण्डमष्टधा ॥६॥ वस्त्रे चान्ने परकृतं विषयोगं च लक्षणैः जानीयादभिचारं च दण्डमप्रकटं त्रिधा ॥७॥ ग्रहनक्षत्राध्वगुणान्विद्याद्भूमिगुणान्नृपः । मन्त्रयन्त्रादिना चात्मरक्षणं युद्धकौशलम् ॥८॥ गारुडं माकरं क्रौञ्चं चक्रं सूचीमुखं महत् । वज्रं च सर्वतोभद्रमर्धचन्द्रं च शाकटम् ॥९॥ शृङ्गाटकादीनि तथा विद्याद्व्यूहानि सर्वशः । सञ्चारयेत्स्वसैन्यानि तथैव च नृपोत्तमः ॥१०॥ नृनागवाजिनां पुष्टियोगान्विद्याच्च शास्त्रतः । रथनिर्माणादि शिल्पं विद्याच्चायुधलक्षणम् ॥११॥ उत्पातादिगुणान्सैन्यप्रोत्साहनपरीक्षणे । शत्रुं मित्रमुदासीनं विद्याद्दूतांश्च लक्षणैः ॥१२॥ खलोन्मूलनरीतिं च प्रयोगं चास्त्रशस्त्रयोः । देशग्रामकुलानां च धर्मान्विद्याच्च वैदिकान् ॥१३॥ तथा राज्ञां द्वादशानां विद्यान्मण्डलसंस्थितिम् । अपराधोचितं दण्डं जानीयाद्धर्मशास्त्रतः ॥१४॥ धनुर्वेदं नीतिशास्त्रं चाधीत्य नृपतिः सुधीः । एवमादि विदित्वाऽरीन् जित्वा धर्मं विवर्धयेत् ॥१५॥ साम्ना दानेन भेदेन स्वबुद्ध्या वशयेद्रिपून् । कालेनाप्यतिदीर्घेण सद्यो युद्धं तु नाचरेत् ॥१६॥ वशीभवेयुश्चेन्नैव त्रिभिः सामादिभिर्द्विषः । तदा युद्धं प्रकुर्वीत राजा धर्मेण निर्भयः ॥१७॥ यदि युद्धे मृताः स्युस्ते तद्राज्यं तर्हि धार्मिकः । वशीकृतेभ्यो नृपतिस्तत्पुत्रेभ्योऽर्पयेत्स्वयम् ॥१८॥ युक्त्या बुद्धिबलेनापि गृहीताः शत्रवो यदि । युद्धे तदा तानानीय स्थापयेद्बन्धनालये ॥१९॥ दद्यात्तेभ्योऽन्नवस्त्राणि यावज्जीवं नृपोत्तमः । शत्रवोऽप्यतिरिच्यन्ते गोभ्यो बन्दीकृता यतः ॥२०॥ निगृहीतान्

---

તેમાં અર્થજય=પર સેનાપતિ આદિ જનને ધનના અર્પણાદિ ભેદ કરવાથી પોતાના વિજયનું વિધાન. ધર્મ્ય જય = યથાર્થ યુદ્ધાદિથી વિજય સંપાદન. આસુર જય=શત્રુ જે પ્રકારે ના જાણે તેવી રીતે છાનો પરાજય કરે. (જેમ સૂતેલાઓને અશ્વત્થામાએ માર્યા હતા. તે અત્યંત નિંદ્ય છે.) (૫) રથો, હાથીઓ, ઘોડાઓ, પદાતિઓ; વિષ્ટિ મૂલ્ય આપ્યા વિના, અથવા અલ્પ મૂલ્યથી એક ગામથી બીજે ગામ લઈ જનારા, નાવ-નૌકા અથવા ભયપ્રદર્શનાદિથી કૈવર્તકાદિથી નૌકા દ્વારા ગતિ કરનારા, રાજાની મુદ્રા ધારણ કરનારા—આગળ ચાલનારા જાસૂદ, તથા સેનાને ઉપદેશ આપનારા ગુરુઓ - આ આઠ પ્રકારથી પ્રસિદ્ધ દંડ = સેના જાણો. (૬) પહેરવાના વસ્ત્રમાં, અન્નમાં (થાળીમાં લાવેલા ચાર પ્રકારના ભોજનમાં) પારકાએ કરેલા વિષપ્રયોગ, અભિચાર (= બ્રાહ્મણો પાસે મંત્રપ્રયોગથી અભિચારરૂપ કર્મ) આ ત્રણ પ્રકારે અપ્રગટ દંડ લક્ષણોથી જાણે. (૭) રાજા, સૂર્યાદિ ગ્રહો અને અશ્વિની આદિ નક્ષત્રો, તેના માર્ગ, તેના ગુણો, પૃથ્વીના ચોરાસી ગુણો ભૂ-વલય આદિ, મંત્ર-યન્ત્ર આદિથી આત્મ - રક્ષણ, અને યુદ્ધ - કૌશલને જાણે. (૮) ગરુડાકૃતિ વ્યૂહ, મકરાકૃતિ વ્યૂહ, ક્રૌંચ આકૃતિ વ્યૂહ, ચક્રાકૃતિ-વ્યૂહ, શુચિ મુખ, મહદાખ્ય વ્યૂહ, વજ્રાકૃતિ વ્યૂહ, સર્વતોભદ્ર મંડલાકૃતિ વ્યૂહ, અર્ધચન્દ્રાકૃતિ વ્યૂહ, ગાડાના આકારવાળો વ્યૂહ, શિંગોડાના ફલની માફક ત્રિકોણ વ્યૂહ, એ આદિક બાર્હસ્પત્ય વગેરે વ્યૂહ (સૈન્યની ગોઠવણી)ને જાણે. ઉત્તમ રાજા તે પ્રકારે જ વ્યૂહરચના પ્રકારથી જ પોતાના સૈન્યોને, શત્રુને ભય પ્રદર્શનાર્થે ભ્રમણ કરાવે. (૯-૧૦) પુરુષો, હાથીઓ અને ઘોડાઓના પોષણ માટે ઉપાયોને શાસ્ત્રોથી જાણે; રથ-નિર્માણ આદિ શિલ્પ અને આયુધનું સ્વરૂપ, શાસ્ત્રથી જાણવું. (૧૧) ઉત્પાતાદિકના ગુણો, સૈન્યોનો ઉત્સાહ અને પરીક્ષા, શત્રુ, મિત્ર, ઉદાસીન અને દૂતોને લક્ષણોથી જાણે. (૧૨) ખલ જનોને ઉન્મૂલિત કરવાની રીત, અસ્ત્રશસ્ત્રનો પ્રયોગ, દેશ-ગામ અને કુળના આચારરૂપ ધર્મો, તેમજ વૈદિક ધર્મોને જાણે. (૧૩) તથા શત્રુ-મિત્ર અને ઉદાસીન, ત્રણેયના ચાર ચાર મિત્રો એમ કરીને બાર રાજાઓના મંડલની સ્થિતિ જાણે. અપરાધને યોગ્ય દંડ ધર્મ શાસ્ત્રથી જાણે. (૧૪) બુદ્ધિમાન રાજા, ધનુર્વિદ્યા અને નીતિશાસ્ત્ર ભણીને, પૂર્વે કહેલું બધું જાણીને, શત્રુઓને જીતીને ધર્મને વૃદ્ધિ પમાડે. (૧૫) સામ-દામ-ભેદથી, પોતાની બુદ્ધિથી, અતિદીર્ઘ સમયથી પણ શત્રુઓને પોતાને વશ કરે. તત્કાલ જ ચતુર્થ ઉપાય રૂપ સંગ્રામનું આચરણ કરે નહિ. (૧૬) જો શત્રુઓ સામાદિ ત્રણ ઉપાયોથી વશ ના થાય, તો રાજા ભયે રહિત થઈને ધર્મથી યુદ્ધ કરે. (૧૭) જો શત્રુઓ યુદ્ધમાં મરણ પામે, તો ધાર્મિક રાજા શત્રુનું રાજ્ય, વશ કરેલા તેમના પુત્રોને પોતે આપે. (૧૮) શત્રુઓ જો યુક્તિથી અને બુદ્ધિ-બલથી પણ યુદ્ધમાં પકડાઈ જાય, તો તે શત્રુઓને લાવીને કેદમાં રાખે. (૧૯) શ્રેષ્ઠ રાજા, ગ્રહણ કરેલા શત્રુઓને જીવન પર્યન્ત અન્ન-વસ્ત્રો આપે. કારણ કે બંદીવાન કરેલા શત્રુઓ ગાયથી પણ અધિક દયાપાત્ર છે. (૨૦) ક્રૂર કર્મવાળો જે રાજા, પકડાયેલા શત્રુઓને મારી નાંખે છે તે રાજા, બ્રહ્મહત્યાદિ મહાપાતકોથી યુક્ત થાય છે જ. (૨૧) બુદ્ધિહીન જે રાજા તો સામાદિ ત્રણ ઉપાયોનો ત્યાગ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

घातयति क्रूरकर्मा नृपस्तु यः । स ब्रह्महत्यादिमहापातकैर्युज्यते किल ॥२१॥ यस्तु राजा बुद्धिहीनः सामादींस्त्रीन्विहाय च । नित्यं युद्धपरस्तस्य क्षीयन्ते सन्नरादयः ॥२२॥ कोशश्च नाशमायाति जायते दैन्यभाक् ततः ॥ स्तेयवृत्तिस्ततो नश्येत्तन्न कुर्वीत साहसम् ॥२३॥ स्ववित्तस्य तृतीयांशं जीवनाय प्रकल्पयेत् । भागद्वयं तु धर्मार्थमनित्यं जीवितं यतः ॥२४॥ धर्मेण पालयेद्राजा प्रजाः शीलेन रञ्जयन् । अदण्ड्यान्दण्डयेन्नैव दण्डार्हान्दण्डयेज्जनान् ॥२५॥ अनयाः सम्प्रवर्तेरन्भवेद्वै वर्णसङ्करः । दुर्भिक्षमाविशेद्राष्ट्रं यदि राजा न पालयेत् ॥२६॥ असंरक्षन्प्रजा राजा यो गृह्णाति करं निजम् । प्रजानां शमलं भुङ्क्ते स्वपुण्यं च जहाति सः ॥२७॥ आददीत करं राजा प्रजाभ्यो धर्मदर्शनः । षष्ठं भागं सदा प्राज्ञस्तासामेवाभिगुप्तये ॥२८॥ मनो जेयं पुरा राज्ञा ततो जेयाश्च शत्रवः । जितेन्द्रियो हि नृपतिर्बाधितुं शक्नुयादरीन् ॥२९॥ वेदवेदाङ्गवित्सम्यङ् नीतिज्ञो विष्णुभक्तिमान् । दानशीलो यज्ञशीलस्तपस्वी च भवेन्नृपः ॥३०॥ कृतकार्यान्परिजनान्धनैर्वस्त्रैश्च पूजयेत् । गुप्तं प्रजाः पीडयतोऽमात्यादींश्च नियन्त्रयेत् ॥३१॥ प्रवर्तयेन्नृपो धर्मं यं तं लोकोऽनुवर्तयेत् । न कालस्य बलं राज्ञि राजा कालस्य कारणम् ॥३२॥ कृतं त्रेता द्वापरं च कलिश्चेति युगानि यत्। राजवत्तानि वर्तेयू राजैव युगमुच्यते ॥३३॥ राजमूला इह प्रोक्ता योगक्षेमसुवृष्टयः । प्रजासु व्याधयश्चैव मरणं च भयानि च ॥३४॥ यदह्ना कुरुते पापमरक्षन्भयतः प्रजाः । राजा वर्षसहस्त्रं तत्फलं भुङ्क्ते यमालये ॥३५॥ यदह्ना कुरुते धर्मं प्रजा धर्मेण पालयन् । दशवर्षसहस्त्राणि तस्य भुङ्क्ते फलं दिवि ॥३६॥ यं हि धर्मं चरन्तीह प्रजा राज्ञा सुरक्षिताः। चतुर्थं तस्य धर्मस्य भागं राजा स विन्दते ॥३७॥ प्रत्याहर्तुमशक्यं यद्धनं चौरैर्हृतं नृणाम्। तत्स्वकोशात्प्रदातव्यं नृपेणैवोपजीविनाम्॥३८॥

---

કરીને હંમેશા યુદ્ધ પરાયણ થાય, તો તે રાજાના સત્પુરુષો વગેરે, ગજ-ઘોડા વગેરે ક્ષય પામે છે. (૨૨) વળી, કોશ નાશ પામે છે, તેથી દીનતા થાય છે. તેથી ચોરીકર્મ કરીને નાશ પામે, માટે સામાદિ ઉપાય કર્યા વિના, તેના પ્રયોગો કર્યા વિના યુદ્ધનો આરંભ કરે નહીં. (૨૩) પોતાના ધનનો તૃતીયાંશ ભાગ જીવન માટે કલ્પે, બે ભાગ ધર્મને માટે કલ્પે કારણ કે જીવિત અનિત્ય છે. (૨૪) રાજા પ્રજાઓને પોતાના સદ્‌વૃત્તથી પ્રસન્ન કરતો, ધર્મપૂર્વક પાલન કરે. અદંડ્ય બ્રાહ્મણાદિને દંડે નહીં. દંડ્યને દંડ કરે જ. (૨૫) જો રાજા પાલન કરે નહીં, તો અન્યાય માર્ગે પ્રવર્તે. બ્રાહ્મણાદિ વર્ણોના ધર્મોની વિપરીતતા થાય, દુર્ભિક્ષ, દેશમાં પ્રવેશે. (૨૬) જે રાજા, પ્રજાઓનું રક્ષણ કર્યા વગર પોતાનો કર ગ્રહણ કરે છે; તે રાજા પ્રજાઓનું પાપ ખાય છે. અને પોતાના પુણ્યનો ત્યાગ કરે છે. (૨૭) ધર્મનિષ્ઠ સુજ્ઞ રાજા, પ્રજાઓના રક્ષણ માટે જ પ્રજાઓનો છઠ્ઠો ભાગ કર રૂપે ગ્રહણ કરે. (૨૮) રાજાએ પ્રથમ મન જીતવું પછી શત્રુઓ જીતવા; કારણ કે જિતેન્દ્રિય રાજા શત્રુઓને જીતવા શક્તિમાન થાય છે. (૨૯) રાજા, વેદ અને વેદાંગ જાણનાર, સારી નીતિ જાણનાર, વિષ્ણુની ભક્તિમાન, દાનશીલ, યજ્ઞશીલ, તપસ્વી, (વિહિત ભોગનો સંકોચ કરનારો) થાય. (૩૦) જેમણે રાજ્યનાં કાર્યો સિદ્ધ કર્યાં છે, એવા નોકરોને ધન અને વસ્ત્રોથી બહુમાન આપે. ગુપ્ત રીતે પ્રજાને પીડા કરતા અમાત્યો વગેરેને નિયમમાં રાખે. (૩૧) જે ધર્મને રાજા પ્રવર્તાવે, તે ધર્મને લોકો અનુસરે; રાજામાં કાળનું બળ નથી જ, રાજા કાળનું કારણ છે. (૩૨) સત્યયુગ, ત્રેતાયુગ, દ્વાપરયુગ, કલિયુગ; આ પ્રકારના જે યુગો છે, તે રાજાને અનુસારે વર્તે, માટે રાજા જ યુગ (પ્રવર્તક-હેતુ) છે. (૩૩) આ લોકમાં પ્રજાઓમાં ઈષ્ટની પ્રાપ્તિ અને પ્રાપ્તનું પરિરક્ષણ, યથાયોગ્ય વૃષ્ટિ, વ્યાધિઓ, મરણ અને તસ્કરાદિથી ભય એ સર્વે રાજાના કારણવાળાં છે, માટે ધર્મનિષ્ઠ રાજાએ ધાર્મિક પ્રવૃત્તિ કરીને પ્રજાઓનું રક્ષણ કરવું. (૩૪) ભય થકી પ્રજાનું રક્ષણ નહિ કરનાર રાજા તે પ્રજાનું રક્ષણ નહિ કરવારૂપ, એક દિવસે કરેલા પાપનું ફળ યમપુરીમાં એક હજાર વર્ષ સુધી ભોગવે છે. (૩૫) ધર્મથી પ્રજાનું પાલન કરતો રાજા એક દિવસે જે ધર્મ કરે છે, તે એક દિવસ કરેલા ધર્મનું ફળ સ્વર્ગમાં દશ હજાર વર્ષ સુધી ભોગવે છે. (૩૬) આ લોકમાં રાજા વડે સુરક્ષિત પ્રજા જે ધર્મનું આચરણ કરે છે, તે રાજા તે ધર્મના પુણ્યનો ચતુર્થ ભાગ પામે છે. (૩૭) ચોરોએ ચોરેલું ધન, કોઈ પણ ઉપાયથી પાછું લાવવા અશક્ય હોય તો તે ઉપજીવી (અમાત્યાદિ) માણસોનું ધન, તે રાજાએ પોતાના કોશથી જ તેઓને આપવું. (૩૮) જે માણસ, નાશ પામતા રાજકોશને હિતની ઈચ્છાથી રાજાને કહે, તે કહેનારનું વચન એકાંત સ્થાનમાં સાંભળવું. તે કહેનારને પોતાના અમાત્ય-મંત્રી વગેરે થકી પણ જે પ્રકારે ભય ન થાય તેમ વધુ રક્ષણ આપવું. (૩૯) પ્રાજ્ઞ, મેધાવી, જિતેન્દ્રિય, ડાહ્યા, શૂરવીર, અનેક શાસ્ત્રજ્ઞ,

**यो राजकोषं नश्यन्तमाचक्षीत हितेच्छया । श्रोतव्यं तस्य च रहो रक्ष्यश्चामात्यतोऽपि सः ॥३९॥ प्राज्ञान्मेधाविनो दान्तान्दक्षान् शूरान्बहुश्रुतान् । कुलीनान्सत्यसम्पन्नान्मानयेत्सर्वकर्मसु ॥४०॥ कृपणानाथवृद्धानां विधवानां च योषिताम् । योगक्षेमं च वृत्तिं च राजा नित्यं प्रकल्पयेत् ॥४१॥ आश्रमेषु ब्रह्मविदां चैलभाजनभोजनम् । सदैवोपाहरेद्राजा सत्कृत्याभ्यर्च्य निश्छलः ॥४२॥ आत्मानं सर्वकार्याणि राष्ट्रं चापि तपस्विने । निवेदयेत्प्रयत्नेन तिष्ठेत्प्रह्वश्च सर्वदा ॥४३॥ तस्मिन् कुर्वीत विश्वासं राजा कस्याञ्चिदापदि । तापसेषु हि विश्वासमपि कुर्वन्ति दस्यवः ॥४४॥ ग्रामस्याधिपतिं कुर्याद्दशानां च ततः परम् । ग्रामाणां च शतस्यैकं सहस्रस्य च सर्वशः ॥४५॥ एतत्क्रमेण सर्वस्य कुर्याद्राष्ट्रस्य रक्षणम् । यथा जना न सीदेयुस्तथा कुर्यादतन्द्रितः ॥४६॥ तथैव वणिजां वृत्तिं शिल्पं चावेक्ष्य शिल्पिनाम् । तेषां व्ययं च निर्वाहं दृष्ट्वा कुर्यात्करान्नृपः ॥४७॥ श्रुत्वान्यस्य वचः सद्यः कुर्यात्किञ्चिन्न भूपतिः । विचार्य निश्चयं कृत्वा ततः कुर्याद्यथोचितम् ॥४८॥ लभ्यते खलु पापीयान्नरः सुप्रियवागिह । अप्रियस्य हि पथ्यस्य वक्ता श्रोता च दुर्लभः ॥४९॥ यस्तु धर्मपरो नित्यं हित्वा भर्तुः प्रियाप्रिये । अप्रियाण्याह पथ्यानि तेन राजा सहायवान् ॥५०॥ स्वस्याहितं येन भवेच्च तादृक् प्रियं वदेद्यः पुरुषो वचश्च । ज्ञातेरपि स्वस्य न तस्य तत्तु नृपः सुबुद्धिः शृणुयाद्द्विजेन्द्र! ॥५१॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे राजधर्मेषु षड्वर्गादिनिरूपणनामा चतुर्विंशोऽध्यायः ॥२४॥

---

ઉત્તમ કુળમાં ઉત્પન્ન થયેલા; સત્યસંપન્ન પુરુષોને સર્વ કર્મમાં માને. આવા ગુણવાળા પુરુષોને પૂછીને જ સર્વે કર્મો કરે. (૪૦) દીન, અનાથ અને વૃદ્ધો તથા વિધવા સ્ત્રીઓના યોગ-ક્ષેમ અને વૃત્તિ, રાજા નિત્ય કલ્પે. (૪૧) રાજા કપટે રહિત થઈને વેદજ્ઞ બ્રાહ્મણોના આશ્રમોમાં પ્રથમ તેઓનો સત્કાર કરી, પછી પૂજન કરીને વસ્ત્રો, પાત્રો અને ભોજન માટે અન્ન હંમેશાં તેમને મોકલે. (૪૨) રાજા પોતાને, સર્વ કાર્યોને તથા રાજ્યને પણ તપોનિષ્ઠ મુનિજન પાસે પ્રયત્નપૂર્વક નિવેદન કરે. સર્વદા મુનિઓની આગળ વિનય યુક્ત રહે. (૪૩) રાજા, કોઈ આપત્કાલ પ્રાપ્ત થાય ત્યારે તપસ્વી ઉપર વિશ્વાસ કરે, કારણ કે ચોરો પણ તપસ્વીઓ ઉપર વિશ્વાસ કરે છે. (૪૪)

એક ગામનો એક ગ્રામાધ્યક્ષ કરે, તેથી આગળ દશ ગામોનો એક અધિપતિ કરે, સો ગામોનો એક અધિપતિ નિયુક્ત કરે. (તે થકી ઉપર) હજાર ગામોનો એક અધિપતિ કરે. પછી સર્વ ગામોનો એક રાષ્ટ્રપતિ નિયુક્ત કરે. (૪૫) આ અનુક્રમથી સર્વ રાજ્યનું રક્ષણ કરે. જે પ્રકારે રાજ્યમાં રહેનારી પ્રજાઓ દુઃખ પામે નહિ, તે પ્રકારે આળસે રહિત થઈને રાજા વર્તન કરે. (૪૬) રાજા, તે પ્રકારે વાણિયાઓની વૃત્તિ અને શિલ્પીઓની શિલ્પકલા જોઈને, બન્નેનો વ્યય અને નિર્વાહ જોઈને કરવેરા નાંખે. (૪૭) રાજા, બીજા કોઈનું પણ વચન સાંભળીને તત્કાલ જ કંઈ પણ નિર્ણય ન કરે. સત્ય અને અસત્યનો વિચાર કરીને નિર્ણય લે, પછી યથાયોગ્ય કાર્ય કરે. (૪૮) આ લોકમાં કેવળ અત્યંત પ્રિય વચન કહેનારો માણસ દુર્લભ નથી. (રાજાઓને તો તેવા જનો વિશેષપણે સુલભ હોય છે પરંતુ) તેનાથી અનર્થ થાય છે. માટે કેવળ અતિપ્રિય વક્તા પાપ રૂપ છે. સાંભળતી વખતે કડવો લાગનાર, અપ્રીતિ ઉત્પન્ન કરનાર, છતાં પરિણામે અતિહિતરૂપ વાક્યનો વક્તા અતિદુર્લભ છે. **सुलभाः पुरुषा राजन् ! सततं प्रियवादिनः । अप्रियस्य च पथ्यस्य च वक्ता श्रोता च दुर्लभः ॥**

એમ વિદુરે કહ્યું છે. (૪૯) જે પુરુષ નિત્ય ધર્મપરાયણ થઈને, પોતાના સ્વામી રાજાનું પ્રિય અને અપ્રિયને ત્યાગ કરીને, અપ્રિય છતાં હિતકારી વચનો કહે છે, તે પુરુષ રાજાને સહાય કરે છે. (કેવળ પ્રિય બોલનારો સહાયક ન જાણવો.) (૫૦)

હે દ્વિજેન્દ્ર ! જે વચનથી પોતાનું અહિત થાય, તેવું પ્રિય વચન જે બોલે, તેવા પુરુષનું વચન બુદ્ધિમાન રાજા સાંભળે નહીં; પછી ભલે તે પોતાની જ્ઞાતિનો, સંબંધી હોય તો પણ ન સાંભળે. (૫૧)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે રાજધર્મેષુ ષડ્વર્ગાદિ નિરૂપણનામા ચતુર્વિંશોઽધ્યાયઃ (૨૪)*

## અધ્યાય : ૨૫



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच – **रूपवर्णस्वरोपेतस्तितिक्षुरनसूयकः । कुलीनः स्मृतिमान् धीमान्नीतिज्ञश्चानृशंस्यवान् ॥१॥ मानितोऽमानितो वापि न च दूष्येत्कदाचन । सूरो विद्वान् हितैषी यः कार्यो मन्त्री स भूभुजा ॥२॥ कुलीनाः शीलसम्पन्ना इङ्गितज्ञा अनिष्ठुराः । देशकालविधानज्ञाः शूरा धीरा हितैषिणः ॥३॥ ज्ञानविज्ञानसम्पन्नाः प्रकृतिज्ञाः परात्मनाम् । सत्यनिष्ठाश्च सन्तुष्टा ये ते कार्याः सुहृज्जनाः ॥४॥ सहायाः साधनोपाया विभागो देशकालयोः । विनिपातप्रतीकारः कार्यसिद्धिश्च पञ्चमी ॥५॥ पञ्चाङ्गानीति मन्त्रस्य विद्याद्वै राजकर्मसु । मन्त्रसंवरणं राज्ञा कर्तव्यं च प्रयत्नतः ॥६॥ अल्पप्रज्ञैर्दीर्घसूत्रैरलसैरबलैः सह । मन्त्रं न कुर्यान्नृपतिर्निद्रां तन्द्रां जयेत्तथा ॥७॥ विद्यामदं धनमदं हित्वा चाभिजनं मदम् । मन्त्रं सङ्गोपयेद्राजा यावत्स्याच्च फलोदयः ॥८॥ प्रासादे गिरिपृष्ठे वा निःशलाके वने रहः । मन्त्रं कुर्यान्महीपालः सम्यङ्नीतिरहोविदा ॥९॥ धन्वभूमिगिरिवृक्षजलमर्त्यमयानि षट् । राज्ञो दुर्गाणि तेष्वेकं नरदुर्गं सुदुस्तरम् ॥१०॥ नित्यमेव दया कार्या चातुर्वर्ण्ये हितैषिणा । सुरक्षिताः प्रजा राज्ञो वर्धयन्ति यशो महत् ॥११॥ मद्यशीला द्यूतकरा धूर्ताः पाषण्डिनो विटाः । कुशीलवाश्चारणाश्च नियन्तव्या नृपेण हि ॥१२॥ धनिनो मानयेद्राजा यतस्ते लोकधारकाः । वनस्पतीन्भक्ष्यफलांश्छेदयेन्नैव कर्हिचित् ॥१३॥ विप्राणां वृत्तिहीनानां कल्पेज्जीविकां नृपः । आपद्भ्य उद्धरंस्तांश्च न क्वचिद्दुःखमाप्नुयात् ॥१४॥ कृपणानाथवृद्धानामश्रूणि परिमार्जयेत् । हर्षं सञ्जनयन्राजा न सीदत्यापदि क्वचित् ॥१५॥ आपत्काले तु नृपतिर्दीर्घसूत्री भवेन्नहि । लभतेऽर्थं क्षिप्रकारी दीर्घसूत्री विनश्यति ॥१६॥ गोविप्राणां हितं कुर्याद्युध्येच्छूरैश्च**

## રાજધર્મોના વક્તા શ્રીહરિએ રાજધર્મોમાં મંત્રી આદિક વિષયક નિરૂપણ કર્યું છે.

**गुरुणा भर्त्सिता सापि रक्षिता च सुतादिभिः । तथापि जारं कुर्वीत नैव साध्या नृपैरपि ॥११॥ नास्ति तस्याः प्रियं किञ्चित्सर्वं कार्यवशात्प्रियम् । गावस्तृणमिवारण्यं प्रार्थयेत्सा नवं नवम् ॥१२॥ व्रते तपसि धर्मे च न मनो गृहकर्मसु । न गुरौ च भवेत्तस्या जारे स्निग्धं च चञ्चलम् ॥१३॥ स्वैरिण्योऽथ च कामिन्यः पुंश्चल्य इति भेदतः । प्रोक्ताः सन्ति पुराणेषु त्रिविधाः कुलटाः स्त्रियः ॥१४॥ सवर्णेषु रताः पुंसु स्वैरिण्यस्तत्र कीर्तिताः । असवर्णेष्वपि रताः सवर्णेषु तथाऽपराः ॥१५॥ सवर्णेष्वसवर्णेषु स्वसम्बन्धिषु पुंसु च । योषितो या रताः स्युस्ताः पुंश्चल्य इति कीर्तिताः ॥१६॥ कुलटास्त्रिविधा ह्येता देहान्ते यमयातनाः । आकल्पं प्राप्नुवन्त्येव नैवासामस्ति सद्गतिः ॥१७॥ पतिरेव व्रतं यस्याः सा तु प्रोक्ता पतिव्रता । प्राणेभ्योऽपि प्रियतरः पतिस्तस्या भवेद्ध्रुवम् ॥१८॥ देवदैत्यनरादिभ्यो यस्याः स्यादधिकः पतिः । सेवेत तं सदा प्रीत्या निश्छद्मेश्वरवद्धि सा ॥१९॥ व्रतं दानं तपः पूजां जपहोमादिकं तु यत् ॥ आज्ञयैव स्वभर्तुर्या कुर्यात्सा तु पतिव्रता ॥२०॥ पुत्रे यथैकपुत्राणां वैष्णवानां यथा हरौ । नेत्रे यथैकनेत्राणां तृषितानां यथा जले ॥२१॥ क्षुधितानां यथाऽन्ने च कामुकानां यथा स्त्रियाम् । यथा परस्वे चौराणां यथा जारे कुयोषिताम् ॥२२॥ विदुषां च यथा शास्त्रे वाणिज्ये वणिजां यथा । तथा शश्वन्मनः साध्व्याः स्वीये भवति भर्तरि ॥२३॥ पतिव्रतानां द्विजवर्य! धर्मान् स्त्रीणां वदाम्यादित एव तुभ्यम् । यानाश्रिता यान्ति हि सप्रियास्ताः सत्यास्तु लोकं सुरदर्शनीयम् ॥२४॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे सधवास्त्रीभेदलक्षणनिरूपणनामा त्रिंशोऽध्यायः ॥३०॥

---

નવાં નવાં ઘાસને જેમ તેમ કુલટા નવા નવા પુરુષને પ્રાર્થના કરે. (૧૨) કુલટાનું મન એકાદશીના વ્રતના આચરણમાં સ્નેહવાળું ના થાય. કૃચ્છ્ર-ચાન્દ્રાયણાદિ તપમાં સ્નેહવાળું ના થાય, ધર્મમાં સ્નેહવાળું ના થાય, ગૃહના કાર્યમાં સ્નેહવાળું ના થાય, પિતા, સસરો વગેરે ગુરુવર્ગમાં તથા તેમનાં શિક્ષાનાં વચનોમાં કુલટાનું મન સ્નેહવાળું ના થાય પરંતુ ઉપપતિમાં જ સ્નેહવાળું થાય તેમ જ ચંચળ થાય. (૧૩) કુલટા સ્ત્રીઓ પુરાણોમાં સ્વૈરિણી, કામિની અને પુંશ્ચલી આ ત્રણ ભેદવાળીઓ કહેલી છે. (૧૪) ત્રણ પ્રકારની કુલટા સ્ત્રીઓમાં જે સવર્ણ, અસવર્ણ પુરુષો અને પોતાના સમીપ સંબંધવાળા પુરુષોમાં પણ પ્રીતિવાળી હોય તે પુંશ્ચલીઓ કહેલી છે; પોતાના સંબંધીમાં પણ આસક્ત થવાપણું તે તેનું સ્વૈરિણી અને કામિનીથી ભિન્નપણું છે. (૧૫-૧૬) આ ત્રણ પ્રકારની કુલટાઓ પોતાના દેહના અવસાનમાં યમપુરીમાં નરકનાં દુઃખો કલ્પપર્યન્ત પામે છે જ. કુલટાઓથી સદ્ગતિ નથી જ. (૧૭) હવે **પતિવ્રતાનાં લક્ષણો** કહે છે. જે સ્ત્રીને પતિસેવા જ વ્રત છે તે તો પતિવ્રતા કહેલી છે. પતિ જ વ્રતની માફક સદૈવ ઉપાસ્ય જેને છે તે પતિવ્રતા કહેવાય. જેને પતિસેવામાં જ નિયમ છે તે પતિવ્રતા : આવી રીતે બે પ્રકારની વ્યાખ્યા છે તે પતિવ્રતાને પતિ પ્રાણથી પણ અતિ પ્રિય હોય જ. (૧૮) જે પતિવ્રતાને પતિ, દેવો-દૈત્યો-નરો અને ગંધર્વાદિ ઉપદેવો થકી અધિક હોય તે પતિવ્રતા પતિને પરમેશ્વરની માફક જાણી કપટે રહિત થઈને પ્રીતિથી સદા પતિની સેવાપરાયણ થાય જ. (૧૯) જે સ્ત્રી વ્રત, દાન, તપ, પૂજા, જપ, હોમાદિ તે સર્વે પોતાના પતિની આજ્ઞાથી જ કરે તે તો પતિવ્રતા થાય. (તેને પતિવ્રતા કહેવાય.) (૨૦) જેમ એક પુત્રવાળા જનોનું એક પુત્રમાં મન નિરંતર રહે છે, જેમ વૈષ્ણવોનું મન પરમાત્મામાં રહે છે, જેમ એક નેત્રવાળાંઓનું મન નેત્રમાં, જેમ તરસ્યાં મનુષ્યોનું મન જળમાં રહે છે. (૨૧) જેમ ભૂખ્યાં જનોનું મન અન્નમાં, કામીજનોનું મન કામિનીમાં, ચોરોનું મન પરધનમાં, કુલટા સ્ત્રીઓનું મન જાર પુરુષમાં રહે છે. (૨૨) તથા જેમ વિદ્વાનોનું મન શાસ્ત્રમાં અને વાણિયાઓનું મન વેપારમાં રહે છે તેમ પતિવ્રતા સ્ત્રીનું મન પોતાના પતિમાં નિરંતર રહે છે. (૨૩)

હે દ્વિજવર્ય ! પતિવ્રતા સ્ત્રીઓના ધર્મો તમોને પ્રથમથી જ કહું છું, જે મારા કહેલા ધર્મોને આશ્રિતા એવી પતિવ્રતાઓ પતિઓએ સહિત દેવોએ પણ દર્શન કરવા યોગ્ય પાર્વતીના લોકને પામે છે જ. (૨૪)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે સ્ત્રીધર્મેષુ સધવાસ્ત્રી ભેદલક્ષણનિરૂપણનામા ત્રિંશોડધ્યાયઃ (૩૦)*

## અધ્યાય : ૩૧



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच - **नार्याः पतिव्रतायास्तु पतिरेवेश्वरो मतः । अतस्तमेव सेवेत भक्त्येश्वरमिवादरात् ॥१॥ प्रतिबुध्योषसि स्नात्वा सुसम्मृष्टपरिच्छदा । धौतवासाः शुचिर्नित्यं भर्तृसेवापरा भवेत् ॥२॥ स्नापयित्वा सुपूतेन वारिणा निर्मलेन च । तस्मै दत्त्वा धौतवस्त्रं तत्पादौ क्षालयेन्मुदा ॥३॥ आसने चासयित्वा तं तस्य भाले च चन्दनम् । दोष्णोश्च हृदये कृत्वा दद्यान्माल्यं गलेऽपि च ॥४॥ नमः कान्ताय मन्त्रेण भोगद्रव्यैः सुधोपमैः । सम्पूज्य भक्तितः कान्तं स्तुत्वा च प्रणमेन्मुदा ॥५॥ प्रकाशेऽन्नं विशोध्याथ शुचिर्भूत्वा शुचिस्थले । सुसंस्कृतं पत्युरिष्टं पाकं कृत्वा तमाशयेत् ॥६॥ भुक्ते पत्यौ तु भुञ्जीत तिष्ठेत्तस्मिंश्च तिष्ठति । निद्रिते सति निद्रायाद्बुध्येताऽऽदौ पतिव्रता ॥७॥ अनलङ्कृतमात्मानं न पतिं दर्शयेत्क्वचित्। कार्यार्थं प्रोषिते पत्यौ भवेन्मण्डनवर्जिता ॥८॥ पत्युर्नाम न गृह्णीयात्तस्यायुष्यविवृद्धये । पुरुषान्तरनामापि न गृह्णीयात्कदाचन ॥९॥ आक्रुष्टापि च नाक्रोशेत्प्रसीदेत्ताडितापि च । चिरं द्वारि न तिष्ठेच्च नोच्चैर्भाषेत कर्हिचित् ॥१०॥ आहूता गृहकार्याणि त्यक्त्वाऽऽगच्छेच्च सत्वरम् । एषाऽस्म्याज्ञाप्यतां स्वामिन्निति ब्रूयाच्छनैर्वचः ॥११॥ हरिपूजोकरणं पत्याऽनुक्तापि साधयेत्। उपयुक्तं यदा यत्स्यात्तत्तदानीमुपाहरेत् ॥१२॥ सेवेत भर्तुरुच्छिष्टमिष्टमन्नं फलादि च । महाप्रसाद इत्युक्त्वा प्रतीच्छेत्पतिनाऽर्पितम् ॥१३॥ देवपित्रतिथिभ्यश्च गोभ्यो भिक्षुभ्य एव च । परिचारकवर्गेभ्यो नादत्वाऽद्यात्पतिव्रता ॥१४॥ ब्राह्मणान् दुर्बलानाथान् दीनान्धकृपणांस्तथा । यः कोऽपि क्षुधितस्तं च साध्वी साऽन्नेन पोषयेत् ॥१५॥ संयतोपस्करा हृष्टा दक्षा व्ययपराङ्मुखी । कुर्यात्पतिमनापृच्छ्य नोपवासव्रतादिकम् ॥१६॥ स्वाचारा**

---

**સ્ત્રીઓના હિતેચ્છુ શ્રીહરિએ સ્ત્રીધર્મોમાં પતિવ્રતાના ધર્મોનું નિરૂપણ સ્પષ્ટપણે કર્યું છે.**

**શ્રી નારાયણ મુનિ બોલ્યા** : હે બ્રહ્મન્ ! પતિવ્રતા નારીને તો પતિ જ ઈશ્વર માનેલો છે માટે પતિવ્રતા ઈશ્વરની માફક પતિને જ ભક્તિથી આદરપૂર્વક સેવે. (૧) નિત્ય પ્રાતઃકાળે નિદ્રાનો ત્યાગ કરીને પવિત્ર જળથી સ્નાન કરી, ધોયેલાં વસ્ત્રોને ધારણ કરી; પવિત્ર માંજેલા છે પાત્રાદિ ગૃહનાં ઉપકરણો જેણે એવી પતિવ્રતા પોતાના પતિની સેવા પરાયણ થાય. (૨) શુદ્ધ વસ્ત્રથી ગાળેલા નિર્મળ જળથી ઋતુ પ્રમાણે પોતાના પતિને સ્નાન કરાવીને પોતાના પતિને પહેરવા માટે ધોયેલાં વસ્ત્રો અર્પણ કરી તેમનાં ચરણોને આનંદથી ફરીથી ધૂએ. (૩) તે પતિને શુદ્ધ આસન ઉપર બેસાડીને પતિના ભાલમાં, બંને હાથો અને હૃદયમાં ચંદનથી અર્ચન કરી પતિના ગળામાં સુગંધીમાન પુષ્પની માલા અર્પણ કરે. (૪) અમૃતની ઉપમા આપવા યોગ્ય ભોગ દુગ્ધાદિ દ્રવ્યોથી કાન્તને નમસ્કાર 'कान्ताय नमः ।' આ મંત્રથી ભક્તિપૂર્વક પતિનું પૂજન કરી અને સ્તુતિ કરી હર્ષથી પ્રણામ કરે. (૫) પછી પ્રકાશવાળા શુદ્ધ સ્થાનમાં અન્ન શુદ્ધ કરીને, સ્નાનથી શુદ્ધ થઈને મૃત્તિકા અને ગોમયથી શુદ્ધ કરેલા રસોડામાં પતિને ઈષ્ટ પાક કરીને પતિને ભોજન કરાવે. (૬) પતિવ્રતા પતિ જમ્યા પછી જમે. પતિ ઉભા રહે ત્યારે ઉભી રહે. તે નિદ્રા પામે ત્યારે નિદ્રા કરે, પોતાના પતિ જાગે તેથી પ્રથમ જાગે. (૭) અલંકારોથી શોભાયમાન નહિ એવા પોતાના દેહને ક્યારેય પણ પતિને ન બતાવે. પતિ કાર્યને માટે દેશાન્તરમાં ગયા હોય ત્યારે અલંકારો ધારણ ના કરે. (૮) પતિના આયુષ્યની વૃદ્ધિ માટે પતિનું નામ ઉચ્ચારણ ના કરે. પોતાના પતિના નામવાળા બીજા પુરુષનું પણ નામ ઉચ્ચારણ ના કરે. (૯) પતિએ તિરસ્કાર કરાયેલી હોય તો પણ પતિનો તિરસ્કાર ના કરે. પોતાના પતિએ ધોલ વગેરેથી પ્રહાર કરાયેલી સતી પણ પ્રસન્ન મનવાળી થાય. પોતાના ગૃહના દ્વારમાં ઘણો વખત ન ઉભી રહે. ક્યારેય ઊંચા સ્વરથી ન બોલે. (૧૦) પતિએ બોલાવેલી સતી ગૃહનાં કાર્યો ત્યાગ કરીને તત્કાલ આવે. હે સ્વામિન્ ! આ તમારી એવી હું આવી છું, યથારુચિ આજ્ઞા કરો : આ પ્રમાણે ધીમેથી વચન બોલે. (૧૧) પતિએ કહ્યા વિના પણ હરિની પૂજાનાં ઉપકરણો સમ્પાદન કરે. જે સમયે જે વસ્તુ ઉપયોગી હોય તે સમયે તે વસ્તુ લાવીને પતિની સમીપમાં મૂકે. (૧૨) સ્વામીને પ્રિય ઉચ્છિષ્ટ અન્ન અને ફલાદિ જમે. પતિએ અર્પણ કરેલું જે કંઈ વસ્તુ 'અહો મને મહાપ્રસાદ મળ્યો !' આમ કહીને સન્મુખ ઉભી રહીને ગ્રહણ કરે. (૧૩) પતિવ્રતા દેવો-પિતૃઓ-અતિથિઓ ને ગાયો, ભિક્ષુકો અને પોતાના નોકર વગેરેને આપ્યા વિના જમે નહિ. (૧૪) સાધ્વી સ્ત્રી, બ્રાહ્મણો, અને દુર્બલો અને અનાથો, દીન, અંધ, કૃપણને તથા કોઈ પણ ભૂખ્યાને અન્નથી પોષણ કરે. (૧૫) યથાસ્થાનમાં મૂક્યાં છે ગૃહનાં ઉપકરણો જેણીએ એવી સદા પ્રસન્ન, સમગ્ર ગૃહકાર્યમાં ચતુર, અતિશય ખર્ચ નહિ કરનારી પતિવ્રતા પતિને પૂછ્યા વિના ઉપવાસ વ્રતાદિ ન કરે. (૧૬) સુંદર આચારવાળી પતિવ્રતા સામાજીક સભાના ઉત્સવોને જોવાનો ત્યાગ કરે. એકાકી તીર્થમાં ન જાય અને વિવાહ જોવા જાય નહિ. (૧૭)

वर्जयेत्सा च समाजोत्सवदर्शनम् । न गच्छेत्तीर्थमेकैव विवाहप्रेक्षणाय च ॥१७॥ रहस्येष्वपि कार्येषु पतिं नोत्थापयेत्क्वचित्। सुखसुप्तं सुखासीनं रममाणं यदृच्छया ॥१८॥ स्त्रीधर्मिणी त्रिरात्रं तु मुखं नैव प्रदर्शयेत् । स्ववाक्यं श्रावयेन्नैव यावन्न स्नानमाचरेत् ॥१९॥ सुस्नाता भर्तृवदनमीक्षेतान्यस्य न क्वचित् । अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत् ॥२०॥ हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा । कूर्पासकं च ताम्बूलं मङ्गल्याभरणं शुभम् ॥२१॥ केशसंस्कारकबरीकरकर्णादिभूषणम्। भर्तुरायुष्यमिच्छन्ती दूरयेन्न पतिव्रता ॥२२॥ न रजक्या न हैतुक्या तथा श्रमणया न च । नच दुर्भगया नार्या सखीत्वं क्वचनाचरेत् ॥२३॥ न च विश्वास्य घातिन्या न प्रेक्षणिकया तथा । न तृतीयप्रकृत्या च नार्या सख्यं समाचरेत् ॥२४॥ न च पुंवेषधारिण्या नातिवार्ताप्रसक्तया । बहुगेहभ्रमणया स्त्रिया सख्यं न चाचरेत् ॥२५॥ न द्यूतादिव्यसनया मादकाशनया न च । न च पैशून्यपरया सख्यं कुर्यान्न वेश्यया ॥२६॥ न चण्डाया न शौण्डायाश्चौराया दुष्टचेतसः । चपलाया बहुभुजः स्त्रियाः सख्यं न चाचरेत् ॥२७॥ भर्तृविद्वेषिणीं नारीं न सम्भाषेत कर्हिचित् । नैकाकिनी क्वचिद्भूयान्नग्ना स्नायान्न च क्वचित् ॥२८॥ नोलूखले न मुसले न वर्धन्यां दृषद्यपि । न यन्त्रके न देहल्यां सती चोपविशेत्क्वचित् ॥२९॥ विना व्यवायसमयं प्रागल्भ्यं नाचरेत्क्वचित् । यत्रयत्र रुचिर्भर्तुस्तत्र प्रेमवती भवेत् ॥३०॥ उच्चासनं न सेवेत न व्रजेत्परवेश्म च। न त्रपाकरवाक्यानि नापशब्दान् क्वचिद्वदेत् ॥३१॥ गुरुणां सन्निधौ वापि नोच्चैर्ब्रूयान्न वा हसेत् । नान्येन पुंसा भाषेत न स्पृशेत्पुरुषान्तरम् ॥३२॥ प्रव्राजकेन वणिजा भिषजा स्थविरेण च । यावत्प्रयोजनं कुर्याद्भाषणं

નિદ્રા પામેલા, સુખપૂર્વક બેઠેલા, સ્વેચ્છાથી ક્રીડા કરતા પતિને ગુપ્ત (રહસ્ય) કાર્યો હોય તો પણ ક્યારેય ઉઠાડવા નહિ. (અર્થાત્ અવસરની પ્રતીક્ષા કરીને યોગ્ય સમયે કાર્ય નિવેદન કરવું.) (૧૮) સધવા, રજસ્વલા સતી જ્યાં સુધી સ્નાન ના કરે ત્યાં સુધી ત્રણ રાત્રિ સુધી પતિને પોતાનું મુખ ના બતાવે તથા પોતાનું વાક્ય પણ પોતાના પતિને સંભળાવે જ નહિ. (૧૯) ચોથે દિવસે સ્નાન કરાયેલી સધવા પોતાના પતિના મુખને જુએ. પોતાના પતિ વિના બીજા પુરુષનું મુખ ક્યારેય પણ જુએ નહિ અથવા તે પરદેશ ગયા હોય ત્યારે મનમાં પતિનું ધ્યાન કરીને સૂર્યને જુએ. (૨૦) હળદર, કુંકુમ, સિન્દૂર, કાજલ, કંચુકી, તામ્બુલ તથા શુભ મંગલાભરણ (કાળી કંઠી); (૨૧) સુગંધી તેલથી કેશનો સંસ્કાર, કબરી=કુસુમાદિના આરોપણપૂર્વક કેશબંધન, હાથ, કાન વગેરેનાં ભૂષણોને પોતાના સ્વામીના આયુષ્યને ઈચ્છતી પતિવ્રતા દૂર ના કરે. (૨૨) રજકા- (ધોબણ) સ્ત્રી સાથે સખીપણું ક્યારેય પણ આચરણ ના કરે. સર્વ કર્મમાં સંદેહ કરતી સ્ત્રી સાથે સખીપણું આચરણ ના કરે, પાખંડ માર્ગને અનુસરનારી અથવા સંન્યાસિણી નારી સાથે સખીપણું આચરે નહીં તથા ભાગ્યહીન નારી સાથે સખીપણું આચરે નહીં. (૨૩) વિશ્વાસ કરાવીને વિશ્વાસનો ભંગ કરનારી તથા જ્યાં-ત્યાં જોવાના સ્વભાવવાળી તથા સ્ત્રી વેષધારી નપુંસક નારી સાથે સખીપણું ના આચરે. (૨૪) પુરુષનો વેશ ધારણ કરનારી સ્ત્રીની સાથે, બહુ વાર્તા કરવાના સ્વભાવવાળી સ્ત્રીની સાથે, લોકોનાં ઘણાં ઘરોમાં ફરનારી સ્ત્રી સાથે સખીપણું આચરણ કરે નહીં. (૨૫) જુગાર આદિ વ્યસનવાળી, પૈશુન્યપરાયણા, માદક વસ્તુઓ ખાનારી તથા વેશ્યા એ સર્વે સ્ત્રીઓની સાથે સખીપણું કરે નહીં. (૨૬) અત્યંત ક્રોધ કરનારી, પરાભવ કરવામાં શક્તિવાળી, ચોરકર્મમાં નિષ્ઠાવાળી, વ્યભિચારાદિ દુષ્ટકર્મ કરનારી, અતિ ચંચલ સ્વભાવવાળી, બહુ ભોજન કરનારી એ સર્વે સ્ત્રીઓ સાથે સખીપણું આચરણ ના કરે. (૨૭) પોતાના પતિ સાથે દ્વેષ કરવાના સ્વભાવવાળી નારીની સાથે ક્યારેય બોલેચાલે નહીં. ક્યારેય પણ એકાકી ન રહે, ક્યારેય વસ્ત્ર વિના સ્નાન ના કરે. (૨૮) પતિવ્રતા સ્ત્રી ક્યારેય ખાણિયા ઉપર બેસે નહિ, મૂસળ ઉપર બેસે નહિ, સાવરણી ઉપર બેસે નહીં; પથ્થર, ભ્રમણ-યંત્ર વગેરે ઉપર તથા ઉમરા ઉપર બેસે નહિ. (૨૯) સંભોગના અવસર વિના પતિની સાથે નિર્લજ્જતા ક્યારેય આચરણ કરે નહિ, સ્વામીની જે જે કાર્યમાં રુચિ હોય તેમાં તેમાં સ્નેહવાળી થાય. (૩૦) ઊંચા આસનમાં ના બેસે, બીજાના ઘરમાં પ્રયોજન વિના ન જાય, લજ્જા કરનારાં વાક્યો, ગુહ્યાંગ શબ્દયુક્ત વચનો ન બોલે. (૩૧) સાસરા અને જેઠ વગેરેની સમીપમાં ઉચ્ચ સ્વરથી ન બોલે અથવા મોટેથી હાસ્ય ન કરે. સમીપ સંબંધી વિના બીજા પુરુષની સાથે બોલે નહિ, તેમ જ સ્પર્શ પણ કરે નહિ. (૩૨) સંન્યાસી, વાણિયો, વૈદ્ય તથા વૃદ્ધ પુરુષ સાથે પ્રયોજન જેટલું વ્યવહારું કાર્ય પ્રાપ્ત થાય તેટલું ભાષણ કરે. (૩૩) પતિવ્રતા અશ્વાદિ પશુજાતીય પુરુષને પણ બુદ્ધિપૂર્વક જુએ નહિ, ક્યારેય કલેશ કરે નહિ, કોઈના ઉપર

व्यावहारिकम् ।।३३।। बुद्धिपूर्वं न वीक्षेत पुरुषं पशुमप्यसौ । न कुर्यात्कलहं क्वापि नापवादं च कस्यचित् ।।३४।। नार्याः स्वपतिरेवैकं दैवतं परमं स्मृतम् । पूजयेत्तमतो नित्यं नातिक्राम्येच्च तद्वचः ।।३५।। क्लीबं वा दुरवस्थं वा व्याधितं वृद्धमेव वा । दुःशीलं दुर्भगं वापि पतिं सेवेत सर्वथा ।।३६।। हृष्टा हृष्टे विषण्णा च विषण्णे स्यात्प्रिये सदा । एकरूपा भवेत्पत्युः सम्पत्सु च विपत्सु च ।।३७।। सर्पिर्लवणतैलादिक्षयेऽपि च पतिव्रता । पतिं नास्तीति न ब्रूयादायासेषु न योजयेत् ।।३८।। बाह्यादायान्तमालोक्य शीघ्रोत्थानजलासनैः । ताम्बूलव्यजनाभ्यां च पादसंवाहनेन च ।।३९।। मधुरैश्चाटुवचनैः खेदसंनोदनैः शुभैः । प्रीणयेत्स्वपतिं भक्त्या प्राञ्जलिर्विनयानता ।।४०।। भर्ता देवो गुरुर्भर्ता धर्मतीर्थव्रतानि च । स एव सर्वथा तस्मान्नापमान्यः क्वचित्स्त्रिया ।।४१।। देवो मनुष्यो गन्धर्वो युवा चापि स्वलङ्कृतः । द्रव्यवानभिरूपो वा ज्ञेयोऽन्यो विट्समः पुमान् ।।४२।। भर्ता सदानुयातव्यो देहवच्छायया यतः । भर्तुः सहचरी भूया इत्युद्वाहेऽब्रुवन् द्विजाः ।।४३।। पत्युराज्ञां गृहीत्वैव नित्यान्नैमित्तिकांस्तथा । व्रतोपवासनियमान् कुर्यादेव पतिव्रता ।।४४।। साध्वी त्वेतेषु धर्मेषु यद्येकस्यापि कर्हिचित् । च्युतिर्भवेत्तर्हि कुर्यात्तत्प्रायश्चित्तमाशु च ।।४५।। उषःप्रबोधमुख्येषु स्वव्रतेषु ह्यबुद्धितः । भग्नेष्वेकैकमेवाथ पृथक्पृथगुपोषणम् ।।४६।। ब्रह्मपञ्चमवक्त्रोत्थमपशब्दं वदेद्यदि । वाग्दोषात्तर्हि सा नारी पादकृच्छ्रं व्रतं चरेत् ।।४७।। इति सङ्क्षेपतो धर्मः सुवासिन्या मयोदितः । पतिव्रताधर्मवती नारी जगति दुर्लभा ।।४८।। व्रतोपवासनियमान् पतिमुल्लङ्घ्य याऽऽचरेत् । आयुष्यं हरते भर्तुः सा मृता निरयं व्रजेत् ।।४९।। दानोपवासपुण्यानि सुकृतान्यपि सर्वथा । निष्फलानि

---

અપવાદ ન કરે. (૩૪) પતિવ્રતા સ્ત્રીને પોતાનો પતિ જ પરમદૈવત કહેલો છે માટે નિત્ય પોતાના પતિને પૂજે. પોતાના પતિનું વાક્ય ઉલ્લંઘન કરે નહિ. (૩૫) નપુંસક, દરિદ્રતાને પામેલો અથવા રોગથી પીડાયેલો અથવા વૃદ્ધ અથવા ક્લેશાદિ સ્વભાવવાળો અથવા જન્મથી ભાગ્યહીન એવા પતિને પણ સર્વ પ્રકારે સેવે. (૩૬) સ્વામી પ્રસન્ન થયે પોતે પ્રસન્ન થાય, સ્વામી (પતિ) ખેદાદિયુક્ત હોય ત્યારે પોતે પણ ખેદયુક્ત થાય. સંપત્તિ અને વિપત્તિમાં સદા પોતાના સ્વામીના સમાન શીલવાળી થાય. (૩૭) પતિવ્રતા ઘી, લવણ, તેલ, કાષ્ઠાદિ જો થઈ રહ્યાં હોય તો પણ 'ઘી વગેરે ઘરમાં નથી' એમ પતિને ના કહે પણ સમયને પારખીને સૂચન કરે, પ્રયાસસાધ્ય કાર્યમાં પ્રેરવા નહિ. (૩૮) બહારથી આવતા પોતાના પતિને જોઈને બંને હાથ જોડીને વિનયથી નમ્ર પતિવ્રતા આસનથી તત્કાલ ઊઠે અને જળ પગ ધોવા માટે અને બેસવા આસન એ સહિત તામ્બુલ અને વીંઝણાથી ચરણ ચાંપવાથી મધુર ખિન્નતાને નિવારણ કરનારાં શુભ પ્રિય વચનોથી ભક્તિપૂર્વક પોતાના પતિને પ્રસન્ન કરે. (૩૯-૪૦) પતિવ્રતાને પતિ જ દેવ, ભરણપોષણ કર્તા, ગુરુ, તીર્થ, વ્રતો, સર્વ પ્રકારે પતિ જ છે માટે પતિવ્રતા સ્ત્રીએ ક્યારેય પતિનું અપમાન કરવું નહિ. (૪૧) પતિવ્રતા અન્ય પુરુષને પછી ભલે તે દેવ, મનુષ્ય, ગંધર્વ, યુવાન, ઘણાં આભૂષણોથી અલંકાર કરેલો, દ્રવ્યવાળો અથવા અતિ રૂપવાન હોય તો પણ પોતાના પતિ વિના બીજા પુરુષને વિષ્ઠા તુલ્ય જાણે. (૪૨) દેહની છાયા દેહને જ જેમ અનુસરે છે તેમ પ્રતિવ્રતાએ પતિને અનુસરીને જ વર્તવું; કારણ કે 'સ્વામિની સહગામિની થાઓ' આ પ્રકારે બ્રાહ્મણો પોતાના પરિણયન સમયે બોલ્યા છે. (૪૩) પતિવ્રતાએ પતિની આજ્ઞા ગ્રહણ કરીને જ નિત્ય તથા નૈમિત્તિક એકાદશી આદિક વ્રતોના ઉપવાસો અને કૃચ્છ્રાદિ ઉપવાસો તથા ચાતુર્માસમાં કરવા યોગ્ય નિયમો કરવા જ. (૪૪) એ ધર્મોમાં એક ધર્મનો પણ જો ક્યારેય ભંગ થાય તો સાધ્વીએ ધર્મભંગ નિમિત્તે પ્રાયશ્ચિત્ત તત્કાલ કરવું. (૪૫) સવારમાં જાગવા વગેરેમાં કોઈ પણ પૂર્વે કહેલા નિયમોમાં અજ્ઞાનથી ભંગ થાય તો જુદો જુદો એક ઉપવાસ કરવો. (૪૬) જો પતિવ્રતા નારી વાણીના દોષથી અપશબ્દ બોલે તો પાદકૃચ્છ્ર વ્રત કરે. એક દિવસ એક વાર જમે, એક દિવસ રાત્રે જમે અને એક દિવસ યાચના વગર મળે તો જમે અને એક દિવસ ઉપવાસ કરે તે પાદકૃચ્છ્ર કહેલું છે. (૪૭) આ પ્રમાણે મેં સુવાસિની પતિવ્રતા નારીનો ધર્મ સંક્ષેપથી કહ્યો છે. જગતમાં પતિવ્રતા ધર્મવાળી નારી દુર્લભ છે. (૪૮) જે સ્ત્રી પતિનાં વચનોનું ઉલ્લંઘન કરીને વ્રતોપવાસ નિયમોને કરે તે પતિવ્રતા સ્વામીનું આયુષ્ય હરે છે, મરણ પામીને તે સ્ત્રી નરકમાં જાય છે. (૪૯) પતિવ્રતાના ધર્મથી ભ્રષ્ટપણાને પામેલી સ્ત્રીનાં સારાં ચરિત્રો દાન, ઉપવાસ અને પુણ્યો સર્વ પ્રકારે નિષ્ફળ જ થાય છે. (૫૦) જે સ્ત્રી, કર્મ, મન અને વાણીથી પણ પતિના વચનને ઉલ્લંઘન ન કરે તે નારીને

भवन्त्येव च्युतायाः पतिधर्मतः ॥५०॥ कर्मणा मनसा वाचा पतिं नातिचरेत्तु या । तस्याः पुण्यफलं प्रोक्तं नान्यस्या इति निश्चितम् ॥५१॥ अवाग्दुष्टाः शौचयुक्ता धृतिमत्यः शुभव्रताः । अयोनिदुष्टा नार्यो हि धारयन्त्यखिलं जगत् ॥५२॥ योनिदुष्टस्त्रिया नास्ति प्रायश्चित्तं हतैव सा । वाग्दुष्टे विहितं सद्भिः प्रायश्चित्तं पुरातनैः ॥५३॥ कल्पान्तरसहस्रेषु न स्त्री सा लभते गतिम् । तिर्यग्योनिसहस्रेषु पच्यते योनिविप्लवात् ॥५४॥ यदि सा नाम मानुष्यं स्त्री लभेतासती तदा । चण्डालयोनौ दुर्मेधा जायते कुक्कुराशना ॥५५॥ उक्ता प्रत्युत्तरं दद्यान्नारी क्रोधेन या पतिम् । सा शुनी जायते ग्रामे शृगाली निर्जने वने ॥५६॥ या भर्तारं परित्यज्य रहश्चरति दुर्मतिः । उलूकी सा भवेत् क्रूरा वृक्षकोटरशायिनी ॥५७॥ ताडिता ताडितुं येच्छेत्सा व्याघ्री वृषदंशिका । कटाक्षयति याऽन्यं च केकराक्षी तु सा भवेत् ॥५८॥ या भर्तारं परित्यज्य मिष्टमश्नाति केवलम् । सा ग्रामे शूकरी स्याच्च वागुली वा स्वविड्भुजा ॥५९॥ या त्वंकृत्य पतिं ब्रूयान्मूका सा तु भवेत्किल । या सपत्नीं सदेर्ष्येच्च दुर्भगा सा पुनः पुनः ॥६०॥ दृष्टिं विलुप्य भर्तुर्या कञ्चिदीक्षेत कौतुकात् । काणा च दुर्मुखी वापि कुरूपा सा भवेद्भुवि ॥६१॥ शीलभङ्गेन दुर्वृत्ताः पातयन्ति कुलत्रयम् । पितुर्मातुस्तथा पत्युरिहामुत्र च दुःखिताः ॥६२॥ शीलभङ्गेन नारीणां भर्ता धर्मपरोऽपि हि । पतेद्दुःखार्जितात्स्वर्गाच्छीलं रक्ष्यं ततः स्त्रिया ॥६३॥ रक्षणीयं महायत्नादिदं सुकृतभाजनम् । वपुः परस्य तु स्पर्शात्सुखाभासात्मकात्स्त्रिया ॥६४॥ इह कीर्तिश्च विपुला स्वर्गे वासस्तथाऽक्षयः । पातिव्रत्यात् स्त्रिया लभ्यं सखीत्वं च श्रिया सह ॥६५॥ पतिश्चासौ यदि भवेद्विमुखो वासुदेवतः । महापातकदुष्टो वा तर्हि त्याज्यः स्त्रिया किल ॥६६॥ भगवन्तं भजेदेष यर्हि शुद्ध्येच्च पातकात् । प्रायश्चित्तैस्तदा त्वेनं भजेत्पुनरिवेश्वरम् ॥६७॥ यावत्स्वलोमसङ्ख्याऽस्ति

---

પુણ્યફળ પ્રાપ્ત થાય છે. પતિના અતિક્રમણના સ્વભાવવાળી સ્ત્રીને પુણ્યફળ કહ્યું નથી : આ પ્રકારે નિશ્ચે છે. (૫૧) અને વાણીથી પણ પરપુરુષની પ્રાપ્તિના દોષથી રહિત શુદ્ધિયુક્ત મહાધૈર્યયુક્ત શુભવ્રતવાળી, બીજાના પરપતિના સંગજન્ય યોનિદોષથી રહિત સ્ત્રીઓ સમગ્ર જગતને ધારણ કરે છે જ. (૫૨) યોનિદુષ્ટ સ્ત્રીઓનું પ્રાયશ્ચિત્ત નથી તે યોનિદુષ્ટ સ્ત્રી તો પતિવ્રતા શબ્દ વાચ્ય છે જ નહિ; કારણ કે પુરાતન સત્પુરુષોએ (જે નારી કામભાવથી પરપુરુષની સાથે ભાષણરૂપ પ્રસંગ દોષ પામેલી હોય તેને) વાણીના દોષમાં પ્રાયશ્ચિત્ત શાસ્ત્રમાં કહેલું છે. (૫૩) યોનિદુષ્ટ નારી તે મહાદોષથી કલ્પાન્તર સહસ્ત્રોમાં પણ ઉત્તમ લોકની પ્રાપ્તિને પામતી નથી. તિર્યક્ યોનિ સહસ્ત્રોમાં રંધાય છે. (૫૪) અસતી યોનિદુષ્ટ સ્ત્રી જો નામ માત્ર મનુષ્યદેહને પામે છે ત્યારે ચંડાલ યોનિમાં દુર્બુદ્ધિ, કૂતરાઓને ખાનારી થાય છે. (૫૫) જે નારી પતિએ કંઈક કાર્ય માટે બોલાવેલી સતી ક્રોધથી પતિને ઉત્તર આપે તે સ્ત્રી ગામમાં કૂતરી થાય છે અથવા નિર્જન વનમાં શિયાળ થાય છે. (૫૬) દુષ્ટ બુદ્ધિ જે સ્ત્રી પોતાના પતિને ત્યાગ કરીને પરપુરુષનો સમાગમ કરવા માટે જાય છે તે સ્ત્રી ક્રૂર સ્વભાવવાળી, વૃક્ષની બખોલમાં રહેનારી ઉલુકી (ઘુવડ) થાય. (૫૭) જે સ્ત્રી પતિએ પ્રહાર કરેલી સતી પતિને પ્રહાર કરવા માટે ઈચ્છે તે બિલાડી અથવા વાઘણ થાય. જે સ્ત્રી બીજા પુરુષને કટાક્ષથી જુએ છે તે તો વાંકાં નેત્રવાળી થાય છે. (૫૮) જે સ્ત્રી પતિનો ત્યાગ કરીને કેવલ એકલી જ બરફી-પેંડા વગેરે મધુર વસ્તુ ભોજન કરે છે તે ગામમાં શૂકરી (ભૂંડણ) થાય અથવા વાગોલ થાય. (૫૯) જે સ્ત્રી પતિને ટુંકારો કરીને બોલે તો તે મૂંગી થાય જ; જે સ્ત્રી સપત્નીની સદા ઈર્ષા કરે તે વારંવાર ભાગ્યવર્જિત થાય. (૬૦) જે સ્ત્રી પતિની દૃષ્ટિને ઠગીને કૌતૂહલથી પોતાના પતિ વિના કોઈ પુરુષને જુએ તે પૃથ્વીમાં એક નેત્રવાળી, કુટિલ મુખવાળી અને કુત્સિત આકૃતિવાળી થાય. (૬૧) દુરાચારી નારીઓ શીલભંગથી પોતાનાં પિતા અને માતા તથા પોતાના પતિનાં : આ ત્રણ કુળને નરકમાં નાખે છે. આ લોકમાં અને પરલોકમાં દુઃખી થાય છે. (૬૨) ધર્મપરાયણ પતિ પણ નારીઓના શીલ-ભંગથી મહાપ્રયાસથી પ્રાપ્ત સ્વર્ગથી પણ પડે છે જ, માટે સ્ત્રીએ શીલવ્રત રક્ષણ કરવું. (૬૩) સ્ત્રીએ સમગ્ર પુણ્યના પાત્રભૂત આ પોતાનું શરીર, સુખના આભાસાત્મક પરપુરુષના સ્પર્શથી મહાપ્રયત્નપૂર્વક રક્ષણ કરવું. (૬૪) સ્ત્રી પતિવ્રતાના ધર્મથી આ લોકમાં વિશાલ કીર્તિ પામે તથા સ્વર્ગમાં ક્ષય રહિત નિવાસ પામે અને લક્ષ્મીની સાથે સખીપણું પ્રાપ્ત થાય. (૬૫) જો આ પતિ વાસુદેવ પરમાત્માની ઉપાસનાથી વિમુખ હોય અથવા બ્રહ્મહત્યાદિ મહાપાપથી દૂષિત હોય તો સ્ત્રીએ ત્યાગ કરવો. (તેને આધીન વર્તવું નહિ.) (૬૬) આ પતિ જો શ્રીકૃષ્ણને ભજે, પ્રાયશ્ચિત્તોથી મહાપાપથી શુદ્ધ થાય ત્યારે તો પતિને ઈશ્વરની માફક સેવે. (પૂર્વની માફક તેને આધીન

**तावत्कोट्ययुतानि च । भर्त्रा स्वर्गसुखं भुङ्क्ते रममाणा पतिव्रता ॥६८॥ धन्या सा जननी लोके धन्योऽसौ जनकः पुनः । धन्यः स च पतिः श्रीमान् यस्य गेहे पतिव्रता ॥६९॥ पुण्यं यस्य भवेत्पुंसः शतजन्मसमर्जितम् । गृहे तस्य भवेन्नारी धर्मनिष्ठा पतिव्रता ॥७०॥ पितृवंश्या मातृवंश्याः पतिवंश्यास्त्रयस्त्रयः । पतिव्रतायाः पुण्येन स्वर्गसौख्यानि भुञ्जते ॥७१॥ अकार्यकारिणं वापि पतितं वापि निर्गुणम् । स्त्री पतिं तारयत्येव तथात्मानं पतिव्रता ॥७२॥ बिभ्यत्पतिव्रतास्पर्शं कुरुते भानुमानपि । सोमो गन्धवहश्चापि स्वपावित्र्याय नान्यथा ॥७३॥ पृथिव्यां यानि तीर्थानि तानि सन्ति सतीपदे । तेजश्च सर्वदेवानां तनौ तस्यास्तपस्विनाम् ॥७४॥ साध्वीपादरजोभिर्भूः पूता सद्यो हि जायते । नमस्कृत्य च तां पापी पापेभ्यो मुच्यते किल ॥७५॥ त्रैलोक्यं भस्मसात्कर्तुं क्षणेनैव पतिव्रता । स्वतेजसा समर्था स्यान्महापुण्यवती सदा ॥७६॥ पतिव्रता त्वरुन्धत्या सावित्र्या चानसूयया । शाण्डिल्याऽहल्यया सत्या द्रौपद्या शतरूपया ॥७७॥ मेनया च सुनीत्या च संज्ञया स्वाहया तथा । तुल्या लोपामुद्रयाऽस्ति विरला कापि भूतले ॥७८॥ गृहे गृहे सन्ति हि तत्र तत्र द्विजेन्द्र! योषास्तु शुनीसमानाः। धन्यैव सा कापि सती सुरीभिः साश्चर्यवन्द्याङ्घ्रियुगापि मर्त्या ॥७९॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे स्त्रीधर्मेषु पतिव्रताधर्मनिरूपणनामैकत्रिंशोऽध्यायः ॥३१॥

---

વર્તે.) (૬૭) આ પતિવ્રતા ધર્મપરાયણ પોતાના શરીરમાં જેટલા રૂંવાડાં છે તેટલા કરોડથી દશ હજાર ગુણેલા વર્ષ પર્યન્ત સ્વર્ગલોકમાં પતિની સાથે રમતી સતી સુખ ભોગવે છે. (૬૮) પતિવ્રતાની જે માતા અને પિતા તે બંને ધન્ય છે. જેના ગૃહમાં પતિવ્રતા છે તે પતિ ધન્ય છે અને શ્રીમાન છે. આ જ બીજી લક્ષ્મી છે. પોતપોતાના કુળના શ્રેયને પમાડવાપણે પતિવ્રતાની જનની વગેરે ત્રણ પણ ધન્ય છે. (૬૯) અલ્પ પુણ્યથી પતિવ્રતાનો લાભ થતો નથી. અનેક જન્મમાં અનુષ્ઠાન કરેલા પુણ્યના ફળનો આ લાભ છે કે જેના ગૃહમાં પતિવ્રતા ભાર્યા વસે છે. (૭૦) પતિવ્રતાના પુણ્યથી પિતાના વંશના, માતાના વંશના, પતિના વંશના ત્રણ ત્રણ પુરુષો સ્વર્ગનાં સુખો ભોગવે છે. (૭૧) પતિવ્રતા સ્ત્રી, હિંસાદિ કાર્ય કરનાર, અથવા પતિત અથવા સ્વધર્મ, વિદ્યા, વિનયાદિ ગુણ રહિત પતિને પણ પોતાના ગુણથી સ્વાત્માને જ જેમ તેમ તારે છે. (૭૨) સૂર્ય પણ ભય પામતો સતો પતિવ્રતાનો સ્પર્શ કરે છે. ચન્દ્ર અને વાયુ પણ પોતાના પવિત્રપણા માટે સ્પર્શ કરે છે. ચન્દ્ર અને વાયુ પણ પોતાના પવિત્રપણા માટે સ્પર્શ કરે છે. બીજા પ્રકારે સ્પર્શ કરતાં નથી. (૭૩) પૃથ્વીમાં જેટલાં તીર્થો છે તે બધાં તીર્થો સતીના પગમાં રહેલાં છે પતિવ્રતાના શરીરમાં સર્વ દેવો તથા તપસ્વીઓનું તેજ રહેલું છે. (૭૪) પતિવ્રતાના ચરણની રજથી પૃથ્વી તરત પવિત્ર થાય છે. પતિવ્રતાને નમસ્કાર કરીને પાપી પણ પાપોથી મુક્ત થાય છે. (૭૫) મહાપુણ્યશાળી પતિવ્રતા સદા પોતાના તેજથી ત્રિલોકને ક્ષણમાત્રમાં જ ભસ્મ કરવા માટે સમર્થ થાય. (૭૬) પતિવ્રતા તો અરૂન્ધતી, સાવિત્રી, અનસૂયા, શાંડિલી, અહલ્યા, સતી (શંભુ પત્ની), દ્રૌપદી, શતરૂપા, મેના, સુનીતિ, સંજ્ઞા, તુલા, સ્વાહા, લોપામુદ્રાના સમાન છે. તેવી પતિવ્રતા પૃથ્વીમાં કોઈ વિરલા જ હોય છે. (ક્યારેક કોઈક ઠેકાણે જ જોવા મળે છે.) (૭૭-૭૮)

હે દ્વિજેન્દ્ર ! શુની (કૂતરી) સમાન સ્ત્રીઓ તો સર્વ સ્થળમાં દરેક ભવનમાં છે જ; મનુષ્યજાતિમાં ઉત્પન્ન થઈને પણ દેવાંગનાઓથી આશ્ચર્યપૂર્વક વંદનીય છે ચરણકમળ જેના એવી જે-કોઈપણ પતિવ્રતા છે તે તો ધન્યા-કૃતાર્થા જ છે. (૭૯)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે સ્ત્રી ધર્મેષુ પતિવ્રતા ધર્મનિરૂપણ નામૈકત્રિંશોઽધ્યાયઃ (૩૧)*

## અધ્યાય : ૩૨



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच – **नार्यः पतिव्रताः प्रोक्ता यास्तास्तु त्रिविधा मताः । उत्तमा मध्यमाश्चैव कनिष्ठा इति भेदतः ॥१॥ कनिष्ठा तत्र पूर्वोक्तान्धर्मान्सर्वानुपाश्रिता । कामसौख्यं समीहेत सेवमाना पतिं ततः ॥२॥ शृङ्गाररसमिश्राभिर्हावभावोक्तियुक्तिभिः । कामयेत यथात्मानं पतिः कुर्यात्तथा च सा ॥३॥ परपुंसो रूपगुणान् दृष्ट्वा तत्र व्रजन्मनः। नियन्तुं शक्नुयान्नैव नियच्छेच्च वचो वपुः ॥४॥ मध्यमा त्वखिलान्धर्मान्प्रागुक्तान्पालयेत्सदा । पतिसेवापरा प्रीत्या देहपुष्टिमनिच्छती ॥५॥ स्वपत्युरधिकं चान्यं धनरूपवयोगुणैः । दृष्ट्वापि पुरुषं कायवाङ्मनोभिश्चलेन्न सा ॥६॥ देशकालक्रियासङ्गवैषम्ये दैवयोगतः । क्वचिज्जाते तु मनसा चलेद्वा पुरुषान्तरे ॥७॥ अन्यथा तु मनोऽप्यस्याः स्वप्नेऽपि पुरुषान्तरम् । क्वापि सङ्कल्पयेन्नैव प्राप्तायाः परमां धृतिम् ॥८॥ स्वतः कामसुखं नेच्छेत्क्वचित्सा स्वपतेरपि । पतिना दीयमानं तु तदिच्छेद्धृष्टचेतसा ॥९॥ इत्युक्ता मध्यमा नारी प्रोच्यतेऽथोत्तमा शुभा । प्रागुक्तान्सा तु सेवेत धर्मान्सर्वानशेषतः ॥१०॥ स्वपत्युरधिकं चान्यं धनरूपवयोगुणैः । दृष्ट्वाऽपि पुरुषं कायवाङ्मनोभिश्चलेन्न वै ॥११॥ देशकालादिवैषम्ये जातेऽपि मनसाऽपि सा । सङ्कल्पयेन्न पुरुषं स्वपत्युरितरं क्वचित् ॥१२॥ सन्निपातादिरोगे वा क्वचिद्वा मादकाशने । अप्यस्या मानसं नैव भ्रान्तं स्यात्पुरुषान्तरे ॥१३॥ सेवमानाऽप्यसौ नारी पतिं कामसुखं स्वतः । नेच्छेत्तेन क्वचित्प्रीत्या दीयमानमपि ध्रुवम् ॥१४॥ पत्याऽऽग्रहेण दत्तं चेदरुच्या तत्सुखं भजेत् । भूरिजम्बीराम्लदन्तो यथा चणकचर्वणम् ॥१५॥ स्वदेहमन्यदेहांश्च दैहिकं च सुखं ह्यसौ । विद्याद्वैराग्यतोऽसत्यं सत्यं च भगवत्सुखम् ॥१६॥**

**સ્ત્રી ધર્મમાં પતિવ્રતા સ્ત્રીઓના ભેદોનું અને તેમના ધર્મના ફળનું સારી રીતે નિરૂપણ કર્યું છે.**

**શ્રી નારાયણ મુનિ બોલ્યા** : હે બ્રહ્મન્ ! જે પતિવ્રતા સ્ત્રીઓ કહી છે તે તો ઉત્તમા, મધ્યમા અને કનિષ્ઠા : આ ભેદથી ત્રણ પ્રકારની માનેલી છે. (૧) ત્રણ પ્રકારની પતિવ્રતામાં કનિષ્ઠા, પૂર્વે કહેલા સર્વ ધર્મોને આશરેલી પતિને સેવતી સતી પતિથી કામ-સુખને ઇચ્છે. ઉત્તમાને તો પતિની પ્રસન્નતા એ જ પુરુષાર્થ છે, પણ કામોપભોગ પુરુષાર્થ નથી. પતિથી કામનો ભોગ એ પુરુષાર્થ જેને છે તે **કનિષ્ઠા પતિવ્રતા** કહેવાય છે. (૨) કનિષ્ઠ પતિવ્રતા શૃંગારરસથી મિશ્ર એવી હાવભાવની યુક્તિઓથી જેમ પોતાને પતિ ઉપભોગ કરવા ઇચ્છે તેમ કરે. (૩) તે બીજા પુરુષનાં રૂપ, ગુણોને જોઈને પર-પુરુષમાં ઉપભોગબુદ્ધિથી જતાં મનનું નિયમન કરવા માટે સમર્થ ના થાય. વાણી અને શરીરને નિયમમાં રાખે. (૪) **મધ્યમા પતિવ્રતા** તો પ્રીતિથી પતિની સેવાપરાયણ, દેહપુષ્ટિને નહિ ઇચ્છતી સતી પૂર્વે કહેલા સર્વે ધર્મોને હંમેશા પાલન કરે. (૫) તે મધ્યમા પતિવ્રતાને ધન, રૂપ અને યૌવન તથા વિદ્યાદિ ગુણોથી પોતાના પતિથી અધિક બીજા પુરુષને જોઈને પણ શરીર, વાણી અને મનથી તેને વિષે પ્રીતિ ન થાય. (૬) અથવા દૈવયોગથી ક્યારેક દેશ, કાલ, ક્રિયા અને સંગની વિષમતાને લીધે મનના સંકલ્પ માત્રથી અન્ય પુરુષમાં ચલાયમાન થાય. (૭) દેશાદિના વૈષમ્ય વિના પરમ ધૈર્યને પામેલી મધ્યમ પતિવ્રતાનું મન સ્વપ્નમાં પણ ક્યારેય બીજા પુરુષનો સંકલ્પ ના જ કરે. (૮) મધ્યમ પતિવ્રતા પોતાના પતિથી પણ કામ-સુખ પોતે ક્યારેય ઇચ્છે નહીં. પતિ દ્વારા અપાતા કામસુખને તો પ્રસન્ન ચિત્તથી ઇચ્છે. (૯) આ પ્રકારે મધ્યમા પતિવ્રતા સ્ત્રી કહી : હવે શુભ **ઉત્તમ પતિવ્રતા** સ્ત્રી કહીએ છીએ. ઉત્તમ પતિવ્રતા સ્ત્રી તો પૂર્વે કહેલા સર્વે ધર્મોને સમગ્રપણે સેવે. (૧૦) ધન, રૂપ, યૌવન, વિદ્યાદિ ગુણોથી પોતાના પતિથી અધિક બીજા પુરુષને જોઈને પણ શરીર, વાણી અને મનથી ચલાયમાન ના જ થાય. (૧૧) તે ઉત્તમ પતિવ્રતા દેશકાલાદિનું વિષમપણું હોય તો પણ મનથી પણ પોતાના પતિથી બીજા પુરુષનો ક્યારેય સંકલ્પ ના કરે. (૧૨) ક્યારેક સન્નિપાતાદિ રોગ થાય અથવા અજ્ઞાનથી માદક વસ્તુનું ભક્ષણ થયું હોય તો પણ ઉત્તમ પતિવ્રતાનું મન બીજા પુરુષમાં ભ્રાન્ત ના થાય. (૧૩) પતિની સેવા કરતી ઉત્તમ પતિવ્રતા પોતે કામસુખને ઇચ્છે નહિ; ક્યારેય પણ પતિએ પ્રીતિથી અપાતા કામસુખને પણ ઇચ્છે જ નહિ. (૧૪) જો પતિએ આગ્રહથી કામસુખ આપેલું હોય તો ઘણા લીંબુના ચૂસવાથી ખટાઈ ગયેલા દાંતવાળા પુરુષ જેમ ચણા ચાવે તેમ અરુચિથી કામસુખનો અનુભવ કરે. (૧૫) ઉત્તમ પતિવ્રતા પોતાના દેહને અને પુરુષ માત્રનાં શરીરોને અને દેહ સંબંધી સુખને વૈરાગ્યથી અસત્ય જાણે અને ભગવાનના સુખને સત્ય જાણે. (૧૬) જો પતિ કામસુખને માટે બીજી સ્ત્રીને પરણે તો પ્રસન્ન થાય. પતિએ કહેલી સતી સપત્નીના દાસભાવને પણ આચરણ કરે. (૧૭) આવા પ્રકારની ઉત્તમ પતિવ્રતા સ્ત્રી પૃથ્વીમાં દુર્લભ જ છે; દેવો



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

पतिश्चेत्कामसौख्यार्थमुद्वहेद्योषिदन्तरम् । हृष्टा स्यात्तर्हि तद्दास्यमपि पत्योदिताऽऽ चरेत् ॥१७॥ एवंविधोत्तमा साध्वी दुर्लभा किल भूतले । देवा अपि न यां द्रष्टुं क्षमन्ते दुष्टचक्षुषा ॥१८॥ कनिष्ठा योदिता साध्वी सप्तभिर्जन्मभिस्तु सा । स्वधर्मनिष्ठा सत्येव मध्यमात्वं प्रपद्यते ॥१९॥ सप्तभिर्जन्मभिः सा च भवत्येवोत्तमा सती । अथैतासां मृते पत्यौ या गतिः सा निगद्यते ॥२०॥ तत्रोत्तमा तु प्रागेव स्वपत्युर्मरणात्स्वयम् । विद्यादस्मिन्दिने चास्मिन्मुहूर्तेऽसौ मरिष्यति ॥२१॥ प्राक्तनानि स्वजन्मानि पत्युर्जन्मानि चाप्यसौ । यथापूर्वं विजानाति सप्त वाप्यधिकानि वा ॥२२॥ विवर्धमानसत्याङ्गी मरणाह्नि तदात्मताम् । पत्या प्राप्य वपुर्भानरहिता जायते ध्रुवम् ॥२३॥ चिताप्रवेशे तद्देहाज्जीवः प्रागेव गच्छति । देवलोकं ततश्चाग्निर्दहत्यस्याः कलेवरम् ॥२४॥ अतो दाहव्यथा तस्या जायते नैव किञ्चन । नात्मघातस्य दोषोऽपि तस्या भवति निश्चितम् ॥२५॥ मध्यमा मरणाह्न्येव साध्वी प्राग्जन्म चात्मनः । पत्युश्चैकं हि जानाति पत्या तादात्म्यमेति सा ॥२६॥ दाहव्यथां चितायां सा प्राप्तशौर्या स्वधैर्यतः। अविक्लवैव सहते रणे शूर इवाचला ॥२७॥ कनिष्ठा तु न जानाति प्राग्जन्म स्वधवात्मनोः । चिताप्रवेशं कुरुते केवलं लोकलज्जया ॥२८॥ कामेन व्याकुलत्वात्तु पैत्रश्वाशुर्यवंशयोः । लाञ्छनं व्यभिचारेण भवेदिति भयेन वा ॥२९॥ वैधव्यधर्माचरणदुष्करत्वेन वा तथा । सत्पुत्रादेरभावेन स्वत्रातुर्याति सा चिताम् ॥३०॥ चितायां दह्यते सा च व्याकुला धर्मचारिणी । एताः श्रीरुद्रयुक्तायाः सत्या लोकं व्रजन्ति हि ॥३१॥ तत्रोत्तमोत्तमं सौख्यं मध्यमं मध्यमा तथा । कनिष्ठं तु कनिष्ठा वै भुङ्क्ते सौख्यं सभर्तृका ॥३२॥

पतिव्रतासु प्रोक्तासु ह्येतासु त्रिविधास्वपि । यासामग्निप्रवेशस्य निषेधोऽस्ति वदामि ताः ॥३३॥ भगवद्भक्तियुक्ता च ज्ञानयुक्त विरागयुक् । शक्ता च ब्रह्मचर्यादिविधवाधर्मपालने ॥३४॥ मुमुक्षुर्वीरसूश्चैव बालापत्या च गर्भिणी । अग्निप्रवेशो

પણ જે ઉત્તમ સાધ્વી, પતિવ્રતાને દુષ્ટચક્ષુથી જોવા માટે સમર્થ થતા નથી. (૧૮) જે કનિષ્ઠા કહેલી છે તે સાત જન્મથી સ્વધર્મનિષ્ઠા સતી જ મધ્યમ પતિવ્રતા ભાવને પામે છે. (૧૯) તે મધ્યમા પતિવ્રતા સાત જન્મ વડે સ્વધર્મ નિષ્ઠા સતી જ ઉત્તમ પતિવ્રતા થાય છે. હવે પતિ મરણ પામે ત્યારે એ **કનિષ્ઠાદિ** ત્રણ પ્રકારની પતિવ્રતાઓની **જે ગતિ થાય છે** તે કહું છું : (૨૦) ત્રણ પ્રકારની પતિવ્રતાઓમાં ઉત્તમ પતિવ્રતા તો પોતાના પતિના મરણથી પહેલાં જ 'મારા પતિ આ દિવસે આ મુહૂર્તમાં મરણ પામશે' આ પ્રમાણે પોતે જાણે. (૨૧) ઉત્તમ પતિવ્રતા, પૂર્વજન્મો સાત અથવા અધિક પોતાના જન્મો અને પતિના પણ સાત જન્મો અથવા અધિક જન્મો યથાપૂર્વ જાણે છે. (૨૨) પતિના મરણદિવસે વૃદ્ધિ પામતું છે સત્ય જેમાં તેવું અંગ જેનું હોય એવી ઉત્તમ પતિવ્રતા પતિની સાથે તદાત્મકપણાને પામીને ભાન રહિત થાય છે, જ. (૨૩) ચિતામાં પ્રવેશ કર્યે સતે પતિવ્રતાનો જીવ તેના દેહથી અગ્નિથી દેહ બળતા પહેલાં જ સતી લોકને પામે છે; તેના દેહથી જીવ નીકળ્યા પછી ઉત્તમ પતિવ્રતાના શરીરને અગ્નિ બાળે છે. (૨૪) માટે પતિવ્રતાને દાહની પીડા લગારે થતી નથી; તેને આત્મઘાતનો દોષ પણ નથી જ. (૨૫) મધ્યમા પતિવ્રતા તો પોતાના પતિના મરણદિવસે જ પોતાનો પૂર્વજન્મ તથા પતિનો એક પૂર્વજન્મ જાણે છે તે પતિની સાથે તાદાત્મ્યપણું પામે છે. (૨૬) તે મધ્યમા પતિવ્રતા રણમાં ક્ષત્રિયની માફક શૌર્યને પામેલી માટે પોતાના શરીરના દાહજન્ય કષ્ટથી રહિત, માટે જ ચિતામાં નિશ્ચલપણે બેઠી સતી રણમાં શૂરાની માફક પોતાના ધૈર્યગુણથી ચિતામાં દાહની પીડાને સહન કરે છે. (૨૭) કનિષ્ઠા સાધ્વી તો પોતાના પતિનો અને પોતાનો પૂર્વજન્મ જાણતી નથી કેવલ લોકલાજથી જ ચિતામાં પ્રવેશ કરે છે. (૨૮) કામથી વ્યાકુળપણાના કારણથી અથવા વ્યભિચારથી પોતાના પિતાના વંશ તથા પોતાના સાસરાના વંશને લાંછન થાય : આવા ભયથી અથવા વૈધવ્યધર્મનું આચરણ દુષ્કર હોવાથી તથા પોતાના રક્ષક  સત્પુત્રાદિના અભાવથી કનિષ્ઠા પતિવ્રતા ચિતાપ્રવેશ કરે છે. (૨૯-૩૦) ધર્મચારિણી કનિષ્ઠ પતિવ્રતા, વ્યાકુલા સતી (દુઃખ પામતી સતી) બળે છે : આ ઉત્તમાદિ ત્રણ પ્રકારની પતિવ્રતાઓ શ્રીરુદ્ર યુક્ત પાર્વતીના લોકને પામે છે, જ. (૩૧) સતી લોકમાં ઉત્તમ પતિવ્રતા પતિ સહિત ઉત્તમ સુખને ભોગવે છે. મધ્યમ પતિવ્રતા પતિએ સહિત મધ્યમ સુખને ભોગવે છે. કનિષ્ઠ પતિવ્રતા પતિએ સહિત કનિષ્ઠ સુખને જ ભોગવે છે. (૩૨) ત્રણ પ્રકારની પતિવ્રતાઓમાં જે પતિવ્રતાઓનો અગ્નિપ્રવેશ નિષેધ કર્યો છે તે કહું છું. (૩૩) આત્મા પરમાત્માના જ્ઞાને સહિત તીવ્ર વૈરાગ્યયુક્ત, બ્રહ્મચર્યાદિ વિધવાના ધર્મ પાળવામાં શક્તિમતી, ભગવાનની ભક્તિયુક્ત, એકાંતિક ધર્મવાળી મુક્તિની ઈચ્છાવાળી, વીર પુરુષની માતા, ગર્ભિણી : આ નારીઓએ અગ્નિમાં પ્રવેશ કરવો નહિ. સદા હરિનું સેવન કરવું. (૩૪-



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

**नैताभिः कार्यः सेव्यो हरिः सदा ॥३५॥ पतिव्रताया धर्मोऽपि द्विविधः परिकीर्त्यते । केवलो नवधाभक्त्या वासुदेवस्य चान्वितः ॥३६॥ तत्राद्यस्य फलं प्रोक्तं सतीलोकाप्तिलक्षणम् । द्वितीयस्य फलं ज्ञेयं गोलोकप्राप्तिरुत्तमम् ॥३७॥ लक्ष्मीतुल्यं सुखं तत्र प्राप्नोत्यनुपमं सती । तद्भर्तापि भवेत्तत्र पार्षदप्रवरः प्रभोः ॥३८॥ पतिव्रतासु या धर्मवंश्यविप्रस्त्रियो द्विज! । स्त्रीगुर्व्यः स्युश्च तासां तु धर्माः सामान्यतस्त्विमे ॥३९॥ विशेषधर्मस्तासां च कृष्णायानर्पितं तु यत् । तत्किञ्चिदपि नैवाऽऽश्यं प्रसवाद्यापदं विना ॥४०॥ स्वसम्बन्धीतरनरस्पर्शभाषेक्षणादि च । न कार्यमिति तासां च विशेषो धर्म ईयताम् ॥४१॥ इति ते कथिता मया वृषाः सधवानामिह योषितां द्विज! । सहिताः स्वफलैरथ ब्रुवे विधवानामपि तानशेषतः ॥४२॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे स्त्रीधर्मेषु पतिव्रताभेदतद्धर्मफलनिरूपणनामा द्वात्रिंशोऽध्यायः ॥३२॥

श्रीनारायणमुनिरुवाच – **विधवाकबरीबन्धो भर्तृबन्धाय जायते । शिरसो वपनं तस्मात्कार्यं विधवया द्विज! ॥१॥ रक्षेत्केशान्यदि तदा जटातुल्यानसंस्कृतान् । रक्षेत्तन्मुण्डनं कार्यं तीर्थे वा शुभपर्वणि ॥२॥ एकाहारं सदा कुर्याद्दिनान्ते सा त्वनापदि । सङ्गं न धर्महीनानां सा कुर्याद्योषितामपि ॥३॥ पर्यङ्के न स्वपेन्नारी रोगाद्यापदमन्तरा । नग्ना स्नानं न कुर्याच्च त्यजेत्क्रोधं तु दूरतः ॥४॥ तैलाभ्यङ्गं न कुर्वीत विधवाऽनापदि क्वचित् । गन्धद्रव्यस्य सम्भोगो नैव कार्यस्तया तथा ॥५॥**

૩૫) પતિવ્રતાનો ધર્મ પણ કેવળ - ભગવાનની નવ પ્રકારની ભક્તિએ રહિત અને વાસુદેવની નવ પ્રકારની ભક્તિથી યુક્ત એમ બે પ્રકારનો કહેલો છે. (૩૬) પતિવ્રતાના બે પ્રકારના ધર્મમાં કેવલ પતિવ્રતાના ધર્મથી સતી લોકની પ્રાપ્તિ લક્ષણ ફળ કહેલું છે. બીજા ભક્તિ સહિત પતિવ્રતા ધર્મનું ફળ ગોલોકની પ્રાપ્તિસ્વરૂપ ઉત્તમ ફળ જાણવું. (૩૭) તે ગોલોકમાં ભગવાનની ભક્તિયુક્ત પ્રતિવ્રતા લક્ષ્મીસમાન અનુપમ સુખ પામે છે. ભગવાનની ભક્તા સતીસ્ત્રીનો પતિ પણ ગોલોકમાં શ્રીકૃષ્ણ ભગવાનનો ઉત્તમ પાર્ષદ થાય, બંને પણ ભગવાનના સુખને પામે છે. (બંનેનો પરસ્પર દંપતીભાવ નિવૃત્તિ પામે છે). (૩૮) હે દ્વિજ ! પતિવ્રતાઓમાં જે સ્ત્રીઓના ગુરુપદમાં રહેલી **ધર્મવંશની સ્ત્રીઓ** હોય તેમને પણ પૂર્વોક્ત ધર્મો સાધારણપણે પાલન કરવાના છે. (૩૯) ધર્મવંશી બ્રાહ્મણની સ્ત્રીઓના વિશેષ ધર્મ આ પ્રમાણે છે. જે વસ્તુ શ્રીકૃષ્ણને અર્પણ કરેલી ના હોય તે કંઈ પણ વસ્તુ પ્રસવાદિ આપત્તિ વિના જમવી નહીં. (૪૦) પોતાના સમીપ સંબંધી વિનાના જે પુરુષો તેનો સ્પર્શ, ભાષણ, દર્શન તથા તે પુરુષોને પોતાનું મુખના દર્શન થાય વગેરે ન કરવું. આ પ્રમાણે તેમનો વિશેષ ધર્મ જાણવો. (૪૧)

હે દ્વિજ ! આ પ્રકારે મેં આ લોકમાં સધવા સ્ત્રીઓના ધર્મો, તેના ફળે સહિત તમોને કહ્યા. હવે વિધવા નારીઓના પણ સમગ્ર ધર્મો કહું છું. (૪૨)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે સ્ત્રીધર્મેષુ પતિવ્રતા ભેદ - તદ્ધર્મ - ફલનિરૂપણનામા દ્વાત્રિંશોઽધ્યાયઃ (૩૨)*

## અધ્યાય : 33

### સ્ત્રીધર્મોમાં વિધવા સ્ત્રીઓના ધર્મ, અંબોડો બાંધવાનો ત્યાગ વગેરે સમગ્ર ધર્મનું નિરૂપણ કરેલું છે.

**શ્રીનારાયણ મુનિ બોલ્યા** : હે દ્વિજ ! વિધવાને મસ્તકે કબરીબંધ (કેશનો અંબોડો) તે પોતાના પતિના બંધન માટે થાય છે, માટે વિધવાએ મુંડન કરાવવું. (૧) જો વિધવા કેશ રાખે તો તેલ વગેરેથી સંસ્કાર કરે નહીં, માટે જ જટા તુલ્ય રાખે તેમનું મુંડન તીર્થમાં અથવા શુભ પર્વમાં કરાવવું. (૨) તે વિધવા આપત્કાળ વિના સંધ્યા સમયે એક વાર ભોજન કરે, રોગાદિ આપત્કાળમાં ફરી ભોજન કરે તેનો દોષ નથી, ધર્મે રહિત સ્ત્રીઓનો સંગ પણ ન કરે. (૩) વિધવા નારીએ રોગાદિ આપત્તિ વિના પલંગ ઉપર સુવું નહીં, નગ્ન સ્નાન કરવું નહીં. ક્રોધ દૂરથી ત્યાગ કરવો. (૪) વિધવાએ આપત્કાલ વિના ક્યારેય પણ તેલથી શરીર ચોળવું નહીં તથા વિધવાએ સુગંધી સુખડનું તેલ અત્તર વગેરે સૂંઘવારૂપ ભોગ કરવો નહીં. (૫) પ્રાણ કંઠે આવે તો પણ પોઠિયા (વૃષભ) ઉપર બેસે નહીં; ભાંગ, ગાંજો વગેરે મદને ઉત્પન્ન કરનાર ભક્ષણ કરે નહીં અને તાંબુલ ભક્ષણ ના કરે. (૬) વિધવા અતિ ભોજન ના કરે, શરીરમાં ધાતુવર્ધક પુષ્ટિ કરનાર દૂધ અને ઘી



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

नाधिरोहेदनड्वाहं प्राणैः कण्ठगतैरपि । मादकं भक्षयेन्नैव न ताम्बूलं च कर्हिचित् ॥६॥ न चातिभोजनं कुर्याच्छरीरे धातुवर्धकम् । नात्यश्नीयात्पयः सर्पिर्विनाऽऽपदमसौ क्वचित् ॥७॥ मिष्टान्नं नातिभुञ्जीत नाद्यादुत्तेजकं तथा । न दध्याद्दिव्यवसनं न च कौसुम्भमंशुकम् ॥८॥ पुष्पस्रजं चन्दनं च शङ्खान् सिन्दूरमञ्जनम् । न दध्याद्धात्वलङ्कारान् धातुयुक्तं च नाम्बरम् ॥९॥ हरेः प्रासादिकमपि सौभाग्यद्रव्यचन्दनम् । अङ्गुल्यैव गले दध्यान्न त्वङ्गेष्वलिकादिषु ॥१०॥ तथा प्रासादिकमपि हरेः पुष्पस्रगादि सा । कण्ठादौ धारयेन्नैव भक्त्याऽऽघ्राय विसर्जयेत् ॥११॥ न च सूक्ष्माणि वस्त्राणि चित्राणि च न धारयेत् । कञ्चुकं परिदध्यान्नो वासो वा विकृतं क्वचित् ॥१२॥ न रञ्जयेत्पाणिपादं दन्तांश्च नखरानपि । न धारयेत्कुङ्कुमं च न कुर्याद्भालपत्रिकाम् ॥१३॥ न वै सुवासिनीवेषं न पुंवेषं च कर्हिचित् । सन्न्यासिन्या न वेषं च न नर्तक्याश्च धारयेत् ॥१४॥ नोत्पाटयेद्भालकेशान्न च व्यर्थं परिभ्रमेत् । नोपवेष्टुं चान्यगृहं गच्छेदेकाकिनी क्वचित् ॥१५॥ वृद्धस्यापि न पित्रादेरुत्सङ्गे क्वाप्युपाविशेत् । श्वाशुर्यवत्पैत्रपक्षे नोपहासवचो वदेत् ॥१६॥ न ग्राम्यधर्मवार्तां च मातुरग्रे वदेच्च सा । न चान्ययोषितोऽप्यग्रे वार्ताः शृङ्गारिकाश्चरेत् ॥१७॥ न होलोत्क्रीडनं कुर्यान्नापशब्दान्वदेत्क्वचित् । मिथ्यापवादं न वदेद्दद्याद्गालिं च नैव सा ॥१८॥ न च श्वशुरपक्षीयैर्निर्लज्जा वादमाचरेत् । न पापदुष्टया नार्या मैत्रीं कुर्यात्कदाचन ॥१९॥ तथा परिव्राजकया दूत्या स्त्रीपुंसयोरपि। शूद्रादवरजात्या च मैत्रीं नैवाचरेत्तु सा ॥२०॥ न यवन्या न कामुक्या पाषण्डिन्या च योषिता । अवतारेष्वविश्वस्ता या हरेश्च तया सह ॥२१॥ निर्लज्जयौषधिविदा मन्त्रयन्त्रज्ञया तथा । मैत्रीं न

---

આપત્કાલ પડ્યા વિના ક્યારેય અતિશય ખાવું નહીં. (૭) ઘી, ગોળ, સાકર વગેરેથી મિશ્રિત લાડુ વગેરે મિષ્ટાન્ન અતિશય ભોજન કરવું નહીં. (આપત્કાલ પડ્યા વિના એમ જાણવું;) તથા લવિંગ, ઈલાયચી, જાયફલાદિ ના જમે, ઉત્તમ વસ્ત્રો પોતાના અંગમાં ધારણ કરે નહીં. (૮) માલતી, જાઈ, મોગરા વગેરેનાં પુષ્પોના હારો ચંદન, શંખ વગેરે વલય, (ચૂડાઓ) સિંદૂર તથા અંજન ધારણ કરે નહીં, સુવર્ણાદિ ધાતુનાં આભૂષણો તથા સુવર્ણાદિ ધાતુના તારે યુક્ત અંબર ધારણ કરે નહીં. (૯) હરિની પ્રસાદી પણ સૌભાગ્ય દ્રવ્ય  કુંકુમ, કેશર ચંદનાદિ આંગળીથી કંઠમાં ધારણ કરે, લલાટ વગેરેમાં ધારણ કરે નહી; (૧૦)  તથા વિધવા હરિની પ્રસાદી પણ પુષ્પની માળાઓ વગેરે કંઠમાં ધારણ કરે નહીં. ભક્તિથી સૂંઘીને વિસર્જન કરે. (૧૧) સૂક્ષ્મ વસ્ત્રો, જેના ધારણ કરવાથી અંગ દેખાય તેવાં વસ્ત્રો ધારણ કરવાં નહીં અને ચિત્રવિચિત્ર વસ્ત્રો ધારણ કરવાં નહીં, કંચુક (સ્ત્રીને ઉચિત ડગલી) ધારણ કરે નહીં અથવા પોતાના દેશ, કુળના આચારથી અયોગ્ય વસ્ત્ર ક્યારેય ધારણ ના કરે. (૧૨) હાથ, પગ, દાંત અને નખોને પણ અળતો આદિક રંગથી લાલ ન કરે, કુંકુમનો ચાંલ્લો કરે નહીં, ભાલમાં પત્રિકા ન કરે. (૧૩) સુવાસિનીના સમાન વેશ ક્યારેય ધારણ ના કરે, પુરુષનો વેશ ધારણ ન કરે, સંન્યાસિનીનો વેશ ધારણ ના કરે અને નૃત્ય કરનારીના જેવો વેશ ધારણ ના કરે. (૧૪)  ભાલના કેશોને ઉખાડે નહીં, પ્રયોજન વિના જ્યાં-ત્યાં ભ્રમણ કરે નહિ; એકલી બીજાને ઘેર બેસવા ક્યારેય જાય નહિ. (૧૫) વૃદ્ધ એવા પિતાદિના ખોળામાં ક્યારેય બેસે નહિ. સસરાના પક્ષમાં, પોતાના પિતાના પક્ષમાં ઉપહાસનું વચન ન બોલે, સાસરાના પક્ષની સ્ત્રીઓની આગળ ઉપહાસ્યનાં વાક્યો ન બોલે. (૧૬) વિધવા, માતાની આગળ ગ્રામ્ય વાર્તા ન બોલે; અન્ય સ્ત્રીઓની આગળ પણ શૃંગારરસની વાર્તા ન કરે. (૧૭) વિધવા હોળીનો ખેલ ક્યારેય ન કરે, અપશબ્દો તથા મિથ્યાપવાદ અને ગાળો ન  બોલે. (૧૮) શ્વસુરપક્ષનાં જનો સાથે નિર્લજ્જ થઈને કંઈ કાર્ય નિમિત્તે બોલે નહિ. જાર પુરુષના સંગથી દૂષણ પામેલી નારી સાથે ક્યારેય મૈત્રી ન કરે; (૧૯) તથા વિધવા, સંન્યાસિની સ્ત્રી અને પુરુષોની દૂતી અને શૂદ્રથી નીચી જાતિની સ્ત્રી સાથે મૈત્રીનું આચરણ કરે નહિ. (૨૦) યવન જાતિની સ્ત્રી સાથે મૈત્રીનું આચરણ ના કરે, કામથી આકુલિતા સ્ત્રીની સાથે, પાખંડ માર્ગમાં રહેલી સ્ત્રી સાથે મૈત્રી આચરણ કરે નહિ. જે નારી હરિના અવતારોમાં વિશ્વાસે રહિત હોય તેની સાથે મૈત્રી કરે નહિ. વિધવા સ્ત્રીએ લજ્જાએ રહિત, ગર્ભપાતની ઔષધિને જાણનારી, વશીકરણ મંત્રો, તંત્રોને જાણનારી તથા ગર્ભપાત કરાવનાર ધૂર્તાની સાથે મૈત્રી કરવી નહિ. (૨૧-૨૨) જો લોકાપવાદવાળા પુરુષના ગૃહમાં પતિવ્રતા નારી હોય તોપણ પતિવ્રતા નારીને જોવા માટે તેના ગૃહમાં જાય નહીં. (૨૩) વિધવા નારી, પોતાનાથી અતિનીચ જાતિની સ્ત્રી ધર્મવાળી હોય



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

गर्भपातिन्या कुर्यात्सा धूर्तया न च ॥२२॥ अभिशस्तस्य पुंसश्चेद्गृहे नारी पतिव्रता । भवेत्तर्ह्यपि तद्गेहं न गच्छेत्तां समीक्षितुम् ॥२३॥ स्वतोऽतिनीचजातेश्च धर्मवत्या अपि स्त्रियाः । उपवेष्टुं गृहे नैव गच्छेन्नारी विभर्तृका ॥२४॥ जीविकामात्रपर्याप्तं धनं स्यादात्मनस्तु यत् । न कुर्याद्धर्मकार्येऽपि व्ययं तस्य कदाचन ॥२५॥ व्यये कृते तु सा नारी जीविकार्थं पराश्रयात् । भ्रष्टा भवेत्स्वीयधर्मात्संशयो नात्र विद्यते ॥२६॥ विवाहं पान्थसार्थं च नृत्यं गीतं जनोत्सवम् । द्रष्टुं न गच्छेद्विधवा सुवेषं पुरूषं तथा ॥२७॥ पश्येन्मुखं च नाऽऽदर्शे व्रजेन्नैकाकिनी क्वचित् । स्वच्छन्दं पुरुषान्नैव वीक्षेत क्रीडतः क्वचित् ॥२८॥ कामान्नेक्षेत पुरुषं न सम्भाषेत न स्पृशेत् । न तद्वार्तां च शृणुयात्सच्छास्त्रीयकथां विना ॥२९॥ व्याघ्राह्यग्न्यम्बुभीत्यादावापदि स्पर्शभाषणे । पुंसो जाते तु नैव स्याद्दोषोऽथ स्तनपस्य च ॥३०॥ धौतशुष्कं च धौतार्द्रं नवीनं चांशुकं विना । पुंसो धार्यं स्पृशेन्नैव तदङ्गस्थं च नांशुकम् ॥३१॥ न पुंसश्चिन्तनं कुर्याद्धृदये कामभावतः। न लिखेन्न स्पृशेच्चित्रं पुत्तलं ग्राम्यधर्मि च ॥३२॥ बुद्धिपूर्वं न वीक्षेत पशुपक्ष्यादिमैथुनम् । सिद्ध्यत्यपि स्वकार्ये च पुंसा मैत्रं तु नाचरेत् ॥३३॥ पुंसो मूत्रमलोत्सर्गस्थले कुर्यान्न तत्क्रियाम् । पुंसो दृष्ट्या निजां दृष्टिं निबध्येक्षेत न क्वचित् ॥३४॥ अवदन्ती नरं नैव बोधयेत्करदृग्भ्रमैः । पश्येत्पुंसो न गुह्याङ्गं विधवा धर्मसंस्थिता ॥३५॥ धनुर्मानान्तरेणैव पुंसो दूरं व्रजेत्सदा। देवालयाल्पाध्वमहे रक्ष्यं पुंस्पर्शतो वपुः ॥३६॥ यत्रोर्ध्वभूमिकायां तु सुप्तः स्यात्पुरुषो गृहे । निशि तत्र स्वपेन्नैका तदूर्ध्वं तदधोऽपि वा ॥३७॥ पुंसभादृश्यहृत्तुन्दसक्थिर्नोपविशेत्क्वचित् । चापल्यं करपादस्य न कुर्यादङ्गघर्षणम् ॥३८॥ पैत्रश्वाशुर्यपक्षाभ्यां छन्नं पुंसा न केनचित् । स्त्रिया व्यवहरेत्तस्मै न दद्यान्नाददीत तत् ॥३९॥ स्वबन्धुनापि चैकेन यूना सह पथि क्वचित् । तारुण्ये विधवा

---

તેને ઘેર પણ બેસવા જાય નહિ. (૨૪) જે પોતાનું ધન જીવિકા જેટલું જ હોય તે ધનનો વ્યય ધર્મકાર્યમાં પણ કરવો નહિ. (૨૫) પોતાના જીવનનું ધન વ્યય કર્યે સતે તો તે નારી જીવિકા માટે બીજાના આશ્રયથી પોતાના વિધવા ધર્મથી ભ્રષ્ટ થાય, આમાં સંશય નથી. (૨૬) વિધવા વિવાહ, દેશાન્તરથી આવેલા-વટેમાર્ગુ પુરુષોનો સમુદાય, રાજાનું સૈન્ય, નૃત્ય, ગીત, ભોજનાદિ લોકોનો ઉત્સવ તથા સારા વેશવાળા રાજકુમારાદિને જોવા માટે ન જાય.(૨૭) દર્પણમાં મુખ ના જુએ, ક્યારેય પણ એકલી ના જાય, સ્વેચ્છાથી ખેલ કરતા પુરુષોને ક્યારેય ન જુએ. (૨૮) કામની ભાવનાથી પુરુષને જુએ નહિ, સંભાષણ તથા સ્પર્શ કરે નહિ. સત્શાસ્ત્ર કથા વિના પુરુષ સંબંધી રૂપગુણના વર્ણનની વાર્તા-કોઈએ કહેલી વાર્તા ન સાંભળે. (૨૯) વાઘ, સર્પ, અગ્નિ, જળમાં ડૂબવાના ભય વગેરે ગૃહની ભીતનું પડવું વગેરે આપત્કાળમાં પુરુષની સાથે સ્પર્શ, ભાષણે સહિત વાણી બોલ્યે સતે દોષ નથી અને સ્તનપાન કરનાર બાળકના સ્પર્શ તથા ભાષણ થયે સતે દોષ નથી. (૩૦) ધોઈને સૂકવેલું હોય અથવા ધોયેલું ભીનું અને નવીન વસ્ત્ર વિના પુરુષે ધારેલા વસ્ત્રને સ્પર્શ કરે નહિ તથા પુરુષના અંગ ઉપર રહેલા વસ્ત્રનો સ્પર્શ કરે નહિ. (૩૧) મનમાં કામભાવથી પુરુષનું ચિંતન ન કરે. સંભોગને આચરતા હોય ને શું ? એવું ચિત્ર ન ચીતરે, સ્પર્શ ન કરે, ગ્રામ્યધર્મી પૂતળાં લાકડાનાં તથા હાથી દાંત વગેરેથી કરેલાં તેનો સ્પર્શ કરે નહિ. (ગ્રામ્યધર્મી શબ્દથી કેવળ પુરુષના ચિત્રના સ્પર્શમાં ઘણું કરીને દોષ નથી એમ સૂચવે છે.) (૩૨) પશુ-પક્ષ્યાદિનું મૈથુન બુદ્ધિપૂર્વક જુએ નહિ, પોતાનું કાર્ય સિદ્ધ થાય તેમ હોય તોપણ પુરુષની સાથે મૈત્રીનું આચરણ ના કરે. (૩૩) પુરુષોના મૂત્ર, મળાદિના ઉત્સર્ગના સ્થાનમાં મળમૂત્રાદિ કર્મ કરે નહિ. પુરુષની દૃષ્ટિની સાથે પોતાની દૃષ્ટિ બાંધીને ક્યારેય પુરુષને જુએ નહીં. (૩૪) ધર્મમાં રહેલી વિધવા નરની સાથે નહિ બોલતી સતી પોતાના હાથો અને દૃષ્ટિના ચાલવાથી (ઈશારાથી) પુરુષને કોઈ પણ સંકેતાર્થ જ્ઞાપન કરે નહિ. પુરુષના ગુહ્યાંગને ન જુએ. (૩૫) હંમેશા ચાર હાથ પુરુષ થકી દૂર ચાલે. દેવાલય અને જ્યાં ભીડો હોય ત્યાં ભગવાનના મહોત્સવમાં પુરુષના સ્પર્શથી શરીર દૂર રાખવું. (૩૬) જે ગૃહમાં મેડા ઉપર પુરુષ એકલો જ સૂતો હોય તે ગૃહમાં અથવા તે ઘરની નીચેના માળમાં રાત્રિમાં વિધવા એકાકિની સૂએ નહિ (૩૭) જે રીતે વક્ષઃસ્થળ (છાતી) ઉદર અને સાથળને પુરુષોની સભા દેખે તેમ સ્ત્રીએ ક્યારેય બેસવું નહિ તથા હાથ-પગનું ચપળપણું અને અંગોનું ઘર્ષણ પુરુષો દેખે તેમ ના કરવું. (૩૮) પિતા તથા સસરાના પક્ષ થકી ગુપ્ત જેમ હોય તેમ પુરુષ સાથે અથવા સ્ત્રી દ્વારા વ્યવહાર ના કરે, પુરુષને સ્ત્રી દ્વારા કંઈ પણ આપે નહિ અને તે પુરુષથી સ્ત્રી દ્વારા કંઈ પણ ગ્રહણ પણ ના કરે. (૩૯) વિધવા એકાકી વિશ્વાસવાળી, તરુણાવસ્થામાં માર્ગમાં યુવાન એકલા પોતાના ભાઈની સાથે પણ ક્યારેય ચાલે નહિ અને એકાંત સ્થાનમાં બેસે નહિ .(૪૦) વિધવાના ધર્મોમાં પુરુષની સાથે જે ભાષણ, સ્પર્શ જોવા વગેરેનો

नैव गच्छेन्नोपविशेद्रहः ॥४०॥ भाषणस्पर्शवीक्षादि पुंसो यत्तु निषेधितम् । तदत्रासन्नसम्बन्धिपुम्भ्योऽन्यत्रावगम्यताम् ॥४१॥ पिता भ्राता पितृव्यश्च तत्पुत्रास्तत्सुतादयः । मातामहो मातुलश्च तत्पुत्रास्तत्सुतादयः ॥४२॥ मातृष्वसुः पतिः पुत्रास्तथा पितृष्वसुः पतिः । तत्पुत्रा गुरुतत्पुत्रावन्नदाता च तत्सुतः ॥४३॥ सभ्रातृकश्च श्वशुरस्तथा ज्येष्ठाश्च देवराः । तेषां पुत्राश्च दौहित्रा दुहितृपतयस्तथा ॥४४॥ पुत्रपौत्रादयः स्वस्या एते सम्बन्धिनो मताः । तत्स्पर्शभाषणेक्षासु न दोषो यदि धार्मिकाः ॥४५॥ न कपाटावृते गेहे विजने वा स्थले क्वचित् । स्वपित्रापि सहासीत विधवैकाकिनी ध्रुवम् ॥४६॥ स्वसम्बन्धिजना एते पापिनो विमुखाः प्रभोः । यदि स्युस्तर्हि तान्नैव भाषयेच्च न सा स्पृशेत् ॥४७॥ हित्वा तान्पापिनः साध्वी निष्कामव्रतरक्षकम्। पोषकं त्वाश्रयेदन्यं पितृभ्रातृसुतैः समम् ॥४८॥ पितृवत्पोषयेद्यः स्वं धर्मं च परिपालयेत् । स एव हि पिता प्रोक्तो न स्वधर्मस्य घातकः ॥४९॥ भ्रातृवत्पोषयेद्यः स्वं धर्मं च परिपालयेत् । भ्राता स एव हि प्रोक्तो न स्वधर्मस्य घातकः ॥५०॥ पुत्रवत्पोषयेद्यः स्वं धर्मं च परिपालयेत् । पुत्रः स एव हि प्रोक्तो न स्वधर्मस्य घातकः ॥५१॥ शारीरसम्बन्धहीना अपि ते धर्मरक्षकाः । पित्रादितुल्या विज्ञेया भिन्नवर्णा अपि ध्रुवम्॥५२॥ तत्स्पर्शभाषणेक्षासु स्पर्शे तद्वाससामपि । विधवाया धर्मवत्या दोषो नास्त्येव निश्चितम् ॥५३॥ पितृभ्रात्रादयो यस्या न स्युः सम्बन्धिनो जनाः । स धर्मरक्षामिच्छुश्चेदाश्रयेद्धर्मरक्षकम् ॥५४॥ स्वतन्त्रा न भवेत्क्वापि नारी धर्मपरायणा । ज्ञातेरभावे राजानमाश्रयेद्धर्मरक्षकम् ॥५५॥ जातिभ्रंशकरं कर्म किञ्चिदप्याचरेन्न सा । जातिशुद्धिर्यतो हेतुर्बुद्धिशुद्धेरुदीर्यते ॥५६॥ अथ यस्या जीविका तु क्रयविक्रयकर्मणा । कृषिसेवादिना वा स्यात्तस्या निर्णय उच्यते ॥५७॥ भाषणं स्पर्शनं पुंसो व्यवहारेऽत्र चेद्भवेत् ।

નિષેધ કર્યો છે તે તો સમીપસંબંધી પુરુષો વિના બીજા પુરુષોમાં જાણવું. (૪૧) પિતા, ભાઈ, કાકા, તેના પુત્રો અને તેના પુત્રો વગેરે માતાના પિતા અને મામા તેના પુત્રો તથા તેના પુત્રોના પુત્રો વગેરે. (૪૨) માતાની બહેનનો પતિ, પુત્રો તથા પિતાની બહેનનો પતિ, તેના પુત્રો, ગુરુ, તેના પુત્રો, અન્નદાતા અને તેના પુત્રો. (૪૩) ભાઈઓએ સહિત સાસરો તથા જેઠ, દિયેર, તેમના પુત્રો, દીકરીનો દીકરો, દીકરીઓના પતિઓ તથા પુત્રના પુત્રો, આ **પોતાનાં સંબંધીઓ** માનેલાં છે. જો તેઓ ધાર્મિક હોય તો એમના સ્પર્શ ભાષણ અને જોવામાં દોષ નથી. (૪૪-૪૫) વિધવા એકાકી કમાડો વગેરેના આવરણવાળા ગૃહમાં અથવા માણસે રહિત સ્થાનમાં પોતાના પિતાની સાથે પણ ક્યારેય બેસે નહિ જ. (અહીંયા પણ તરુણી અને તરુણપિતા જાણવા.) (૪૬) આ પિતા વગેરે સંબંધીજનો જો પોતાનાં નિષ્કામ વ્રતને ભાંગનારાં અને શ્રીકૃષ્ણ ભગવાનથી વિમુખ હોય તો તે સંબંધીજનો સાથે વિધવા ભાષણ કરે નહિ અને સ્પર્શ પણ કરે નહિ. (૪૭) પતિવ્રતા વિધવા સ્ત્રી તે સંબંધી જનોનો ત્યાગ કરીને નિષ્કામ વ્રતનું રક્ષણ કરનાર, અન્નાદિ દાનથી પોતાનો પાલક માટે જ પિતા-ભાઈ અને પુત્રોની સમાન, પોતાના પોષણ વગેરેમાં પિતા તુલ્ય બીજા સ્વધર્મનિષ્ઠ ગૃહસ્થ પુરુષોનો આશ્રય કરે. (૪૮) જે પોતાના વર્ણનાથી બીજો પણ પુરુષ પોતાને પિતાની માફક પોષણ કરે, નિષ્કામવ્રતનું પરિપાલનરૂપ સદાચારનું પોષણ કરે તે જ પિતા કહેલો છે; પાલન કરે તે પિતા એ સાર્થક નામ છે. જે સ્વધર્મનો વિનાશક હોય તેને પિતા કહેલો નથી. (૪૯) જે પોતાને ભાઈની માફક પોષણ કરે અને ધર્મનું પરિપાલન કરે તે જ ભાઈ કહેલો છે. સ્વધર્મનો ઘાતક ભાઈ કહ્યો નથી જ. (૫૦) જે પોતાને પુત્રની માફક પોષણ કરે અને ધર્મનું પરિપાલન કરે તે પુત્ર કહેલો છે. 'પુનાતીતિ' ધર્મનું પાલન કરવાથી પવિત્રતાને ઉત્પન્ન કરે અને પોષણ કરે તે 'પુત્ર' શબ્દ અન્વર્થ છે. સ્વધર્મનો ઘાતક પુત્ર કહ્યો નથી. (૫૧) પોતાના ધર્મનું રક્ષણ કરનારા તે પોતાના પોષક પુરુષો શરીરના સંબંધ વિના પણ ભિન્ન વર્ણવાળા છે તોપણ પિતાદિને તુલ્ય જ જાણવા. (૫૨) તેમના સ્પર્શ-ભાષણ અને જોવામાં તથા તેમનાં વસ્ત્રોનાં સ્પર્શમાં પણ ધર્મવાળી વિધવાને દોષ નથી જ. (૫૩) જે વિધવાના પિતા, ભાઈ વગેરે સંબંધીજનો ન હોય તે વિધવા જો પોતાના ધર્મનું રક્ષણ ઇચ્છનાર હોય તો ધર્મ રક્ષક સદ્ધર્મનિષ્ઠ પુરુષનો આશ્રય કરે. (૫૪) ધર્મપરાયણા વિધવા નારી ક્યારેય પણ સ્વતંત્ર ન થાય, પોતાના જ્ઞાતિજનના અભાવે ધર્મરક્ષક રાજાનો આશ્રય કરે. (૫૫) તે વિધવા જાતિભ્રંશકર કોઈ પણ કર્મ કરે નહિ જે માટે જાતિશુદ્ધિ, બુદ્ધિશુદ્ધિમાં કારણ કહેવાય છે. (૫૬) હવે જે વિધવાની જીવિકા તો તૃણ, કાષ્ટ, છાણ વેચાતું લેવું અને આપવાથી અથવા ખેતીની સેવા વગેરેથી થાય : તે વિધવાના જીવિકા-સંબંધી ધર્મનો નિર્ણય આ પ્રમાણે કહેલો છે. (૫૭) જો જીવિકા લક્ષણ વ્યવહારમાં પુરુષની સાથે આવશ્યક ભાષણ-સ્પર્શ થાય તો વ્યવહાર આચરણના સમય સુધી તેની સાથે ભાષણાદિ કરે; કારણ કે તેને ક્રય-વિક્રય આચરણના

तावत्कालं तु तत्कुर्याद्यतः सा जीविका मता ॥५८॥ कुलोचितं न चेत्कुर्याद्व्यवहारं स्वजीवने । पराश्रयात्तदा भ्रष्टा सा निष्कामव्रताद्भवेत् ॥५९॥ श्रीविष्णोः पूजनं कार्यं यथालब्धोपचारकैः । मनसि प्रतिमायां च ज्ञेयो भर्ता स एव च ॥६०॥ तन्नाममन्त्रस्य जपं कुर्यान्नित्यं स्वशक्तितः । दिवा रात्रौ च कार्येषु स्मर्तव्यो हरिरेव हि ॥६१॥ ऋतौ च सूतके रोगे मानसं त्वर्चनं हरे : । स्वयं कुर्याद्बाह्यपूजां कारयेदन्ययोषिता ॥६२॥ आवश्यकं गेहकार्यं कृत्वा सा सकलं दिनम् । भक्तिमेव हरेः कुर्याद्व्यर्थं कालं तु न क्षिपेत् ॥६३॥ न भक्षयेत्सा यतीनां च वर्णिनामनाश्रमस्थस्य जनस्य च द्विज!। अन्नं क्वचापद्यपि धर्मसंस्थिता यद्भक्षणान्नश्यति वै मतिः शुभा ॥६४॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे स्त्रीधर्मेषु विधवानां कबरीबन्धवर्जनादिधर्म-निरूपणनामा त्रयस्त्रिंशोऽध्यायः ॥३३॥

श्रीनारायणमुनिरुवाच - एकादशीस्तथा जन्माष्टम्यादीनि व्रतानि च । नित्यानि कुर्यात्तत्रार्चां वासुदेवस्य सादरम् ॥१॥ धर्मनिष्ठा व्रतान्येव सा तु कुर्यान्निरन्तरम् । त्रिरात्रं पञ्चरात्रं वा पक्षव्रतमथापि वा ॥२॥ मासोपवासं वा कुर्याच्चान्द्रायणमथापि वा । कृच्छ्रं पराकं वा कुर्यात्तप्तकृच्छ्रमथापि वा ॥३॥ यवान्नैर्वा फलाहारैः शाकाहारैः पयोव्रतैः । प्राणयात्रां प्रकुर्वीत यावत्प्राणः स्वयं व्रजेत् ॥४॥ वैशाखे कार्तिके माघे विशेषनियमांश्चरेत् । स्नानं दानं तीर्थयात्रां

---

વ્યવહાર-સ્વરૂપ જીવિકા માનેલી છે. (૫૮) વિધવા જો પોતાના જીવન નિમિત્તે કુલોચિત વ્યવહાર ન કરે તો પારકાના આશ્રયથી, નિષ્કામ વ્રતથી ભ્રષ્ટ થાય. (૫૯) પ્રથમ પોતાના મનમાં પછી યથાલબ્ધ ઉપચારોથી પોતાને પૂજવાની પ્રતિમામાં શ્રીકૃષ્ણ ભગવાનનું પૂજન કરવું તે વિષ્ણુ શ્રીહરિને જ પોતાના સ્વામી જાણવા. (૬૦) ભગવાનના અષ્ટાક્ષરમંત્ર સહિત શ્રી સ્વામિનારાયણ નામ-મંત્રનો જપ નિત્ય પોતાની શક્તિથી કરે. દિવસે અને રાત્રિમાં પણ ઘરનાં સર્વ કાર્યોમાં હરિનું જ સ્મરણ કરવું. (૬૧) સ્વ-રજોદર્શન, બે પ્રકારનાં સૂતક અને રોગમાં હરિનું માનસપૂજન તો પોતે જ કરે. બાહ્યપૂજા અન્ય સ્ત્રી પાસે કરાવે. (૬૨) વિધવા અવશ્ય પ્રાપ્ત ગૃહકાર્ય કરીને સમગ્ર દિવસ હરિની ભક્તિ જ કરે. ભગવાનની ભક્તિ વિના વ્યર્થ સમય કાઢવો નહિ. (૬૩)

હે દ્વિજ ! ધર્મમાં રહેલી વિધવા સ્ત્રી સંન્યાસીઓ, બ્રહ્મચારીઓ, અને કોઈ પણ આશ્રમમાં નહિ રહેલો (અનાશ્રમી જન અને અચ્યુતગોત્રી સત્પુરુષો) તેમનું અન્ન કોઈ સમયે પણ ભક્ષણ ના કરે, કેમ કે તેના ભક્ષણથી શુભમતિ નાશ પામે છે જ. (૬૪)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે સ્ત્રીધર્મેષુ વિધવાનાં કબરી-બન્ધવર્જનાદિ ધર્મ નિરૂપણનામા ત્રયસ્ત્રિંશોऽધ્યાયઃ (૩૩)*

## અધ્યાય : ૩૪

### સ્ત્રીધર્મોમાં વિધવાનાં વ્રતોના ભેદોના વિધિનું સારી રીતે નિરૂપણ કરેલું છે.

**શ્રી નારાયણ મુનિ બોલ્યા** : હે બ્રહ્મન્ ! વિધવા, એકાદશીઓ તથા જન્માષ્ટમી આદિ નિત્યવ્રતો (જે ન કરવાથી પ્રત્યવાય દોષ લાગે તેવા) વ્રતો કરે. એકાદશી આદિ વ્રતોમાં વાસુદેવની પૂજા આદરે સહિત જેમ હોય તેમ કરે. (૧) ધર્મનિષ્ઠ વિધવા નિરંતર વ્રતો કરે. ત્રણ રાત્રિ વ્રતનો ઉપવાસ અથવા પાંચ રાત્રિનાં ઉપવાસ, વ્રત અથવા પંદર દિવસના ઉપવાસરૂપી વ્રત કરે. તરુણઅવસ્થામાં કરનારીની શક્તિને અનુસારે વિકલ્પનાં વ્રતો જાણવાં; (૨) અથવા માસના ઉપવાસનું વ્રત અથવા ચાન્દ્રાયણ વ્રત કરે અથવા પરાકકૃચ્છ્ર અથવા તપ્તકૃચ્છ્ર કરે; (૩) અથવા યવાન્નથી અથવા ફલાહાર અથવા શાકાહાર અથવા પયોવ્રતથી પ્રાણ ધારણ કરે. પ્રાણ જ્યાં સુધી શરીરથી સ્વયં ન નીકળે ત્યાં સુધી પોતાના શરીરની સ્થિતિ રહે તેટલા માટે અન્ન-ભોજન કરવું પણ ઈન્દ્રિયોને ક્ષોભ થાય તેમ કરવું નહિ. (૪) વૈશાખ, કારતક અને મહામાસમાં વિશેષ નિયમો ધારવા તે કહે છે. સ્નાન, દાન, તીર્થયાત્રા અને શ્રીકૃષ્ણના નામનું ઉચ્ચારણ વારંવાર કરે. (૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

विष्णोर्नामग्रहं मुहुः ॥५॥ वैशाखे जलकुम्भांश्च कार्तिके घृतदीपकान् । माघे धान्यतिलान् दद्याद्विधवा सति वैभवे ॥६॥ प्रपा कार्या च वैशाखे देवे देया गलन्तिका । उपानद्व्यजनं छत्रं सूक्ष्मवासांसि चन्दनम् ॥७॥ सकर्पूरं च ताम्बूलं पुष्पदाम तथैव च । जलपात्राण्यनेकानि तथा पुष्पगृहाणि च ॥८॥ पानानि च विचित्राणि द्राक्षारम्भाफलानि च। तया देयानि विप्रेभ्यः पतिर्मे प्रीयतामिति ॥९॥ ऊर्जे यवान्नमश्नीयादेकान्नमथवा पुनः । वृन्ताकं सूरणं चैव शूकशिम्बीं च वर्जयेत् ॥१०॥ कार्तिके वर्जयेत्तैलं कार्तिके वर्जयेन्मधु । कार्तिके वर्जयेत्कांस्यं कार्तिके शुक्तसन्धितम् ॥११॥ कार्तिके मौननियमे घण्टां चारुं प्रदापयेत् । पत्रभुक्कांस्यपात्रं तु घृतपूर्णं द्विजाय च ॥१२॥ भूमिशय्याव्रते देया शय्या श्लक्ष्णा सतूलिका । फलत्यागे फलं देयं रसत्यागे च तद्रसः ॥१३॥ धान्यत्यागे च तद्धान्यमथवा शालयः स्मृताः । धेनूर्दद्यात्प्रयत्नेन सालङ्काराः सकाञ्चनाः ॥१४॥ एकतः सर्वदानानि दीपदानं तथैकतः । कार्तिके मासि तत्तस्मात्कर्तव्यं सर्वथा मतम् ॥१५॥ किञ्चिदभ्युदिते सूर्ये माघस्नानं समाचरेत् । यथाशक्त्या च नियमान्माघस्नात्री समाचरेत् ॥१६॥ पक्वान्नैर्भोजयेद्विप्रान् यतिनोऽपि तपस्विनः । लड्डुकैः फेणिकाभिश्च वटकैर्घुर्घुरादिभिः ॥१७॥ घृतपक्वैः समरिचैः शुचिकर्पूरवासितैः । गर्भे शर्करया पूर्णैर्नेत्रानन्दैः सुगन्धिभिः ॥१८॥
शुष्केन्धनानां भारांश्च दद्याच्छीतापनुत्तये । कञ्चुकं तूलगर्भं च तूलिकां सोपधानिकाम् ॥१९॥ मञ्जिष्ठारक्तवासांसि तथा तूलवतीं पटीम् । जातीफललवङ्गैलाताम्बूलानि बहून्यपि ॥२०॥ कम्बलांश्चित्रवर्णांश्च निर्वातानि गृहाणि च । मृदुलाः पादरक्षाश्च सुगन्ध्युद्वर्तनानि च ॥२१॥ दानानि ददती सा च दानेनानेन मे सदा । भर्तृस्वरूपो भगवान्प्रीयतामिति चोच्चरेत्

---

વિધવા, વૈભવ હોય તો વૈશાખ માસમાં જળના ઘડાઓ, કારતક માસમાં ઘીના દીવાઓ, માઘ માસમાં ધાન્ય તથા તિલોને આપે. (૬) વૈશાખ માસમાં વિધવાએ પાણીની પરબ કરાવવી. શિવ ઉપર ગળતી ચઢાવવા આપવી. ઉપાનહ (પગરખાં) વીરણના વાળાનો પંખો, છત્ર, સૂક્ષ્મ વસ્ત્રો, ચંદન; (૭) કપૂરે સહિત તાંબુલ તથા સુગંધી પુષ્પના હાર તથા અનેક જલપાત્રો તથા પુષ્પોના હારો. (૮) વિવિધ પ્રકારના પેય પદાર્થો, દ્રાક્ષ, કેળા, તે વિધવાએ 'મારા પતિ પ્રસન્ન થાઓ' એમ ઉચ્ચારણ કરીને બ્રાહ્મણોને વૈશાખ માસમાં આપવા. (૯) કારતક માસમાં યવાન્ન (જવ) જમે અથવા જે કોઈ એક અન્ન જમે તથા વૃન્તાક, સૂરણ, શીંગમાં થયેલા ધાન્ય (મગ વગેરે) વર્જે. (૧૦) કાર્તિક માસમાં તેલનો ત્યાગ કરવો. કારતકમાં મધનો ત્યાગ કરે, કારતક માસમાં કાંસાના પાત્રમાં ભોજન ત્યાગ કરે. વાસી શાક ખાય નહીં. (૧૧) કારતક માસમાં મૌનવ્રતમાં સારા નાદવાળી ઘંટા બ્રાહ્મણને અપાવે, પત્રાવળીમાં જ ભોજન કરનારી વિધવા ઘૃતથી ભરેલું કાંસાનું પાત્ર બ્રાહ્મણોને આપે. (૧૨) ભૂમિમાં શય્યા કરનારી વ્રતવાળી વિધવાએ સુંદર રૂની ગોદડીએ સહિત શય્યા આપવી. ફલના ત્યાગમાં તે ફલ આપવું, રસ ત્યાગે, પોતે ત્યાગ કરેલા રસ, ઘી વગેરે આપવા. (૧૩) ધાન્યના ત્યાગમાં જે ધાન્ય ત્યાગ કર્યું હોય તે આપવું અથવા ડાંગર આપવી. અલંકારે સહિત, સુવર્ણ દક્ષિણાએ સહિત ગાયો કારતક માસમાં બ્રાહ્મણોને અર્પણ કરે.(૧૪) એક પક્ષમાં સર્વ દાનો તથા એક પક્ષમાં કારતક માસમાં દીપદાન સમાન થાય છે. માટે કારતક માસમાં દીપદાન સર્વ પ્રકારે કરવું એમ માનેલું છે. (૧૫) સૂર્યનારાયણ લગારેક ઉદય પામે ત્યારે માઘ સ્નાનનું આચરણ કરવું (તે સમયે ઠંડી વધારે લાગે માટે) માઘ માસમાં પ્રાતઃ સ્નાન કરનાર વિધવા શક્તિ પ્રમાણે કારતક માસમાં કહેલા નિયમોને આચરણ કરે. (૧૬) બ્રાહ્મણો, સન્યાસીઓ અને તપસ્વીઓને પણ લાડુ, સુતરફેણી, વડા, ઘૂઘરા, જલેબી, શીરો વગેરે પકવાનોથી ભોજન કરાવે. (૧૭) નવીન ઘીથી પકવેલાં, મરચાં સહિત અથવા મરીએ સહિત, શુદ્ધ કર્પૂરથી સુગંધિમાન, સાકરથી પૂર્ણ, નેત્રોને આનંદ આપનારા, સુખ કરનારા સુગંધિવાળા ભોજનોથી બ્રાહ્મણોને ભોજન કરાવે. (૧૮) સુકાયેલાં લાકડાંના ભારા, રૂ ભરેલી ડગલી, ઉશીંકાએ સહિત ગાદલું, ઠંડીના નિવારણ માટે મંજીઠા રંગના વસ્ત્રો તથા રૂની ભરેલી ઓઢવા યોગ્ય રજાઈ આપે. જાયફળ, લવિંગ, એલાયચીએ યુક્ત તામ્બૂલો આપે. (૧૯-૨૦) વિચિત્ર વર્ણવાળા કામળાઓ, વાયુસંચારે રહિત ગૃહો, કોમળ ઉપાનહ (પગરખાં)ની જોડી અતિ સુન્દર સુગંધિવાળા, સ્નાન કરવાના ચૂર્ણો આપે. (૨૧) દાનોને આપતી વિધવા આ દાનથી પતિસ્વરૂપ ભગવાન મને સદા પ્રસન્ન થાઓ. આ પ્રમાણે ઉચ્ચારણ કરે. (૨૨) વિધવા પોતાની શક્તિને અનુસરીને કહેલા પ્રકારે વિવિધ નિયમો અને વ્રતોથી વૈશાખ, કારતક, માઘ, માસોને

॥२२॥ एवंविधैश्च विधवा विविधैर्नियमैर्व्रतैः । वैशाखान्कार्तिकान्माघान् यथाशक्त्यतिवाहयेत् ॥२३॥ व्रतोपवासहीना तु नारी भ्रष्टा भवेद्ध्रुवम् । कामाकुला स्याच्च यथा ह्यूर्जे मासि शुनी कपी ॥२४॥ शृणुयात्सच्छास्त्रकथां वक्तुर्धर्मपरायणात्। उपविश्य स्त्रीसमे सा पालयन्ती निजं व्रतम् ॥२५॥ कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत् । अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु ॥२६॥ एतान्धर्मांस्तु या नारी चिन्तयन्ती मृतं पतिम् । पालयेत्सा सतीलोकं प्राप्नुयाद्वै सभर्तृका ॥२७॥ कृष्णमेव पतिमात्मनस्तु या चिन्तयन्त्यविरतं भजेच्च तम् । संस्थिता च निजधर्मवर्त्मनि तत्पदं द्विज! लभेत सा परम् ॥२८॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे स्त्रीधर्मेषु विधवानां व्रतविशेषविधिनिरूपणनामा चतुस्त्रिंशोऽध्यायः ॥३४॥

श्रीनारायणमुनिरुवाच – **विधवायाः क्वचिद्धर्मच्युतौ वच्म्यथ निष्कृतिम् । यां कृत्वा साऽऽप्नुयात्पूर्णं स्वधर्मफलमुत्तमम् ॥१॥ कबरीबन्धने नारी पर्यङ्कशयने तथा । धर्महीनस्त्रियाः सङ्गे कुर्यादेकमुपोषणम् ॥२॥ द्विर्भोजने तथा क्रोधे नग्नस्नानेऽतिभोजने। तैलाभ्यङ्गे कृते च स्त्री कुर्या० ॥३॥ गन्धद्रव्योपभोगे च वृषभारोहणे तथा । अतिसर्पिःपयःपाने कुर्या० ॥४॥ उत्तेजकेऽतिमिष्टान्ने ताम्बूले मादके तथा । भक्षिते सा तु विधवा कुर्या० ॥५॥ दिव्ये सूक्ष्मे तथा चित्रे कौसुम्भे चांशुके धृते। कञ्चुके च धृते नारी कुर्या० ॥६॥ विकृतं च धृते वस्त्रे पाणिपद्दन्तरञ्जने । सिन्दूरकुङ्कुमधृतौ कुर्या०**

---

નિર્ગમન કરે. (૨૩) **વ્રતો અને ઉપવાસ રહિત વિધવા નારી ધર્મ થકી નિશ્ચે ભ્રષ્ટ થાય** અને કારતક માસમાં કૂતરી જ જેમ તથા વાનરી જ જેમ, તેમ કામથી વિહ્‌વલ થાય; માટે વ્રતો તથા ઉપવાસ આચરે. (૨૪) વિધવા, સ્ત્રીઓના સમૂહમાં બેસીને પોતાનું વ્રત પુરુષોને નહિ જોવારૂપને પાલન કરતી સતી સ્વધર્મનિષ્ઠ પુરાણ વાંચનારથી સત્શાસ્ત્રની કથા સાંભળે. (૨૫) શરીર, મન અને વાણીથી યત્નથી ધર્મનું આચરણ કરે. જે સ્વર્ગ પ્રાપ્તિનું સાધન નથી એવું કર્મ; લોકોમાં વિદ્વેષ કરનાર, ધર્મપણ આચરણ કરવો નહિ. (૨૬) જે વિધવા સ્ત્રી મરેલા પતિને ચિન્તવન કરતી મેં કહેલા ધર્મોને પાલન કરે તે વિધવા સ્ત્રી પોતાના પતિએ સહિત સતી લોકને પામે. (૨૭)

હે દ્વિજ ! જે વિધવા તો કૃષ્ણને જ પોતાના પતિને ચિન્તવતી સતી પોતાના ધર્મ માર્ગમાં રહેલી સતી નિરન્તર કૃષ્ણને ભજે તે વિધવા સર્વોત્કૃષ્ટ શ્રીકૃષ્ણના **ગોલોક** નામના ધામને પામે. (૨૮)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે સ્ત્રી ધર્મેષુ વિધવાનાં વ્રતવિશેષવિધિ નિરૂપણનામા ચતુસ્ત્રિંશોઽધ્યાયઃ (૩૪)*

## અધ્યાય : ૩૫

### સ્ત્રીધર્મોમાં વિધવાના ધર્મમાં ભંગ થાય તેના પ્રાયશ્ચિત્તનું સ્પષ્ટપણે નિરૂપણ કર્યું છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે વિપ્ર ! હવે વિધવાને ક્યારેક અજ્ઞાનથી ધર્મભંગ થાય તો પ્રાયશ્ચિત્ત કહું છું જે પ્રાયશ્ચિત્ત કરીને સંપૂર્ણ સ્વધર્મનું ફળ પામે. (૧) વિધવા નારી અંબોડો વાળે તથા પલંગમાં શયન કરે તથા ધર્મહીન સ્ત્રીનો સંગ કરે તો એક ઉપવાસ કરે એવી રીતે સર્વ સ્થાનમાં એક એક ઉપવાસ જાણવો. (૨) બે વાર ભોજન કરે તો તથા ક્રોધ કરે તથા નગ્ન સ્નાન કરે તથા અતિ ભોજન કરે તથા આપત્કાળ પડ્યા વિના તેલથી અભ્યંગ સ્નાન કરે તો વિધવા નારી એક એક જુદો ઉપવાસ કરે. (૩) સુગંધિમાન અત્તર આદિનો ઉપભોગ કરે તથા બલીવર્દ ઉપર બેસે તથા આપત્કાળ પડ્યા વિના અતિ ઘી દૂધનું પાન કરે તો એક ઉપવાસ કરે. (૪) ઉત્તેજક લવિંગ એલાયચી, જાયફળ, વગેરે ભક્ષણ કરે તો તથા મિષ્ટાન્ન લાડુ જલેબી વગેરે પકવાન અતિ ભક્ષણ કરે તો તથા તાંબુલ ભક્ષણ કરે તો તથા માદક વસ્તુ ભક્ષણ કરે તો વિધવા સ્ત્રી એક એક ઉપવાસ કરે. (૫) દિવ્ય (મહામૂલ્યવાળા) વસ્ત્ર ધારણ કરે તથા ચિત્ર-વિચિત્ર વસ્ત્ર ધારણ કરે, કૌસુંભી વસ્ત્ર તથા કંચુકી વિધવા સ્ત્રી ધારણ કરે તો એક ઉપવાસ કરે. (૬) દેશ અને કુલાચારથી વિરુદ્ધ વેશ ધારણ કરે, હાથ પગ દાંતને અળતાદિકથી રંગે અને સિન્દૂર તથા કુંકુમને ધારણ કરે તો એક ઉપવાસ કરે. (૭) પુષ્પની માળા ચંદન

॥७॥ पुष्पस्त्रजश्चन्दनस्य शङ्खानामञ्जनस्य च । धारणे भालपत्र्याश्च कुर्या० ॥८॥ विष्णुप्रसादिगन्धादेर्ललाटादौ धृतावपि । तादृक्पुष्पस्त्रजश्चाङ्गे कुर्या० ॥९॥ धातुयुक्ताम्बरधृतौ धात्वलङ्कारधारणे । सुवासिनीवेषधृतौ कुर्या० ॥१०॥ सन्न्यासिनीवेषधृतौ नर्तकीवेषधारणे । पुंवेषस्य धृतौ च स्त्री कुर्या० ॥११॥ भालकेशोत्पाटने च विना कार्यं परिभ्रमे । परगेहोपवेशे च कुर्या०॥१२॥ पैत्रपक्षोपहासोक्तौ पित्रुत्सङ्गोपवेशने । अम्बाग्रे ग्राम्यधर्मोक्तौ कुर्या० ॥१३॥ श्रवणे कीर्तने च स्त्री शृङ्गारवचसां कृते । गालिदाने च विधवा कुर्या० ॥१४॥ अपशब्दोच्चारणे च होलिकोत्क्रीडने तथा । मिथ्यापवादे च कृते कुर्या० ॥१५॥ निर्लज्जवादे श्वाशुर्यैः कृतेऽथो पापदुष्टया । स्त्रिया मैत्र्यां कृतायां सा कुर्या० ॥१६॥ परिव्राजिकया दूत्या नीचजात्या च योषिता । मैत्र्यां कृतायां कामुक्या कुर्या० ॥१७॥ पाषण्डिन्या यवन्या च मन्त्रयन्त्रविदा स्त्रिया । मैत्र्यां कृतायां नास्तिक्या कुर्या० ॥१८॥ निर्लज्जयौषधिविदा गर्भघ्न्या धूर्तया च सा । मैत्र्यां कृतायां विधवा कुर्या० ॥१९॥ पतिव्रतेक्षया पुंसोऽभिशप्तस्य गृहे गतौ। कृतायां नीचजातेश्च कुर्या० ॥२०॥ नृत्यगीतोद्वाहसार्थसुवेषपुरुषोत्सवान् । द्रष्टुं कृते तु गमने कुर्या० ॥२१॥ क्रीडतां वीक्षणे स्वैरं पुंसां चैकाकिनीगतौ । कामाच्च पुरुषेक्षायां कुर्या० ॥२२॥ पुंरूपगुणवार्तानां श्रवणे कीर्तने तथा । पुंसोऽङ्गस्पर्शने च स्त्री कुर्या० ॥२३॥ धौतादिभिन्नपुंवस्त्रस्पर्शे पुंसा च भाषणे । पौंस्ने च दुष्टसङ्कल्पे कुर्या०॥२४॥ पुंसश्चित्रे च लिखिते स्पृष्टे मैथुनिपुत्तले । स्वकार्यसिद्ध्यै पुंमैत्र्यां कुर्या० ॥२५॥ पशुपक्ष्यादियभने पुंगुह्ये च समीक्षिते । करदृग्भ्रमपुंबोधे कुर्या० ॥२६॥ पुंदृष्ट्या सह दृग्बन्धे पुंसश्चोत्सर्जनस्थले । तत्क्रियाकरणे नारी कुर्या० ॥२७॥ धनुर्मानाभ्यन्तरेण गतौ पुंसोऽन्तिके तथा । अनापदि

---

અને શંખલાની ચુડીઓ અને કાજલ તથા લલાટનું ભૂષણ ધારણ કરે તો એક ઉપવાસ કરે. (૮) વિષ્ણુની પ્રસાદી ચંદનાદિ સુગંધિનું લલાટમાં ધારણ કરે તેવી રીતે વિષ્ણુની પ્રસાદિભૂત પુષ્પની માલા કંઠમાં ધારણ કરે તો એક ઉપવાસ કરે. (૯) ધાતુયુક્ત અલંકાર અને સુવાસિનીના જેવો વેષ ધારણ કરે તો એક ઉપવાસ કરે. (૧૦) સંન્યાસિની તથા નર્તકીના જેવો વેષ ધારણ કરે તો વિધવા નારી એક ઉપવાસ કરે અને પુરુષના જેવો વેષ ધારણ કરે તો એક ઉપવાસ કરે. (૧૧) ભાલના કેશ ઉખાડવામાં, કાર્ય વિના ફરવા જવામાં અને પારકે ઘેર બેસવા જવામાં એકાકી જાય તો એક ઉપવાસ કરે. (૧૨) પિતાના પક્ષમાં હાસ્યની ઉક્તિ કર્યે સતે, પિતાના ખોળામાં બેઠે સતે તથા માતાની આગળ મૈથુન વાર્તાના ઉચ્ચારણમાં એક ઉપવાસ કરે. (૧૩) સ્ત્રી-પુરુષના સંયોગની વાર્તાઓના શ્રવણ, કીર્તન તથા ગાલીદાન કર્યે સતે, વિધવા સ્ત્રી એક ઉપવાસ કરે. (૧૪) અપશબ્દના ઉચ્ચારણમાં તથા હોળીની ક્રિયામાં તથા મિથ્યાપવાદ કર્યે સતે એક ઉપવાસ કરે. (૧૫) સસરાના પક્ષના માણસો સાથે નિર્લજ્જપણે વાદ કરે તો અને પાપી દુષ્ટા સ્ત્રી સાથે મૈત્રી કર્યે સતે વિધવા એક ઉપવાસ કરે તથા પાખંડી, યવનની સ્ત્રી, મંત્ર યંત્રને જાણનારી, નાસ્તિકી, હરિના અવતારોમાં અવિશ્વાસીની સ્ત્રીની સાથે મૈત્રી કર્યે સતે એક ઉપવાસ કરે. (૧૬-૧૭-૧૮) નિર્લજ્જ, વશીકરણાદિ ઔષધિ જાણનારી, ગર્ભને પાડનારી અને ધૂર્તા આ સ્ત્રીઓ સાથે મૈત્રી કરે તો એક ઉપવાસ કરે. (૧૯) અભિશાપવાળા પુરુષના ગૃહમાં પતિવ્રતા સ્ત્રીનાં દર્શન માટે ગયે સતે તથા નીચ જાતિમાં વર્તતી ધર્મવાળી સ્ત્રીના ગૃહમાં બેસવા જાય તો એક ઉપવાસ કરે. (૨૦) નૃત્ય, ગીત, વિવાહ, જનસમુદાય અને સુવેશવાળો પુરુષ તથા ઉત્સવ એ આદિને જોવા માટે ગયે સતે એક ઉપવાસ કરે. (૨૧) પોતાની ઇચ્છાથી ક્રીડા કરતાં પુરુષોને જુવે તથા કોઈ સ્થળે એકાકી જાય તો એક ઉપવાસ કરે અને કામ ભાવથી પુરુષને જોવામાં એક ઉપવાસ કરે. (૨૨) પુરુષ સંબંધી રૂપગુણની વાર્તાના શ્રવણમાં તથા કીર્તનમાં તથા પુરુષના અંગ સ્પર્શમાં વિધવા નારી એક ઉપવાસ કરે. (૨૩) ધોયેલાથી જુદું જે પુરુષનું વસ્ત્ર પુરુષે અંગે ધારણ કરેલું પોતે ઉતારીને ખીંટીએ મૂકેલું હોય તેના સ્પર્શમાં અને પુરુષની સાથે બોલવામાં, પુરુષ સંબંધિ દુષ્ટ સંકલ્પ-કામભાવથી સંકલ્પ કરે તો એક ઉપવાસ કરે. (૨૪) પુરુષનું ચિત્ર ચિત્રે તો, મૈથુનીપુતલાને સ્પર્શ કરે તો, પોતાના કાર્યની સિદ્ધિ માટે પણ પુરુષની સાથે મૈત્રી કરે તો એક ઉપવાસ કરે. (૨૫) પશુ, પક્ષ્યાદિના મૈથુનને બુદ્ધિપૂર્વક જોવાય તો અને પુરુષના ગુહ્યાંગને જોયે સતે ભાષણ કર્યા વગર હાથની ચેષ્ટાથી પુરુષને બોધ કરે તો એક ઉપવાસ કરે. (૨૬) પુરુષની દૃષ્ટિ સાથે દૃષ્ટિ મળી જાય અને પુરુષના મળ, મૂત્રના વિસર્જન સ્થાનમાં મળમૂત્રોત્સર્જન કરે તો વિધવા સ્ત્રી એક ઉપવાસ કરે. (૨૭) તથા આપત્કાળ પડ્યા વિના ચાર હાથથી પુરુષની સમીપમાં ચાલે તો વિધવા સ્ત્રી એક ઉપવાસ કરે. (૨૮) જેના ગૃહમાં મેડા ઉપર અથવા નીચેની ભૂમિમાં એકલો પુરુષ સૂતો હોય

कृतायां सा कुर्या० ॥२८॥ ऊर्ध्वं वाधः पुमान् यत्र सुप्तः स्यान्निशि तद्गृहे । एकाकिनी स्वपेद्या सा कुर्या० ॥२९॥ पुंसभादृश्यहृत्तुन्दसक्थिर्योपविशेत्तथा । स्वाङ्गचापल्यकर्त्री च कुर्या० ॥३०॥ पैत्रश्वाशुर्यसङ्गस्वव्यवहारविधापने । आदर्शे च मुखेक्षायां कुर्या० ॥३१॥ सह याने कृते यूना बन्धुनाऽपि च वर्त्मनि । रहःस्थानोपवेशे च कुर्या० ॥३२॥ मानसस्याथ बाह्यस्य पूजनस्याकृतौ हरेः । अकृतौ नित्यजाप्यस्य कुर्या० ॥३३॥ आवश्यकं गेहकार्यं विना भक्तिं च सत्पतेः । व्यर्थे कालातिक्रमे च कुर्या० ॥३४॥ गेहद्वारान्तरे कश्चित्प्रविश्याशु पुमान्बहिः । निर्गच्छेत्तत्र चैका चेत्कुर्या० ॥३५॥ यत्रैका स्यात्स्वयं तत्र तिष्ठेदेत्य पुमांस्तु यः । आक्रोश्य दूरयेत्तं चेत् कुर्या० ॥३६॥ निष्कासयेन्न चेत्तं तु स्वयं तत्र स्थिता भवेत् । तर्हि सा प्रकुर्वीत चतुर्दिनमुपोषणम् ॥३७॥ स्वप्ने पुरुषसङ्गे च कुर्यादेकमुपोषणम् । तत्र स्वबन्धुसङ्गे तु पादकृच्छ्रं व्रतं चरेत् ॥३८॥ स्वधनस्य व्ययं कृत्वा जीविकार्थं ततश्चरेत् । याऽन्यसेवां च भैक्ष्यं वा सा चान्द्रायणमाचरेत् ॥३९॥ जीविकार्थे क्रयादौ च पुंस्पर्शे स्नानतः शुचिः । भाषणे तु जपेद्विष्णोर्नाम्नां पञ्चशतं च सा ॥४०॥
करीषतृणमृत्काष्ठगोमयाद्याहृतौ च सा । आवश्यके तु पुंस्पर्शे जाते स्नानाद्विशुध्यति ॥४१॥ स्वसम्बन्धिनराणां च कामात्क्वापि समीक्षणे । जाते वा भाषणादौ च निष्कृतिर्द्विगुणोदिता ॥४२॥ एकपत्नीव्रतस्त्यागी मृतस्त्रिः शरणागतः । अनिच्छुरथ विश्वासी पुमांसः षडिमे तु ये ॥४३॥ तत्रैकस्य सकृज्जाते सङ्गे वर्षं दिनान्तरे । पिबेन्निर्लवणान्सक्तूंस्ततः शुध्येत्तु साऽबला ॥४४॥ धारणापारणाख्येऽस्मिन्व्रते भोजनवासरे । एकमन्नं तु वाऽश्नीयादशक्ता सैन्धवान्वितम् ॥४५॥ अन्नद्वयं

તેવા પ્રકારના ભવનમાં રાત્રિમાં જે વિધવા એકલી સૂએ તો તે એક ઉપવાસ કરે. (૨૯) જે વિધવા, પુરુષની સભાના જનો હૃદય, ઉદર, સાથળ જોઈ શકે તેમ બેસે તથા જે પોતાના અંગની ચંચળતા કરનારી થાય તે વિધવા એક ઉપવાસ કરે. (૩૦) પોતાના પિતા અને સસરાના પક્ષથી છાનું જેમ હોય તેમ વ્યવહાર વિધાપન= પુરુષની સાથે સ્ત્રી દ્વારા વ્યવહારિક કાર્ય સંપાદન કર્યે સતે અને દર્પણમાં મુખ જોયે સતે એક ઉપવાસ કરે. (૩૧) યુવાન એવા પોતાના ભાઈની સાથે પણ તરુણા વિધવાએ ગમન કર્યું હોય તો, તથા એકાંત સ્થાનમાં બેસે તો એક ઉપવાસ કરે. (૩૨) હરિનું માનસોપચારથી કરવા યોગ્ય અને બાહ્યોપચારથી કરવા યોગ્ય પૂજન ના કર્યું હોય તો, તથા પ્રતિદિન જપ કરવા યોગ્ય અષ્ટાક્ષર મંત્રનો જપ ના કર્યો હોય તો એક ઉપવાસ કરે. (૩૩) અવશ્ય પ્રાપ્ત ઘરનું કાર્ય કરીને શ્રીકૃષ્ણની ભક્તિ શ્રવણ=કીર્તનાદિ ભક્તિ-નવ પ્રકારનું ભજન કર્યા વિના વ્યર્થ કાળ નિર્ગમન કર્યે સતે એક ઉપવાસ કરે. (૩૪) જે ગૃહની અંદર કોઈ પુરુષ પ્રવેશ કરીને નીકળે અને તે ઘરમાં જો પોતે એકલી હોય તો એક ઉપવાસ કરે. (૩૫) જે ઘરમાં પોતે એકલી હોય તે ગૃહમાં જે પુરુષ આવીને ઊભો રહે ત્યારે તે પુરુષને ઊંચેથી 'દૂર જાઓ દૂર જાઓ', એમ કહી દૂર કરે તો પણ એક ઉપવાસ કરે. (૩૬) જો ઘેર આવેલા પુરુષને કાઢી મૂકે નહીં અને પોતે ત્યાં ઊભી રહે તો તે વિધવા તો ચાર દિવસ સુધી ઉપવાસ કરે. (૩૭) સ્વપ્નમાં પર પુરુષનો સંગ થયો હોય તો એક ઉપવાસ કરે. (૩૮) જે વિધવા પોતાના જીવનપર્યન્ત દ્રવ્યનો ધર્મનિમિત્તે ખર્ચ કરીને પછી જીવિકા માટે બીજાની સેવા અથવા ભિક્ષાચર્યા કરે તો તે વિધવા ચાંદ્રાયણ વ્રત આચરણ કરે. (૩૯) જીવિકા માટે વેચાતું લેવું અને તે દેવું, કૃષિ સેવા વગેરેમાં, વ્યવહારમાં પુરુષનો સ્પર્શ થાય તો વિધવા સ્નાનથી શુદ્ધ થાય. પુરુષ સાથે બોલે તો શ્રીકૃષ્ણના પાંચસો નામ જપે. (૪૦) છાંણા, કાષ્ટ, મૃત્તિકા, છાંણ વગેરે પોતાને ઘેર લાવવા તે નિમિત્તે આવશ્યક, ભારો બંધાવવો ઉંચકવો વગેરે કાર્યમાં પુરુષનો સ્પર્શ થાય તો સ્નાનથી શુદ્ધિ થાય. (૪૧) ક્યારેક કામભાવથી પોતાના સંબંધી જનોને જુએ તો અથવા ભાષણ વગેરે થાય તો બમણું પ્રાયશ્ચિત્ત કરવું બીજા પુરુષને જોવામાં એક ઉપવાસ કહ્યો છે તે અહીંયાં બે કરવા. (૪૨) એક પત્નીવ્રતવાળો, ત્યાગી, તથા મરી ગઈ છે સ્ત્રી જેની એવો, શરણે આવેલો, ઇચ્છા નહિ કરતો અને વિશ્વાસી આ છો પુરુષો છે (૪૩) તે છો પુરુષમાં એક પુરુષના સંગમાં આઠમું બ્રહ્મચર્યનો એક વાર ભંગ થયો હોય તો વિધવા નારી એક વર્ષ સુધી એક દિવસે ઉપવાસ કરીને બીજે દિવસ પારણા કરે; પારણાને દિવસે લવણ વિનાનો સાથવો પીવે, ત્યાર પછી શુદ્ધ થાય. (૪૪) અથવા સક્તુપાન કરવા અસમર્થા વિધવા આ ધારણા પારણા વ્રતમાં ભોજનસમયમાં સૈન્ધવેયુક્ત એક અન્ન જમે. (૪૫) એક અન્ન જમવામાં પણ અશક્ત વિધવા તો લવણે સહિત બે અન્ન ભક્ષણ કરે. ઉપવાસના દિવસે કેવળ જળ જ પીવે અથવા છાશ જ પીવે. (૪૬) આ વ્રત કર્યે સતે જો રોગાદિ આપત્તિ

सलवणं तत्राशक्ता तु भक्षयेत् । उपवासदिने त्वम्बु सा पिबेत्तक्रमेव वा ॥४६॥ क्रियमाणे व्रते यर्हि रोगाद्यापदिहापतेत् । तर्हि तस्या व्यपगमे व्रतशेषं समापयेत् ॥४७॥ वर्षव्रते त्वशक्ता स्त्री पादोनं व्रतमाचरेत् । अत्यशक्ता तदर्धं वा तदर्धं वा ततः शुचिः ॥४८॥ प्रायश्चित्तमिदं प्रोक्तं स्वपापे विदिते जनैः । रहस्ये त्वत्र वक्ष्यामि निष्कृतिं शास्त्रसम्मताम् ॥४९॥ विष्णोर्मूर्तिं पुरोधाय निर्निमेषविलोचना । दृढासना जपेन्मन्त्रं मौनयुक् चतुरक्षरम् ॥५०॥ सहस्त्राण्यन्वहं पञ्च सा षण्मासान् जपेन्मनुम्। जपान्ते भोजनं कुर्यादेकवारं जितेन्द्रिया ॥५१॥ एकपत्नीव्रतादौ तु भ्रष्टायाः पुंसि योषितः । व्रतं यत्कथितं तच्च तदन्यत्रार्धमीरितम् ॥५२॥ अज्ञानान्मद्यपाने च तथा मांसाशने कृते । स्तैन्ये सुवर्णस्य च सा व्रतं चान्द्रायणं चरेत् ॥५३॥ प्रायश्चित्तं त्विह प्रोक्तं धर्मशास्त्रेऽस्ति वै महत् । कलौ कर्तुमशक्यं तदत एतावदीरितम् ॥५४॥ एकाहिके रन्धितेऽन्ने शाकमूलफले दले । हृते च दधिदुग्धादावेकं दिनमभोजनम् ॥५५॥ दिनद्वयं तूपवसेन्मिष्टान्ने च घृते हृते । एवमन्यत्र विज्ञेयं प्रायश्चित्तं यथोचितम् ॥५६॥ लिक्षायूकामत्कुणादिसूक्ष्मजन्तुवधे तु सा । अज्ञानतः कृते नारी कुर्यादेकमुपोषणम् ॥५७॥ मूषकादिवधे जाते क्वाप्यज्ञानात्तु साऽऽचरेत् । उपवासद्वयं नारी कीर्तयन्त्यभिधा हरेः ॥५८॥ उत्तरोत्तरजीवानां ज्ञात्वेत्थं महदल्पताम् । प्रायश्चित्तं तथा कुर्याद्देशकालादि वीक्ष्य च ॥५९॥ आत्मघाते कृते नारी भुक्त्वैव यमयातनाः । जायते तामसीष्वेव प्रेतसर्पादियोनिषु ॥६०॥ एकादशीनां च हरेर्जन्माहानामनापदि । उपवासानाचरणे कुर्याच्चान्द्रायणव्रतम् ॥६१॥ यतिनो वर्णिनश्चान्ने भुक्तेऽनाश्रमिणस्तथा । अज्ञानादपि कुर्वीत व्रतं चान्द्रायणं शुभम् ॥६२॥ जातिभ्रंशकरे

---

આવે તો તે રોગની નિવૃત્તિ થાય ત્યારે બાકીનું સમાપ્ત કરવું. (૪૭) એકવર્ષ વ્રતના આચરણમાં અશક્તા વિધવા નારીએ તો એક પાદ રહિત અર્થાત્ નવ માસ વ્રત કરવું અથવા છોમાસાત્મક આચરે અતિ અશક્તા તે ત્રિમાસાત્મક આચરણ કરે. તે વ્રતના આચરણથી શુદ્ધ થાય. (૪૮) જનોએ પોતાનું પાપ જાણ્યું હોય તો પૂર્વે કહેલું પ્રાયશ્ચિત્ત કહ્યું છે. જનોએ ના જાણ્યું હોય તો પુરુષના સંગાત્મક પાપમાં તો **શાસ્ત્ર સમ્મત પ્રાયશ્ચિત્ત** કહું છું. (૪૯) વિષ્ણુની મૂર્તિ પોતાની આગળ મૂકીને નિર્નિમેષ દૃષ્ટિવાળી દૃઢ આસનવાળી, મંત્રના વર્ણ વિના બીજું નહિ બોલતી સતી વિધવા ચાર અક્ષરયુક્ત નારાયણ નામનો મંત્ર જપે. (૫૦) તે વિધવા છ માસ સુધી દરરોજ પાંચ હજાર, ચાર અક્ષરનો મંત્ર જિતેન્દ્રિયા થઈને જપે. જપના અન્તમાં એકવાર ભોજન કરે. (૫૧) એક પત્નીવ્રતવાળા વગેરે છો પ્રકારના પુરુષોમાં કોઈ પણ પુરુષમાં ભ્રષ્ટ થયેલી સ્ત્રીને જે વ્રત કહ્યું છે. તેનાથી ભિન્ન અન્ય પુરુષમાં ભ્રષ્ટ સ્ત્રીને અર્ધું કહ્યું છે. (૫૨) અજ્ઞાનથી મદ્યપાન થયું હોય તથા માંસનું ભક્ષણ થયું હોય, તથા સોળ માસા પરિમિત સુવર્ણની ચોરી કરી હોય તો તે વિધવા સ્ત્રી ચાન્દ્રાયણવ્રત કરે. (૫૩) પુરુષનાં સંગમાં અને મદ્યપાનાદિમાં જે પ્રાયશ્ચિત્ત કહ્યું તે ધર્મશાસ્ત્રમાં તો અતિશય કહ્યું છે તે મહાપ્રાયશ્ચિત્ત કલિયુગમાં કરવા માટે અશક્ય છે. માટે આટલું કહ્યું છે. (૫૪) એક દિવસ પોતાને ભોજન (પરિપૂર્ણ ભોજન) થાય તેટલું રાંધેલું અન્ન ચોરે તો તથા શાક, મૂળો અને પાંદડા, દહીં-દૂધની ચોરી કરી હોય તો એક દિવસ દરેક વસ્તુમાં ભિન્ન ભિન્ન ઉપવાસ કરે. (૫૫) એક દિવસ જમે તેટલા મિષ્ટાન્નની ચોરી કરે તો, અને ઘીની ચોરી કરે તો બે દિવસ ઉપવાસ કરે : આ પ્રકારે કહેલી વસ્તુથી બીજી વસ્તુઓ વસ્ત્ર, પાત્ર, અલંકારાદિની ચોરી કર્યે સતે યથાયોગ્ય પ્રાયશ્ચિત્ત (મૂલ્યના અધિક ન્યૂનપણાને અનુસરીને) જાણવું. (૫૬) લીખ, જૂ, માંકડ, ચાંચડ આદિ મચ્છર, કીડીઓ વગેરેનો અજ્ઞાનથી નાશ થયે સતે વિધવા નારી એક ઉપવાસ કરે. (૫૭) ક્યારેક અજ્ઞાનથી ઉંદર વગેરે સ્થૂળ જંતુનો વિનાશ થયો હોય તો વિધવા નારી હરિનાં નામો ઉચ્ચારણ કરતી સતી બે ઉપવાસ કરે. (૫૮) આ પ્રકારે ઉત્તરોત્તર જીવોની મહત્તા અને અલ્પતા જાણીને દેશ-કાલાદિ જોઈને યથાયોગ્ય પ્રાયશ્ચિત્ત કરે. (૫૯) આત્મઘાત કર્યે સતે વિધવા નારી યમયાતનાઓ ભોગવીને તમોગુણપ્રધાન પ્રેત-સર્પાદિ યોનિઓમાં જ ઉત્પન્ન થાય છે. (માટે આત્મઘાત કરવો નહિ.) (૬૦) આપત્કાલ પડ્યા વિના એકાદશીના તથા હરિના પ્રાદુર્ભાવ દિવસોના ઉપવાસો ના થયા હોય તો ચાન્દ્રાયણ વ્રત કરે. (૬૧) સંન્યાસીઓ અને વર્ણિઓ તથા અનાશ્રમીઓના અન્નનું અજ્ઞાનથી પણ ભોજન થયું હોય તો શુભ ચાન્દ્રાયણ વ્રત કરે. (૬૨) અજ્ઞાનથી જાતિ ભ્રંશકર કર્મ કર્યે સતે વિધવા હરિનું સ્મરણ કરતી સતી ચાન્દ્રાયણ વ્રત કરે. (૬૩) મેં કહેલું આ પ્રાયશ્ચિત્ત અજ્ઞાનથી એક વાર થયે સતે, કબરીબંધ વગેરે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

**कर्मण्यज्ञानाच्च कृते सति । चान्द्रायणं प्रकुर्वीत स्मरन्ती हरिमेव सा ॥६३॥ अज्ञानतः सकृज्जाते व्रतभङ्गे मयोदितम् । प्रायश्चित्तमिदं ज्ञेयं सर्वत्रापि न चान्यथा ॥६४॥ प्रायश्चित्तोपवासेषु भगवन्नामकीर्तनम् । दिवा रात्रौ च कर्तव्यं तेन पूर्णं फलं भवेत् ॥६५॥ प्रायश्चित्तोपवासेषु त्वेकादश्याद्युपोषणम् । गणयेन्नैव नारी च प्रायश्चित्तं प्रकुर्वती ॥६६॥ शुद्ध्यर्थं उपवासश्चेदेकादश्याद्युपोषणे । प्राप्तः स्यात्तर्हि तं कुर्यात्तृतीये वासरे पृथक् ॥६७॥ प्रायश्चित्तोपवासे च क्रियमाणे पुनर्यदि । आपतेदुपवासोऽन्यः कुर्यात्तन्त्रेण तं तदा ॥६८॥ प्रायश्चित्तोपवासाहे नीरतक्रेतरत्तु सा । न किञ्चिदद्याद्विधवा फलमूलाद्यपि क्वचित् ॥६९॥ व्रतभङ्गे तु या नारी प्रायश्चित्तं करिष्यति । गोलोके प्राप्स्यति सुखं सा रमायाः समं महत् ॥७०॥ न करिष्यति त्वेतत्कुर्वन्तीं वा निषेत्स्यति । ते उभे निरयं क्षेप्ता हर्याज्ञानुसृतो यमः ॥७१॥ यमयातनया दोषे क्षीणे त्वनुचरा हरेः । ते नयिष्यन्ति गोलोकं विमानेनार्करोचिषा ॥७२॥ विष्णुभक्तिः कृतास्त्येव ताभ्यां प्रागिति ते उभे । दासीत्वं प्राप्स्यतो लक्ष्म्यास्तत्र धाम्न्यमरीप्सितम् ॥७३॥ पालयन्ती निजान्धर्मान्विष्णुभक्तिविवर्जिता । प्रायश्चित्तं चरेद्या स्त्री सा सतीलोकमाप्नुयात् ॥७४॥ प्रायश्चित्तं नाचरेद्या सा तीव्रा यमयातनाः । भुक्त्वा शुद्धा ततो याति सतीलोकं न संशयः ॥७५॥ इतीरिता विप्र! विभर्तृकाणां धर्मा मया तच्च्युतिनिष्कृतं च । प्रोक्तं ब्रुवेऽथाखिलयोषितां ते साधारणं कृष्णसमर्चनं च ॥७६॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे पञ्चमप्रकरणे धर्मोपदेशे स्त्रीधर्मेषु विधवाधर्मभङ्गप्रायश्चित्तनिरूपणनामा पञ्चत्रिंशोऽध्यायः ॥३५॥

---

સમગ્ર વ્રતભંગમાં જાણવું; એમ ન હોય તો ના જાણવું, બુદ્ધિપૂર્વક વ્રતના ભંગમાં બમણું પ્રાયશ્ચિત્ત કહેલું છે. (૬૪) પ્રાયશ્ચિત્તોના ઉપવાસોમાં દિવસે અને રાત્રિમાં ભગવાનનાં નામનું ઉચ્ચારણ કરે તો પૂર્ણ ફલ પ્રાપ્ત થાય. (૬૫) પ્રાયશ્ચિત્તોના ઉપવાસો કરતી વિધવા સ્ત્રીએ પ્રાયશ્ચિત્તોના ઉપવાસમાં એકાદશીનો ઉપવાસ ગણવો નહિ, ચાર દિવસાદિ પ્રાયશ્ચિત્તના ઉપવાસમાં એકાદશીનો ઉપવાસ આવે તો પાંચમો વગેરે ઉપવાસ (અલગથી) કરવો. (૬૬) શુદ્ધિ માટે ઉપવાસ પ્રાપ્ત હોય તે દિવસે એકાદશી હોય તો ત્રીજે દિવસે જુદો ઉપવાસ કરવો. (૬૭) પ્રાયશ્ચિત્તનો ઉપવાસ ચાલતો હોય તેમાં બીજો ઉપવાસ પડે તો તંત્રથી કરવો (ભેગો ગણી લેવો). (૬૮) વિધવા પ્રાયશ્ચિત્તના ઉપવાસ દિવસે જળ અને છાશ વિના ફળ મૂળાદિક કંઈ પણ ક્યારેય પણ ખાય નહિ; અશક્ત નારીઓએ છાશપાન કરીને વ્રતનો ઉપવાસ કરવો. (૬૯) જે ભગવાનની ભક્તા વિધવા સ્ત્રી વ્રતભંગમાં પ્રાયશ્ચિત્ત કરશે તે વિધવા તો ગોલોકમાં લક્ષ્મીની સમાન મહાસુખ પામશે. (૭૦) જે ભગવાનની ભક્તા વિધવા સ્ત્રી તો આ વ્રતભંગનું પ્રાયશ્ચિત્ત કરશે નહીં અથવા જે વ્રતભંગનો ઉપવાસ કરતી વિધવાને નિષેધ કરશે તે બન્ને વિધવાઓને હરિની આજ્ઞાનુસારે વર્તતા યમરાજા નરકમાં ફેંકશે. (૭૧) યમની યાતનાથી વ્રતભંગનાં પાપ નાશ પામ્યે સતે, હરિના અનુચરો સૂર્ય સમાન કાંતિવાળા વિમાનથી બંનેને **ગોલોક** ધામ પમાડે છે. (૭૨) તે બન્ને સ્ત્રીઓએ વિષ્ણુભક્તિ પૂર્વે કરેલી છે જ માટે બન્ને સ્ત્રીઓ ગોલોક ધામમાં દેવની સ્ત્રીઓએ ઈચ્છેલું લક્ષ્મીનું દાસીપણું પામશે. (૭૩) વિષ્ણુની ભક્તિ રહિત વિધવા નારી પોતાના ધર્મોને પાળતી સતી પ્રાયશ્ચિત્ત કરે છે તે વિધવા સતી લોકને પામે છે. (૭૪) જે વિષ્ણુભક્તિથી રહિત વિધવા સ્ત્રી પ્રાયશ્ચિત્ત કરતી નથી તે તીવ્ર યમયાતનાઓને ભોગવીને શુદ્ધ થઈને પછી સતી લોકને પામે છે તેમાં સંશય નથી. (પૂર્વે ધર્મનું આચરણ કર્યું છે માટે.) (૭૫)

હે વિપ્ર ! આ પ્રકારે મેં વિધવાઓના ધર્મો કહ્યા અને તેના ભંગનું પ્રાયશ્ચિત્ત કહ્યું. હવે સમગ્ર સધવા અને વિધવા નારીઓએ સાધારણપણે કરવા યોગ્ય શ્રીકૃષ્ણનું પૂજન તમોને કહું છું. (૭૬)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે સ્ત્રીધર્મેષુ વિધવાધર્મભંગ પ્રાયશ્ચિત્તનિરૂપણનામા પંચત્રિંશોઽધ્યાયઃ (૩૫)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

श्रीनारायणमुनिरुवाच – **नित्यं श्रीवासुदेवस्य योषाभिः पूजनं मुदा । कर्तव्यं तस्य च विधिं कथयामि समासतः ॥१॥ प्रातः शुच्यम्बुना स्नात्वा धौतं धवलमंशुकम् । वसित्वाऽऽचमनं कृत्वा पूजाद्रव्याणि साधयेत् ॥२॥ उज्ज्वलं जलपात्रं च गालितं निर्मलं जलम् । तथाऽऽचमनपात्रं च देवस्नपनभाजनम् ॥३॥ चन्दनं चाक्षतान् पुष्पं धूपं दीपं निवेदनम् । मुखवासं दक्षिणां च नीराजनमुपाहरेत् ॥४॥ शालग्रामो नार्चनीयः स्त्रीभिः सर्वाभिरप्यतः । प्रतिमापूजनं ताभिः कर्तव्यं कमलापतेः॥५॥ नखस्पृष्टेनोदकेन न कुर्यात्पूजनं हरेः । न चाचमनशिष्टेन पादाक्रान्तेन चाम्बुना ॥६॥ घृतेन दीपं कुर्वीत तिलतैलेन वाऽर्चने। पूजोपहारालाभे तु मन्त्रमात्रमुदीरयेत् ॥७॥ पूजायां क्रियमाणायां स्त्री न भाषेत चान्यया । इतस्ततो न पश्येच्च क्रोधं कुर्वीत न क्वचित् ॥८॥ उपविश्य शुचिस्थाने पुनराचम्य सा हरिम् । उत्थापयेत्तालिकाभिर्घण्टानादेन वा शनैः॥९॥ उत्तिष्ठोत्तिष्ठ गोविन्द! उत्तिष्ठ गरुडध्वज! । उत्तिष्ठ कमलाकान्त! त्रैलोक्ये मङ्गलं कुरु॥१०॥ उत्थाप्य प्रतिमामेवं हरेर्वस्त्रेण मार्जयेत् । सिंहासने तां मृदुले स्थापयेद्वा करण्डके ॥११॥ शैली दारुमयी लौही लेप्या लेख्या च सैकती । मनोमयी मणिमयी प्रतिमाऽष्टविधा स्मृता ॥१२॥ प्राङ्मुखोदङ्मुखा वापि प्रतिमासम्मुखाऽथवा । स्वस्तिकासनमासीना ध्यायेत्स्वहृदये हरिम्॥१३॥ कोटिकोट्यर्करुचिरे दिव्यसिंहासने स्थितम् । द्विभुजं च घनश्यामं कोटिकन्दर्पसुन्दरम् ॥१४॥ अनेकदिव्याभरणं पीतकौशेयवाससम् । मुरलीं वादयन्तं च स्थितं राधारमायुतम् ॥१५॥ उपाश्रितं च धर्मेण वामे शुभ्ररुचाऽऽदरात् । उपास्यमानं भक्त्या च गाढस्नेहेन दक्षिणे ॥१६॥**

## અધ્યાય : ૩૬

### સ્ત્રીઓના ધર્મોમાં સમગ્ર સ્ત્રીઓને સર્વ પ્રકારે હિત કરનારો કૃષ્ણપૂજાનો વિધિ નિરૂપણ કરેલો છે.

**શ્રી નારાયણમુનિ બોલ્યા :** હે બ્રહ્મન્ ! સર્વ સ્ત્રીઓએ દરરોજ શ્રી વાસુદેવનું પૂજન હર્ષથી કરવું. શ્રી વાસુદેવના પૂજનનો વિધિ સંક્ષેપથી કહું છું. (૧) પ્રાતઃ સમયે નિર્મળ જળથી સ્નાન કરીને ધોયેલું ધોળું વસ્ત્ર ધારણ કરીને આચમન કરીને પૂજાનાં દ્રવ્યોને એક સાથે ભેગાં કરે. (૨) બહાર અને અંદરથી માંજેલું જળપાત્ર તથા ગાળેલું નિર્મળ જળ તથા આચમન પાત્ર તથા દેવને સ્નાન કરાવવાનું પાત્ર. ઘસેલું ચંદન, અક્ષતો, પુષ્પો, ધૂપ, દીપ, દૂધ, સાકર, પેંડા વગેરે નિવેદન, મુખવાસ, દક્ષિણા, આરતી વગેરે લાવીને પોતાના જમણે પડખે મૂકે.(૩-૪) જે માટે સર્વે સ્ત્રીઓએ શાલગ્રામની પૂજા કરવી યોગ્ય નથી. માટે સર્વ સ્ત્રીઓએ કમલાપતિ શ્રીકૃષ્ણની પ્રતિમાની પૂજા કરવી. (૫) નખના સ્પર્શવાળા જળથી હરિનું પૂજન કરે નહિ, તેમજ પોતે આચમન કરેલા જળથી તથા પોતે અથવા બીજાએ ઉલ્લંઘન કરેલા જળથી પૂજન ન કરે. (૬) અર્ચનમાં ઘીનો દીવો કરે અથવા તલના તેલથી દીવો કરે. (આ તેલનો દીવો અશક્ત સ્ત્રી વિષયવાળો જાણવો) પૂજાના ઉપહારો ના મળે તો મંત્ર માત્ર કેવળ પૂજાનો મંત્ર ઉચ્ચારણ કરે. (૭) પૂજા કરતી વખતે પૂજા કરનાર સ્ત્રી બીજી સ્ત્રી સાથે બોલે નહિ. (પુરુષ સાથે ન બોલે તેમાં કહેવું જ શું ?) અને જ્યાં ત્યાં જોવું નહિ. ક્યારેય ક્રોધ કરવો નહિ. (૮) સ્ત્રીભક્તે પવિત્ર સ્થાનમાં બેસીને ફરીથી આચમન કરી તાલી વગાડીને અથવા ઘંટડીના નાદથી ધીમેથી પ્રભુને આ મંત્રથી ઉઠાડવા - **(મંત્રાર્થ કહે છે :)** હે ગોવિંદ ! ઊઠો ઊઠો હે ગરુડધ્વજ ! ઊઠો - હે કમલાકાંત ! ઊઠો. ત્રિલોકીમાં મંગલ કરો.

उत्तिष्ठोत्तिष्ठ गोविंद ! उत्तिष्ठ गरुडध्वज ! । उत्तिष्ठ कमलाकान्त ! त्रैलोक्ये मंगलं कुरु ॥ (૯-૧૦) આ પ્રકારે હરિની પ્રતિમાને ઉઠાડી વસ્ત્રખંડથી માર્જન કરે, પછી તે પ્રતિમાને કોમળ સિંહાસન ઉપર અથવા કરંડિયામાં સ્થાપન કરે. (૧૧) શિલાની, કાષ્ટમયી, સુવર્ણ-રજત અને તાંબું એ ધાતુની, તથા ચંદનના લેપથી બનાવેલી, ચિત્રામણની, રેતીની, મનથી કલ્પેલી અને મણિમયી આ આઠ પ્રકારની પ્રતિમા કહેલી છે. (૧૨) પૂર્વ મુખે અથવા ઉત્તર મુખે અથવા પ્રતિમા સન્મુખ, સ્વસ્તિક આસને બેસીને પૂજન કરનારી સ્ત્રી પોતાના હૃદયમાં હરિનું ધ્યાન કરે. (૧૩) કરોડો કરોડ સૂર્યના સમાન તેજોયુક્ત દિવ્ય સિંહાસનમાં બેઠેલા, બે ભુજાવાળા, ઘનશ્યામ, અપરિમિત કામદેવોના મનને હરનારો છે આકાર જેનો એવા, (૧૪) અનેક દિવ્ય-આભરણ યુક્ત પીળા પીતાંબર ધારણ કરનારા, મનોહર વંશીને વગાડનારા, રાધા અને રમાયુક્ત રહેલા, (૧૫) ડાબે ભાગે રહેલા શુભ્ર કાન્તિવાળા ધર્મે આદરપૂર્વક સેવાયેલા, જમણા પડખે રહેલાં ભક્તિએ અત્યન્ત સ્નેહથી ઉપાસના કરાયેલા, (૧૬) દેવતાગણોએ અનેક દિવ્યોપચારોથી પૂજેલા, શ્રીદામા-નંદ-સુનન્દાદિએ

अनेकदिव्योपहारैः पूजितं देवतागणैः । सेव्यमानं पार्षदैश्च छत्रव्यजनचामरैः ॥१७॥ एवंविधं वासुदेवं ध्यात्वा स्वहृदयाम्बुजे । स्वेष्टैरनेकोपचारैर्मानसैस्तं समर्चयेत् ॥१८॥ आवाह्य प्रतिमायां तं यथालब्धोपचारकैः। श्रीकृष्णाय नम इति षडर्णमनुनाऽर्चयेत् ॥१९॥ आवाहनासने पाद्यमर्घ्यमाचमनीयकम् । स्नानं वासश्चन्दनं च पुष्पं धूपं च दीपकम् ॥२०॥ नैवेद्यं मुखवासं च दक्षिणां च क्रमेण सा । नीराजनं मन्त्रपुष्पं समर्प्य प्रार्थयेद्धरिम् ॥२१॥ श्रीकृष्ण! नारायण! देवदेव! श्रीराधिकाकान्त! सदर्चनीय! । भक्तप्रियाऽऽनन्दितभक्तिधर्म! प्रभो! हरे! नाथ! मयि प्रसीद ॥२२॥ त्वय्येव लोके पतिशब्द ईशे ह्यन्वर्थ एवास्ति समन्ततो मे । भीतेरिहामुत्र च रक्षके वै ततः पतिस्त्वं हि मया कृतोऽसि ॥२३॥ अन्यं पतिं या तु वृणोति नारी भवन्तमाराध्य तपोर्चनाद्यैः । सा मोहिता ते ननु माययैव भयादिहामुत्र न मुच्यते यत् ॥२४॥ अतो मया धर्मतपोव्रताद्यैस्त्वत्प्रीतिरेवेष्यत ईश! नान्यत् । अतः प्रसन्नो हि भवात्मबन्धो! मनोरथं पूरय मे हृदिस्थम् ॥२५॥ इति सम्प्रार्थ्य नत्वा तं धारयेद्धृदये पुनः । करण्डके च प्रतिमां स्वापयेद्योषिदन्वहम् ॥२६॥ पूजाविधिरिति प्रोक्तः सङ्क्षेपेण मया हरेः । यस्मिन् कृते तु नारीणां प्रेमवृद्धिर्भवेत्प्रभौ ॥२७॥ कृष्णपूजनविधेश्च समाप्तौ कृष्णमन्त्रमचला गुरुलब्धम् । स्त्री जपेदनघ! पञ्चशतं सा कृष्णपादकमलाहितचित्ता ॥२८॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे स्त्रीधर्मेषु श्रीकृष्णपूजाविधिनिरूपणनामा षट्त्रिंशोऽध्यायः ॥३६॥

---

વીંઝણો તથા ચામરોથી સેવા કરાયેલા, (૧૭) આવા વાસુદેવને પોતાના હૃદયકમળમાં ધ્યાન ધરીને પોતે ઇચ્છેલા માનસિક અનેક ઉપચારોથી શ્રીવાસુદેવનું પૂજન કરે. (૧૮) માનસિક ઉપચારોથી પૂજાએલા શ્રીવાસુદેવને પ્રતિમામાં આવાહન કરી, જેવા (યથાશક્તિ) પ્રાપ્ત થયેલા ઉપચારોથી 'श्रीकृष्णाय नमः' - આ છ અક્ષરના મંત્રથી પૂજન કરે. (૧૯) આવાહન અને આસન-પાદ્ય-અર્ઘ્ય, આચમન કરવા માટે જળ, સ્નાન માટે જળ, બે વસ્ત્રો, ચંદન, પુષ્પ, ધૂપ, દીપ, નૈવેદ્ય, મુખવાસ, દક્ષિણા, નીરાજન અને મંત્ર પુષ્પાંજલિને પૂજન કરનારી સ્ત્રી અનુક્રમે સમર્પણ કરીને હરિની પ્રાર્થના કરે. (૨૦-૨૧) હે શ્રીકૃષ્ણ ! હે નારાયણ ! હે દેવ દેવ ! હે શ્રી-રાધાપતે ! હે સાધુજનોએ પૂજેલાં ! હે ભક્તપ્રિય ! હે આનંદિત કર્યા છે ભક્તિ અને ધર્મ જેણે એવા, હે પ્રભો ! હે હરે ! હે નાથ ! તમો મારા ઉપર પ્રસન્ન થાઓ. (૨૨) હે ભગવન્ ! લોકમાં પતિ શબ્દ તો પ્રવર્તે છે, પરંતુ આ લોકમાં વિવિધ સાંસારિક ભયથી અને પરલોકમાં યમયાતનાદિ ભયથી મારી સર્વ પ્રકારે રક્ષા કરવા માટે સમર્થ; પરમેશ્વર એવા તમારે વિષે જ પતિ શબ્દ અન્વર્થ 'पतिं पतीनां' - રક્ષણ કરે તે પતિ આ વ્યુત્પત્તિ અન્વર્થ છે જ, માટે મેં તમોને જ પતિ કરેલા છે. (૨૩) જે નારી તપ અને પૂજનાદિથી તમોને આરાધીને બીજા પતિને વરે છે તે નારી તમારી માયાથી મોહ પામી છે જ, માટે આ લોક અને પરલોકમાં ભયથી મુક્ત થતી નથી. (૨૪) તે માટે હે પરમેશ્વર ! મેં ધર્મ તપ વ્રતાદિથી તમારી પ્રીતિ જ ઇચ્છેલી છે માટે હે આત્મબંધો ! તમો પ્રસન્ન થાઓ. મારા હૃદયમાં રહેલા મારો મનોરથ પૂર્ણ કરો. (૨૫) હે દ્વિજ ! આ પ્રકારે ભગવાનની પૂજા કરનારી સ્ત્રી પ્રતિદિન શ્રીકૃષ્ણને સંપ્રાર્થના કરી નમસ્કાર કરીને ફરીથી હૃદયમાં ધારણ કરે અને પ્રતિમાને કરંડિયામાં શયન કરાવે. (૨૬) આ પ્રમાણે મેં સંક્ષેપથી શ્રીહરિનો પૂજાવિધિ કહ્યો જે પૂજાવિધિ કર્યે સતે નારીઓને શ્રીકૃષ્ણમાં પ્રેમ વૃદ્ધિ થાય. (૨૭)

- હે અનઘ ! કૃષ્ણના પૂજનનો વિધિ સમાપ્ત થયે સતે સ્ત્રી સ્થિર આસનયુક્તા કૃષ્ણના બંને ચરણકમળમાં આરોપણ કર્યું છે ચિત્ત જેણીએ એવી સતી ગુરુપત્નીથી પ્રાપ્ત થયેલા શ્રીકૃષ્ણના અષ્ટાક્ષર મંત્રના પાંચસો જપ કરે. (૨૮)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે સ્ત્રીધર્મેષુ શ્રીકૃષ્ણપૂજાવિધિનિરૂપણનામા ષટ્‌ત્રિંશોઽધ્યાયઃ (૩૬)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच – **सधवा विधवा वापि नारी या स्याद्रजस्वला । त्रिरात्रं न स्पृशेत्सा तु स्त्रियं वा पुरुषं क्वचित् ॥१॥ इन्द्रेण ब्रह्महत्यायाः स्त्रीभ्यो भागस्तुरीयकः । दत्तोऽस्ति स रजोरूपो मासि मासि प्रदृश्यते ॥२॥ प्रथमेऽहनि चण्डाली द्वितीये ब्रह्मघातिनी । तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शूद्रवत् ॥३॥ दैवे कर्मणि पैत्र्ये च पञ्चमेऽहनि शुद्रवत् । उपवासेनाऽऽपदि तु तृतीयेऽह्न्येव शुद्ध्यति ॥४॥ नैतत्सङ्गोपयेन्नारी महापापं कदाचन । गोपिते ब्रह्महत्याया मुच्यते नैव सा यतः ॥५॥ रजस्वला स्पृशेदन्यामुदक्यां वा परां स्त्रियम् । अन्या वेनां स्पृशेद्बुद्ध्या यदि तर्हि भवेदघम् ॥६॥ धर्मशास्त्रेष्विह प्रोक्ता कृच्छ्रेणेव हि निष्कृतिः । कलौ सा सर्वनारीभिः कर्तुं शक्या न दृश्यते ॥७॥ अतोऽहं निष्कृतिं वच्मि सर्वासां सुकरामिह । या स्त्री ज्ञात्वा स्पृशेत्सा तु कुर्यादेकमुपोषणम् ॥८॥ अज्ञानतः क्वचित्स्पर्शो यदि स्यात्तर्हि सत्वरम् । स्नात्वा सचैलं कुर्वीत नारी नामस्मृतिं हरेः ॥९॥ स्पर्शे त्वापदि बुद्ध्यापि जाते स्नानेन शुद्ध्यति । स्पर्शे पुंसोऽप्युदक्याया एवमेव हि निर्णयः ॥१०॥ न गोपनीयं हि रज इति प्राहुर्महर्षयः । सदाचारश्च साध्वीनामेवमेव प्रवर्तते ॥११॥ अगोपने ब्रह्महत्यादोषः स्त्रीणां विनश्यति। परपुंसो गर्भशङ्का स्वजनानां च नश्यति ॥१२॥ तस्मात्स्त्रीभिः पालनीया मर्यादैषा पुरातनी । चातुर्वर्ण्यस्थिताभिर्वै धर्मसिद्धिमभीप्सुभिः ॥१३॥ ब्रह्मचर्यव्रतं नारी पालयेद्वापि यः पुमान् । तयोस्तच्छलवाक्यैर्या भनक्ति स्त्री व्रतं भुवि॥१४॥ क्रोधारुणेक्षणा याम्या दूतास्तामग्निवर्णकैः । लोहदण्डैर्दाहयन्ति क्रोशन्तीमुच्चकैर्भृशम् ॥१५॥ कुम्भीपाके तप्ततैले रन्धयन्ति ततश्च ताम्। रक्तविट्पूयकुण्डे तां निक्षिपन्ति ततश्च ते ॥१६॥ स्वरोमसङ्ख्यवर्षाणि**

## અધ્યાય : ૩૭

### ધર્મનું રક્ષણ કરવા ઈચ્છતા શ્રીહરિએ સ્ત્રીધર્મોમાં સ્ત્રીઓના સાધારણ ધર્મનું નિરૂપણ કરેલું છે.

**શ્રી નારાયણ મુનિ બોલ્યા** : હે બ્રહ્મન્ ! સધવા અને વિધવા જે નારી રજસ્વલા થાય તે ત્રણ દિવસ સુધી સ્ત્રીને અથવા પુરુષને ક્યારેય પણ સ્પર્શ કરે નહિ. (૧) ઈન્દ્રે બ્રહ્મહત્યાનો ચોથો ભાગ સ્ત્રીઓને આપેલો છે તે મહિને મહિને રજો રૂપે દેખાય છે. (ભાગવતના છઠ્ઠા સ્કંધમાં કહ્યું છે.) (૨) રજસ્વલા સ્ત્રી પ્રથમ દિવસે **ચાંડાલી** કહેલી છે, બીજે દિવસે **બ્રહ્મઘાતિની** કહેલી છે, ત્રીજે દિવસે **રજકી-(ધોબણ)** કહેલી છે, ચોથે દિવસે શૂદ્રા સમાન કહેલી છે. (સ્નાન કરાયેલી સ્પર્શને યોગ્ય થાય છે.) (૩) દેવ સંબંધી કર્મમાં અને પિતૃ સંબંધી કર્મમાં પાંચમે દિવસે શુદ્ધ થાય છે. આપત્કાલમાં તો ઉપવાસના આચરણથી ત્રીજે દિવસે જ ઉપવાસથી શુદ્ધ થાય છે. (૪) નારીએ આ રજોદર્શનરૂપ મહાપાપને ક્યારેય ગુપ્ત રાખવું નહીં કારણ કે ગુપ્ત રાખે તો તે નારી બ્રહ્મહત્યાથી મુકાતી નથી. (૫) રજસ્વલા સ્ત્રી બીજી રજસ્વલા કે અરજસ્વલા સ્ત્રીને જો બુદ્ધિપૂર્વક સ્પર્શ કરે અથવા અરજસ્વલા સ્ત્રી રજસ્વલાને બુદ્ધિપૂર્વક સ્પર્શ કરે તો તેઓને પાપ થાય. (૬) ધર્મશાસ્ત્રોમાં આ પાપનું કૃચ્છ્રવ્રતથી પ્રાયશ્ચિત્ત કહેલું છે. તે પ્રાયશ્ચિત્ત કલિયુગમાં સર્વ સ્ત્રીઓએ કરવા માટે શક્ય દેખાતું નથી. (૭) માટે હું આ લોકમાં સર્વનારીઓને સુખેથી થાય એવું પ્રાયશ્ચિત્ત કહું છું : જે બીજી નારી જાણીને અન્ય રજસ્વલાનો સ્પર્શ કરે તો એક ઉપવાસ કરે. (૮) જો અજ્ઞાનથી ક્યારેક રજસ્વલાનો સ્પર્શ થાય તો સ્પર્શ કરનારી નારી તત્કાલ જ વસ્ત્રો સહિત સ્નાન કરીને હરિના નામની સ્મૃતિ કરે. (૯) આપત્કાલમાં તો બુદ્ધિપૂર્વક સ્પર્શ થાય તો સ્નાનથી શુદ્ધ થાય છે. પુરુષને પણ રજસ્વલાનો સ્પર્શ થયો હોય તો એ જ નિર્ણય છે. જો પુરુષ જાણીને રજસ્વલાનો સ્પર્શ કરે તો એક ઉપવાસ કરે અને અજાણથી સ્પર્શ થાય તો વસ્ત્રે સહિત સ્નાન કરે. (૧૦) **રજો દર્શન ગુપ્ત રાખવું નહિ.** એમ મહર્ષિઓ કહે છે. અને પતિવ્રતાઓનો સદાચાર આ પ્રમાણે જ પ્રવર્તે છે. (૧૧) રજોદર્શનને ગુપ્ત ન રાખે તો સ્ત્રીઓને બ્રહ્મહત્યાનો દોષ નાશ પામે અને પોતાનાં સ્વજનોને ગર્ભધારણની શંકા નાશ પામે. (૧૨) માટે ધર્મસિદ્ધિને પામવા ઈચ્છતી ચાર વર્ણની સ્ત્રીઓએ આ પ્રાચીન મર્યાદા પાલન કરવી જ. (૧૩) પૃથ્વીમાં જે નારી બ્રહ્મચર્યવ્રત પાલન કરે અથવા જે પુરુષ બ્રહ્મચર્યવ્રતને પાલન કરે તે બંને સ્ત્રી-પુરુષનું બ્રહ્મચર્યવ્રત જે સ્ત્રી છલવાક્યોથી ભાંગે છે. તેને ક્રોધના આવેશથી લાલ નેત્રવાળા યમદૂતો અત્યંત ઊંચા સ્વરથી બૂમો પાડતી એવી, બ્રહ્મચર્યવ્રતનો ભંગ કરાવનારી સ્ત્રીને લાલચોળ લોખંડના દંડોથી બાળે છે. (૧૪-૧૫) પછી યમદૂતો તે સ્ત્રીને તપેલા તેલવાળા કુંભીપાક નામના નરકમાં રાંધે છે પછી તેને રુધિર, વિષ્ટા, પાચના કુંડમાં નાખે છે. (૧૬) તે સ્ત્રી પોતાના રોમની સંખ્યા (સાડા ત્રણ કરોડ વર્ષ સુધી)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

भुक्त्वा सा यमयातनाः। अरण्ये निर्जले देशे पिशाची जायते ततः ॥१७॥ निष्कामव्रतभङ्गं यः कामुकः पुरुषः स्त्रियाः । पुरुषस्यापि वा कुर्यात्स मृत्वा नरकान्व्रजेत्॥१८॥ कुम्भीपाके पच्यतेऽसौ मुहुः सर्पैश्च दश्यते । उच्चैः करोत्यार्तनादान्स याम्यैः परिताडितः ॥१९॥ निष्कामव्रतिनां पुंसां नारीणां च व्रतावनम् । ये करिष्यन्ति ते तेषां गतिं प्राप्स्यन्ति निश्चितम् ॥२०॥ इति ते ब्राह्मणश्रेष्ठ ! स्त्रीणां धर्मा मयोदिताः। सतीगीताभिधास्तासां सर्वासां हितकारकाः ॥२१॥ सतीगीतामिमां नारी या श्रोष्यति पठिष्यति । उभे ते प्राप्स्यतो नूनं स्ववाञ्छितफलं किल ॥२२॥ नित्यं या नियमेनैतां योषिदत्र पठिष्यति । लप्स्यते साऽत्र महतीं कीर्तिं चान्ते हरेः पदम् ॥२३॥ इति द्वितीयाश्रमिणां वृषास्ते पुंसां तथैषामपि योषितां च । उदीरितास्ते द्विज! तैश्च ताभिः श्रव्याश्च पाठ्याः सततं च पाल्याः ॥२४॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे स्त्रीसाधारणधर्मनिरूपणनामा सप्तत्रिंशोऽध्यायः ॥३७॥

श्री नारायणमुनिरुवाच – **दुष्करत्वात्कलौ विप्र! वर्जितस्य द्विजैरथ । वानप्रस्थाश्रमस्यापि धर्मान्बोधाय वच्मि ते ॥१॥ हित्वा गृहाश्रमं विप्रो द्वितीयादाश्रमात् परम् । तृतीय आयुषो भागे तृतीयाश्रममाश्रयेत् ॥२॥ अपत्यापत्यमालोक्य ग्राम्याहारान्विसृज्य च । पत्न्याः पोषण आदिश्य पुत्रं वनमुपाव्रजेत् ॥३॥ अनुकूला तपः सोढुं क्षमा च यदि सा भवेत् । सहैव तां नयेद्विद्वान्नान्यथा दुःखदत्वतः ॥४॥ ग्राम्यधर्मानभीप्सुश्च धैर्यवान्ब्रह्मचार्यपि । मृतदारो गृहस्थो वा वानप्रस्थाश्रमं श्रयेत् ॥५॥ आपृच्छ्य स्वगुरुं चादौ राजानं धार्मिकं ततः । सम्बन्धिनश्चाथ गृही गृह्णीयादाश्रमान्तरम् ॥६॥ शुक्लपक्षस्य**

---

યમનાં દુઃખો ભોગવીને પછી નિર્જલ અરણ્યમાં પિશાચી થાય છે. (૧૭) તેમજ કામી જે પુરુષ સ્ત્રીના અથવા પુરુષના નિષ્કામ વ્રતનો ભંગ કરાવે તે પુરુષ પણ મરીને નરકને પામે છે. (૧૮) તે પુરુષ કુંભી પાકમાં રંધાય છે સર્પોએ વારંવાર ડંસ કરાયેલો યમદૂતોનાં પ્રહારોથી ઊંચે સ્વરે આર્તનાદ કરે છે. (૧૯) જે પુરુષો, નિષ્કામી પુરુષો અને નિષ્કામવ્રતવાળી સ્ત્રીઓના નિષ્કામ વ્રતનું રક્ષણ કરશે તે પુરુષો નિષ્કામ વ્રતીઓની ગતિને નિશ્ચે પામશે. (૨૦) હે બ્રાહ્મણશ્રેષ્ઠ ! આ પ્રમાણે **સતી ગીતા** નામના સર્વે સ્ત્રીઓને હિત કરનારા ધર્મો મેં તમોને કહ્યા. (૨૧) જે સ્ત્રી આ સતીગીતાને સાંભળશે, પાઠ કરશે તે બન્ને સ્ત્રીઓ પોતાને ઇચ્છિત ફળ નિશ્ચે પામશે જ. (૨૨) આ લોકમાં જે સ્ત્રી દરરોજ નિયમથી સતીગીતાનો પાઠ કરશે તે સ્ત્રી આ લોકમાં મહાકીર્તિ પામશે અને દેહના અંતમાં પરમાત્માના પરમ પદને પામશે. (૨૩)

હે દ્વિજ ! આ પ્રકારે બીજા આશ્રમી ગૃહસ્થ પુરુષોના તથા એમની સ્ત્રીઓના ધર્મો મેં તમોને કહ્યા. તે આ ધર્મો ગૃહસ્થો તથા તેમની સ્ત્રીઓએ નિરંતર સાંભળવા, પાઠ કરવા અને પાલન કરવા. (૨૪)

*ઇતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે સ્ત્રી સાધારણધર્મનિરૂપણનામા સપ્તત્રિંશોऽધ્યાયઃ (૩૭)*

## અધ્યાય : ૩૮

### અત્યંત ધર્મમાં પ્રીતિવાળા શ્રીહરિએ સ્ફુટપણે વાનપ્રસ્થના ધર્મનું નિરૂપણ કર્યું છે.

**શ્રી નારાયણમુનિ બોલ્યા** : હે વિપ્ર ! હવે પછી દુઃખથી પણ પાલન માટે અશક્ય હોવાથી કલિયુગમાં સ્મૃતિકાર મુનિઓએ નિષિદ્ધ છે તોપણ વાનપ્રસ્થના ધર્મોને જાણવા માટે તમોને કહું છું. (૧) બ્રાહ્મણ આયુષ્યના ત્રીજા ભાગમાં (એકાવનમેં વર્ષે) ગૃહસ્થાશ્રમનો ત્યાગ કરીને ત્રીજો આશ્રમ જે **વાનપ્રસ્થાશ્રમનો** આશ્રય કરે. (૨) પુત્રના પુત્રને જોઈને ગૃહસ્થના સુખનો ત્યાગ કરીને પત્નીના પોષણમાં પુત્રને આજ્ઞા કરીને વનનો આશ્રય કરે. (૩) જો પત્ની પોતાની રુચિને અનુસરનારી હોય અને તપ કરવા સમર્થ હોય તો વિદ્વાન ગૃહસ્થ પત્નીને પોતાની સાથે જ લઈ જાય. જો અનુકૂલ ના હોય તો પોતાને દુઃખ આપનારી હોવાથી ના લઈ જાય. (૪) વૈરાગ્યથી ગૃહસ્થ સંબંધી સુખને પામવા નહિ ઇચ્છતા બ્રહ્મચારી પણ અથવા જેની પત્ની મરી ગઈ છે એવો ગૃહસ્થ વાનપ્રસ્થાશ્રમનો આશ્રય કરે. (૫) ગૃહસ્થાશ્રમી પ્રથમ પોતાના ગુરુને પૂછીને પછી ધર્મનિષ્ઠ રાજાને પૂછીને અને પોતાનાં સંબંધી જનોને પૂછીને પછી આશ્રમાન્તર (વાનપ્રસ્થાશ્રમ) ગ્રહણ કરે. (૬) પ્રસિદ્ધ ઉત્તરાયન તેમાં પણ શુકલ પક્ષના કોઈ પણ દિવસના પૂર્વ ભાગમાં વનમાં જઈને નિયમયુક્ત, નિશ્ચલ

पूर्वाह्णे प्रशस्ते चोत्तरायणे । गत्वाऽरण्यं नियमवांस्तपः कुर्यात्समाहितः ॥७॥ अत्राश्रमे तपो मुख्यं द्विजदेहोचितं तु यत् । उत्साहवांस्ततो धीरस्तप एव समाश्रयेत् ॥८॥ अग्निहोत्रं च दर्शादि कर्म प्राग्वद्यथाविधि । साग्निकस्य मुनेः प्रोक्तं पश्वालम्भनमन्तरा ॥९॥ मुन्यन्नैः स्वयमानीतैः पुरोडाशांश्च निर्वपेत् । कुर्यादग्न्यर्थमुटजं स्वयं तु निवसेद्बहिः ॥१०॥ शिलायां शर्करादौ वा शयीत सुसमाहितः । जितक्रोधश्च तत्त्वज्ञो न द्विर्भुञ्जीत कर्हिचित् ॥११॥ वर्जयेन्मधु मांसं च ब्रह्मचारी भवेत्सदा । न द्रुह्येत्सर्वभूतेभ्यो न पत्न्या सह संविशेत् ॥१२॥ अन्नैः शाकैः फलैर्वापि पञ्चयज्ञान्समाचरेत् । अम्मूलफलभिक्षाभिरर्चयेद्भिक्षुकातिथीन् ॥१३॥ वसीत वल्कलं वासस्तृणपर्णाजिनानि वा । कमण्डलुं च दण्डं च धारयेत्संयतेन्द्रियः ॥१४॥ केशान् रोमाणि श्मश्रूणि छेदयेन्न नखानपि । अङ्गलग्नं मलं चैव क्षालयेन्न च मार्जयेत् ॥१५॥ अङ्गान्यमार्जयन्स्नायात्त्रिकालं स्थण्डिलेशयः । न दन्तान् शोधयेन्नित्यं नासनं चालयेन्मुहुः ॥१६॥ वनाश्रमी न कुर्वीत परस्त्रीसङ्गमष्टधा । यथोपयोगं भाषेत स्वकीयां यज्ञकर्मणि ॥१७॥ भुञ्जीत सकृदेवान्नं नीवारादि वनोद्भवम् । कपित्थबदराश्वत्थफलादीन्यपि वा मुनिः ॥१८॥ शान्तो दान्तो मृदुर्धीरो मूलकन्दफलाशनः । मुन्यन्नवर्तनो वापि खादेत्स्नेहं फलोद्भवम् ॥१९॥ आहरेत्स्वयमेवान्नमात्मनो वृत्तिहेतवे । दन्तोलूखलिको वा स्यादश्मकुट्टाशनोऽपि वा ॥२०॥ न कृष्टपच्यमश्नीयादकृष्टं चाप्यकालजम् । अग्निपक्वमथामं वा कालपक्वमुताहरेत् ॥२१॥ सद्यःप्रक्षालको वा स्यादथवा माससञ्चयी। षण्माससञ्चयी वाब्दपर्याप्तान्नादिसङ्ग्रही ॥२२॥ सन्त्यजेदाश्विने मासि यत्किञ्चित्पूर्वसञ्चितम् । पुनः सञ्चिनुयात्सर्वं मुन्यन्नादिकमात्मना ॥२३॥ शनैः शनैः क्रमेणैव वर्धयेत्तप आत्मनः । सर्वत्यागे तु सहसा नश्येद्दत्तं

---

ચિત્તવાળો થઈને તપ કરે. (૭) બ્રાહ્મણના દેહને યોગ્ય જે તપ તે આ વાનપ્રસ્થાશ્રમમાં મુખ્ય છે તેથી ઉત્સાહવાળો, ધીરજવાળો થઈને સમય પ્રમાણે યથાયોગ્ય તપ જ કરે (બ્રાહ્મણનો દેહ ક્ષુદ્ર કામના માટે નથી કૃચ્છ્ર તપને માટે છે અને મરીને અનંત સુખ માટે છે.) (૮) ત્રેતાગ્નિ સહિત વાનપ્રસ્થના અગ્નિહોત્ર અને દર્શાદિકર્મ સાક્ષાત્ પશુના વધ વિના પૂર્વની માફક ગૃહસ્થાશ્રમીની જેમ શાસ્ત્રવિધિ પ્રમાણે કરવાનું કહ્યું છે. (૯) પોતે લાવેલા નિવારાદિથી પુરોડાશોને તૈયાર કરી હોમ (નિર્વાપ) કરે. અગ્નિની રક્ષા માટે પર્ણશાલા કરે પોતે પર્ણશાલાથી બહાર ભાગમાં નિવાસ કરે. (૧૦) સ્થિર ચિત્તવાળો જીત્યો છે ક્રોધ જેણે એવો તત્ત્વજ્ઞ, વની, શિલાના પૃષ્ઠમાં અથવા કાંકરા વગેરે પ્રદેશમાં શયન કરે. ક્યારેય પણ બે વાર જમે નહિ. (૧૧) મદ્ય અને માંસનો ત્યાગ કરે, સદા બ્રહ્મનિષ્ઠ થાય, સર્વ ભૂતોનો દ્રોહ ન કરે પત્નીની સાથે શયન કરે નહિ. (૧૨) નિવારાદિ અન્નો, શાકો અથવા ફળોથી પંચયજ્ઞો કરે અને જળ, મૂળ અને ફળોની ભિક્ષાથી ભિક્ષુકો અને અતિથિઓનું સન્માન કરે. (૧૩) જિતેન્દ્રિય વની વલ્કલને પહેરે અથવા તૃણપર્ણનાં વસ્ત્ર ધારણ કરે. કમંડળ અને દંડ ધારણ કરે. (૧૪) મસ્તકના કેશો, મુખદાઢીના કેશોને અને નખોને છેદે નહિ. પોતાના શરીરમાં રહેલો મેલ ધૂએ નહિ અને વસ્ત્રાદિથી માર્જન કરે નહિ. (૧૫) પૃથ્વીમાં શયન કરનાર વની પોતાના શરીરના અવયવોને મર્દન કર્યા વગર ત્રણ સમય સ્નાન કરે નિત્ય દાંતોની શુદ્ધિ કરે નહિ. વારંવાર આસનને ચલાયમાન કરે નહિ. (૧૬) વનાશ્રમી શ્રવણાદિ આઠ પ્રકારે પરસ્ત્રીનો સંગ કરે નહિ. યજ્ઞ, કર્મ નિમિત્તે પોતાની પત્ની સાથે પ્રયોજન પૂરતું જ બોલે. (૧૭) વાનપ્રસ્થાશ્રમી વનમાં થયેલા નિવારાદિ અન્ન અથવા કોઠાં, બોરાં, પીપરની ટેટી, ઈંગોરા, વગેરે એક વાર જ જમે. (૧૮) શાંત, દાંત, કોમળ ચિત્તવાળો, ધૈર્યતાયુક્ત મૂલ, કંદ, ફળ, જમે અથવા મુનિ અન્નોને તથા ફલોનો રસ, તેલ, જમે ઘૃતાદિ ન જમે. (૧૯) પોતાના જીવન માટે નિવારાદિ પોતે જ લાવે. વની દાંતોથી જ અન્ન તથા ફલોના ગર્ભાદિને ચાવીને ખાનારો થાય અથવા પથ્થરથી કૂટીને ફલાદિનું ભક્ષણ કરનારો પણ થાય. (૨૦) ખેડ કરવાથી ઉત્પન્ન થયેલા અન્નને ના જમે, પાક કાલથી પહેલાં જ ઉત્પન્ન થયેલા અને ખેડ વિના પાકેલા નિવારાદિને પણ જમે નહિ. અગ્નિથી પકાવેલું અથવા અપકવ અથવા કાલથી પાકેલા ફલાદિને જમે.(૨૧) વની, સદ્ય પ્રક્ષાલક એટલે ભોજન કરીને હાથ-મુખ ધોયા પછી અન્ન રાખે નહિ એવો થાય અથવા એક માસ પર્યન્ત ચાલે તેટલું અન્ન રાખનારો થાય. અથવા છ માસ સુધી પોતાનું જીવન ચાલે તેટલું અન્ન રાખનારો થાય અથવા એક વર્ષ સુધી પોતાનો નિર્વાહ ચાલે તેટલું અન્ન રાખનારો થાય. (૨૨) પૂર્વે વર્ષ દિવસ સુધી સંગ્રહિત અન્ન જે કંઈ હોય તે આસો માસમાં ત્યાગ કરે સર્વ મુનિ અન્નાદિ પોતે જ ફરીથી ભેગું કરે તેટલા માસનું જ સંગ્રહ કરે. (૨૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

वपुर्यत: ॥२४॥ तपसा शोषयेद्देहं ध्यायन् हृद्यन्वहं हरिम् । मुन्यन्नं भक्षयेदादौ फलमूलाशनस्तत: ॥२५॥ नक्ताश्येकान्तराशी च चतुर्थाहभुजिस्तत:। पञ्चमेऽहनि षष्ठे वा फलमूलाशनो भवेत् ॥२६॥ चान्द्रायणव्रती वा स्यात्पक्षभुग्वाऽथ मासभुक् । क्षीरप: फेनपो वा स्यादम्बुपो धूमपस्तथा ॥२७॥ ज्योत्स्नापिबश्चोष्मपश्च वायुभुक्च भवेत्क्रमात् । इत्थं तपस्यभिरतो न प्रमत्तो भवेत्क्वचित् ॥२८॥ न विश्वसेदिन्द्रियाणि प्रयतात्मा सदा भवेत् । क्षुद्रकामाप्तये मौढ्यादुत्सृजेन्न निजं तप: ॥२९॥ स्त्रीकथाश्रवणादौ च कुर्यादेकमुपोषणम् । ब्रह्मचर्याङ्गभङ्गे च सावधानो भवेत्सदा ॥३०॥ यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत् । व्रतभ्रष्ट: स कुर्वीत देहान्तां तस्य निष्कृतिम् ॥३१॥ तस्य यो जायते पुत्रो न संस्पृश्यो द्विजै: स तु । वेदाधिकारहीन: स्याज्जयेत्कामं ततो वनी ॥३२॥ ग्रीष्मे सेवेत पञ्चाग्नीनासारं प्रावृषि ध्रुवम् । वानप्रस्थश्च शिशिरे तिष्ठेदाकण्ठमप्सु च ॥३३॥ यथाशक्ति तप: कुर्याद्देहपातो यथा न वै । भवेत्स्वस्य तथा धीरो वनस्थो दम्भवर्जित: ॥३४॥ चरेद्वने द्वादशाब्दानष्टौ वा चतुरो मुनि: । द्वावेकं वा यथाशक्ति न विपद्येत कृच्छ्रत: ॥३५॥ य: कण्टकाद्यै रुजति चन्दनाद्यैश्च योऽर्चति । अक्रुद्धोऽपरितुष्टश्च सम: स्यादुभयोरपि ॥३६॥ अशक्तस्त्वात्मन्याधाय विचरेदग्निमत्र तु । भिक्षयेत् प्राणवृत्त्यर्थमनिकेतश्च तापसान् ॥३७॥ ग्रामादानीय वा भिक्षां शुचिब्राह्मणगेहत: । ग्रासानष्टौ च भुञ्जीत ह्यशक्त: षोडशापि वा ॥३८॥ नित्यं स्वाध्यायशील: स्यात्सावित्रीजपतत्पर: । जित्वा निद्रां तथालस्यं रात्रौ ध्यानपरो भवेत् ॥३९॥ य एतां नियतां चर्यां ब्रह्मर्षिविहितां चरेत् । स दहेदग्निवद्दोषान् जयेल्लोकांश्च दुर्जयान् ॥४०॥ अभिभूतो जरारोगैरशक्त:

---

પોતાનું તપ ધીમે ધીમે અનુક્રમથી જ વૃદ્ધિ પમાડે કારણ કે તત્કાલજ સર્વ અન્નાદિ સંગ્રહનો પરિત્યાગ કરે તો રત્નની માફક દુર્લભ માનુષ્યશરીર નાશ પામે. (૨૪) પ્રતિદિન હરિને હૃદયમાં ધ્યાન કરતો સતો તપથી દેહનું શોષણ કરે. પ્રથમ મુનિ અન્ન જમે પછી ફલ-મૂલને ભોજન કરનારો થાય. (૨૫) પછી નક્ત સમયે (સાંજના પાંચ વાગ્યે) ફલ-મૂલ જમે. પછી ત્રીજે દિવસે ફલ-મૂલ ખાનારો થાય. પછી ચોથા દિવસે ફલ-મૂલ જમે પછી પાંચમા દિવસે અથવા છઠ્ઠા દિવસે ફલ-મૂલ ભોજન કરનારો થાય.(૨૬) અથવા ચાંદ્રાયણવ્રતવાળો થાય અથવા પંદર દિવસે એક વાર જમનારો થાય અથવા માસમાં એક વાર ભોજન કરનારો થાય અથવા દૂધ પીનારો થાય. દૂધનું ફીણ ભક્ષણ કરનારો થાય અથવા જળ માત્ર પીનારો થાય, ધૂમપાન કરનારો થાય. (૨૭) ચંદ્રની કિરણનું પાન કરનારો થાય, ઊકળતા જળની વરાળ પાન કરનારો અને વાયુ ભક્ષણ કરનારો થાય. આ પ્રકારે અનુક્રમથી તપમાં પ્રીતિવાળો વની ક્યારેય પણ પ્રમાદ કરે નહિ. (૨૮) જીતેલી ઈંદ્રિયોનો વિશ્વાસ કરવો નહિ. સદા નિયમિત મનવાળો ક્ષુદ્ર કામની પ્રાપ્તિ માટે મૂર્ખ ભાવથી પોતાના તપને ત્યાગ ન કરે. (૨૯) સ્ત્રીકથા શ્રવણાદિરૂપ બ્રહ્મચર્ય વ્રતના ભંગમાં એક ઉપવાસ કરવો. બ્રહ્મચર્યવ્રતના અંગભૂત તપશ્ચર્યામાં સદા સાવધાન થાય. (૩૦) જે બ્રાહ્મણ પત્ની સાથે વનમાં જઈને કામથી મૈથુનનું આચરણ કરે તે વિપ્ર તે પાપનું મરણાન્ત પ્રાયશ્ચિત્ત કરે. (૩૧) વ્રતભ્રષ્ટ વનસ્થાશ્રમીથી જે પુત્ર થાય છે તે તો ત્રણ વર્ણવાળાઓએ સ્પર્શ કરવા યોગ્ય નથી. વેદાધિકારથી રહિત થાય માટે વની કામને જીતે. (૩૨) વાનપ્રસ્થ ગીષ્મઋતુમાં પંચાગ્નિનું સેવન કરે વર્ષાઋતુમાં વરસાદની ધારાનું સેવન કરે. હિમ ઋતુમાં જળમાં કંઠ પર્યન્ત ઊભો રહે. પંચાગ્નિના સેવનથી નિવૃત્તિ પામે ત્યારે પ્રહરાદિ નિયમથી બલ પ્રમાણે આચરણ કરે. (૩૩) વાનપ્રસ્થ ધીર-દંભે રહિત જેમ પોતાનો દેહ પડી ના જાય તે પ્રકારે યથાશક્તિ તપ કરે. (૩૪) મુનિ બાર વર્ષ પર્યન્ત અથવા આઠ વર્ષ અથવા ચાર વર્ષ અથવા બે વર્ષ અથવા એક વર્ષ યથાશક્તિ પ્રમાણે વનમાં ફરે, તપશ્ચર્યાથી વિરામ ન પામે. (૩૫) જે પુરુષ કાંટા વગેરેથી પીડા કરે અને જે ચંદનાદિથી પોતાને પૂજે બન્ને પ્રકારના પુરુષોને વિષે પણ વની ક્રોધ રહિત તેમજ હર્ષ નહિ પામતો સતો બંને ઉપર સમદૃષ્ટિ રાખે. (૩૬) તપશ્ચર્યામાં અશક્ત વની અગ્નિને આત્મામાં (વિસર્જનપૂર્વક) મૂકીને નિયત સ્થાને રહિત પ્રાણવૃત્તિ માટે વાનપ્રસ્થોની પાસે ભિક્ષા માગે. (૩૭) અથવા ગામમાં જઈને પવિત્ર બ્રાહ્મણના ઘેરથી ભિક્ષા લાવીને આઠ કોળિયા જમે, અશક્ત-આઠ ગ્રાસોના ભોજનથી પ્રાણ ધારણ કરવા અસમર્થ, સોળ કોળિયા પણ જમે. (૩૮) હંમેશા સ્વાધ્યાયપરાયણ, ગાયત્રી જપમાં તત્પર થાય. નિદ્રા તથા આળસનો ત્યાગ કરી રાત્રિમાં ધ્યાનપરાયણ થાય. (૩૯) જે વની વસિષ્ઠાદિ બ્રહ્મર્ષિઓએ વેદોનાં વચનોથી બાંધેલી ચર્યા=દ્વિજાતિઓનું અવશ્ય કર્તવ્યરૂપ આચરણ, શ્રદ્ધાથી પાલન કરે તે વની અગ્નિની માફક પોતાનાં પાપોને ભસ્મ કરી નાખે. દુર્જય એવા મહરાદિ લોકોને પામે. (૪૦) જે વની વૃદ્ધાવસ્થા અને રોગથી પરાભવ પામેલો સતો પોતાના આશ્રમને યોગ્ય ક્રિયામાં અશક્ત થાય



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्वक्रियासु यः । स हरिं हृदये ध्यायन्कुर्यादनशनादिकम् ॥४१॥ इत्थं तपः प्रकुर्वाणो मनो जित्वा वनाश्रमी । महर्लोकमवाप्नोति देहान्ते तापसेप्सितम्॥४२॥ यो विष्णुभक्तिसहितं वानप्रस्थाश्रमे वसन् । तपः करोति स मुने ! धाम प्राप्नोति वैष्णवम् ॥४३॥ वृत्तिभेदेन कथिता वानप्रस्थाश्चतुर्विधाः । वैखानसा वालखिल्यौदुम्बराः फेनपा इति ॥४४॥ आद्यास्तत्राकृष्टपच्यैर्वर्तमानास्तपस्विनः । लब्धे नवेऽन्ने पूर्वान्नत्यागिनस्त्वपरे मताः ॥४५॥ प्रातरुत्थाय यां पूर्वं दिशं पश्यन्ति ये ततः । आहृतैः फलमूलाद्यैर्जीवेयुस्ते तृतीयकाः ॥४६॥ स्वयं द्रुमेभ्यः पतितैः फलैः पुष्पैर्दलैरपि । जीवेयुर्ये ते कथिताश्चतुर्थाः फेनपा इति ॥४७॥ तपः प्रकुर्वतश्चास्य सर्वत्र स्याद्दृढं यदि । वैराग्यं तर्हि सन्न्यासो विहितस्तुर्य आश्रमः ॥४८॥ धर्मास्तृतीयाश्रमिणो मयैते समासतो विप्रवरोदितास्ते । अथो तुरीयाश्रमिणोऽपि धर्मान् स्मृतिप्रसिद्धान् कथयामि सर्वान् ॥४९॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे वानप्रस्थाश्रमधर्मनिरूपणनामाऽष्टत्रिंशोऽध्यायः ॥३८॥

श्रीनारायणमुनिरुवाच - चतुर्षु पुरुषार्थेषु यथा श्रेष्ठस्तुरीयकः । तथाऽऽश्रमेष्वपि ब्रह्मंस्तुरीयाश्रम ईरितः ॥१॥ ब्रह्मचर्याद्गृहाद्वापि वनाद्वाप्यव्रती व्रती । साग्निकोऽनग्निको वापि यो विरक्तः स सन्न्यसेत् ॥२॥ चतुर्विधोऽथ सन्न्यासी कथ्यते मुनिभिर्द्विज ! । कुटीचको बहूदश्च हंसः परमहंसकः ॥३॥ तत्र पुत्रादिक्लृप्तायां कुट्यां वाऽपि गृहे वसन् । शिखोपवीतं त्रीन्दण्डान्काषायवसनो दधत् ॥४॥ स्वबन्धूनां गृहे कुर्याद्भोजनं स्वस्य वा गृहे । आत्मज्ञोऽशक्तदेहो यः स तु

---

તે હૃદયમાં હરિનું ધ્યાન કરતો સતો અનશન વ્રત કરે. (૪૧) આ પ્રકારે મનને જીતીને તપ કરતો, ભગવાનની ભક્તિ રહિત વાનપ્રસ્થ પોતાના દેહના અવસાનમાં વાનપ્રસ્થોએ ઈચ્છેલા મહર્લોકને પામે છે. (૪૨) હે શિવરામ વિપ્ર ! જે વની વાનપ્રસ્થાશ્રમમાં વસતો સતો વિષ્ણુભક્તિ સહિત તપ કરે છે તે વૈષ્ણવ ધામને પામે છે. (૪૩) વૈખાનસ અને વાલખિલ્ય અને ઔદુંબર તથા ફેનપા : આ પ્રમાણે **વાનપ્રસ્થો** વૃત્તિભેદથી **ચાર પ્રકાર**ના કહ્યા છે. (૪૪) ચાર પ્રકારના વાનપ્રસ્થોમાં ખેડ વિના ઉત્પન્ન થયેલા નિવારાદિથી જીવનનિર્વાહ કરનારા વાનપ્રસ્થોમાં પ્રથમ **વૈખાનસ** નામવાળા માનેલા છે. નવું અન્ન પ્રાપ્ત થાય ત્યારે પહેલા સંગ્રહ કરેલું અન્ન ત્યાગ કરનારા તપસ્વીઓ તો બીજા **વાલખિલ્ય** નામના માનેલા છે. (૪૫) જે વાનપ્રસ્થો સવારમાં ઊઠીને પ્રથમ જે દિશાએ જુએ છે તે દિશાથી લાવેલાં કંદમૂલ વગેરેથી જીવે તે ત્રીજા **ઔદુંબર** નામના માનેલા છે. (૪૬) જે વાનપ્રસ્થો વૃક્ષોથી જાતે પડેલાં ફળો, પુષ્પો અને પત્રોથી જીવે તે ચોથા **ફેનપા** નામના માનેલા છે. આ પ્રકારે કહેલાઓમાં ઉત્તરોત્તર શ્રેષ્ઠ છે. (૪૭) અહીંયાં પૂર્વે કહેલા તપ કરતા વાનપ્રસ્થને જો સર્વ સાંસારિક પદાર્થોમાં દૃઢ વૈરાગ્ય થાય તો સંન્યાસ નામનો ચોથો આશ્રમ કહેલો છે. (૪૮)

હે વિપ્રરાજ ! મેં તૃતીયાશ્રમી વાનપ્રસ્થના આ ધર્મો સંક્ષેપથી તમોને કહ્યા : હવે ચતુર્થ આશ્રમી સંન્યાસીના સ્મૃતિપ્રસિદ્ધ સર્વ ધર્મોને પણ કહું છું. (૪૯)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે વાનપ્રસ્થાશ્રમ ધર્મ નિરૂપણનામાऽષ્ટત્રિંશોऽધ્યાયઃ (૩૮)*

## અધ્યાય : ૩૯

### શ્રીહરિએ સંન્યાસના ધર્મોમાં ચોથા આશ્રમના અધિકાર વગેરેનું નિરૂપણ કરેલું છે.

**શ્રી નારાયણ મુનિ બોલ્યા** : હે બ્રહ્મન્ ! જેમ ચાર પુરુષાર્થોમાં જે મોક્ષ નામનો પુરુષાર્થ શ્રેષ્ઠ છે તેવી રીતે બ્રહ્મચર્યાદિ ચાર આશ્રમોમાં સંન્યાસ આશ્રમ શ્રેષ્ઠ છે. (૧) જેણે વ્રતાદેશ પ્રાપ્ત કર્યો નથી. (ઉપનયન ધારણ કર્યું નથી) અથવા પ્રાપ્ત છે ઉપનયનસંસ્કાર જેને એવો ત્રેતાગ્નિસહિત અથવા અગ્નિએ રહિત પણ જે દ્વિજાતિ વૈરાગ્ય યુક્ત હોય તે બ્રહ્મચર્ય આશ્રમથી અથવા ગૃહસ્થાશ્રમથી અથવા વાનપ્રસ્થાશ્રમથી પણ સંન્યાસ ગ્રહણ કરે. (૨) હે દ્વિજ ! મુનિઓએ **સંન્યાસી** ચાર પ્રકારના કહ્યા છે તે જેમ કુટીચક, બહૂદક, હંસ, પરમહંસ એવો ભેદ છે. (૩) તે ચાર પ્રકારના સંન્યાસીઓમાં જે પોતાના પુત્રાદિએ નિર્માણ કરેલી પર્ણકુટિમાં અથવા પોતાના ઘરના એક પ્રદેશમાં નિવાસ કરતા સતા શિખા, ઉપવીત અને ત્રણ દંડને ધારણ કરતા સતા ભગવાં વસ્ત્ર ધારણ કરીને પોતાના બંધુઓના ગૃહમાં અથવા પોતાના

प्रोक्तः कुटीचकः ॥५॥ पूर्वोक्तवेष एवाथ स्वबन्धूनां गृहान्यतिः । हित्वाऽन्यत्र चरेद्भिक्षां यः स प्रोक्तो बहूदकः ॥६॥ पूर्वोक्तवेषाचारोऽपि दण्डमेकं दधाति यः । वैणवं स त्विह प्रोक्तस्तृतीयो हंससंज्ञकः ॥७॥ तुर्यः परमहंसाख्यो ज्ञानवैराग्यमण्डितः । एकदण्डं च वासश्च दध्यात्कश्चिन्न वा यतिः ॥८॥ सन्न्यासहेतुर्वैराग्यं यदहर्विरजेत्तदा। प्रव्रजेदिति वेदोक्तेस्तद्भेदान्कथयामि ते ॥९॥ वैराग्यं च त्रिधा मन्दं तीव्रं तीव्रतरं त्विति । मन्दे न्यासो न तीव्रे तु द्वौ द्वौ स्यातां च तत्परे ॥१०॥ पुत्रदारधनादीनां नाशे तात्कालिकी मतिः । धिक्संसारमितीदृक्स्यात् सा वैराग्यस्य मन्दता ॥११॥ अस्मिञ्जन्मनि माभूवन् पुत्रदारादयो मम । इति या सुस्थिरा बुद्धिः सा वैराग्यस्य तीव्रता ॥१२॥ पुनरावृत्तिसहितो लोको मे मास्तु कश्चन। दृढबुद्धिरिति प्रोक्तं श्रेष्ठं तीव्रतरं हि तत् ॥१३॥ प्रोक्तो विविदिषान्यासो ह्यपक्वज्ञानिनः खलु । दृढज्ञानवतो न्यासो विद्वत्सन्न्यास उच्यते ॥१४॥ वैराग्यं स्याद्दृढं यर्हि तदा परिव्रजेद्द्विजः । परिव्राडविरक्तस्तु भ्रष्टो भवति निश्चितम् । ॥१५॥ वैराग्यमन्तरा नैव भवेदिन्द्रियनिग्रहः । तं विना न भवेत्त्यागस्तिष्ठेन्न्यासः क्व तं विना ॥१६॥ अविरक्तस्य सन्न्यासमृणापाकरणश्रुतिः । स्मृतयश्च निषेधन्ति सन्न्यसेन्नाविचार्य तत् ॥१७॥ सन्न्यस्य सहसा पश्चात्सेवेत विषयान् यदि । वैराग्याभावतो मूढः स भवेत्पतितो द्विजः ॥१८॥ सन्न्यस्य यो रसे लुब्धः स्त्रियां वा स तु यातनाः । महारौरवनाम्नीर्हि यातीत्याह यमो वचः ॥१९॥ दृश्यन्ते बहवो भ्रष्टा न्यासिनोऽत्राविरागिणः । तस्मात्सञ्जातवैराग्यः प्रसन्नः सन्न्यसेद्द्विजः ॥२०॥ चिकीर्षुर्यस्तु सन्न्यासं गुरुस्वजनभूभुजः । स आपृच्छ्य सिते पक्षे गृह्णीयात्सुदिने च तम् ॥२१॥ दैवमार्षं च दिव्यं

ગૃહમાં ભોજન કરે, આત્મજ્ઞ અશક્ત દેહવાળો તે તો **કુટીચક** કહેલો છે. (૪-૫) જે સંન્યાસી પૂર્વે કહેલા કુટીચકના સમાન વેષધારી સતો જ પોતાના બંધુઓના ઘરોનો ત્યાગ કરીને સંબંધી વિનાના ભવનોમાં ભિક્ષા કરે તે **બહુદક** કહેલો છે. (૬) જે યતિ બહુદક સમાન વેષવાળો વેણુનો એક દંડ ધારણ કરે છે તે તો આ લોકમાં હંસ સંજ્ઞાવાળો ત્રીજો કહ્યો છે. (૭) જે સંન્યાસી જ્ઞાન, વૈરાગ્યથી અલંકૃત થયેલો અને દંડ અને વસ્ત્ર ધારણ કરે અથવા કંઈ ધારણ ના કરે તે **પરમહંસ** નામના ચોથા કહેલા છે. (૮) જે દિવસે સંસારથી વૈરાગ્ય પામે તે દિવસે જ સંન્યાસ ગ્રહણ કરે આ પ્રમાણે ઉપનિષદ્‌ના શાસનથી સંન્યાસનું કારણ વૈરાગ્ય છે તે **વૈરાગ્યના ભેદો** તમોને કહું છું. (૯) મંદ, તીવ્ર અને અતિતીવ્ર આ ત્રણ પ્રકારનો વૈરાગ્ય છે તેમાં મંદ વૈરાગ્ય તે સંન્યાસમાં કારણ ના થાય તીવ્રવૈરાગ્ય હોય તો (આગળ કહેશે તે વિવિદિષા અને વિદ્વત્સંન્યાસ) થાય અને તીવ્રતર વૈરાગ્યમાં પણ તે બન્ને થાય. (૧૦) પુત્ર, સ્ત્રી, ધનાદિ નાશ થયે સતે સંસારને ધિક્કાર છે આવી તાત્કાલિકી બુદ્ધિ ઉત્પન્ન થાય તે વૈરાગ્યની મંદતા જાણવી.(૧૧) આ જન્મમાં જે પુત્ર, સ્ત્રી વગેરે તે મારે ના થાઓ : આ પ્રકારની સ્થિર બુદ્ધિ તે વૈરાગ્યની તીવ્રતા માનેલી છે. (૧૨) પુનરાવૃત્તિ કોઈ લોક મને ના થાઓ : આવી જે દંઢ બુદ્ધિ તે ઉત્તમ અતિ તીવ્ર વૈરાગ્ય કહ્યો છે. (૧૩) અપક્વ જ્ઞાનીને જે સંન્યાસ છે તે વિવિદિષા નામનો સંન્યાસ કહેલો છે. (૧૪) જ્યારે દંઢ વૈરાગ્ય થાય ત્યારે બ્રાહ્મણ સંન્યાસ ગ્રહણ કરે, દંઢ વૈરાગ્ય રહિત સંન્યાસી તો ચોક્કસ સંન્યાસ ધર્મથી ભ્રષ્ટ થાય છે. (૧૫) વૈરાગ્ય વિના ઈન્દ્રિયોનો નિગ્રહ ના થાય. ઈન્દ્રિયનિગ્રહ વિના ત્યાગ ના થાય, ત્યાગ વિના સંન્યાસ ટકી શકે નહિ. (૧૬) ‘ત્રણ ઋણોને ચૂકવીને મનને મોક્ષમાં પ્રવેશ કરાવવો. ઋણને ચૂકવ્યા વિના જો મોક્ષને સેવે તો નીચે જાય છે :’ આ જે ઋણાપાકરણ શ્રુતિ છે તેના અર્થની સ્મૃતિઓ છે તે વૈરાગ્ય રહિતને સંન્યાસ નિવારણ કરે છે. તેથી વૈરાગ્યની તીવ્રતાનો વિચાર કર્યા વિના સંન્યાસ ગ્રહણ કરવો નહી. (શ્રુતિઃ- ‘ઉત્પન્ન થયેલો બ્રાહ્મણ ત્રણ ઋણવાળો થાય છે, બ્રહ્મચર્યથી ઋષિઓને, યજ્ઞથી દેવોને પ્રજાથી પિતૃઓને : આ પ્રમાણે યજ્ઞ, અધ્યયન, તથા પુત્રોથી ત્રણ ઋણોથી મુક્ત થાય છે.’) (૧૭) જે દ્વિજ વિચાર કર્યા વિના સંન્યાસ ગ્રહણ કરીને જો પછી વૈરાગ્યના અભાવથી વિષયોને સેવે તો મૂઢ બ્રાહ્મણ પતિત થાય. (૧૮) જે ત્યાગ કરીને રસમાં લુબ્ધ થાય અથવા સ્ત્રીમાં લુબ્ધ થાય તે તો મહા રૌરવ નામના નરકોમાં જાય છે જ : આ પ્રમાણે યમનું વચન છે. (૧૯) આ લોકમાં વૈરાગ્યે રહિત ઘણા સંન્યાસીઓ ભ્રષ્ટ થયેલા દેખાય છે, માટે તીવ્ર વૈરાગ્યવાળો દ્વિજ પ્રસન્ન થઈને સંન્યાસી થાય. (૨૦) સંન્યાસને ગ્રહણ કરવા ઈચ્છતો દ્વિજ તે તો ગુરુ, પોતાનાં સંબંધીજનો અને રાજાને પૂછીને શુકલ પક્ષમાં શુભ દિવસે સંન્યાસ ગ્રહણ કરે. (૨૧) દેવશ્રાદ્ધ, ઋષિશ્રાદ્ધ, દિવ્ય શ્રાદ્ધ,



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

च पित्र्यं मातृकमानुषे । भौतिकं चात्मकं चेति श्राद्धान्यष्टौ स निर्वपेत् ॥२२॥ प्राजापत्यां निरूप्येष्टिमग्नीनाधाय चात्मनि । कृष्णात्मा गुर्वनुज्ञातो यथावत्प्रैषमुच्चरेत् ॥२३॥ आतुरस्य तु सन्न्यासे न विधिर्नैव च क्रिया । प्रैषमात्रं समुच्चार्य सन्न्यासं तत्र पूरयेत् ॥२४॥ यथाविध्यथ सन्न्यस्य ब्रह्मज्ञानाप्तये मुनिः । सेवेत सद्गुरुं धर्मानाश्रितः प्रयतः सदा ॥२५॥ अपरोक्षात्मानुभवो दृढवैराग्यवान् यतिः । तीर्थानि विचरेद्धर्मानाश्रितो हरिभक्तिमान् ॥२६॥ पूजितस्ताडितो वापि सुज्ञैरज्ञैश्च तेष्वपि । हर्षशोकविहीनश्च सुप्रसन्नः समश्चरेत् ॥२७॥ कौपीनयुगलं दण्डं वास आच्छादनं तथा । मृदः कमण्डलुं भिक्षापात्रं वा पादुके अपि ॥२८॥ जीर्णचीरकृतां कन्थां शीतातपनिवारणीम्। एतानि धारयेदन्यन्न सङ्गृह्णीत भिक्षुकः ॥२९॥ कन्थां वासश्च कौपीनं धारयेद्धातुरञ्जितम् । अतिवादं च पैशुन्यं हिंस्त्रां वाचमपि त्यजेत् ॥३०॥ वासो दध्यान्न वा दध्यान्नियमो नात्र विद्यते । मुख्यं दण्डं ज्ञानरूपं विद्याद्गौणं तु वैणवम् ॥३१॥ त्रिदण्डित्वेऽपि ये दण्डा गौणास्ते वैणवा मताः । वाक्कर्ममनसां दण्डा मुख्या ज्ञेया विचक्षणैः ॥३२॥ वाग्दण्डे मौनमातिष्ठेत्कर्मदण्डे त्वनीहताम् । प्राणायामं मनोदण्डे यतिः सम्यगुपाश्रयेत् ॥३३॥ अध्यात्मपुस्तकं विप्रैर्दत्तं गृह्णीत भिक्षुकः । न तेभ्यो द्रव्यमादाय लेखयेद्दोषदर्शनात् ॥३४॥ असंवृतानि गृह्णीयात्पत्रं पुष्पमपो मृदम् । मूलं फलं चाथ भूमौ स्वपेदक्रोधनः शुचिः ॥३५॥ शान्तामेव वदेद्वाचमपि बाणैर्हतो यतिः । दद्यान्नारायणेत्येवं प्रतिवाचं च निःस्पृहः ॥३६॥ वाङ्मनःकायचेष्टासु न प्रमत्तो भवेत्क्वचित् । स्नानं ध्यानं तपो दानं योगं कुर्याज्जितेन्द्रियः ॥३७॥ स्नानं मनोमलत्यागो ध्यानं तत्त्वार्थनिश्चयः । इन्द्रियाणां च मनस ऐकाग्र्यं

પિતૃશ્રાદ્ધ અને માતૃશ્રાદ્ધ અને મનુષ્ય શ્રાદ્ધ, ભૂતશ્રાદ્ધ, આત્મશ્રાદ્ધઃ આ આઠ શ્રાદ્ધો સંન્યાસ ગ્રહણ કરવાની ઈચ્છાવાળો કરે. તેમાં દેવ શ્રાદ્ધમાં - બ્રહ્મા, વિષ્ણુ, મહેશ્વર દેવતાઓ, ઋષિશ્રાદ્ધમાં-દેવર્ષિ, બ્રહ્મર્ષિઓ, દિવ્ય શ્રાદ્ધમાં-વસુ, રુદ્ર, આદિત્યો. પિતૃશ્રાદ્ધમાં-પિતાદિ ત્રણ અને માતામહાદિ, માતૃશ્રાદ્ધમાં-માતા વગેરે ત્રણ. માનુષ્યશ્રાદ્ધમાં-સનકાદિ, ભૌતિક શ્રાદ્ધમાં-પૃથ્વી આદિ ભૂતો, ચક્ષુરાદિ કરણો અને ચાર પ્રકારનો ભૂત સમુદાય, (ત્રણ દેવતા) આત્મશ્રાદ્ધમાં-પોતાના પિતા, પિતામહો, દેવતા. આત્મશ્રાદ્ધ-'પરમાત્મા દેવતા જેના છે' એવું શ્રાદ્ધ એમ કેટલાકનું કથન છે, તે નિર્ણયસિંધુને અનુસારે જાણવું. (૨૨) પ્રજાપતિ દેવતાત્મક ઈષ્ટિ કરીને અગ્નિને આત્મામાં મૂકીને શ્રી વાસુદેવમાં એક મન વાળો ગુરુએ આજ્ઞા આપેલો યથાર્થ **'सन्न्यस्तो ऽहम्'** આવું પ્રૈષ વાક્ય ઉચ્ચારણ કરે. (હું સંન્યાસી છું એમ પ્રૈષવાક્ય બોલે.) (૨૩) રોગાદિથી પીડિત બ્રાહ્મણના સંન્યાસમાં તો વિધિ નથી અને ક્રિયા નથી, આતુર જન સંન્યાસમાં કેવલ પ્રૈષવાક્ય જ ઉચ્ચારણ કરીને સંન્યાસને પૂર્ણ કરે.(૨૪) વિધિ પ્રમાણે સંન્યાસધર્મને આશરેલો હંમેશા નિયમતત્પર સંન્યાસી બ્રહ્મ-પરબ્રહ્મના સ્વરૂપના જ્ઞાન માટે આત્મા-પરમાત્માના અપરોક્ષ-અનુભવનિષ્ઠ આચાર્યનું સેવન કરે. (૨૫) સદ્‌ગુરુની કૃપાથી પ્રત્યક્ષ આત્મા-પરમાત્માના જ્ઞાને સહિત દૃઢ વૈરાગ્યવાન પોતાના સદાચારોને આશરેલા હરિભક્ત સંન્યાસી તીર્થોમાં વિચરણ કરે. (૨૬) સુજ્ઞોએ પૂજેલા અથવા મૂર્ખ જનોએ તાડન કરાયેલા હોય તો પણ હર્ષ શોકથી રહિત પોતાને પૂજનારો તથા તાડન કરનારા જનોમાં અનુગ્રહ અને નિગ્રહથી રહિત અત્યન્ત પ્રસન્ન સંન્યાસી વિચરણ કરે. (૨૭) બે કૌપીન, દંડ તથા ઓઢવાનું વસ્ત્ર, મૃતિકાનું કમંડલું, ભિક્ષાપાત્ર, પાદુકા પણ ધારણ કરે. (૨૮) જૂનાં વસ્ત્રોથી કરેલી કંથા (ગોદડી) ટાઢ અને તડકો નિવારણ કરનારી : આ બે કૌપીનો વગેરે ધારણ કરે. એનાથી વિશેષ કંઈ પણ સંગ્રહ કરે નહિ. (૨૯) કંથા, (ગોદડી) આચ્છાદન વસ્ત્ર, કૌપીનની જોડી ગેરુથી રંગેલાં ધારણ કરવાં. અતિશય વાણીનો ક્લેશ, પૈશુન્ય અને જંતુહિંસાપ્રધાન વાણી પણ બોલવી નહિ. (૩૦) વસ્ત્ર ધારણ કરે અથવા ના ધારણ કરે. અહીંયાં વસ્ત્રો ધારણ કરવાનો નિયમ નથી. જ્ઞાનસ્વરૂપ દંડ મુખ્ય જાણવો. વાંસનો દંડ તે ગૌણ જાણવો. (૩૧) ત્રણ દંડ ધારણ કરવામાં પણ જે વાંસના દંડો તે અપ્રધાન માનેલા છે. વાણી, કર્મ અને મનના જે દંડો તે તો વિવેકી સંન્યાસીઓએ મુખ્ય જાણવા. (૩૨) યતિ વાણીના દંડમાં મૌન, યથોચિત ભાષણ કરવું, કર્મદંડમાં યથાયોગ્ય ચેષ્ટાપણાને સ્વીકારે, મનના દંડમાં પ્રાણાયામનો સમયક્ આશ્રય કરે. વિપ્રે આપેલું અધ્યાત્મ પુસ્તક ગીતા ઉપનિષદ્ પુરાણાદિ ગ્રહણ કરે, દ્રવ્યના સ્વીકારવામાં દોષ હોવાથી બ્રાહ્મણોથી દ્રવ્ય લઈને પુસ્તક લખાવવાં નહીં. (૩૩-૩૪) પત્ર, પુષ્પ, જળ, મૃત્તિકા, મૂલ અને ફલ એ બીજાથી ગુપ્તપણે ગ્રહણ કરવાં નહિ, ક્રોધે રહિત પવિત્ર સંન્યાસી ભૂમિમાં શયન કરે. (૩૫) વાણીરૂપી બાણોથી તાડન કરાયેલો હોય તો પણ સંન્યાસી શાંતિ યુક્ત વાણી બોલે. નિઃસ્પૃહી થકો **હે નારાયણ** આ પ્રકારનો પ્રત્યુત્તર આપે. (૩૬) વાણી, મન, શરીરની ચેષ્ટામાં ક્યારેય પણ પ્રમાદ રાખે નહિ. જિતેન્દ્રિય થઈને સ્નાન, ધ્યાન, તપ, દાન અને યોગ કરે. (૩૭) મનના મળનો ત્યાગ એટલે મનથી કામ,

परमं तपः ॥३८॥ दानं त्वभयमेवोक्तं योगो ब्रह्मात्मनोर्युजिः । तद्दार्ढ्यं स्याद्धरेर्भक्त्या यस्य मुक्तो भवेत्स वै ॥३९॥ न हिंस्यात्प्राणिमात्रं च वदेत्सत्यं सुनिश्चितम् । गोब्राह्मणादिहिंसादावनृतं च न दुष्यति ॥४०॥ स्तेयं वैरं मदं लोभं कौटिल्यं स्त्रीकथां शुचम् । मत्सरं च भयं तृष्णां जनस्नेहं च वर्जयेत् ॥४१॥ ज्ञानं तपोऽर्चनं दानं दहत्येव वपुश्च यः । तं प्राणहारिणं शत्रुं क्रोधं दूराच्च सन्त्यजेत् ॥४२॥ मञ्चकः शुक्लवस्त्रं च सुरापानं दिवास्वपिः । त्यक्तस्त्रीपुत्रमित्रादेः सङ्गोऽधः पातयेद्यतिम्॥४३॥ चलन्निर्जन्तुकं देशं दृष्ट्वा पादं न्यसेत्सदा । न धावेच्च पिबेत्तोयं वस्त्रपूतं विवेकवान् ॥४४॥ शान्तो दान्तश्चोपरतस्तितिक्षुः श्रद्धयान्वितः । दयालुर्धैर्यवान्कर्मफलत्यागी भवेन्मुनिः ॥४५॥ व्रतोपवासनियमान् विष्णुपूजां च न त्यजेत् । सदा जपेच्च प्रणवं तदर्थं च विचारयेत् ॥४६॥ कुर्यात्तथोपनिषदां श्रवणं मननं पुनः । निदिध्यासं च तेन स्याज्ज्ञानविज्ञानवान् यतिः ॥४७॥ देहात्मनोः पृथग्रूपं पश्येत्साङ्ख्येन चात्मवान् । जयेज्जिह्वोपस्थवेगमष्टधा ब्रह्मचर्यवान् ॥४८॥ अन्वीक्षेतात्मनो बन्धं मोक्षं च ज्ञाननिष्ठया। बन्ध इन्द्रियविक्षेपो मोक्ष एषां च संयमः ॥४९॥ आज्ञामवाप्य स्वगुरोर्विचरेत्पृथिवीमिमाम् । सारभूतमुपासीत ज्ञानं यन्मोक्षसाधनम् ॥५०॥ पुरग्रामव्रजान्सार्थान् भिक्षार्थे प्रविशंश्चरेत् पुण्यदेशसरिच्छैलवनाश्रमवर्तीं महीम् ॥५१॥ नापृष्टः केनचिद्ब्रूयान्न चान्यायेन वादिनम् । विद्वानपि हि मेधावी विचरेज्जडवद्यतिः ॥५२॥ एकस्मिन्नेव न ग्रामे न चैकस्मिन्सरित्तटे। शून्यागारे न चैकस्मिन्वसेद्बहुदिनानि च ॥५३॥ पञ्चाहानि पुरे ग्रामे दिनमेकं वसेद्यतिः । सङ्गादशेषा दोषाः स्युर्मुक्तस्यापीति तं त्यजेत् ॥५४॥ सतां सङ्गस्तु कर्तव्यो

---

ક્રોધાદિ દોષનો ત્યાગ તે સ્નાન કહેલું છે. તત્ત્વરૂપ પરંબ્રહ્મ પરમાત્માનું સ્વરૂપ જે ચિહ્નાદિ યુક્ત તેનો યથાર્થ નિર્ણય તે ધ્યાન કહ્યું છે. ચક્ષુ આદિક ઈંદ્રિયો અને મનનું એકાગ્રપણું-પોતપોતાનાં વિષયમાંથી પાછા વાળી ભગવાનમા જોડવા તે તપ કહ્યું છે. ભૂત પ્રાણિમાત્રને અભય આપવું તે દાન કહ્યું છે. ત્રણ દેહથી વિલક્ષણતાની ભાવનાપૂર્વક પોતાના આત્માને અક્ષરબ્રહ્મની સાથે ઐક્યની ભાવના કરવી તે યોગ કહ્યો છે. જે યતિને હરિની ભક્તિથી તે સ્નાનાદિ પાંચ ગુણોનું દઢપણું થાય તે યતિ મુક્ત થાય જ. (૩૮-૩૯) પ્રાણી માત્રને મારે નહિ, સારા નિર્ણયથી સત્ય બોલે; ગાય-બ્રાહ્મણાદિની હિંસા વગેરેમાં અનૃત ભાષણ પણ દોષવાળું થતું નથી. (૪૦) ચોરી, વૈર, મદ, લોભ, કુટિલપણું, સ્ત્રી-કથા, શોક, મત્સર, ભય, તૃષ્ણા અને લોકોમાં પ્રીતિનો ત્યાગ કરે. (૪૧) જે ક્રોધ છે તે જ્ઞાન, તપ, પૂજન, દાન, તથા પોતાના શરીરને બાળે છે અર્થાત્ ક્ષીણતાને પમાડે છે. પ્રાણને હરનારા શત્રુરૂપ ક્રોધનો દૂરથી જ ત્યાગ કરવો. (૪૨) પલંગ ઉપર શયન, ધોળું વસ્ત્ર પહેરવું, સુરાપાન, દિવસે શયન, પ્રૈષના ઉચ્ચારણથી પહેલા પોતે 'મારે પિતાદિ નથી, મારે કોઈ પુત્રાદિ નથી એમ કહેવાપૂર્વક ત્યાગ કરેલાં જે સ્ત્રી, પુત્ર, મિત્રો, ક્ષેત્ર, વિત્ત, ગૃહાદિનો ફરી પ્રસંગ યતિને નીચે પાડે છે અર્થાત્ નરકમાં પાડે છે. (૪૩) માર્ગમાં ચાલતો સંન્યાસી, સ્થૂળ, સૂક્ષ્મ કીડી, મકોડી વગેરે જંતુથી રહિત દેશને જોઈને પગ ભૂમિમાં મૂકે, વિવેકી યતિ માર્ગમાં ઉતાવળો ચાલે નહિ અને વસ્ત્રથી ગાળેલું પાણી પીએ. (૪૪) યતિ શાંત, દાંત, વ્યાવહારિક કાર્યથી ઉપરતિ પામેલો, તિતિક્ષુ, શ્રદ્ધાથી યુક્ત, દયાળુ, ધૈર્યવાળો અને કર્મના ફળને ત્યાગ કરનારો થાય. (૪૫) વ્રત-ઉપવાસના નિયમોનો અને વિષ્ણુની પૂજાનો ક્યારેય ત્યાગ ન કરે. ઓંકારનો હંમેશા જપ કરે, તેના અર્થનો વિચાર કરે; (૪૬) તથા ઉપનિષદોનું શ્રવણ, મનન અને વારંવાર નિત્ય અભ્યાસ કરે અને જ્ઞાન-વિજ્ઞાનવાળો થાય. (૪૭) સાંખ્યશાસ્ત્રના વિચારથી દેહ અને આત્માનું રૂપ ભિન્ન ભિન્ન જુએ, આત્મનિષ્ઠાવાળો જિહ્વા અને ઉપસ્થના વેગને જીતે, અષ્ટ પ્રકારે બ્રહ્મચર્યવાળો થાય. (૪૮) આત્મવિચારથી આત્માનો બંધ અને મોક્ષ જુએ. ચક્ષુરાદિ ઈંદ્રિયોના સમુદાયનું જે શબ્દાદિ વિષયોમાં પ્રસરણ થાય તે બંધ જાણવો અને ઈન્દ્રિયોનો સંયમ - વિષયોથી પાછી વાળવી તે મોક્ષ જાણવો. (૪૯) પોતાના ગુરુની આજ્ઞા પામીને આ પૃથ્વીમાં વિચરણ કરે. સમગ્ર સાધનોના રહસ્યભૂત પોતાની સંસારથી મુક્તિ થાય તેનું સાધન જે **જ્ઞાન** તેનો અભ્યાસ કરે. (૫૦) પુરો, ગ્રામો, વ્રજો, જનોના સમુદાયોમાં ભિક્ષા માટે પ્રવેશ કરતો સતો પવિત્ર દેશ, સરિતા, પર્વત, વન અને આશ્રમો જેમાં હોય એવી પૃથ્વીમાં વિચરણ કરે. (૫૧) યતિ કોઈએ પૂછ્યા વગર બોલે નહિ. સર્વ અર્થને જાણતો સતો પણ અન્યાયથી બોલનારા પુરુષને અન્યાયથી કેમ બોલો છો એમ કહે નહિ, પંડિત હોવા છતાં પણ અજ્ઞાનીની માફક વિચરણ કરે. (૫૨) એક ગામમાં ઘણા દિવસો ન રહેવું. એક સરિતાના તટમાં તથા જનવર્જિત ભવનમાં ઘણા દિવસો ન વસે. (૫૩) યતિ નગરમાં પાંચ દિવસ રહે. ગામમાં એક દિવસ રહે, મુક્ત ભાવને પામેલા યતિને ઘણા દિવસ જનોના પ્રસંગથી સમગ્ર દોષો થાય માટે જનોના સંગનો ત્યાગ કરે. (૫૪) હે દ્વિજ ! બ્રહ્મવિદ્યાની પ્રાપ્તિ માટે સત્પુરુષોનો સંગ કરવો; વ્રતોમાં વૃદ્ધ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ब्रह्मविद्याप्तये द्विज! । गुरुवद्व्रतवृद्धांश्च मानयन्प्रणमेद्यतीन् ॥५५॥ त्यक्तसङ्गो जितक्रोधो लघ्वाहारो जितेन्द्रियः । पिधाय बुद्ध्या द्वाराणि ध्यानमेव सदाभ्यसेत् ॥५६॥ शून्येष्वेवावकाशेषु गुहासु च वने तथा । नदीनां पुलिने चापि नित्ययुक्तो वसेद्यतिः ॥५७॥ प्राग्रात्रेऽपररात्रे च मध्यरात्रे तथैव च । सन्ध्यायां च विशेषेण ध्यायेद्धरिमतन्द्रितः ॥५८॥ न संवदेत्स्त्रियं काञ्चित्पूर्वदृष्टां न च स्मरेत् । लौकिकार्थानुपनिषदन्यग्रन्थांस्तु नाभ्यसेत् ॥५९॥ वृक्षाणां जङ्गमानां च न सक्तः पालने भवेत् । विषं बीजं तैजसं च न रक्षेन्मलमूत्रवत् ॥६०॥ यत्रैकोऽपि स्वसम्बन्धी न तत्र दिवसं वसेत् । न तत्सुखदुःखाभ्यां विक्रियां प्राप्नुयात् क्वचित् ॥६१॥ तन्नाशादिशुचा क्वापि यदि रोदिति भिक्षुकः । योजनानां शतं गत्वा तदा पापात्प्रमुच्यते ॥६२॥ वृद्धोऽपि विश्वसेन्नैव वृद्धायामपि योषिति । युज्यते जीर्णकन्थायां जीर्णमप्यम्बरं यतः ॥६३॥ बाह्यमाभ्यन्तरं चेति द्विविधं शौचमाचरेत् । मृज्जलाभ्यां तु बाह्यं स्यान्मनःशुद्धिस्तथान्तरम् ॥६४॥ न लौकिकार्थासक्तः स्यात्कुर्याद्वादं च नात्मवित् । धनग्रहं न कुर्वीत न चैवान्येन कारयेत् ॥६५॥ अजिह्वः पण्डकः पङ्गुरन्धो बधिर एव च । मुग्धश्च यो भवेद्योगी स मुक्तः स्यान्न चेतरः ॥६६॥ इष्टं वानिष्टमश्नाति यथालब्धं तु यो यतिः । ब्रूते हितं मितं सत्यं सोऽजिह्वो मृदुलं वचः ॥६७॥ जातमात्रां वा तरुणीं स्त्रियं वा शतवार्षिकीम् । निर्विकारः समं पश्येत्स यतिः पण्डको मतः ॥६८॥ तीर्थस्नानाय भिक्षार्थं विण्मूत्रोत्सर्जनाय वा । योजनान्नाधिका यस्य गतिः पङ्गुः स उच्यते ॥६९॥ तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगम् । चतुर्युगां भुवं त्यक्त्वा परिव्राट् सोऽन्ध उच्यते ॥७०॥ शृण्वन्नपि स्तुतिं निन्दां

યતિઓને ગુરુની માફક માનતો થકો પ્રણામ કરે. (૫૫) અસંગી, જીતક્રોધ, મિતાહારી, જિતેન્દ્રિય યતિ બુદ્ધિથી ઇન્દ્રિયોને વિષયોથી પાછી વાળીને હંમેશા ધ્યાનનો જ અભ્યાસ કરે. (૫૬) હંમેશા આત્મા-પરમાત્માના ચિંતનમાં ઉદ્યમવાળો યતિ જનોએ રહિત અવકાશવાળા, ગુહાઓ, વન તથા નદીઓના કાંટા અને રેતીવાળા સ્થાનમાં નિવાસ કરે. (૫૭) રાત્રિના પૂર્વભાગમાં, પાછલી રાત્રિએ અને મધ્યરાત્રિમાં તથા બંને સંધ્યા-સમયમાં આળસે રહિત થઈને વિશેષપણે હરિનું ધ્યાન કરવું. (૫૮) કોઈ સ્ત્રીને બોલાવે નહિ. (કોઈ સ્ત્રીની સાથે વાર્તા ન કરે.) સંન્યાસગ્રહણ પહેલાં યથાર્થપણે જોયેલી કોઈ સ્ત્રીનું સ્મરણ કરે નહિ. વ્યાવહારિક પ્રયોજનવાળા, ઉપનિષદ્ વિના બીજા ગ્રંથોનો અભ્યાસ ના કરે. (૫૯) વૃક્ષો અને પશુપક્ષ્યાદિ પાલન કરવામાં આસક્તિવાળો ના થાય. ઝેર, પારદ અને તાંબુ વગેરે ધાતુપાત્રને મળ મૂત્રની માફક પોતાની પાસે રાખે નહિ. (૬૦) જે ગામ વગેરેમાં એક પણ પોતાનો સંબંધી હોય તે ગામ વગેરેમાં એક દિવસ પણ નિવાસ ના કરે. સંબંધીના સુખ-દુઃખના શ્રવણથી હર્ષ શોકરૂપ વિકારને ક્યારેય પણ ન પામે. (૬૧) ભિક્ષુક જો તેના નાશ વગેરેના શોકથી ક્યારેક રુદન કરે તો ચારસો ગાઉ દૂર જઈને તે દોષથી મુકાય છે. (૬૨) વૃદ્ધ યતિ પણ વૃદ્ધા સ્ત્રીને વિષે પણ વિશ્વાસ ના કરે; કારણ કે જૂની કન્થામાં જૂનું પણ વસ્ત્ર ચોંટી જાય છે. (૬૩) બાહ્ય અને આભ્યન્તર : આવી રીતે બે પ્રકારની શુદ્ધિનું આચરણ કરે, તેમાં પણ મૃત્તિકા અને જળથી બાહ્ય શુદ્ધિ થાય તથા મનનો મળ ત્યાગ કરવાથી આભ્યન્તર શુદ્ધિ થાય. (૬૪) આત્મસ્વરૂપને જાણનારો સંન્યાસી સાંસારિક પદાર્થોમાં પ્રીતિવાળો ના થાય, વાણીનો ક્લેશ કરે નહિ, ધનનો સંગ્રહ ન કરે, બીજાની પાસે ન કરાવે. (૬૫) જે યતિ જિહ્વા વિનાનો થાય, નપુંસક થાય, પાંગળો, અંધ, બહેરો, મૂઢ થાય તે મુક્ત થાય. બીજો મુક્ત થાય નહિ. (૬૬) જે યતિ જે પ્રાપ્ત થાય, પોતાને પ્રિય અથવા અપ્રિય કાંગ, કોદરાનો રોટલો વગેરે ભોજ્ય પદાર્થ આદરપૂર્વક જમે, ભોજ્યપદાર્થની પ્રશંસા અથવા નિંદા કરે નહિ. બીજાને હિતકારક, પ્રયોજન જેટલા અક્ષર પોતાના અને પારકા દ્રોહથી રહિત જેવું જોયું હોય અને જેવું સાંભળ્યું હોય તેવું કોમળ વચન બોલે તે યતિ **અજિહ્વ** માનેલો છે. (૬૭) જાત-માત્ર બાળક, સ્ત્રી અથવા તરુણી સ્ત્રીને અથવા સો વર્ષની સ્ત્રીને જે યતિ વિકારે રહિત; સમાન જેમ હોય તેમ જુએ તે **નપુંસક** માન્યો છે. નપુંસકતા રહિત હોવા છતાં સ્ત્રીના દર્શનથી નિર્વિકાર રહે માટે નપુંસક કહ્યો છે. (૬૮) તીર્થમાં સ્નાન કરવા માટે અથવા મળ-મૂત્રનો ત્યાગ કરવા માટે જે યતિનું ગમન ચાર કોશથી અધિક ના હોય તે યતિ **પંગુ** કહેવાય છે. અપંગુ પણ પંગુની માફક બલક્ષીણ હોવાથી ચાલવા માટે શક્તિમાન ના થાય તે માટે પંગુ કહ્યો છે. (૬૯) ઉભો રહેલો અથવા ચાલતો પણ જે સંન્યાસીનાં ચક્ષુ ચાર યુગોના (ચાર હાથનું એક યુગ) પ્રમાણથી અર્થાત્ સોળ હાથ પૃથ્વીનો ત્યાગ કરીને દૂર જાય નહિ તે સંન્યાસી **અંધ** કહેવાય છે. (૭૦) જે યતિ લોકોએ કહેલી સ્તુતિ અથવા

हितं वाप्यहितं वचः । अरुन्तुदं वा लोकोक्तं बधिरोऽविक्रियस्तु यः ॥७१॥ विकारहेतुसान्निध्येऽप्यविकारी जितेन्द्रियः । अज्ञवद्वर्तते यस्तु स मुग्धः प्रोच्यते यतिः ॥७२॥ नाम गोत्रं कुलं देशं श्रुतं वृत्तं बलं वयः । आत्मनः ख्यापयेन्नैव शीलं च क्वचिदात्मवित् ॥७३॥ दारवीमपि नारीं न स्पृशेत्पश्येन्न चित्रिताम् । नारी धनं रसश्चेति त्रयं पातयति ध्रुवम् ॥७४॥ अनिकेतो भवेत्त्यागी बहिर्ग्रामाद्वसेद्यतिः । देवालये क्वचिद्वृक्षमूले वा विजनस्थले ॥७५॥ प्राणान्तिकभयं वापि विण्मूत्रोत्सर्गमन्तरा । न रात्रौ न च मध्याह्ने सन्ध्ययोर्न क्वचिद्व्रजेत् ॥७६॥ यथाऽतिपीडा न भवेच्छरीरे यथा न मृत्युः सहसाऽऽपतेद्वा । तथा परिव्राड् द्विजवर्य! धर्मं समाचरेच्छास्त्रदृशैव पश्यन् ॥७७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे सन्न्यासधर्मेषु प्रव्रज्याधिकारादिनिरूपण-नामैकोनचत्वारिंशोऽध्यायः ॥३९॥

श्रीनारायणमुनिरुवाच - वानप्रस्थान्सदा भिक्षेत्परिव्राड् सुदृढव्रतान् । ज्ञानसिद्धिमवाप्नोति तदन्नेनाशु शुद्धधीः ॥१॥ अभावे वनिनां ग्राम्यान् श्रोत्रियान्ब्राह्मणोत्तमान् । याचेदन्नं यतिस्तेषामभावेऽन्यानपि द्विजान् ॥२॥ भिक्षार्थे नगरग्रामानसङ्गोऽलक्षितो विशेत् । इतस्ततो न वीक्षेत गृहशोभाश्च सम्पदः ॥३॥ न ग्राम्यवार्ताः शृणुयात्प्रीत्या नेक्षेत योषितः । मातृस्वसृसमा विद्यात्तास्तु भिक्षां चरन् यतिः ॥४॥ मृद्दार्वलाबुजं वापि वैणवं तान्तवौपलम् । पार्णं तार्णं तथा क्षौमं भिक्षापात्रमुदीरितम् ॥५॥ सलिलैः शुद्धिरेतेषां गोवालैश्चावघर्षणम् । धातुपात्रं तु न क्वापि स्वधर्मस्थो यतिः

નિન્દા, લોકોએ કહેલું પ્રિય અથવા અપ્રિય અથવા મર્મસ્થલને સ્પર્શ કરનારું વચન સાંભળવા છતાં પણ હર્ષ-શોક રૂપ વિકારે રહિત થાય તે યતિ **બહેરો** કહેવાય છે. (૭૧) જે યતિ વિકારનો હેતુ સમીપમાં હોવા છતાં વિકાર રહિત જિતેન્દ્રિય થઈને અજ્ઞાનીની માફક વર્તે છે તે યતિ **મુગ્ધ** કહેલો છે. આ અજિહ્વ વગેરે લક્ષણો જાબાલ સ્મૃતિને અનુસરીને કહ્યાં છે. (૭૨) આત્મવિત્ યતિ પોતાનું નામ, ગોત્ર, વંશ, દેશ, શાસ્ત્રાધ્યયન, વૃત્તિ, બલ, તારુણ્યાદિ ભાવને અને સારા સ્વભાવને ક્યારેય પણ બીજાની આગળ કહેવું નહિ. (નામ વગેરે પૂર્વાશ્રમનું જાણવું.) (૭૩) કાષ્ટની નારીને અને ચિતરેલી નારીને પણ સ્પર્શ કરવો નહિ, તેમ જોવી પણ નહિ. નારી, ધન અને રસાસ્વાદ એ ત્રણ નિશ્ચે જ યતિને પોતાના ધર્મથી ભ્રષ્ટ કરે છે. (૭૪) ત્યાગી યતિ નિયત નિવાસે રહિત થાય, ગામથી બહાર રહે, ક્યારેક દેવાલયમાં અથવા વૃક્ષના મૂળમાં જને રહિત સ્થાનમાં રહે. (૭૫) પ્રાણાંતિક ભય વિના અથવા મળ-મૂત્રોત્સર્જન કરવા સિવાય રાત્રિએ, મધ્યાહ્નને અને બંને સંધ્યા સમયે ક્યાંય જાય નહિ. (૭૬)

હે બ્રાહ્મણશ્રેષ્ઠ ! જે પ્રકારે શરીરમાં અતિ પીડા ન થાય અથવા એકદમ મૃત્યુ ન થાય તે પ્રકારે સંન્યાસી શાસ્ત્ર નેત્રથી જ જોતા સતા ધર્મનું આચરણ કરે.(૭૭)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે સંન્યાસધર્મેષુ પ્રવ્રજ્યાધિકારાદિનિરૂપણ નામૈકોનચત્વારિંશોઽધ્યાયઃ (૩૯)*

## અધ્યાય : ૪૦

### ધર્મપુત્ર શ્રીહરિએ સંન્યાસીના ધર્મોમાં યતિના ભૈક્ષવિધિનું સ્ફુટ નિરૂપણ કર્યું છે.

**શ્રી નારાયણ મુનિ બોલ્યા** : હે બ્રહ્મન્ ! સુદૃઢ વ્રતવાળા વાનપ્રસ્થોને ત્યાં સદા ભિક્ષા કરે; કારણ કે વાનપ્રસ્થના અન્નથી તત્કાળ નિર્મળ મતિવાળો થઈને જ્ઞાનની સિદ્ધિ પામે છે. (૧) વાનપ્રસ્થોના અભાવમાં ગામમાં રહેલાં શ્રોત્રિય ઉત્તમ બ્રાહ્મણોને ત્યાં સંન્યાસી અન્નની યાચના કરે; તે ના હોય તો પ્રાપ્ત થયેલા બ્રાહ્મણોની પાસે અન્નની યાચના કરે. (૨) યતિ આસક્તિએ રહિત, અલક્ષિત- કોઈએ પણ નહિ જાણેલો એવો થકો ભિક્ષા માટે નગર અને ગામમાં પ્રવેશ કરે. જ્યાં-ત્યાં ગૃહોની શોભા, સંપત્તિઓ ન જુએ. (૩) યતિ ગ્રામ્ય વાર્તાઓ ન સાંભળે, સ્ત્રીઓને પ્રીતિથી જુએ નહીં, ભિક્ષા માટે ફરતા સતા સ્ત્રીઓને માતા-બહેન સમાન જાણે. (૪) મૃત્તિકા, કાષ્ટ, તુમ્બિકાથી થયેલું અથવા વાંસનું અને લતાના તંતુઓથી કરેલું, પથ્થરનું કરેલું, પાંદડાંનું કરેલું, ઉશીરાદિ તૃણનું કરેલું, અતસીના સૂત્રનું કરેલું : આવા પ્રકારનું ભિક્ષાનું પાત્ર યતિઓને ગ્રહણ કરવાપણે કહેલું છે. (૫) એટલાં પાત્રોની જળથી શુદ્ધિ કહેલી છે. ઉચ્છિષ્ટ થયેલાં પાત્રોની, ગાયના

स्पृशेत् ॥६॥ ब्राह्मणक्षत्रियविशां गृहान् याचेत भिक्षुकः । पूर्वाभावे परं याचेद्वर्जयेन्निन्द्यकर्मणः ॥७॥ आहारशुद्धिः सर्वेषां बुद्धिशुद्धेर्हि कारणम् । वेदवेदाङ्गवेत्तापि त्याज्यो दुष्कृतकृद्द्विजः ॥८॥ द्विजाभावे तु सम्प्राप्त उपवासद्वये गते । भैक्षं शूद्रादपि ग्राह्यमिति मेधातिथिर्जगौ ॥९॥ कलौ तु ब्राह्मणानेव वृत्तिभेदाच्चतुर्विधान् । पूर्वाभावे परान् याचेद्बिडालाद्यांस्तु न क्वचित् ॥१०॥ जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः । वेदाध्ययनसम्पन्नः षट्सु कर्मस्ववस्थितः ॥११॥ सत्यं शमो दमोऽद्रोह आनृशंस्यं कृपा घृणा । तपो भक्तिश्च यत्र स्यात्स ब्राह्मण इति स्मृतः ॥१२॥ वेदाध्यायी शस्त्रधारी दानी राज्यरुचिर्घृणी । अश्वयुद्धप्रियः शूरो धैर्यवान् क्षत्रियो द्विजः ॥१३॥ कृषिवाणिज्यगोरक्षाकुसीदाद्युपजीवनः । वेदाध्यायी च दानी च ब्राह्मणो वैश्य उच्यते ॥१४॥ सर्वभक्ष्यरतिर्नित्यं रसलाक्षादिविक्रयी । अनाचारो वेदहीनो ब्राह्मणः शूद्र उच्यते ॥१५॥ स्तेयप्रियः सदा लुब्धो दाम्भिको लोकरञ्जकः । हिंस्रकर्मरुचिर्धूतो बिडालः स तु कथ्यते ॥१६॥ वापीकूपसरःक्षेत्रपल्वलारामनाशकः। स्नानसन्ध्यादिहीनस्तु म्लेच्छ एव मतो द्विजः ॥१७॥ अभक्ष्यभक्षको मूढः परस्त्रीलम्पटोऽशुचिः । कार्याकार्ये न जानाति यः स विप्रः पशुर्मतः ॥१८॥ दयाहीनः प्रमादी च श्रुतिस्मृतिपथातिगः । सुरापानरतो विप्रश्चाण्डालो मांसभक्षकः ॥१९॥ बिडालादीन्वर्जयित्वाऽभिशस्तपतितांस्तथा । याचेदन्नं शुचीन्विप्रांस्त्रीन्वा पञ्चापि सप्त वा ॥२०॥ चिकित्सकं स्त्रीजितं च मृगायुं शल्यहारिणम् । कुलटां पाशिनं षण्ढं यतिर्भिक्षेत्न्न कर्हिचित् ॥२१॥ भिक्षा माधुकरी नाम्नी यतीनामुचिता द्विज ! । यावतोदरपूर्तिः स्यात्तावद्भैक्षं समाचरेत् ॥२२॥ पञ्चकृत्वोऽपि वा

---

વાળોથી ઘસવાથી શુદ્ધિ કહેલી છે. સ્વધર્મમાં રહેલો યતિ ધાતુપાત્રને તો ક્યારેય સ્પર્શ કરે નહીં. (૬) ભિક્ષુક, બ્રાહ્મણ, ક્ષત્રિય અને વૈશ્યોના ગૃહાદિમાં ભિક્ષાની યાચના કરે. તેમાં બ્રાહ્મણ ના હોય તો ક્ષત્રિય અને તે ના હોય તો વૈશ્યની યાચના કરવી, નિંદ્ય કર્મવાળાનો ત્યાગ કરવો. (૭) કારણ કે સર્વ આશ્રમી જનોને આહારશુદ્ધિ તે બુદ્ધિની શુદ્ધિમાં કારણ છે માટે વેદ-વેદાંગ જાણનાર બ્રાહ્મણ પણ જો દુષ્કર્મ પારદાર્યાદિ પાપકર્તા હોય તો ભિક્ષામાં વર્જી મૂકવો. (૮) ત્રૈવર્ણિકની અપ્રાપ્તિમાં બે ઉપવાસ થાય પછી સત્શૂદ્ર જનોથી પણ ભિક્ષા ગ્રહણ કરવી : આ પ્રમાણે મેધાતિથિએ કહ્યું છે. (૯) કલિયુગમાં તો વૃત્તિભેદથી ચાર પ્રકારના બ્રાહ્મણોને જ યાચે, તેમાં પણ પૂર્વના અભાવમાં બીજાઓની પાસે યાચના કરે, બિડાલાદિ ચાર પ્રકારના વિપ્રો પાસે ક્યારેય પણ યાચના કરે નહીં. (૧૦) જે જાત-કર્માદિ સંસ્કારોથી સંસ્કાર પામેલો હોય, બાહ્ય, આભ્યન્તર શુદ્ધિવાળો હોય, સ્નાન, સંધ્યાદિ ષટ્ કર્મ કરનારો હોય જેમાં સત્ય, શમ, દમ, અદ્રોહ, અક્રૂરપણું, કૃપા, ઘૃણા, તપશ્ચર્યા તથા શ્રીવાસુદેવ ભગવાનની નવ પ્રકારની ભક્તિ હોય તે **બ્રાહ્મણ** કહેલો છે. (૧૧-૧૨) વેદાધ્યાયી, શસ્ત્રધારી, દાની, રાજ્યમાં રુચિવાળો, નઠારા કર્મમાં મનનો વિષાદ(ઘૃણા)વાળો, અશ્વ ઉપર આરોહણ, યુદ્ધ-આચરણમાં પ્રીતિયુક્ત, રણમાં ઉત્સાહવાળો અને ધૈર્યવાળો બ્રાહ્મણ **ક્ષત્રિય** કહ્યો છે. (૧૩) ક્ષેત્રને ખેડવાનું, વાણિજ્ય, ગાયોની રક્ષા, વૃદ્ધિજીવન તથા આસ્તિક્ય, વિપ્રની સેવાદિના ગુણોથી જીવનવાળો વેદાધ્યાયી અને દાની એવો બ્રાહ્મણ **વૈશ્ય** કહેવાય છે. (૧૪) નિત્ય સર્વ જનોના અન્નનું ભક્ષણ કરવામાં પ્રીતિવાળો, ઘી, તેલાદિ રસ, લાખ, લવણ વગેરે નિષિધ્ધ વેચનારો, આચાર રહિત-વેદાધ્યયન રહિત : આવો બ્રાહ્મણ **શૂદ્ર** કહેવાય છે. (૧૫) ચોરીમાં પ્રીતિવાળો, સદા લોભી, દાંભિક, લોકને રંજન કરનારો, હિંસાકર્મમાં રુચિવાળો, લોકને ઠગનારો : આવો જે બ્રાહ્મણ તે તો **બિડાલ** કહેવાય છે. (૧૬) વાવ્યો, કૂવા, તળાવો અને ક્ષેત્રો, નાનાં સરોવરો, ઉપવનોને નાશ કરનાર અને સ્નાન-સંધ્યા-હોમાદિ કર્મોથી રહિતઃ આવો બ્રાહ્મણ **મ્લેચ્છ** જ માનેલો છે. (૧૭) જે બ્રાહ્મણ શાસ્ત્ર નિષિદ્ધ ડુંગળી-લસણાદિને ભક્ષણ કરનાર, મૂર્ખ, પરસ્ત્રીલમ્પટ, અશુદ્ધ, કાર્ય અને અકાર્યને નથી જાણતો તે વિપ્ર **પશુ** માનેલો છે. (૧૮) દયારહિત, પ્રમાદી, શ્રુતિ-સ્મૃતિના ધર્મનું ઉલ્લંઘન કરનારો, સુરાપાનમાં પ્રીતિવાળો, માંસ ખાનાર : આવો બ્રાહ્મણ **ચાંડાલ** માનેલો છે. (૧૯) બિડાલાદિ ચાર પ્રકારના બ્રાહ્મણોનો ત્યાગ કરીને તથા અભિશસ્ત (જેને માથે લોકાપવાદ આવ્યો હોય તેવા) પતિતોનો ત્યાગ કરીને પવિત્ર ત્રણ બ્રાહ્મણો અથવા પાંચ કે સાત બ્રાહ્મણોને ત્યાં પણ અન્નની યાચના કરે. (૨૦) વૈદ્ય, પોતાની સ્ત્રીને આધીન, પારધી, મૃગોની હિંસાનાં સાધનોને ગ્રહણ કરનાર, કુલટા, પાશ યુક્ત, અને નપુસંકની પાસે યતિ ક્યારેય પણ ભિક્ષા કરે નહિ. (૨૧) હે દ્વિજ ! માધુકરી નામની ભિક્ષા યતિઓને યોગ્ય છે. જેટલા ભિક્ષાન્નથી યથાયોગ્ય ઉદરપૂર્તિ થાય તેટલી જ ભિક્ષા ગ્રહણ કરે. (૨૨) જે બ્રાહ્મણના ગૃહથી પાંચ વાર અથવા સાત વાર ભિક્ષા ના પામે તેનું ગૃહ ચાંડાલના ગૃહની માફક હંમેશા ત્યાગ

सप्तकृत्वो लभ्यते नो यतः । भैक्षं तद्वर्जयेद्गेहं चण्डालगृहवत्सदा ॥२३॥ याचितुं न गृहं लोभात्पुनर्गच्छेत्तदेव च । अभावे त्वन्यगेहानां तद्गच्छेद्दिवसान्तरे ॥२४॥ विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने । कालेऽपराह्णभूयिष्ठे नित्यं भिक्षां यतिश्चरेत् ॥२५॥ कलावयं तु नियमः प्रायिकस्तदकल्पितान् । सप्तमावधि याचेत गृहान्मध्याह्नतः परम् ॥२६॥ बह्वन्नं पच्यते यत्र मन्यन्ते यत्र मानवाः । अनुद्विग्नाः प्रयच्छन्ति तं देशं यत्नतो व्रजेत् ॥२७॥ जाताशौचं मृताशौचं येषां तान्वर्जयेद्द्विजान् । श्राद्धमात्रं भवेद्यत्र तत्र भिक्षेन्न कर्हिचित् ॥२८॥ न पश्येद्द्वाररन्ध्रेण भिक्षालिप्सुः क्वचिद्यतिः । न कुर्यादुच्चैः क्वचिद्घोषं न द्वारं ताडयेत्क्वचित् ॥२९॥ दण्डं च दक्षिणे कक्षे यतिः सन्धार्य बाहुना । धृत्वा वामकरे पात्रं पिदध्याद्दक्षपाणिना ॥३०॥ भिक्षाटनं प्रकुर्वाणो यद्यमेध्यं स्पृशेद्यतिः । सपात्रो विधिवत्स्नात्वा प्राणायामान्षडाचरेत् ॥३१॥ उदक्याशवचण्डाल-चौरनग्नकपालिभिः । स्पृष्टां भिक्षां त्यजेद्भिक्षुः सवासा जलमाविशेत् ॥३२॥ कुड्ये काष्ठे रथे मञ्चे नौकायां गजवृक्षयोः । तृणौघजलसङ्घाते न दोषः स्पर्शसम्भवः ॥३३॥ भिक्षां गृहीत्वोपावृतः सभैक्षं पात्रमप्सु तत् । निष्प्लाव्य शुचिदेशे च निधायाथ स्वयं शुचिः ॥३४॥ प्रक्षाल्य पाणिपादं च मौनी भोक्तुमुपाविशेत् । धातुः प्रकुप्यते येन तदन्नं वर्जयेद्यतिः ॥३५॥ विष्णोर्नैवेद्यमश्नीयादन्यदेवस्य वर्जयेत् । अपोशानादिविधिना भुञ्जीतामृतवन्मुनिः ॥३६॥ प्राणाहुतीः स्पृशेन्नैव दन्तोष्ठेन कदाचन । प्राश्नीयादवशिष्टं तु स्वयमौषधवद्यतिः ॥३७॥ पात्रं सव्यकरे धृत्वा प्राश्नीयाद्दक्षपाणिना । अर्धाहारं प्रकुर्वीत देहो वर्तेत यावता ॥३८॥ कामदर्पादयो दोषा न बाधन्ते मिताशिनम्। एककालं सदाश्नीयान्न सङ्गृह्णीत भिक्षितम् ॥३९॥ अभ्यासं ब्रह्मविद्यायाः सर्वकालं समाचरेत् । एतदर्थं हि सन्न्यासो विहितोऽत्र द्विजन्मनाम् ॥४०॥ न

---

કરે. (૨૩) મિષ્ટાન્ન મળેલું હોય તે લોભથી બીજે દિવસે તે જ ગૃહે યાચના કરવા માટે જાય નહિ, બીજા ઘરોના અભાવે તો ત્રીજે દિવસે તેના ઘેર ભિક્ષાર્થે જાય. (૨૪) ધૂમે રહિત, ખાંડવાની ક્રિયા રહિત મુસલ હોય. અંગારે રહિત, ભોજન કરી રહેલા ઘરમાં ઘણું કરીને બપોર પછી યતિ હંમેશા ભિક્ષા કરે. (૨૫) આ ધૂમાદિ રહિત પૂર્વે કહેલો નિયમ તો કલિયુગમાં ઘણું કરીને આશરવા યોગ્ય નથી, માટે કોઈના જાણ્યામાં ના આવે તેવી રીતે સાત ગૃહોમાં મધ્યાહ્ન પછી યાચના કરે (૨૬) જે દેશમાં અતિશય અન્ન પાકતું હોય, જે દેશમાં મનુષ્યો ભિક્ષુકોનો સત્કાર કરતા હોય તે દેશમાં પ્રયત્નપૂર્વક જવું. (૨૭) જે ત્રણ વર્ણનાને જન્મસૂતક અને મરણનું સૂતક હોય તે દ્વિજોને ત્યાગ કરવા. જે દ્વિજના ગૃહમાં શ્રાદ્ધ હોય તે દ્વિજના ગૃહમાં ક્યારેય ભિક્ષા ન કરવી. (૨૮) ભિક્ષાની ઈચ્છાવાળો સંન્યાસી કમાડના છિદ્રથી જુએ નહિ, ક્યારેય પણ ઊંચેથી ભિક્ષા-યાચનાનો શબ્દ કરે નહિ, દ્વારને ક્યારેય દંડાદિથી પ્રહાર કરે નહીં. (૨૯) ભિક્ષા સમયે યતિ દંડને જમણી બગલમાં ધારીને, ડાબા હાથમાં ભિક્ષાનું પાત્ર ધારણ કરીને ભિક્ષાગ્રહણ પછી તે પાત્રને જમણા હાથથી આચ્છાદન કરે. (૩૦) ભિક્ષામાં ફરતા ભોજનપાત્રે સહિત યતિને જો અમેધ્ય વસ્તુનો સ્પર્શ થાય તો વિધિ પ્રમાણે સ્નાન કરીને છ પ્રાણાયામોનું આચરણ કરે, પછી તે ભિક્ષાને જમે ત્યાગ ના કરે. (૩૧) રજસ્વલા, શબ, ચોર, ચાંડાલ, નગ્ન, નાસ્તિક તથા કપાલિ-(સ્મશાનમાં રહી સાંજે કપાળ લઈ ભિક્ષા માગનારા શંભુવ્રતવાળા) એ સ્પર્શ કરાયેલી ભિક્ષાને ભિક્ષુ ત્યાગ કરે, વસ્ત્રે સહિત જળમાં પ્રવેશ કરે. (૩૨) ભીંતમાં, કાષ્ઠમાં, રથમાં, ખાટલામાં, નૌકામાં, હાથી અને વૃક્ષમાં, તૃણના સમુદાયમાં તથા જલના પ્રવાહમાં પૂર્વોક્ત રજસ્વલાદિના સ્પર્શથી દોષ થતો નથી. (૩૩) ભિક્ષા ગ્રહણ કરીને પાછો ફરેલો યતિ ભિક્ષાના અન્ન સહિત તે ભિક્ષાપાત્ર, જળમાં ધોઈને પવિત્ર દેશમાં મૂકીને પછી પોતે હાથ-પગ ધોઈને પવિત્ર મૌન રાખીને જમવા બેસે. જે અન્નથી વીર્ય વૃદ્ધિ પામે તે અન્ન યતિ ત્યાગ કરે. (૩૪-૩૫) યતિ વિષ્ણુને નૈવેદ્ય ધરેલું ભોજન જમે બીજા દેવનું નૈવેદ્ય ત્યાગ કરે, અપોશાનવિધિથી અમૃતની માફક માનીને ભોજન કરે. (૩૬) યતિ દાંત અને ઓષ્ઠથી પ્રાણાહુતિઓને ક્યારેય સ્પર્શ કરે નહીં. પ્રાણાહુતિઓથી બાકી રહેલું અન્ન ઔષધની માફક પોતે જમે. (૩૭) ભિક્ષાનું પાત્ર ડાબા હાથમાં ધારણ કરીને જમણા હાથથી જમે. જેટલા અન્નથી દેહ રહે તેટલા અન્નને જમે (અર્ધો આહાર કરે.) (૩૮) કામ, ગર્વ વગેરે દોષો મિતાહાર કરનાર યતિને પીડા કરતા નથી. હંમેશા એક સમય જ ભોજન કરવું. ભિક્ષાનો સંગ્રહ કરવો નહિ. (૩૯) સર્વદા બ્રહ્મવિદ્યારૂપ ઉપનિષદોનો અભ્યાસ કરવો; કારણ કે આ લોકમાં ત્રણ વર્ણનાં જનોને જે સંન્યાસ તે બ્રહ્મવિદ્યાના અભ્યાસ માટે જ શાસ્ત્રમાં કહેલો છે. યતિએ આપત્કાલ વિના કંઈ પણ પાથેય ગ્રહણ કરવું નહિ. આપત્તિમાં એક દિવસ ભોજન કરે તેટલું પાથેય અન્ન ગ્રહણ કરે. (૪૦-૪૧) હે દ્વિજ ! યતિ આપત્કાલ પડ્યા વિના જો

चाददीत पाथेयं यतिः किञ्चिदनापदि । पक्कमापत्सु गृह्णीयाद्यावद्भुञ्जीत तद्दिने ॥४१॥ एकस्यान्नं त्र्यहं चाद्यान्निरन्तरमनापदि । यदि तर्हि यतिः कुर्यात्प्राणायामान् शतं द्विज ! ॥४२॥ अनापदि पुनर्भुङ्क्ते यतिर्यस्तु प्रमादतः । तप्तकृच्छ्रं व्रतं तस्य तद्दोषशान्तये ॥४३॥ अशक्तः प्राणरक्षार्थं पुनर्मूलफलादिकम् । न दुष्येद्भक्षयन्न्यासी भेषजं दन्तधावनम् ॥४४॥ देशकालादिवैषम्याद्वृत्तिं माधुकरीं यदि । कर्तुं न शक्नुयात्तर्हि भुञ्जीत गृहिवेश्मनि ॥४५॥ एकीकृत्यान्नशाकादि सम्प्रोक्ष्याद्भिस्तु तद्यतिः । भुञ्जीतौषधवन्मौनी वृद्धार्तौ वा पृथक्पृथक् ॥४६॥ मृत्तोयभिक्षादिपदार्थयाचने भाषेत चेद्ब्राह्मणयोषया यतिः । असन्निधानेऽपि नरस्य तर्ह्यसौ दुष्येन्न विप्रेन्द्र ! रहो न चेत्तदा॥४७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे सन्न्यासधर्मेषु भैक्षविधिनिरूपणनामा चत्वारिंशोऽध्यायः॥४०॥

श्रीनारायणमुनिरुवाच-**वार्षिकांश्चतुरो मासान्ग्रामे वा नगरे वसेत् । मासद्वयं चापदि तु स्थित्वैकत्र ततो व्रजेत् ॥१॥ वर्षासु यावतो ग्रामान् लङ्घयेत्तावतो यतिः । कृच्छ्रोपवासान्कुर्वीत ततः शुद्धो भवेत्किल ॥२॥ अनाचारे वसेन्नैव ग्रामे वा नगरेऽपि वा । स्वाचारेऽपि स्वसम्बन्धी यत्र स्यात्तत्र नो वसेत् ॥३॥ तस्करोपद्रुते ग्रामे ब्रह्महत्यादिदूषिते । दुर्भिक्षे राष्ट्रभङ्गे वा वर्षास्वप्याशु तं त्यजेत् ॥४॥ मासद्वये पौर्णमास्यां यतीनां केशवापनम् । वर्षासु तन्न कर्तव्यं नदीनां तरणं तथा ॥५॥ आसनं पात्रलोपश्च सञ्चयः शिष्यसङ्ग्रहः । दिवास्वापो वृथालापो यतेर्बन्धकराणि षट् ॥६॥ एकाहात्परतो ग्रामे पञ्चाहात्परतः पुरे । वर्षाभ्योऽन्यत्र यत्स्थानमासनं तदुदाहृतम् ॥७॥ उक्तालाब्वादिपात्राणामेकस्यापि न सङ्ग्रहः ।**

---

એકનું અન્ન ત્રણ દિવસ સુધી જમે તો એક સો પ્રાણાયામો કરે. (૪૨) જે યતિ તો આપત્કાલ વિના પ્રમાદથી બે વાર જમે તે યતિને તે દોષની શાંતિ માટે તપ્તકૃચ્છ્ર-વ્રત કહ્યું છે. (૪૩) અસમર્થ સંન્યાસી, પ્રાણની રક્ષા માટે મૂળ-ફળાદિ ફરી ભોજન કરતો સતો દોષવાળો થતો નથી. ઔષધ ભક્ષણ અને દાતણ ફરીથી કરતો સતો દૂષિત થતો નથી. (૪૪) જો દેશ-કાળાદિના વિષમપણાથી માધુકરી વૃત્તિ કરવા માટે શક્તિમાન ના હોય તો ગૃહસ્થ બ્રાહ્મણના ગૃહમાં જમે. (૪૫) યતિ અન્ન-શાકાદિ એક કરીને ભોજન - પાત્રમાં મિશ્રણ કરીને વિષ્ણુપાદોદકથી સંપ્રોક્ષણ કરી તે અન્નને મૌન રાખીને ઔષધની માફક જમે. વૃદ્ધ અને રોગી યતિ તો જુદું જમે. (૪૬)

હે વિપ્રેન્દ્ર ! યતિ જો મૃત્તિકા, જળ, ભિક્ષા, ઔષધ વગેરે વસ્તુઓની યાચના નિમિત્તે બ્રાહ્મણની પત્ની સાથે બોલે, તે સમયે એકાંત ના હોય તો દૂષણ પામતો નથી. (અર્થાત્ એકાંતમાં તો દોષ જ છે.) (૪૭)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ધર્મોપદેશે સંન્યાસધર્મેષુ ભૈક્ષવિધિનિરૂપણનામા ચત્વારિંશોઽધ્યાયઃ (૪૦)*

## અધ્યાય : ૪૧

**સંન્યાસીઓના ધર્મોમાં સંન્યાસીએ ત્યાગ કરવા યોગ્ય કર્મો, તેના પ્રાયશ્ચિતોનું નિરૂપણ કર્યું છે.**

**શ્રી નારાયણ મુનિ બોલ્યા :** હે બ્રહ્મન્ ! યતિ વર્ષાઋતુના ચાર માસ ગામમાં અથવા નગરમાં એક સ્થાનમાં નિવાસ કરે, આપત્કાલમાં તો બે માસ એક સ્થાનમાં રહીને ગામ અથવા નગરમાંથી જાય. (૧) યતિ વર્ષાઋતુમાં જેટલાં ગામોને ઉલ્લંઘન કરે તેટલા કૃચ્છ્રોપવાસો કરે. તે કૃચ્છ્રોપવાસો કરવાથી દોષ થકી શુદ્ધ થાય. (૨) યતિ આચારે રહિત ગામમાં અથવા નગરમાં ન રહે, આચાર સારો-શુદ્ધ હોય તો પણ જે ગામમાં અથવા નગરમાં પોતાના સંબંધી હોય ત્યાં રહેવું નહિ. (૩) પોતે કરેલા નિવાસનું જે ગામ તે ચોરની પીડા યુક્ત હોય, અથવા બ્રહ્મહત્યાદિથી દૂષણયુક્ત અથવા દુર્ભિક્ષ થાય ત્યારે અથવા બીજા રાજાએ દેશનો ભંગ કર્યો હોય તેવા ગામને વર્ષાઋતુમાં પણ તત્કાલ ત્યાગ કરે. (૪) બે માસ થઈ જાય ત્યારે પૂર્ણિમાને દિવસે યતિઓ કેશનું મુંડન કરાવે, તે કેશનું મુંડન વર્ષાઋતુમાં ન કરાવે તથા નદીઓને તરે નહિ. (૫) આસન, પાત્રલોપ, સંચય, શિષ્યસંગ્રહ, દિવાસ્વપ્ન અને વૃથાલાપ : આ **છ** યતિને **બંધન** કરનારાં છે. (૬) વર્ષાઋતુ વિના એક દિવસથી અધિક ગામમાં જે રહેવું અને પાંચ દિવસથી વધારે નગરમાં રહે તે **આસન** કહેલું છે. (૭) ભિક્ષાનું ભોજન



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

भिक्षोर्भैक्षभुजश्चापि पात्रलोपः स उच्यते ॥८॥ गृहीततस्तु दण्डादेर्द्वितीयस्य परिग्रहः । कालान्तरोपभोगार्थं सञ्चयः स प्रकीर्तितः ॥९॥ शुश्रुषालाभपूजार्थं यशोर्थं वा परिग्रहः । शिष्याणां तु न कारुण्यात्स ज्ञेयः शिष्यसङ्ग्रहः ॥१०॥ विद्यादीनां प्रकाशत्वादविद्या रात्रिरुच्यते । विद्याभ्यासे प्रमादो यः स दिवास्वाप उच्यते ॥११॥ आध्यात्मिकीं कथां मुक्त्वा भैक्षादेस्तु प्रशंसनम् । नृपयुद्धादिवार्ताश्च वृथालापः स उच्यते ॥१२॥ वराटकेऽपि यतिना सङ्गृहीते दिने दिने । गोसहस्त्रवधं पापं श्रुतिरेषा सनातनी ॥१३॥ हृदि सस्नेहभावेन चेत्पश्येत्स्त्रियमेकदा । कल्पकोटिद्वयं याति कुम्भीपाकं न संशयः ॥१४॥ न स्नानमाचरेद्भिक्षुः पुत्रादिनिधने श्रुते । पितृमातृक्षयं श्रुत्वा स्नात्वा शुद्ध्यति साम्बरः ॥१५॥ पारिव्राज्यं गृहीत्वा तु स्वधर्मे यो न वर्तते । श्वपदेनाङ्कयित्वा तं राजा शीघ्रं प्रवासयेत् ॥१६॥ छेदने भेदने पाके वीर्योत्सर्गे प्रवर्तते । यस्तं दृष्ट्वा यतिं कार्यं सचैलं स्नानमेव हि ॥१७॥ तिलधान्यहिरण्यक्ष्मागोदासीगृहसङ्ग्रही । यतिः सद्भिर्बहिष्कार्यः स्नातव्यं तस्य दर्शनात् ॥१८॥ सन्न्यासधर्ममारूढो यः प्रत्यावर्तते पुनः । स निन्द्यः सर्वभूतानां पितृघ्नश्चैव जायते ॥१९॥ चण्डालाः प्रत्यवसिताः परिव्राजकतापसाः । तेषां जातान्यपत्यानि चण्डालैर्वासयेन्नृपः ॥२०॥ अन्नदानपरो भिक्षुश्चतुरो हन्ति धर्महा । स्वस्यान्नदं गृहीतारमन्नं स्वं च तुरीयकम् ॥२१॥ निशान्नं शुक्लवस्त्रं च ताम्बूलं मद्यमामिषम् । वाहनं तूलिका मञ्चो धनं नारी रसा इति ॥२२॥ एतानि यस्य सन्न्यासी भुङ्क्ते तस्य कुलं तथा । यतेः कुलं च नरके रौरवे पतति ध्रुवम् ॥२३॥ ग्रामद्वये यदा भिक्षुश्चरेद्भैक्षं प्रमादतः । कञ्चुकं धारयेद्वा यः स तु चान्द्रायणं चरेत् ॥२४॥ धान्यं वृक्षं लतां

---

કરનાર યતિને કહેલાં તુમ્બિકા વગેરે પાત્રોમાં એક પણ પાત્રનો સંગ્રહ ન કરે તો તે **પાત્ર લોપ** કહેવાય છે. (૮) પ્રથમ ગ્રહણ કરેલા દંડથી બીજો દંડાદિનો કાળાંતરમાં ઉપભોગાર્થે જે સંગ્રહ તે **સંચય** કહેવાય છે. (૯) સેવા-પદાર્થની પ્રાપ્તિ-સન્માન માટે અથવા કીર્તિ માટે શિષ્યોનો જે પરિગ્રહ, (કરુણાથી જે શિષ્યનો સંગ્રહ નથી) તે **શિષ્યસંગ્રહ** જાણવો. (૧૦) વિદ્યાદિ ગુણોનું અજ્ઞાન રૂપ અંધકારને નાશ કરવાપૂર્વક હૃદયમાં પ્રકાશ કરવાપણું હોવાથી દિવા કહેવાય છે. વિદ્યા દિવસ કહેવાય છે. અવિદ્યા રાત્રિ કહેવાય છે. વિદ્યાના અભ્યાસમાં પ્રમાદ તે **દિવાસ્વપ્ન** કહેવાય છે. (૧૧) આત્મા, પરમાત્મા. સંબંધી કથાનો ત્યાગ કરીને ભિક્ષાથી પ્રાપ્ત થયેલા અન્નાદિકની પ્રશંસા અને રાજાના યુદ્ધની વાર્તાઓ તે **વૃથા આલાપ** કહેવાય છે. (૧૨) યતિએ કોડી જેટલું ધન સંગ્રહ કરેલું હોય તો **દરરોજ હજાર ગાયના વધનું પાપ થાય** : આ પુરાતની શ્રુતિ છે. (૧૩) તે યતિ જો હૃદયમાં સ્નેહભાવથી એક વાર પણ સ્ત્રીને જુએ તો બે કોટિ કલ્પ પર્યંત કુંભીપાકમાં પડે છે, એમાં સંશય નથી. (૧૪) ભિક્ષુક, પુત્રાદિ મરણ પામ્યે સતે સ્નાન ના કરે, માતા-પિતાનું મરણ સાંભળીને વસ્ત્રે રહિત સ્નાન કરીને શુદ્ધ થાય છે. (૧૫) જે સંન્યાસીપણું ગ્રહણ કરીને સ્વધર્મમાં વર્તતો નથી તે યતિને શ્વાપદનું-(કૂતરાના પગલાનું તપાવેલા લોહ દંડથી) ચિહ્ન કરીને તત્કાલ દેશમાંથી કાઢી મૂકવો. (૧૬) જે યતિ તૃણાદિને છેદે, વૃક્ષાદિને કાપે, અન્નને રાંધે અને વીર્યપાત કરે તે યતિને જોઈને વસ્ત્રે સહિત સ્નાન જ કરવું. (૧૭) તિલ, ધાન્ય, સુવર્ણ, પૃથ્વી, ગાયો, દાસીઓ અને મઠ વગેરેનો સંગ્રહ કરનાર યતિને સ્વધર્મનિષ્ઠ યતિઓએ પોતાના મંડલથી જુદો કરવો. તે યતિના દર્શનથી સ્નાન કરવું. (૧૮) જે યતિ સંન્યાસ-ધર્મનો આશ્રય કરીને ફરીથી પત્ની સંગ્રહપૂર્વક ગૃહસ્થતાને સ્વીકારે છે તે યતિ સર્વભૂતોને નિંદનીય થાય છે જ. (૧૯) સંન્યાસાદિ ત્યાગ કરીને ગૃહીભાવને પામવાથી પોતાના ધર્મથી પડેલા સંન્યાસીઓ અને વાનપ્રસ્થો તે ચંડાલ સદશ થાય છે તેવા સંન્યાસીઓ તથા વાનપ્રસ્થોથી થયેલા પુત્રોને રાજા ચંડાલોની સાથે વાસ કરાવે. (૨૦) પોતાના ધર્મથી ભ્રષ્ટ થઈને અન્નદાનપરાયણ ધર્મધ્ન ભિક્ષુ ચારને નાશ કરે છે, પોતાને અન્ન આપનાર, અન્ન ગ્રહણ કરનાર, અન્નને અને ચોથા પોતાના આત્માને. (૨૧) રાત્રિમાં ફરી ભોજન માટે અન્ન, ધોળું વસ્ત્ર, તામ્બુલ, મદ્ય, આમિષ, વાહન, રજાઈ, પલંગ, ધન, નારી, ભિક્ષાથી ભિન્ન નાના પ્રકારના રસો; (૨૨) જે પુરુષનાં આ કહેલા રાત્રિ-અન્નાદિને સંન્યાસી ભોગવે, તે સંન્યાસીને રાત્રિમાં ભોજન વગેરે આપનાર પુરુષનું કુળ તથા તે સંન્યાસીનું કુળ તે (બંને પણ) રૌરવ નરકમાં નિશ્ચે પડે છે. (૨૩) ભિક્ષુ જો પ્રમાદથી બે ગામમાં ભિક્ષા કરે તો ચાંદ્રાયણ-વ્રત કરે અથવા જે ભિક્ષુ ડગલી ધારણ કરે તે સંન્યાસી પણ ચાંદ્રાયણ કરે. (૨૪) ધાન્ય, વૃક્ષ, લત્તા, મૂલ અથવા ફલ, પુષ્પ, પાન જે યતિ ઉખાડે તે યતિ અવીચિ નામના નરકમાં



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

मूलं फलपुष्पदलानि वा। उत्पाटयेद्यतिर्यस्तु सोऽवीचिं नरकं व्रजेत् ॥२५॥ हनने सूक्ष्मजन्तूनां प्राणायामान्दशाचरेत् । स्वप्ने स्त्रीसङ्गमे स्नात्वा त्रिसहस्रं मनुं जपेत् ॥२६॥ स्कन्देदिन्द्रियदौर्बल्यात्स्त्रियं दृष्ट्वा यतिर्यदि । त्रिरात्रमुपवासं च प्राणायामशतं चरेत् ॥२७॥ स्वप्ने तु क्षरणे स्नात्वा प्राणायामान्दशाचरेत् । उपवासस्तु सर्वत्र वीर्यपाते यतेर्मतः ॥२८॥ भिक्षाक्रियादेरन्यत्र स्त्रिया सह वदेद्यदि । अकामात्तर्ह्युपवसेत्स्नात्वा नाम हरेर्जपन् ॥२९॥ एवमेव प्रकर्तव्यं स्त्रीकथाश्रवणादिषु । सप्तस्वकामतो नूनं यतिना धर्मचारिणा ॥३०॥ कामाद्यदि सकृत्कुर्यात्सप्तस्वन्यतमं यतिः । तप्तकृच्छ्रं व्रतं कुर्यात्तदा नाम जपन् हरेः ॥३१॥ अष्टमे मैथुने साक्षाज्जाते त्वस्य तु निष्कृतिम् । लिङ्गस्योत्कर्तनं कुर्यात्स्वयमेव यतिर्वने ॥३२॥ स्वकर्म ख्यापयँल्लोके तीर्थानि विचरेत्सदा। फलमूलाशनो दान्तः सतां शुद्ध्येत् प्रसादनात् ॥३३॥ यस्तु प्रव्रजितो भूत्वा पुनः सेवेत मैथुनम् । षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥३४॥ कण्डूयनेन चेद्वीर्यं पातयेत्काममोहितः । जपेत्त्रिलक्षं प्रणवं कृत्वा सान्तपनद्वयम् ॥३५॥ असद्वादे च कर्तव्यो यतिना धर्मभीरुणा । अहोरात्रोपवासश्च प्राणायामशतं तथा ॥३६॥ एकान्नं मधु मांसं च तथैव श्राद्धभोजनम् । अभोज्यानि यतीनां वै प्रत्यक्षलवणं तथा ॥३७॥ अज्ञानात्सेवने जाते एषामेकतमस्य च । प्राजापत्यं चरेत्कृच्छ्रं विष्णुनामानि सञ्जपन् ॥३८॥ व्यतिक्रमाश्च ये केचिद्वाङ्मनःकायसम्भवाः । सद्भ्यस्तांस्तु निवेद्यैव यद्ब्रूयुस्ते तदाचरेत् ॥३९॥ एवं स्मृत्युक्तधर्मेभ्यो न चलेद्यो यतिः क्वचित् । स प्राप्नुयाद्ब्रह्मलोकं यतिनामभिवाञ्छितम् ॥४०॥ भक्त्या भगवतः साकं समाचरति यो यतिः । सन्न्यासधर्मानेतान्वै प्राप्नोति स पदं हरेः ॥४१॥ केचिच्च ज्ञानसन्न्यासो वेदसन्न्यास एव च । कर्मसन्न्यास इत्येवं न्यासे त्रैविध्यमूचिरे ॥४२॥ सर्वसङ्गविनिर्मुक्तो निर्द्वन्द्वश्चैव निर्भयः । प्रोच्यते ज्ञानसन्न्यासी स्वात्मन्येव व्यवस्थितः ॥४३॥ वेदमेवाभ्यसेन्नित्यं निर्द्वन्द्वो निष्परिग्रहः ।

---

પડે છે. (૨૫) સૂક્ષ્મ જંતુઓના હણવામાં, દશ પ્રાણાયામો આચરે. સ્વપ્નમાં સ્ત્રીનો સમાગમ કરે તો સ્નાન કરીને ત્રણ હજાર ‘ૐ નમો નારાયણાય’ આ અષ્ટાક્ષર મંત્રનો જપ કરે. (૨૬) યતિ, જો સ્ત્રીને જોઈને ઇન્દ્રિયની દુર્બલતાને લીધે વીર્યપાત થાય તો ત્રણ રાત્રિ ઉપવાસ કરે અને સો પ્રાણાયામ કરે. (૨૭) આ પ્રમાણે સ્વપ્નમાં વીર્યપાત સ્ત્રીને જોયા વિના થાય તો સ્નાન કરીને દશ પ્રાણાયામો કરે. યતિને સર્વે વીર્યપાતમાં ગમે તે પ્રકારે થયો હોય તો ઉપવાસ માનેલો છે. (૨૮) ભિક્ષાની ક્રિયા વિના જો અજાણ્યથી સ્ત્રીની સાથે બોલે તો સ્નાન કરીને હરિનાં નામ જપતો સતો ઉપવાસ કરે. (૨૯) ધર્મનું આચરણ કરનાર યતિએ અજાણ્યે સ્ત્રીની કથા-શ્રવણાદિમાં પ્રત્યેકમાં ઉપવાસ કરવો જ. (૩૦) સંન્યાસી જો સ્ત્રી કથા-શ્રવણાદિ સાતમાં એક પણ કામબુદ્ધિથી એક વાર કરે ત્યારે તો હરિનું નામ જપતો થકો તપ્ત કૃચ્છ્ર-વ્રત કરે. (૩૧) અષ્ટમાં ક્રિયા નિર્વૃત્તિ સંજ્ઞાવાળા મૈથુનમાં સાક્ષાત્ થયે સતે તો યતિ પોતે વનમાં શિશ્નને છેદનરૂપે આઠમા બ્રહ્મચર્ય -ભંગનું પ્રાયશ્ચિત્ત કરે. (૩૨) લોકમાં પોતાનું કર્મ પ્રસિદ્ધ કરતો સતો (મેં આઠમાં બ્રહ્મચર્યનો ભંગ કરેલો છે એમ કહેતો સતો) ફલ-મૂલને ભક્ષણ કરનારો ઇન્દ્રિયોને દમન કરતો યતિ સદા તીર્થોમાં વિચરણ કરે પછી સત્પુરુષોની પ્રસન્નતાથી શુદ્ધ થાય. (૩૩) જે બ્રાહ્મણ સંન્યાસનો સ્વીકાર કરીને ફરીથી મૈથુનનું સેવન કરે તે આઠ હજાર વર્ષ વિષ્ટામાં કીડો થાય છે. (૩૪) જો સંન્યાસી કામથી મોહ પામીને ખંજોળવાથી વીર્યપાતન કરે તો તે **સાન્તપન** નામનું કૃચ્છ્ર-વ્રત કરીને ત્રણ લાખ પ્રણવને જપે. (૩૫) ધર્મના ભંગથી ભીતિવાળો યતિ મિથ્યાલાપ થયે સતે અહોરાત્ર ઉપવાસ કરે તથા શત પ્રાણાયામ કરે. (૩૬) નિત્ય એક જ ગૃહનું અન્નભક્ષણ, મદ્ય, માંસ, તથા શ્રાદ્ધભોજન તથા પ્રત્યક્ષ લવણ : આટલાં યતિઓને નિષિદ્ધ હોવાથી જમવામાં અયોગ્ય છે જ. (૩૭) એ અન્નાદિમાં એક પણ અજ્ઞાનથી ભક્ષણ થયે સતે વિષ્ણુનાં નામો જપતો સતો **પ્રાજાપત્ય** કૃચ્છ્ર-વ્રત કરે. (૩૮) વાણી, મન અને શરીરથી ઉત્પન્ન થનારા જે કેટલાક પોતાના નિયમના ભંગ થાય તો સત્પુરુષોને નિવેદન કરીને તે સંતો જે પ્રાયશ્ચિત્ત કહે તે કરે. (૩૯) જે સંન્યાસી આ પ્રકારે સ્મૃતિમાં કહેલા ધર્મોથી ક્યારેય પણ ચલાયમાન થાય નહિ તે સંન્યાસી યતિઓએ ઈચ્છિત બ્રહ્મલોકને પામે. (૪૦) જે યતિ આ પૂર્વે કહેલાં સંન્યાસના ધર્મો ભગવાનની ભક્તિએ સહિત આચરણ કરે છે તે યતિ હરિના પરમ ધામને પામે છે જ. (૪૧) કેટલાક મુનિઓ, જ્ઞાનસંન્યાસ, વેદસંન્યાસ, કર્મસંન્યાસ, આ પ્રકારે સંન્યાસમાં ત્રણ પ્રકારપણું કહે છે. (૪૨) જે સર્વ સંગથી વિર્નિમુક્ત અને માનઅપમાનથી રહિત, ભયે રહિત, પોતાના આત્મસુખમાં રહેલો છે તે **જ્ઞાન-સંન્યાસી** કહેવાય છે. (૪૩) જે

प्रोच्यते वेदसन्न्यासी मुमुक्षुर्विजितेन्द्रियः ॥४४॥ यस्त्वग्नीनात्मसात् कृत्वा ब्रह्मार्पणपरो द्विजः । स ज्ञेयः कर्मसन्न्यासी महायज्ञपरायणः ॥४५॥ त्रयाणामपि चैतेषामाद्यस्त्वभ्यधिको मतः । न तस्य विद्यते कार्यं न लिङ्गं वा विपश्चितः ॥४६॥ यदि वैराग्यदार्ढ्येन स्याद्भक्तिज्ञानयोर्हरेः । प्रपक्वता यतेस्तर्हि लिङ्गं दण्डादिकं त्यजेत् ॥४७॥ सुखदुःखादिकं देहप्रारब्धानुगतं विदन् । सलिङ्गमाश्रमं त्यक्त्वा चरेदविधिगोचरः ॥४८॥ गूढधर्माश्रितो विद्वानज्ञातचरितं चरेत् । सन्दिग्धः सर्वभूतानां वर्णाश्रमविवर्जितः ॥४९॥ उन्मत्तबालजडवन्मूकवच्च महीं चरेत् । मोक्षधर्मेषु निरतो लब्धाहारो जितेन्द्रियः ॥५०॥ ब्रह्मानन्दे सदा मग्नं निराशं निष्परिग्रहम्। अभ्येति सर्वतः सौख्यं जलानीव महोदधिम् ॥५१॥ त्यागी य ईदृशो विप्र ! निर्विकल्पसमाधिमान् । स महामुक्त इत्युक्तः प्राप्तः सिद्धदशां शुभाम् ॥५२॥ सविकल्पसमाधिस्था ज्ञानिमुक्तास्तु ये द्विज ! । आस्थिताः साधनदशामित्युक्ता न्यासिनस्तु ते ॥ ५३॥ ये वैराग्यबलेनाथ परित्यक्तगृहाश्रमाः । त्रैवर्णिकास्ते सम्प्रोक्ता वैष्णवाः साधुवृत्तयः ॥५४॥ लोभं कामं रसास्वादं स्नेहं मानं विजित्य तैः । त्यागिभिः सर्वभावेन सेवनीयो हरिः सदा ॥५५॥ चतुर्ष्वेतेषु वर्णेषु चतुर्ष्वप्याश्रमेषु च । गृह्णीयुर्विष्णुदीक्षां ये सामान्यां महतीं च वा ॥५६॥ तेषां सामान्यतो धर्मास्त्वेत एवाखिला अपि । विशेषधर्मा ये ते तु ज्ञेया दीक्षाविधेस्त्वया ॥५७॥ वर्णाश्रमाणामिति तेऽखिलानां

પરિગ્રહે રહિત થકો નિત્ય વેદનો જ અભ્યાસ કરે, મુમુક્ષુ, જિતેન્દ્રિય તે **વેદ-સંન્યાસી** કહેવાય છે. (૪૪) જે યતિ અગ્નિઓનું પોતાના આત્મામાં આધાન(ધારણ) કરીને 'બ્રહ્માર્પણં બ્રહ્મહવિ:' આ પ્રમાણે કર્મો કરતો સતો તેના ફલનું શ્રીકૃષ્ણાર્પણમાં આસક્તિવાળો ભગવદ્ ગીતામાં કહેલા સમગ્ર યજ્ઞોમાં ઉત્તમ યજ્ઞનિષ્ઠ છે તે તો **કર્મસંન્યાસી** જાણવો. (૪૫) આ ત્રણ પ્રકારના સંન્યાસીઓમાં પણ જ્ઞાન-સંન્યાસી અધિક માનેલો છે. જ્ઞાનીને કંઈ કાર્ય નથી અથવા લિંગ = દંડ, પાત્ર-આદિ આશ્રમચિહ્નની અપેક્ષા નથી. (૪૬) જો સંન્યાસીને વૈરાગ્યની દઢતાથી હરિની ભક્તિ અને જ્ઞાનની પરિપક્વતા થાય તો તે દંડાદિ ચિહ્નનો ત્યાગ કરે. (૪૭) સુખ-દુ:ખાદિ પોતાના દેહના પ્રારબ્ધ-કર્મથી પ્રાપ્ત થાય એમ જાણતો સતો દંડાદિ ચિહ્નને સહિત જ આશ્રમના આચારના મમત્વને ત્યાગ કરીને શાસ્ત્રમાં કહેલા વિધિનિષેધને અનુસરીને લોક સ્થિતિ માટે પોતે અનુષ્ઠાન કરતો સતો પણ મમતાએ રહિત ફરે. (૪૮) જ્ઞાની સંન્યાસી ગુપ્તપણે પોતાના ધર્મોને પાળતો સતો સર્વે પ્રાણીઓને સંદેહ થાય (જાતિ કે આશ્રમનો નિર્ણય ન થઈ શકે) તેવી રીતે વર્તતો, જેથી વર્ણાશ્રમથી રહિત, વાર્તાદિના પ્રસંગમાં વર્ણાશ્રમની મમતાને પ્રગટ નહિ કરતો સતો કોઈથી પણ ન જાણી શકાય તેવા ચરિત્રવાળો, પૃથ્વીમાં વિચરણ કરે. નિવૃત્તિ ધર્મોમાં પ્રીતિવાળો ઈશ્વરેચ્છાથી પ્રાપ્ત થયેલા આહાર મિષ્ટ—અમિષ્ટને જમનારો જિતેન્દ્રિય સંન્યાસી ગ્રહ ગ્રહીત(ઉન્મત)બાલ-જડ અને મૂંગાની માફક પૃથ્વીમાં વિચરણ કરે. સ્વયં વિદ્વાન હોવા છતાં પણ ઉન્મત્તની માફક, વિવેકવાળો હોવા છતાં પણ માન અને અપમાનથી રહિતપણે બાળકની માફક, નિપુણ હોવા છતાં પણ જડની માફક, સર્વજ્ઞ હોવા છતાં પણ મૂંગાની માફક પોતાને બતાવતો પૃથ્વીમાં વિચરણ કરે. (૪૯-૫૦) પોતાના આત્મામાં ઉપાસ્ય શ્રી વાસુદેવના પરમ આનંદમાં સદા મગ્ન, આશાએ રહિત પરિગ્રહે રહિત યતિને મહાસાગરને જળો જેમ તેમ સર્વ સ્થાનથી સુખ પ્રાપ્ત થાય છે. (૫૧) હે વિપ્ર ! આવો સંન્યાસી શુભ સિદ્ધ દશાને પ્રાપ્ત થયેલો નિર્વિકલ્પ સમાધિવાળો **મહામુક્ત** કહેલો છે. (૫૨) હે બ્રાહ્મણ ! જે સંન્યાસીઓ સાધનદશામાં રહેલા છે તે સંન્યાસીઓ તો સવિકલ્પ સમાધિમાં રહેલાં **જ્ઞાની મુક્તો** કહેલા છે. (૫૩) વળી, જે ત્રણ વર્ણના જનો વૈરાગ્યબળથી ત્યાગ કર્યો છે ગૃહસ્થાશ્રમ જેમણે એવા હોય તે તો **સાધુવૃત્તિવાળા** વૈષ્ણવો કહેલા છે. (૫૪) ત્યાગીઓ એવી સંજ્ઞાવાળા, સાધુવૃત્તિવાળા વૈષ્ણવોએ લોભ, કામ, રસાસ્વાદ, સ્નેહ અને માનને જીતીને એકાંતિક ભાવથી સદા હરિ સેવનીય છે. (૫૫) આ પૂર્વે કહેલાં ચાર વર્ણો અને ચાર આશ્રમોમાં પણ જે વર્ણાશ્રમીઓ સામાન્ય અથવા મહાવિષ્ણુદીક્ષાને ધર્મવંશી ગુરુ થકી સ્વીકાર કરે, તેમના સામાન્યપણે તો પૂર્વે કહેલા જ ધર્મો જાણવા; જે વિશેષ ધર્મો તે તો તમોએ **દીક્ષા વિધિ** થકી (તેમાં અમોએ કહેલા છે તે પ્રમાણે ચતુર્થ પ્રકરણથી) જાણવા. (૫૬-૫૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**धर्मा मयोक्ता द्विजवर्य ! सर्वे । पठिष्यति श्रोष्यति वा य एतान् धर्मे मतिं प्राप्स्यति स स्थिरां वै ॥५८॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे सन्न्यासधर्मेषु त्यागिहेयकर्मतत्प्रायश्चित्तनिरूपण-नामैकचत्वारिंशोऽध्यायः ॥४१॥

ब्राह्मण उवाच-**चातुर्वर्ण्येतरे ये स्युर्ये चान्ये दस्युवृत्तयः । किरातप्रमुखास्तेषां धर्मान् ब्रूहि जगद्गुरो ! ॥१॥** श्रीनारायणमुनिरुवाच-**चातुर्वर्ण्येतरे ये तु सूतवैदेहकादयः । किरातशककङ्काद्या ये च स्युर्दस्युवृत्तयः ॥२॥ मातापित्रोर्हि शुश्रूषा गुरोश्चाश्रमवासिनाम् । भूमिपानां च कर्तव्या तैर्विप्र ! स्वहितार्थिभिः ॥३॥ वृत्तिः सङ्करजातीनां तत्तत्कुलकृता मता। कुलाचारगता हिंसा वर्ज्या चौर्यं च सर्वथा ॥४॥ अहिंसा सत्यमक्रोधः शौचमद्रोह एव च । धर्मा एते हि सामान्याः सर्वेषां समुदीरिताः ॥५॥ तैः सर्वैः पितृयज्ञाश्च कार्याः कूपाः प्रपास्तथा । दानं देयं यथाशक्ति ब्राह्मणेभ्यश्च भक्तितः ॥६॥ दक्षिणा सर्वयज्ञानां दातव्या धनिभिश्च तैः । अन्नवस्त्रादिभिः कार्यं पुत्रदारादिपोषणम् ॥७॥ सर्वथा स्त्री न हन्तव्या सर्वसत्त्वेषु केनचित् । युध्यमानो हि हन्तव्यो न च ग्राह्या बलात्स्त्रियः ॥८॥ गवां सतां च विप्राणां योद्धव्यं रक्षणाय वै । तपस्वी च शिशुर्भीरुर्न हन्तव्यः कदाचन ॥९॥ सर्वस्वेनापि कर्तव्या शुश्रूषा च तपस्विनाम्। अन्नैः फलैरम्बुना वा कार्यं चातिथितर्पणम् ॥१०॥ देवाश्च पितरो विप्रा मान्याः पूज्याश्च भक्तितः । ये तांश्च पीड्येयुस्ते शिक्षणीया यथोचितम् ॥११॥ न सस्यमपहर्तव्यं परक्षेत्राच्च दस्युभिः । जीविकासाधनं यत्तन्नाशनीयं न कस्यचित् ॥१२॥ नातिक्रमः सतां क्वापि कर्तव्यो मनसाऽपि तैः । कृते तु सुकृतं सर्वं समूलं नश्यति ध्रुवम् ॥१३॥ इति सङ्करजातीनां दस्यूनां च हितावहाः । धर्माः**

---

હે દ્વિજવર્ય ! આ પ્રકારે મે સમગ્ર વર્ણાશ્રમોના સર્વે ધર્મો તમોને કહ્યા. જે પુરુષ મેં કહેલા ધર્મોનો પાઠ કરશે અથવા સાંભળશે તે પુરુષ પોતાના ધર્મમાં સ્થિર બુદ્ધિ પામશે જ. (૫૮)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે સંન્યાસધર્મેષુ ત્યાગીહેયકર્મ તત્પ્રાયશ્ચિત્તવિધિનિરૂપણ નામૈકચત્વારિંશોઽધ્યાયઃ (૪૧)*

### અધ્યાય : ૪૨

### શ્રીહરિએ સંકર જાતિના ધર્મોનું સન્નિરૂપણ સારી રીતે કરેલું છે.

**શિવરામબ્રાહ્મણ પુછે છે** - હે જગદ્ગુરો ! જે જનો ચાર વર્ણોથી ભિન્ન હોય અને બીજા જે ભીલ વગેરે ચોરી આદિકથી જીવનવૃત્તિવાળા હોય તે બંનેના ધર્મોને કહો. (૧) **શ્રીનારાયણમુનિ કહે છે** : હે બ્રહ્મન્ ! સૂત, વૈદેહક વગેરે ચાર વર્ણનાથી બીજા હોય તથા ભીલ, શક, કંકાદિ જે ચોરીની વૃત્તિવાળા હોય; (૨) હે વિપ્ર ! પોતાના હિતને ઇચ્છતા તે બંને પ્રકારનાં જનોએ માતાપિતા અને ગુરુ, આશ્રમવાસીઓ અને રાજાઓની સેવા કરવી. (૩) સંકર જાતિ જે સૂતાદિની **વૃત્તિ,** તે તે કુળે કરેલી માનેલી છે. તેમાં કુલાચારથી આવેલી હિંસા સર્વ પ્રકારે ત્યાગ કરવી અને ચોરી ત્યાગ કરવી. (૪) અહિંસા, સત્ય, ક્રોધેરહિતપણું, શુદ્ધિ, અદ્રોહ : આ ધર્મો સર્વેના સામાન્ય કહેલા છે જ. (૫) સર્વે તેમણે શ્રાદ્ધ નામના પિતૃયજ્ઞો, કૂવાઓ તથા પરબો કરવી અને બ્રાહ્મણોને શક્તિ પ્રમાણે ભક્તિથી દાન આપવું. (૬) ધનાઢ્ય ગૃહસ્થોએ સર્વ યજ્ઞોની દક્ષિણા આપવી. યજ્ઞના આચરણ-સ્થાનમાં તે નિમિત્તે કેવલ દક્ષિણા આપવી, અન્ન વસ્ત્રાદિથી પુત્ર, દારાદિનું પોષણ કરવું. (૭) કોઈ પણ પ્રાણીઓમાં સ્ત્રી-જાતિને સર્વ પ્રકારે હણવી નહિ. આતતાયી ભાવથી પોતાની સાથે યુદ્ધ કરતા ને હણવો, બળાત્કારે પરાંગનાઓને ઉપભોગબુદ્ધિથી ગ્રહણ કરવી નહિ. (૮) ગાયો, સાધુ પુરુષો અને બ્રાહ્મણોની રક્ષા કરવા માટે યુદ્ધ કરવું; તપસ્વી, બાલક, તથા ભીરુને ક્યારેય હણવો નહિ, જ. (૯) તપસ્વીઓની સેવા પોતાના સર્વસ્વથી પણ કરવી તથા અન્નો, ફળો, અથવા જળથી અતિથિ-તર્પણ કરવું. (૧૦) દેવો, પિતૃઓ અને બ્રાહ્મણોનો ભક્તિથી સત્કાર કરવો અને પૂજવા. તે દેવાદિને જે પીડા કરે તેને યથાયોગ્ય શિક્ષા કરવી. (૧૧) ચોરની વૃત્તિવાળાઓએ બીજાના ક્ષેત્રથી ધાન્યની ચોરી કરવી નહિ. કોઈની જીવિકાનું સાધન નાશ કરવું નહિ. (૧૨) ચોરોએ સાધુજનોનું (તેમની આજ્ઞા વગેરેનું) ઉલ્લંઘન મનથી પણ ક્યારેય ન કરવું. સત્પુરુષોનું ઉલ્લંઘન કર્યે સતે સર્વ સુકૃત મૂલે સહિત નિશ્ચે નાશ પામે છે. (૧૩) હે દ્વિજ ! આ પ્રમાણે મેં સંકર જાતિ અને ચોરોને હિત કરનારા, પરલોકમાં પણ મંગલ સંપાદન કરનારા ધર્મો શાસ્ત્ર પ્રમાણે

प्रोक्ता यथाशास्त्रं मया श्रेयस्करा द्विज ! ॥१४॥ सुव्रत उवाच-इति प्रोक्तान् भगवता श्रुत्वा धर्मान् स वाडवः । प्रसन्नो धरणीपाल ! पुनः पप्रच्छ तं प्रभुम् ॥१५॥ ब्राह्मण उवाच-धर्माः प्रोक्तास्त्वया स्वामिन् ! पृथक्पृथगनुक्रमात्। वर्णानामाश्रमाणां च तद्बाह्यानां च सर्वशः ॥१६॥ अधुना श्रोतुमिच्छामि प्रायश्चित्तविधिं विभो ! । पापस्य सम्भवे क्वापि वर्णानां विहितोऽत्र यः ॥१७॥ महतामपि पापानामल्पानां च जगद्गुरो ! । निष्कृतिं ब्रूहि मे सर्वां कर्तव्यां सर्वथा नृभिः ॥१८॥ व्रतानां तत्र कार्याणां कृच्छ्रादीनां च सर्वशः । लक्षणान्यपि मे स्वामिन्कृपया वक्तुमर्हसि॥१९॥ सुव्रत उवाच-इति तेन स पृष्ट उवाच हरिर्नु धर्मरहस्यमशेषमपि । अवगन्तुमुदारधिया नृप ! तं मुदितश्च यथागममेव वचः ॥२०॥

इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे धर्मोपदेशे सङ्करजातिधर्मनिरूपणनामा द्विचत्वारिंशोऽध्यायः ॥४२॥

श्रीनारायणमुनिरुवाच-प्रायश्चित्तविधिं विप्र ! कथये ते समासतः । विस्तरोऽन्यत्र तस्यास्ति सारमात्रमिहोच्यते ॥१॥ गुरूणां च लघूनां च क्षयकृत्पापकर्मणाम् । साधनं यत्तदेवात्र प्रायश्चित्तमितीर्यते ॥२॥ षड्विधानि च पापानि प्रोक्तान्येव महर्षिभिः । पातकं च महापापमुपपापं प्रकीर्णकम् ॥३॥ अतिपापं पञ्चमं च षष्ठमत्यधिपातकम् । स्युर्द्वैधैतानि प्रत्येकं कामाकामकृतत्वतः ॥४॥ महापापैस्तु तुल्यानि कथ्यन्ते पातकाख्यया । ब्रह्महत्या सुरापानं स्वर्णस्तेयं तृतीयकम् ॥५॥ गुरुस्त्रीगमनं चैतत्पापकृत्सङ्ग एव च । महापापाभिधानीति पञ्च प्रोक्तानि सत्तम ! ॥६॥ पातकाद्यद्भवेन्न्यूनं तदुक्तमुपपातकम्।

---

કહેલા છે. (૧૪)

**સુવ્રતમુનિ કહે છે** : હે પ્રતાપસિંહ રાજન્ ! આ પ્રમાણે શ્રીહરિએ કહેલા ધર્મોને સાંભળીને **શિવરામ બ્રાહ્મણ** પ્રસન્ન થઈ પ્રભુ શ્રીહરિને ફરીથી પૂછતા હતા : (૧૫) હે સ્વામિન્ ! તમોએ વર્ણો અને આશ્રમો અને સંકરજાત્યાદિના સર્વે ધર્મો જુદા જુદા અનુક્રમથી કહેલા છે. (૧૬) હે વિભો ! હાલમાં પ્રાયશ્ચિત્ત વિધિ સાંભળવા ઇચ્છું છું. આ લોકમાં બ્રાહ્મણાદિ સર્વેને ક્યારેય પણ પાપનો સંભવ હોય તો પ્રાયશ્ચિત્ત-વિધિ કર્તવ્યપણે કહ્યો છે. (૧૭) હે જગદ્ગુરુ ! મનુષ્યોએ સર્વ પ્રકારે કર્તવ્યપણે કહેલી મહાપાપો અને અલ્પ પાપોની સર્વ **પ્રાયશ્ચિત્ત વિધિ** મને કહો. (૧૮) હે સ્વામિન્ ! પાપના પ્રાયશ્ચિત્તમાં કર્તવ્યપણે કહેલા કૃચ્છ્રાદિ સર્વ વ્રતોનાં લક્ષણો પણ કૃપા કરી મને કહેવા માટે યોગ્ય છો. (૧૯)

હે નૃપ ! આ પ્રકારે મહામતિવાળા શિવરામ બ્રાહ્મણે સમગ્ર ધર્મ-રહસ્યને પણ જાણવા માટે પૂછેલા ધર્મોપદેશ-કર્તા શ્રીહરિ પ્રસન્ન થઈને શિવરામ વિપ્રને શાસ્ત્ર પ્રમાણે વચન કહેવા લાગ્યા. (૨૦)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે ધર્મોપદેશે સંકરજાતિધર્મનિરૂપણનામા દ્વિચત્વારિંશોऽધ્યાયઃ (૪૨)*

## અધ્યાય : ૪૩

### શાસ્ત્રના કારણભૂત શ્રીહરિએ પ્રાયશ્ચિત્ત વિધિમાં પરિષત્-સભાનું નિરૂપણ કરેલું છે.

કર્યો, ત્યારે જૂનાગઢથી, હેમંતસિંહના નાના ભાઈ અનુપસિંહ શ્રીહરિને પોતાને ગામ લઈ જવા માટે આવ્યા. (૧૬) અનુપસિંહ શ્રીહરિ પાસે ગયા. નમસ્કાર કરી, પ્રણામ કર્યા. બન્ને હાથ જોડીને વિનંતી કરી : 'હે ભગવન્! જૂનાગઢમાં મંદિર તૈયાર થઈ ગયું છે. (૧૭) હે સ્વામિન્ ! તમો પાર્ષદોએ સહિત, મુનિગણો સાથે, જૂનાગઢ આવીને યથાયોગ્ય મુહૂર્ત સમયે યથાવિધિ શ્રીકૃષ્ણની મૂર્તિપ્રતિષ્ઠા કરો. (૧૮) હે રાજન્ ! આ પ્રકારે અનુપસિંહનું વાક્ય સાંભળીને પ્રસન્ન થયેલા શ્રીહરિ જ્યોતિષ-શાસ્ત્ર જાણનાર રામચન્દ્રાદિ શ્રેષ્ઠ વિપ્રોને બોલાવી, શ્રીકૃષ્ણની મૂર્તિપ્રતિષ્ઠાનું **શુભ મુહૂર્ત** પૂછતા હતા. (૧૯) હે હરે ! વૈશાખ વદી બીજ અને ગુરુવારને દિવસે શ્રીકૃષ્ણની મૂર્તિ- પ્રતિષ્ઠાનું શુભ મુહૂર્ત છે. આ પ્રમાણે દૈવજ્ઞ બ્રાહ્મણોએ કહ્યું. શ્રીહરિએ તે બ્રાહ્મણોને દક્ષિણા આપી. (૨૦) પછી, પોતાના પાર્ષદો, સોમવર્મા આદિ તથા પોતાના ભાઈઓ; તેમના પુત્રો તથા મુનિઓ - જે મુક્તાનંદ આદિ સાધુઓ તથા વર્ણિઓએ સહિત શ્રીહરિ વૈશાખ સુદી દશમીને દિવસે જૂનાગઢ તરફ ચાલ્યા. વૈશાખ સુદી તેરશને દિવસે જૂનાગઢ પહોંચ્યા. (૨૧) શ્રીહરિ પુરમાં આવી રહ્યા છે, એવા સમાચાર સાંભળી પ્રસન્ન થયેલા હેમતસિંહ વગેરે પુરવાસીઓ પોતાના નગરથી જ્યાં શ્રીહરિની સામે જવા માટે તત્કાળ બહાર નીકળે છે ત્યાં તો મુનિ (પાર્ષદો સહિત)શ્રીહરિ તે નગરીમાં આવી પહોંચ્યા. (૨૨) હેમંતસિંહ વગેરે પુરનાં જનોએ શ્રીહરિને પ્રણામ કર્યા. શ્રીહરિએ પ્રસન્ન થઈ સન્માન કર્યા થકા અતિ પ્રસન્ન થઈને અનુયાયીઓ સહિત શ્રીહરિને સુંદર ભુવનોમાં યથાયોગ્ય નિવાસ કરાવીને હર્ષપૂર્વક આદર સત્કાર કર્યો. (૨૩) પછી, શ્રીહરિ મંદિરમાં આવ્યા. ચોતરફ જોઈને પ્રસન્ન થયા. શ્રીહરિ, શિલ્પીવર્યો, હેમંતસિહ રાજા તથા પોતાના સાધુ બ્રહ્માનંદ મુનિને વારંવાર પ્રશંસતા હતા. (૨૪) પછી, શ્રીહરિ હેમતસિંહના મહેલમાં, પોતાના નિવાસ સ્થાનમાં આવીને દેવપ્રતિષ્ઠા માટે યથાયોગ્ય, મહાઉપહારોને હેમંતસિહના સેવકો પાસે મંગાવતા હતા. (૨૫) હે રાજન્ ! પોતે જ કૃષ્ણ શ્રીહરિએ , જુનાગઢના નિવાસી, વેદશાસ્ત્રના જાણનારા શ્રેષ્ઠ બ્રાહ્મણોએ કહેલા વિધિપૂર્વક બે દિવસ કૃષ્ણમૂર્તિની પ્રતિષ્ઠા કરી. (૨૬) હે રાજન્ ! **સંવત્ ૧૮૮૪ ના વૈશાખ વદી ૨** ને દિવસે પ્રથમના બે પ્રહરમાં મધ્ય મંદિરમાં પ્રત્યક્ષ પોતે જ કૃષ્ણ એવા શ્રીહરિ શ્રીદ્વારિકેશની સ્થાપના કરતા હતા. (૨૭) પછી શ્રી દ્વારિકેશને મધ્યમંદિરમાં સ્થાપના કરનારા શ્રીહરિ, દ્વારકાધીશના મંદિરમાં, જમણી બાજુએ રાધારમણની મૂર્તિની સ્થાપના કરતા હતા, જેના દર્શનથી આ જૂનાગઢમાં જ દ્વારિકા - વૃંદાવન આદિ તીર્થ માત્રનું સંપૂર્ણ ફલ પ્રાપ્ત થાય છે. (૨૮) પછી ધર્મસુત એવા શ્રીહરિ, શ્રીદ્વારકેશ મંદિરના ડાબા ભાગમાં અતિ દર્શનીય સિદ્ધેશ્વર નામનાં મૂર્તિમાન શંકર પાર્વતી, ગણપતિ, નન્દીકેશ્વરની યથાવિધિ સ્થાપના કરતા હતા. (૨૯) અગાઉ જેમ વડતાલમાં લક્ષ્મીનારાયણ દેવની પ્રતિષ્ઠાનો



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कृष्णप्रतिष्ठोत्सवमाचचार ॥३०॥ यथाविधीत्थं त्रिषु मन्दिरेषु देवप्रतिष्ठां स विधाय राजन् ! । गोभूहिरण्यानि तिलान् द्विजेभ्यो नूत्नानि वासांसि बहूनि चादात् ॥३१॥ विप्रान्समग्रान् पुरवासिनोऽथ ग्रामान्तरेभ्योऽपि समागतान्सः सन्तर्पयामास तदिष्टभोज्यैर्यथोचितं रौप्यकदक्षिणाभिः ॥३२॥ सौराष्ट्रदेशाधिपतिश्च तस्य बह्वादरो वीक्ष्य महाप्रतापम् । साश्चर्यमागत्य तदीयपार्श्वं प्रणम्य तस्थौ नृप ! दासवच्च ॥३३॥ तं मानयामास हरिस्ततोऽस्मै तन्मन्दिरक्ष्मातलधर्मपत्रम् । कृत्वा ददौ स्वे विषये च तस्य धान्यानयादेरपशुल्कतां सः ॥३४॥ मदर्हकार्यं भवतां भवेद्यत्तत्सर्वथा मे कथनीयमेव । इत्यर्थयित्वा स महीपतिस्तं तदाज्ञया स्वं निलयं जगाम ॥३५॥ सोऽथार्चितो भक्तजनैः सुगन्धपुष्पांशुकस्वर्णविभूषणाद्यैः । तद्देवसेवोत्सवसुव्यवस्थां चकार भूमा दशमीनिशायाम् ॥३६॥ एकादश्यामुत्सवं तत्र कृत्वा प्रातः कृत्वा पारणां चापरेद्युः । भक्तैः साकं निर्ययौ स्वानुयातैः पुर्यास्तस्याः स्तूयमानो जनौघैः ॥३७॥ सन्निवर्त्य पुरवासिनो हरिः स्वाननुव्रजत आस्त्रवद्दृशः । सानुगः पथि निजांश्च रञ्जयन् दर्श आप नृप ! दुर्गपत्तनम् ॥३८॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे जीर्णदुर्गे श्रीद्वारिकेशादिप्रतिष्ठानिरूपण-नामैकोनपञ्चाशत्तमोऽध्यायः ॥४९॥

---

મોટો ઉત્સવ શ્રીહરિએ કર્યો હતો, તેમ જૂનાગઢમાં પણ શ્રીકૃષ્ણની મૂર્તિ -પ્રતિષ્ઠાનો ઉત્સવ કરતા હતા. (૩૦) હે રાજન્ ! શ્રીહરિએ આ પ્રકારે ત્રણે મંદિરોમાં શાસ્ત્રોક્ત વિધિ મુજબ દેવપ્રતિષ્ઠા કરી; પછી ગાયો, પૃથ્વી, સુવર્ણ, તિલ અને વસ્ત્રો બ્રાહ્મણોને દાનમાં આપતા હતા. (૩૧) પછી શ્રીહરિ, પુરવાસી સર્વ બ્રાહ્મણો અને ગ્રામાન્તરથી આવેલા સમગ્ર વિપ્રજનોને પણ ઈષ્ટ ભોજનથી સંતર્પણ કરતા હતા. અને યથાયોગ્ય રૂપિયાની દક્ષિણા આપીને પ્રસન્ન કરતા હતા. (૩૨) હે રાજન્ ! સૌરાષ્ટ્ર દેશનો અધિપતિ **બહાદુરખાન,** શ્રીહરિનો મહાપ્રતાપ જોઈને, આશ્ચર્ય સહિત, શ્રીહરિની સમીપમાં આવીને, શ્રીહરિને વિનયપૂર્વક નમસ્કાર કરી, દાસની માફક ઉભો રહ્યો (૩૩) શ્રીહરિ, પોતાની સમીપમાં આવેલા બહાદુરખાન રાજાનું સન્માન કરતા હતા. પછી રાજાએ તેના મંદિરની પૃથ્વીનો ધર્મપત્ર શ્રી દ્વારકેશ મંદિરની પૃથ્વીના તળનો, જમીનનો, જ્યાં સુધી સૂર્ય, ચન્દ્ર પ્રકાશે ત્યાં સુધીનો ધર્માદા, અર્પણ-પત્ર કરીને પોતાના લેખકો પાસે લખાવીને, પોતાના દેશમાં શ્રી દ્વારિકેશ મંદિર સંબંધી, ધાન્ય, ઘી, ગોળ વગેરેનો લાવવાનો કરવેરો લેવો નહિ, એ પ્રમાણે નિઃશુલ્ક, પૈસા આપ્યા વગર જ લઈ જવા દેવો, એવા લખાણવાળો લેખ શ્રીહરિને આપ્યો. (૩૪) મારે યોગ્ય જે કામ હોય, તે સર્વ અવશ્ય મને કહેવું; આ પ્રકારે રાજા બહાદુરખાને સંપ્રાર્થના કરીને, તે શ્રીહરિની આજ્ઞા લઈ, સ્વસ્થાને ગયા. (૩૫) પછી, હેમંતસિંહ આદિ પોતાનાં આશ્રિતજનોએ સારી રીતે ઘસેલું અગર, ચંદન, પુષ્પો, સુગંધી પુષ્પોના હારો, અને અમૂલ્ય વસ્ત્રો તથા સુવર્ણનાં આભૂષણો, નાના પ્રકારના ફલાદિ ઉપહાર નિવેદનાદિથી પૂજાયેલા, સમગ્ર ગુણયુક્ત, શ્રીહરિએ વૈશાખ વદી દશમીની રાત્રિએ તે દેવસેવાની વ્યવસ્થા કરી. (૩૬) જુનાગઢમાં એકાદશીનો ઉત્સવ કરીને, બારશને દિવસે પ્રાતઃસમયે પારણાં કરીને, પોતાના આશ્રિતજનોએ સ્તુતિ કરાતા શ્રીહરિ, પોતાના અનુયાયી ભક્તજનોની સાથે જૂનાગઢથી નીકળ્યા. (૩૭)

હે રાજન્ ! અશ્રુભીનાં નેત્રો જેમનાં છે, એવા પોતાની પાછળ આવતા પુરવાસી, પોતાના ભક્તજનોને પાછા વાળીને, પોતાના અનુયાયી જનોએ સહિત શ્રીહરિ, માર્ગમાં પોતાના આત્મીય સર્વ ભક્તજનોને તેમની સેવાના અંગીકારથી રાજી કરતાં કરતાં વૈશાખ વદી અમાસને દિવસે ગઢપુર પધાર્યા. (૩૮)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે જીર્ણદુર્ગે શ્રી દ્વારિકેશાદિ પ્રતિષ્ઠાનિરૂપણ-નામૈકોનપંચાશત્તમોऽધ્યાયઃ (૪૯)*

सुव्रत उवाच-**मन्दिरं कारयंस्तत्र धर्मवार्ताभिरन्वहम् । प्रीणयन्निजभक्तांश्च समुवास हरिर्नृप ! ॥१॥ तमेकदा वर्णिराजो मुकुन्दानन्द आदरात् । बद्धाञ्जलिर्नमस्कृत्य पप्रच्छ विनयान्वितः ॥२॥** मुकुन्दानन्द उवाच-**त्वदाश्रितानामस्माकं नैष्ठिकब्रह्मचारिणाम् । श्रोतुमिच्छाम्यहं त्वत्तो धर्मान् पाल्यानशेषतः ॥३॥** सुव्रत उवाच-**इति नैष्ठिकवर्येण पृष्टस्तेन नराधिप! । प्रसन्नो भगवानूचे भक्तिधर्मप्रपोषकः ॥४॥** श्रीनारायणमुनिरुवाच-**समीचीनं त्वया पृष्टं वर्णिराज ! वदाम्यहम् । नैष्ठिकानां यथाशास्त्रं धर्मांस्ते ब्रह्मचारिणाम् ॥५॥ ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः । ब्रह्मचर्याश्रमस्यैते कथिता अधिकारिणः ॥६॥ गर्भाधानादिसंस्कारैः संस्कृतश्चोपनायनम् । प्राप्तो यथाकालमसौ ब्रह्मचर्यं द्विजोऽर्हति ॥७॥ त्रिरात्रं बुद्धिहीनस्य सावित्राख्यं तदीरितम् । प्राजापत्याख्यमुदितं तदब्दं दुर्बलस्य च ॥८॥ अपि बुद्धिमतः पुंसो गृहाश्रमरुचेस्तु तत् । ब्राह्माख्यं द्वादशाब्दं च प्रोक्तं वैराग्यमान्द्यतः ॥९॥ यावज्जीवं नैष्ठिकाख्यमनिच्छोस्तु गृहाश्रमम् । प्रोक्तं तद्बुद्धिवैराग्यबलिनो विरलस्य हि ॥१०॥ तत्रान्त्यः श्रेयसे स्वस्य सद्गुरुं शीघ्रमाश्रयेत् । विष्णुमाहात्म्यबुद्ध्यैव स पठेन्निगमं गुरोः ॥११॥ साङ्गं सार्थं च स गुरोरधीत्य स्वस्य शक्तितः । वेदं दद्यात्ततस्तस्मै शक्त्या स्वर्णादिदक्षिणाम् ॥१२॥ तीव्रवैराग्ययुक्तत्वाद्दीक्षामुद्धववर्त्मनि । सम्प्राप्तो नैष्ठिकीं स स्यात्तद्धर्मान्कीर्तयाम्यहम् ॥१३॥ नैष्ठिकेन व्रतेनैव यावज्जीवं स्वसद्गुरोः । सेवने कृतसङ्कल्पः स भवेद्भक्तिमान् हरौ ॥१४॥ नित्यं यज्ञोपवीतं च स विप्रो धारयेच्छिखाम् । तुलसीमालिकायुग्मं स्वकण्ठपरिवर्ति च ॥१५॥ मौञ्जीं च मेखलां दण्डं पालाशं बैल्वमेव वा । स धारयेद्दर्भपाणिश्चासनार्थं**

## અધ્યાય : ૫૦

### બ્રહ્મચારીઓને રાખવા યોગ્ય પરિગ્રહ અને સ્ત્રીઓના પ્રસંગનો ત્યાગ કહ્યો છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શ્રીહરિ ગઢપુરમાં મંદિર કરાવતા હતા, ત્યારે દરરોજ ધર્મની વાર્તાઓથી પોતાના ભક્તોને આનંદ પમાડતા, નિવાસ કરતા હતા. (૧) એક દિવસે વર્ણિરાજ મુકુન્દાનંદ બન્ને હાથ જોડીને આદરપૂર્વક શ્રીહરિને નમસ્કાર કરીને વિનય સહિત પૂછતા હતા : (૨) હે સ્વામિન્ ! તમારા આશ્રિત નૈષ્ઠિક બ્રહ્મચારીઓ જે અમો તે અમારે પાલન કરવા યોગ્ય ધર્મો તમારાથી સમગ્રપણે સાંભળવા હું ઈચ્છું છું. (૩) હે નરાધિપ ! આ પ્રકારે નૈષ્ઠિક બ્રહ્મચારી મુકુન્દાનંદે પુછાયેલા પ્રશ્નનો ઉત્તર આપવા, ભક્તિ સહિત ધર્મનું પોષણ કરનારા ભગવાન શ્રીહરિ પ્રસન્ન થઈને બોલ્યા : (૪) હે વર્ણિરાજ ! તમોએ ઘણું સારું પુછ્યું હું નૈષ્ઠિક બ્રહ્મચારીઓના ધર્મો શાસ્ત્ર પ્રમાણે તમોને કહું છું. (૫) બ્રાહ્મણ, ક્ષત્રિય, વૈશ્ય આ ત્રણ વર્ણઓ દ્વિજાતિ કહેલા છે. એ બ્રહ્મચર્યાશ્રમના અધિકારીઓ છે. (૬) ગર્ભાધાન આદિ સંસ્કારોથી ઉપનયન-સંસ્કારને પ્રાપ્ત થયેલા દ્વિજ બ્રહ્મચર્યને યોગ્ય છે. (૭) બુદ્ધિ રહિત દ્વિજ માટે **'સાવિત્ર'** સંજ્ઞાવાળું ત્રણ રાત્રિનું બ્રહ્મચર્ય કહેલું છે. દુર્બલ માટે **'પ્રાજાપત્ય'** બ્રહ્મચર્ય કહેલું છે. વૈરાગ્યથી મંદ હોય અને અગાઉ કહેલા કરતાં લગારેક અધિક બુદ્ધિ યુક્ત 'દુર્બલ બુદ્ધિ' હોય તેને માટે આ 'પ્રાજાપત્ય' બ્રહ્મચર્ય છે, જે એક વર્ષ પર્યન્તનું છે. (૮) આગળ કહેલાથી અધિક બુદ્ધિવાળા હોય, વૈરાગ્યની મંદતાથી ગૃહસ્થાશ્રમની રુચિવાળા હોય, તેવા દ્વિજને **'બ્રહ્માખ્ય'** બ્રહ્મચર્ય બાર વર્ષનું કહેલું છે. (૯) બુદ્ધિ અને વૈરાગ્યના સામર્થ્ય સહિત, માટે જ ગૃહસ્થાશ્રમની ઈચ્છાથી રહિત દ્વિજને **'નૈષ્ઠિક'** નામનું બ્રહ્મચર્ય જીવન પર્યન્ત કહેલું છે, જ. (૧૦) તે ચાર પ્રકારના બ્રહ્મચારીઓમાં અંતિમ નૈષ્ઠિક બ્રહ્મચારી, પોતાના કલ્યાણ માટે તત્કાલ સદ્‌ગુરુનો આશ્રય કરે. નૈષ્ઠિક બ્રહ્મચારી વિષ્ણુના માહાત્મ્યની બુદ્ધિથી ગુરુથી જ્ઞાનકાણ્ડાત્મક વેદ ભણે. (૧૧) નૈષ્ઠિક બ્રહ્મચારી શિક્ષાદિ અંગે સહિત, અર્થેસહિત, વેદ, પોતાની શક્તિથી ગુરુથી ભણીને પછી ગુરુને શક્તિ પ્રમાણે સુવર્ણાદિ દક્ષિણા આપે. (૧૨) નૈષ્ઠિક બ્રહ્મચારી તીવ્ર વૈરાગ્યયુક્ત હોવાથી ઉદ્ધવ સંપ્રદાયમાં નૈષ્ઠિકી દીક્ષા પામેલો થાય. તેના સદાચારો હું કહું છું. (૧૩) નૈષ્ઠિક બ્રહ્મચારી નૈષ્ઠિક વ્રતથી જ જીવનપર્યન્ત ઉદ્ધવ સંપ્રદાયના ધર્મવંશી આચાર્યની સેવામાં કર્યો છે સંકલ્પ જેણે એવો, હરિમાં ભક્તિવાળો થાય. (૧૪) નૈષ્ઠિક બ્રહ્મચારી બ્રાહ્મણ હંમેશાં યજ્ઞોપવીત, શિખા, પોતાના કંઠમાં તુલસીની બેવડી કંઠી ધારણ કરે. (આગળ કહેશે એવી જટાધારણથી શિખા ધારણ પ્રાપ્ત થાય, તો પણ કદાચિત્ આપત્કાલમાં મુંડન કરાવે તો શિખાધારણ આવશ્યક સૂચનાર્થ અહીંયાં શિખાધારણ કહેલું છે.) (૧૫) ઉપનયન સમયે પલાશ અથવા બિલીનો દંડ શિખાપર્યંતને ધારણ કરે. યોગ્ય સ્થાને હાથમાં દર્ભ, મૌંજી મેખલા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मृगाजिनम् ॥१६॥ सोपपात्रं चाम्बुभृतं नित्यं धातुकमण्डलुम् । साम्बुगालनवस्त्रं तं धारयेदुज्ज्वलं शुचिः ॥१७॥ धारयेत् पञ्चकेशांश्च जटायां जन्तुसम्भवात् । तत्राग्निहोत्रजं भस्म मिश्रणीयं नहीतरत् ॥१८॥ अतिजन्तूदये पित्रोर्मृत्यौ वाऽऽपदि मुण्डनम् । कक्षोपस्थशिखावर्जं कारयेत्तीर्थ एव सः ॥१९॥ द्वे कौपीने सिते धोत्रे क्षौमं वैकां च कम्बलीम् । धारयेद्भुक्तिसमये परिधानार्थमेव सः ॥२०॥ कन्थां च प्रच्छदपटीं कम्बलं द्वे च पञ्चिके । शिरःपटकमेतानि काषायाण्येव धारयेत् ॥२१॥ पूजोपकरणैः साकं शालग्रामं च धारयेत् । चित्रार्चां चावश्यकानि धातुपात्राणि पक्तये ॥२२॥ सच्छास्त्रपुस्तकं चासौ धर्मज्ञानादिपुष्टये । स्वोपयोगि भवेद्यावत्तावत्तदपि धारयेत् ॥२३॥ पीठार्थं कम्बलीखण्डो जपमाला सगोमुखी । धार्या गोपीचन्दनं च पादुके इति सङ्ग्रहः ॥२४॥ इतोऽन्यत्परिगृह्णीयाद्यावतो वासरान्स तु । उपवासान् प्रकुर्वीत तावतः स्वस्य शुद्धये ॥२५॥ स्त्रियः कामान्न वीक्ष्याश्च क्रीडन्त्यस्तेन वा स्थिताः। श्रव्याः कीर्त्या न तद्वार्ताश्चासच्छास्त्रस्थतत्कथाः ॥२६॥ क्रीडां विनोदं गुह्योक्तिं स्त्रीभिः साकं न चाचरेत् । न कारयेच्च पुंसाऽपि कामयेत हृदा न ताः ॥२७॥ स्पृशेत्स्त्र्यङ्गं तु न क्वापि न च स्त्रीधार्यमंशुकम् । धौतशुष्कं च धौतार्द्रं तच्चेत्तर्हि न दोषभाक् ॥२८॥ विहाय देवतामूर्तिं न स्त्रियाः प्रतिमामपि । काष्ठधातुवस्त्रमृज्जां चित्रस्थामपि न स्पृशेत् ॥२९॥ न स्त्रीजातेश्च गुह्याङ्गं पश्येद्बुद्ध्या च दूरतः । तथा नग्नां तु नेक्षेत कन्यकामपि नैष्ठिकः ॥३०॥ न स्त्रीभिः सह भाषेत न तच्चित्रं तथा लिखेत् । न स्पृशेन्न च वीक्षेत चित्राद्यपि च मैथुनि ॥३१॥ दृश्यमैथुनिचित्रादौ न च गेहे वसेत्क्वचित्। स्त्रीवक्त्रसन्मुखमुखं क्वचिन्नोपविशेच्च सः ॥३२॥ प्रच्छन्नं

અને આસન માટે મગૃચર્મ ધારણ કરે. (૧૬) બાહ્ય અને આભ્યાંતર પવિત્ર વર્ણી પવાલા સહિત જળથી પરિપૂર્ણ ત્રાંબાનું અથવા પિત્તળનું પાત્ર ધારણ કરે અને તેને જળ ગાળવાના વસ્ત્રે સહિત, અંદર અને બહારથી ખાટા દ્રવ્યે સહિત માંજેલું ધારણ કરે. (૧૭) બગલ, ઉપસ્થ, મસ્તક, દાઢી-મૂછના વાળોને ધારણ કરે. જટામાં જંતુ ઉત્પન્ન થવાનો સંભવ હોવાથી જટામાં અગ્નિહોત્રની ભસ્મ મિશ્ર કરે પરંતુ અન્ય ભસ્મ અથવા તેલ વગેરે મિશ્ર (સંસ્કારયુક્ત) ના કરે. (૧૮) તે વર્ણી, અતિ જંતુ ઉત્પન્ન થાય ત્યારે અથવા માતા પિતાનું મરણ થાય ત્યારે અથવા મહારોગાદિ આપત્કાલ હોય ત્યારે અથવા પુણ્ય ક્ષેત્રમાં, બગલ, ઉપસ્થ અને શિખાએ રહિત મુંડન કરાવે. (૧૯) તે વર્ણી બે ધોળાં કૌપીન ઢાંકવાનાં વસ્ત્રો-ધારણ કરે. ભોજન સમયે પહેરવા માટે રેશમી અથવા શણનું વસ્ત્ર અથવા કાંબળી ધારણ કરે. (૨૦) એક ગોદડી, એક કાંબળી, (ઓઢવાની) બે પંચિયાં, ચાર ખૂણાવાળો માથે બાંધવાનો રૂમાલ, કંથા વગેરે વસ્ત્રો કાષાય-લાલ માટીથી રંગેલા જ ધારણ કરવાં. અને લાલ વર્ણવાળી ટોપી ધારણ કરવી. (૨૧) પૂજાનાં ઉપકરણો કળશ્યો,આચમની, અભિષેકનું પાત્ર, નૈવેદ્ય પાત્ર વગેરે પૂજનનાં સાધનોની સાથે શાલિગ્રામ, ચિત્ર-પ્રતિમા, રસોઈ કરવા માટે જરૂરી ધાતુપાત્રો ધારણ કરે. (૨૨) આ વર્ણી, ધર્મ-જ્ઞાનાદિની પુષ્ટિ માટે સત્શાસ્ત્રનાં પુસ્તક ધારણ કરે. તે પુસ્તક પણ જેટલાં પોતાને ઉપયોગી હોય, તેટલાં ધારણ કરે. (૨૩) બેસવા માટે કાંબળીનો કકડો રાખે, ગૌમુખીએ સહિત જપમાળા ધારણ કરે. ગોપીચંદન, તિલક કરવા માટે ધારણ કરે. અને પાદુકાની જોડી રાખે : બ્રહ્મચારીએ આટલો જ પરિગ્રહ કરવો. (૨૪) વર્ણી કૌપીનાદિ વસ્તુઓ, કહેલા પરિગ્રહથી વધારે વસ્તુ જેટલા દિવસ પરિગ્રહ કરે તેટલા ઉપવાસો પોતાની શુદ્ધિ માટે કરે. (૨૫) વર્ણીએ ક્રીડા કરતી અથવા પોતાની ઈચ્છાથી કોઈ ઠેકાણે રહેલી સ્ત્રીઓને કામબુદ્ધિથી જોવી નહીં, તેની વાર્તાઓ સાંભળવી નહીં. (૨૬) સ્ત્રીઓ સાથે વિનોદવાર્તા કરે નહિ. પુરુષ દ્વારા સ્ત્રીઓને ગુપ્તવાર્તા કરે નહિ, કરાવે નહીં. મનથી પણ સ્ત્રીઓને ઈચ્છે નહિ. (૨૭) સ્ત્રીનો કરચરણાદિ અવયવનો સ્પર્શ તો ક્યારેય ન કરે. સ્ત્રીએ પોતાના અંગ ઉપર ધારણ કરેલું વસ્ત્ર ખીંટીએ ટાંગેલું હોય, તેનો સ્પર્શ ન કરે. જો સ્ત્રીનું વસ્ત્ર, ધોઈને સૂકવેલું હોય, ધોયેલું, ભીનું અને નવીન વસ્ત્ર હોય તો તેના સ્પર્શનો દોષ નથી. (૨૮) દેવતાની મૂર્તિ વિના કાષ્ટની, ધાતુની, ત્રાંબા-પિત્તળની, મૂર્તિ, અને કપાસાદિનાં વસ્ત્ર તથા માટીની બનાવેલી સ્ત્રીની મૂર્તિને સ્પર્શ કરે નહિ. સ્ત્રીની ચિત્રપ્રતિમાનો પણ સ્પર્શ કરે નહીં. (૨૯) નૈષ્ઠિક વર્ણિ, સ્ત્રી-જાતિનું ગુહ્ય અંગ જાણીને દૂરથી પણ ન જુએ; તેમ જ નગ્ન બાલિકાને પણ ન જુએ. (૩૦) સ્ત્રીઓની સાથે ભાષણ ના કરે. તેનું ચિત્ર પણ ના ચિતરે. મૈથુનાસક્ત ચિત્રો જે ઘરમાં હોય, તે ઘરમાં ક્યારેય પણ ન રહેવું. સ્ત્રીના મુખ સન્મુખ પોતાનું મુખ થાય, તેમ ક્યારેય બેસવું નહીં. (૩૧-૩૨) કોઈ વસ્તુ સ્ત્રી માટે ગુપ્ત રીતે મોકલવી નહીં; તેમ જ સ્ત્રીએ મોકલાવેલી વસ્તુ

प्रेषयन्नैव वस्तु किञ्चिदपि स्त्रियै । प्रेषितं च तया किञ्चिद्गृह्णीयान्न रहस्तथा ॥३३॥ स्त्रियमुद्दिश्य पुरतः पुरुषस्य हरेरपि । कथां वार्तां न कुर्वीत शृणुयान्न च तां ततः ॥३४॥ स्वपेतां दम्पती रात्रौ यतः कुड्यान्तरे गृहे । तत्र गेहे स्वपेन्नैव दोषो नास्त्यन्यथा त्विह ॥३५॥ न स्वपेत् स्त्रीयुते गेहे सत्सु पुंसु बहुष्वपि । न स्त्रीसञ्चरणस्थाने कुर्यादुत्सर्गकर्म च ॥३६॥ स्नानोत्सर्गादिका यत्र यत्र स्युर्योषितां क्रियाः । तत्र तत्र क्रियां तां तां वर्णी नैवाचरेत्क्वचित् ॥३७॥ धनुर्मानान्तरे नैव स्त्रिया गच्छेदनापदि । मार्गाल्प्योत्सवमौढ्यादौ रक्ष्यं तत्स्पर्शतो वपुः ॥३८॥ स्त्रिया सह रहःस्थाने वर्णी तिष्ठेन्न कर्हिचित् । न चाध्वनि तया साकं स्थविरोऽपि क्वचिद्व्रजेत् ॥३९॥ नारोहेद्वाहनं वर्णी क्वाप्यारोहेद्यदापदि । तदापि न स्त्रिया साकं शकटादावुपाविशेत् ॥४०॥ परिवेष्ट्री पाककर्त्री स्याद्यत्र स्त्री न पूरुषः । तत्र भोक्तुं नैव गच्छेन्न स्पृशेच्च भ्रूकुंसकम् ॥४१॥ गुणांश्चाप्यगुणान्स्त्रीणां क्वचिद्वर्णी न वर्णयेत् । लेपनाद्यर्थमपि ताः स्वमठे न प्रवेशयेत् ॥४२॥ एतेषु नियमेषु स्याद्यस्य भङ्गः प्रमादतः । तत्रैक उपवासोऽस्य प्रायश्चित्तमुदीरितम् ॥४३॥ स्त्रीसम्बन्धिनिषेधोऽयं साक्षात्स्पर्शं रहःस्थितिम् । विना स्वासन्नसम्बन्धस्त्रीभ्योऽन्यत्रावगम्यताम् ॥४४॥ रहःस्थाने तु मात्रापि सह तिष्ठेन्न कर्हिचित् । बृहद्व्रतधरो वर्णी साक्षात्तामपि न स्पृशेत् ॥४५॥ कार्यमावश्यकं स्याच्चेत्सम्बन्धिन्यापि योषया । अस्पृशन्भाषणादीनि तर्हि कुर्वीत नान्यदा ॥४६॥ क्वचिदापदि कष्टायां भाषणस्पर्शने स्त्रियाः। विहिते भवतस्ते च कथयामि समासतः ॥४७॥ अन्नाम्बुकाष्ठपात्रादेर्याचने प्रच्छनेऽथ च । स्वावासस्य वदेन्नारीमुद्दिश्य पुरुषं प्रति ॥४८॥ ईदृशावश्यके कार्ये रीतिरित्थं हि

---

એકાંતમાં ગ્રહણ કરવી નહીં. (૩૩) સ્ત્રીને ઉદ્દેશીને પુરુષની આગળ હરિની કથા-વાર્તા પણ ના કરે, અને સ્ત્રી થકી હરિની કથાવાર્તા સાંભળે નહીં. (૩૪) પોતાના નિવાસસ્થાનથી એક ભીંતવાળા ઘરમાં, જ્યાં રાત્રે સ્ત્રી-પુરુષ સૂતાં હોય, તેવા, તેની બાજુનાં ઘરમા પણ સૂવું નહીં. બીજા ઘરમાં કેવળ સ્ત્રીઓ જ હોય, અથવા પિતાપુત્રાદિ હોય તો તેવા પડોશમાં રહેવામાં દોષ નથી. (૩૫) ઘણા પુરુષો હોય, તોપણ સ્ત્રીએ સહિત બંધી યુક્ત ઘરમાં શયન કરવું નહીં. સ્ત્રીઓના હરવા ફરવાના સ્થાનમાં મળમૂત્રાદિ ત્યાગની ક્રિયા કરવી જ નહિ. તથા જે જે સ્થળમાં સ્ત્રીઓની સ્નાનાદિક ક્રિયાઓ થતી હોય તે તે સ્થાનમાં તે તે ક્રિયા કરવા જવું નહીં. આપત્કાલ પડ્યા વિના, સ્ત્રી થકી ચાર હાથની જગ્યાનો ત્યાગ કરીને સમીપમાં ક્યારેય ચાલવું નહીં. માર્ગ સાંકડો હોય, જન્માષ્ટમી વગેરે ભગવાનના મહોત્સવમાં તથા સ્ત્રીઓનું બાળ, ઉન્મત્ત અને અશક્તપણું વગેરેથી મૂઢતા તથા ભિક્ષા યાચના વગેરેમાં સ્ત્રીસ્પર્શથી શરીરનું રક્ષણ કરવું. તેવા સ્થાનમાં ચાર હાથ જ દૂર રહેવાનો મુદ્દલ વિચાર રાખવો નહીં. રસ્તે ચાલતાં ચાર હાથ દૂર ચાલવું. (૩૬-૩૭-૩૮) વર્ણી વૃદ્ધ હોય તો પણ સ્ત્રી સાથે એકાંતમાં ક્યારેય બેસે નહીં તે સ્ત્રીની સાથે માર્ગમાં ક્યારેય પણ ચાલે નહીં. (૩૯) વર્ણી ક્યારેય પણ વાહન, અશ્વાદિ ઉપર બેસે નહિ. જ્યારે આપત્કાલ હોય, ત્યારે બેસે. ત્યારે સ્ત્રી સાથે ગાડા વગેરે વાહનમાં બેસે નહિ. (૪૦) જે બ્રાહ્મણના ઘરમાં પીરસનારી તથા રસોઈ કરનારી સ્ત્રી હોય, પુરુષ ના હોય, તેવા બ્રાહ્મણના ગૃહમાં જમવું નહીં. સ્ત્રીવેશધારી પુરુષનો સ્પર્શ કરવો નહીં. (૪૧) વર્ણી, સ્ત્રીઓના ગુણ કે અવગુણને પણ ક્યારેય વર્ણવે નહીં. પોતાના નિવાસ સ્થાનમાં લીંપવું વાળવું વગેરે કાર્ય માટે તથા જળ લાવવા માટે પણ સ્ત્રીઓનો પ્રવેશ કરાવવો નહીં. (૪૨) નિત્ય યજ્ઞોપવીત ધારણાદિ નિયમોમાં જે, કોઈ નિયમનું પ્રમાદથી પાલન થાય નહિ, ભંગ થાય, ત્યારે પ્રાયશ્ચિત્તનો એક ઉપવાસ કરવો. (૪૩) આ સ્ત્રી સંબંધી નિષેધ, પ્રત્યક્ષ સ્પર્શ-એકાંત સ્થિતિ વિના, પોતાના સમીપ સંબંધીની સ્ત્રીઓથી બીજી સ્ત્રીઓમાં જાણવો. તે સ્ત્રીઓની સાથે પણ સાક્ષાત્ સ્પર્શ અને એકાંત સ્થિતિ ન કરે. બીજી સ્ત્રીઓ સાથે તો દર્શન-ભાષણાદિનો ત્યાગ કરવા રૂપ સર્વ નિયમો પાળવા. (૪૪) નૈષ્ઠિક બ્રહ્મચર્ય-વ્રતના ધરનાર વર્ણી એકાંત સ્થાનમાં તો પોતાનાં માતુશ્રી વગેરે સ્ત્રીઓ સાથે પણ ક્યારેય ઊભો ન રહે. માતાને પણ સાક્ષાત્ સ્પર્શ ન કરે. (૪૫) જો આવશ્યક કાર્ય હોય તો સ્પર્શ ન કરતો વર્ણી સંબંધી માતા વગેરે સ્ત્રીની સાથે પણ ભાષણાદિ કરે. આવશ્યક કાર્ય વિના ચર્ચા ન કરવી. (૪૬) ક્યારેક કષ્ટ રૂપ આપત્કાલમાં જ, પોતાના સમીપ સંબંધ રહિત સ્ત્રીની સાથે પણ ભાષણ અથવા સ્પર્શ અનુજ્ઞા આપેલી હોય, તે સંક્ષેપથી કહું છું. (૪૭) અન્ન, જળ, કાષ્ઠ, પાત્રો તથા ઔષધાદિની યાચનામાં તથા નહિ જાણેલા પોતાના નિવાસ પૂછવામાં નારીને ઉદ્દેશીને પુરુષના પ્રતિ બોલે, સાક્ષાત્ સ્ત્રી પ્રતિ ન બોલે. (૪૮) આવાં આવશ્યક કાર્ય હોય, તો સ્ત્રી સાથે ભાષણ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

भाषणे । साक्षाद्भाषणकालं च सूचयामि स्त्रियं प्रति ।।४९।। सबन्धनाश्रमे स्वस्य योषा यद्यापतेत्क्वचित्। स्प्रष्टुं वा स्वं तदा त्वस्य न दोषो भाषणे तया ।।५०।। जलाग्निशृङ्गिदंष्ट्र्यादेर्भये शस्त्रादिद्विषात्तथा । गृहद्रुमादिपाते वा रोगे स्वस्य स्त्रिया अपि ।।५१।। प्राणन्तिकापदीदृश्यां साक्षात्स्पर्शे च भाषणे । स्त्रिया जातेऽपि नास्त्येव दोषस्तस्यान्यथाऽस्ति हि ।।५२।। सर्वथैव निषिद्धोऽस्ति स्त्रीप्रसङ्गोऽत्र वर्णिनः । स्त्रैणप्रसङ्गोऽपि तथा हेयः प्रोक्तोऽस्ति बन्धकृत् ।।५३।। न वीर्यपातनं कुर्याद्बुद्धिपूर्वं कदाचन । स्रावे जाते स्वतः कुर्याद्दिनमेकमुपोषणम् ।।५४।। प्रमादात्पातिते वीर्ये कार्यं चान्द्रायणव्रतम्। साक्षात्सङ्गे स्त्रिया जाते पतितोऽसौ बृहद्व्रतात् ।।५५।। नैष्ठिकत्वं न तस्य स्यात्प्रायश्चित्तशतैरपि । अतस्तन्मण्डलाद्भ्रष्टः स त्वौद्धवसमाश्रितात् ।।५६।। प्रायश्चित्तं विधायासौ ततः कुर्याद्गृहाश्रमम्। तत्र साधूत्सेवमानो लक्ष्मीनारायणं भजेत् ।।५७।। यदि न स्यात्स्त्रियाः प्राप्तिः कुलद्रव्याद्यभावतः । तुरीयाश्रममाश्रित्य तपस्येत्तर्हि मुक्तये ।।५८।। तत्रापि भक्तिं कमलाधवस्य कुर्वीत नित्यं स च वर्णिराज !। पापक्रियाया विमुखस्तयाऽसौ मृत्वाप्नुयाद्धाम तदीयमेव ।।५९।। इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे नैष्ठिकधर्मेषु ब्रह्मचारिपरिग्रहस्त्रीप्रसङ्गवर्जननिरूपणनामा पञ्चाशत्तमोऽध्यायः ।।५०।।

---

કરવામાં આવી રીત છે અર્થાત્ પુરુષ દ્વારા ભાષણનો પ્રકાર છે. હવે સ્ત્રીના પ્રત્યે પ્રત્યક્ષ ભાષણકાલ સૂચન કરું છું. (૪૯) પોતાના બંધનવાળા આશ્રમમાં જો ક્યારેક કોઈ સ્ત્રી આવે, અથવા પોતાને સ્પર્શ કરવા આવે, ત્યારે તો તે સ્ત્રી સાથે પ્રત્યક્ષ બોલવામાં આ વર્ણીને દોષ નથી. (૫૦) પોતાને અને સ્ત્રીને પણ જલ, અગ્નિ, મારકણું પશુ, દાઢવાળા સર્પાદિ, ઘોડા ઉપરથી પડવા વગેરેથી, શસ્ત્રાદિ પાતથી તથા વિષથી ભય પ્રાપ્ત થાય અથવા ઘર-વૃક્ષાદિ થકી પડવાથી અથવા રોગ, જ્વરાદિ આવ્યો હોય ત્યારે; આવી પ્રાણવિયોગની પ્રાપ્તિરૂપ આપત્તિ હોય ત્યારે સ્ત્રીનો પ્રત્યક્ષ સ્પર્શ થાય તથા તેની સાથે પ્રત્યક્ષ ભાષણ થાય તો પણ વર્ણીને દોષ નથી. એમ ના હોય તો દોષ છે. (૫૧-૫૨) આ લોકમાં વર્ણીને સ્ત્રી-પ્રસંગ સર્વ પ્રકારે જ નિષેધ છે તથા તે પ્રકારે જ બંધન કરનારો સ્ત્રૈણ પ્રસંગ-સ્ત્રીને આધીન કામી પુરુષનો પ્રસંગ પણ ત્યાગ કરવાનો કહેલો છે. (૫૩) વર્ણી ક્યારેય બુદ્ધિપૂર્વક વીર્યપાત કરે નહિ. પોતાની મેળે થયો હોય, સ્વપ્નમાં કે જાગ્રતમાં અથવા પોતાની મેળે વીર્ય સ્ત્રાવ થાય ત્યારે એક દિવસ ઉપવાસ કરે. (૫૪) પ્રમાદથી વીર્યપાત, ખંજોળવાથી અથવા કરમંથનથી સ્ત્રાવ કર્યો હોય તો વર્ણીએ ચાન્દ્રાયણ વ્રત કરવું. સ્ત્રીનો પ્રત્યક્ષ સંગ થયો હોય, તે આ વર્ણી બૃહદ્વ્રતથી પતિત જાણવો. (૫૫) પતિત વર્ણીનું પ્રાયશ્ચિત્ત સો વખત કરે, તો પણ નૈષ્ઠિકપણું ન થાય; માટે પતિત વર્ણી, ઉદ્ધવ સંપ્રદાયના ધર્મવંશી આચાર્યના આશ્રિત નૈષ્ઠિક બ્રહ્મચારીના મંડલથી ભ્રષ્ટ થયેલો જ છે. (૫૬) આ પતિત વર્ણી, પ્રાયશ્ચિત્ત કરીને પછી ગૃહસ્થાશ્રમ કરે. ગૃહસ્થાશ્રમમાં સાધુઓની સેવા કરતાં કરતાં લક્ષ્મીપતિ શ્રીકૃષ્ણને ભજે. (૫૭) જો કુળ દ્રવ્યાદિના અભાવથી સ્ત્રીની પ્રાપ્તિ ન થાય, તો મુક્તિ માટે ચોથો આશ્રમ સ્વીકારીને તપશ્ચરણ કરે. જો કે કલિયુગમાં સંન્યાસાશ્રમનો નિષેધ કહ્યો છે; તો પણ જ્યાં સુધી ગંગા-વર્ણાશ્રમનો વિભાગ છે, ત્યાં સુધી દોષ નથી. (૫૮)

હે વર્ણિરાજ ! તે સંન્યાસી સંન્યાસ-આશ્રમમાં પણ લક્ષ્મીપતિ કૃષ્ણની ભક્તિ શ્રવણાદિ નિત્ય કરે. આ સંન્યાસી ભગવદ્ભક્તિથી પાપ ક્રિયાથી મુક્ત થયેલો સતો મરીને ભાગવત ધામને જ પામે છે. (૫૯)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે, ધર્મશાસ્ત્રે પંચમપ્રકરણે નૈષ્ઠિક ધર્મેષુ બ્રહ્મચારી પરિગ્રહસ્ત્રીપ્રસંગવર્જનનિરૂપણનામા પંચાશત્તમોડધ્યાયઃ (૫૦)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच–न क्रोधो वर्णिना कार्यो जायेताकस्मिकः स चेत् । तर्हि यस्मै स जातस्तं प्रणम्याशु प्रसादयेत् ।।१।। पापमूलं च लोभोऽस्ति ततस्त्याज्यः स सर्वथा । सङ्ग्रहो नैव कर्तव्यो विहितेतरवस्तुनः ।।२।। त्यागीव ब्रह्मचार्येष धनं रक्षेन्न रक्षयेत् । वर्जयेत्सकलान्भोगान् द्यूतादिव्यसनानि च ।।३।। स्वसम्बन्धिजनानां च दृष्ट्वाऽऽपदं क्वचित् । धनार्थमुद्यमं नैव कुर्यात्तस्या निवृत्तये ।।४।। मोहं मदं मत्सरं च मानं तन्द्रीं च वर्जयेत् । दम्भं दर्पं च कार्पण्यं कलिं निन्दां च यत्नतः ।।५।। अवाच्यां न वदेद्वाचमभक्ष्यं नैव भक्षयेत् । अस्पृश्यं न स्पृशेद्वर्णी नापेयं च पिबेत्क्वचित् ।।६।। न मर्मभिद्वचो ब्रूयाद्दुरुक्तिं वितथं कटु । नानृतं च वदेत्क्वापि सत्यं च परदुःखकृत् ।।७।। रसलुब्धो भवेन्नैव नैकं भिक्षेत चान्वहम् । धातुपुष्टिकरं चान्नं प्रायो वर्णी न भक्षयेत् ।।८।। खर्या उष्ट्र्यास्तुरङ्ग्याश्च हस्तिन्या अपि यत्पयः । आपद्यपि क्वचिन्नैव स्वीकुर्यान्नौषधेऽपि तत् ।।९।। चण्डिकाभैरवादीनां मद्यमांसाशिनां क्वचित् । नाश्नीयाद्ब्रह्मचार्येष आपद्यपि निवेदितम् ।।१०।। नाद्याच्च मादकं किञ्चिन्न स्पृशेत्पललं तथा । नाद्यात्पलाण्डुं लशुनं नान्नं दत्तमश्रद्धया ।।११।। मद्यमांसाद्यभक्ष्येण मिश्रमौषधमप्यसौ । नाद्याच्च तन्न गृह्णीयादज्ञातगुणवैद्यतः ।।१२।। अनिवेदितमन्नं वा फलपत्रादि विष्णवे । ब्रह्मचारी न भुञ्जीत क्वापि किञ्चन नैष्ठिकः ।।१३।। नात्याहारं च कुर्वीत पुनर्भुक्तिमनापदि । पौर्वाह्णिकं कर्म नित्यमसमाप्य च कर्हिचित् ।।१४।। न याचेदाग्रहेणासौ भिक्षां कमपि कर्हिचित् । न द्वारधन्धनं कुर्यान्नाक्रोशं चान्नयाचने ।।१५।। नाभिशस्तं न पतितं पापकर्मरतं न च । द्विजमाशौचिनं क्वापि न याचेदन्नमाह्निकम् ।।१६।। अगालितेन तोयेन

## અધ્યાય : ૫૧

### બ્રહ્મચારીનાં નિષિદ્ધ કર્મો અને તેનાં પ્રાયશ્ચિતો સંક્ષેપથી નિરૂપિત કર્યા છે.

**શ્રી નારાયણ મુનિ બોલ્યા** - હે વર્ણિવર્ય ! વર્ણિએ ક્રોધ ન કરવો. જો ક્રોધ એકદમ થાય તો, તે ક્રોધ જેના ઉપર થયો હોય તે પુરુષને તત્કાલ જ પ્રણામ કરીને પ્રસન્ન કરે. (૧) લોભ પાપનું મૂળ છે. માટે તે લોભનો સર્વ પ્રકારે ત્યાગ કરવો. વિહિતથી બીજી વસ્તુનો સંગ્રહ ના જ કરવો. (અપરિગ્રહ) (૨) આ બ્રહ્મચારી ઉદ્ધવ સંપ્રદાયના સાધુની માફક જ ધન રાખે નહિ. અને રખાવે પણ નહિ. મહાદીક્ષા-વિધિમાં ધનના સ્પર્શનો સર્વ પ્રકારે ત્યાગ હોવાથી સમગ્ર ભોગોને અને દ્યુતાદિ વ્યસનોને ત્યાગ કરે. (૩) વર્ણીએ પોતાનાં સંબંધીઓનો આપત્કાલ જોઈને તેમની આપત્તિની નિવૃત્તિ માટે ક્યારેય પણ, તેને આપવા યોગ્ય દ્રવ્ય નિમિત્તે ઉદ્યમ કરવો નહિ. (૪) મોહ, માદક વસ્તુના ખાવાથી ઉત્પન્ન થતો મદ, મત્સર, માન, આળસ, દંભ, અહંકાર, કૃપણતા, ક્લેશ અને નિંદા પ્રયત્નથી ત્યાગ કરવા. (૫) વર્ણી, લોકનિંદિત વાણી બોલે નહિ, અભક્ષ્ય જે - માંસ, ડુંગળી, લસણ વગેરેને ન જ ખાય. સ્ત્રી પતિત અને અંત્યજ વગેરેનો સ્પર્શ ના કરે. અપેય- જે સુરાપાન વગેરેનું સેવન ક્યારેય ન કરે. (૬) મર્મસ્થાનને ભેદનારાં વચન, દુરુક્તિ તથા વ્યર્થ વચનો અને કડવાં વચનો ના બોલે. ક્યારેય અસત્ય ના બોલે. પારકાને દુઃખ કરનારું સત્ય વચન ન બોલે. (૭) વર્ણી રસાસ્વાદમાં આસક્ત ના થાય. દરરોજ એક ગૃહસ્થની ભિક્ષા ન લે. ધાતુ પુષ્ટ કરનારું અન્ન ઘણું કરીને ના જમે. (૮) ગધેડી, ઘોડી, હાથણી, ઊંટડીનું પણ જે દૂધ - તે આપત્કાલમાં ઔષધ તરીકે પણ સ્વીકાર ન કરવો. (૯) આ બ્રહ્મચારીએ મદ્ય-માંસનું ભોજન કરનારા, ચંડિકા-ભૈરવાદિનું નૈવેદ્ય-આપત્કાલમાં પણ ક્યારેય ન ખાવું. (૧૦) મદને ઉત્પન્ન કરનાર ભાંગ-મફર-અફીણ-તમાકુ વગેરે કંઈ પણ ખાવું નહિ. માંસનો તો સ્પર્શ પણ ના કરે. ડુંગળી-લસણ ના ખાય. અશ્રદ્ધાથી આપેલું જમવું નહિ. (૧૧) મદ્ય કે માંસથી મિશ્રિત ઔષધ પણ ન ખાય જેનું આચરણ ન જાણતા હોય તે વૈદ્યે આપેલું ઔષધ ગ્રહણ કરવું નહિ. (૧૨) નૈષ્ઠિક બ્રહ્મચારીએ વિષ્ણુને નહિ નૈવેદ્ય કરેલું અન્ન, અથવા ફલ-પત્રાદિ કંઈ પણ ક્યારેય ખાવું નહિ. (૧૩) વર્ણી અતિ આહાર ના કરે. આપત્કાલ પડ્યા વગર ફરીથી ભોજન ના કરે. નિત્ય, દિવસના પૂર્વ ભાગમાં કરવા યોગ્ય સંધ્યા-વંદનાદિ રૂપ કર્મ- તે સમાપ્ત કર્યા વગર ક્યારેય ભોજન ના કરવું. (૧૪) આ વર્ણી કોઈની પાસે પણ હઠાગ્રહથી ભિક્ષા-યાચના ના કરે. અન્ન માગવા જાય ત્યારે બારણાની સાંકળ ખખડાવવી નહિ. કોલાહલ કરવો નહિ. (૧૫) એક દિવસ ચાલે તેટલું અન્ન પણ ગાય, બ્રાહ્મણ, સ્ત્રીહત્યાના પાપવાળા, અભિશાપિત દ્વિજ પાસે ક્યારેય યાચના કરે નહિ. તેમજ પતિત, પાપકર્મમાં આસક્ત, જન્મમરણના સૂતકી પાસે યાચના કરે નહિ. (૧૬) અણગણ-ગાળ્યા વિનાનું જળ-થી સ્નાન, પાદ પ્રક્ષાલન તથા

नाम्बुकार्यं समाचरेत् । न स्पृशेन्मद्यपात्रादि यदन्यच्चाप्यमङ्गलम् ॥१७॥ खरमुष्ट्रमनड्वाहं महिषं बर्करं च सः । ब्रह्मचारी नाधिरोहेदापद्यपि कदाचन ॥१८॥ दिवा निन्द्रां न कुर्वीत निशश्चाद्यन्तयामयोः । सन्ध्ययोश्च स्वपेन्नैव ब्रह्मचारी विनापदम् ॥१९॥ प्रासादिकेनापि हरेश्चन्दनेनाङ्गचर्चनम् । तथा सुगन्धितैलेन कुर्यान्नाभ्यङ्गमप्यसौ ॥२०॥ गन्धद्रव्यं च कस्तूरीकुङ्कुमादि न धारयेत् । न दन्तान् रञ्जयेत्क्वापि कुर्यात्तान्नोज्ज्वलानपि ॥२१॥ छत्रं न धारयेद्वर्णी न नृत्यप्रेक्षको भवेत् । नातिरक्तानि वासांसि काषायाण्यपि धारयेत् ॥२२॥ न चाङ्गमर्दनं कुर्यात्स्नानकाले तथा पदे । घर्षयित्वा न धावेच्च मुखं नेक्षेत दर्पणे ॥२३॥ नात्युज्ज्वलानि वासांसि धुत्वा कुर्वीत कर्हिचित् । नाञ्जयेच्च स्वके नेत्रे न ताम्बूलादि भक्षयेत् ॥२४॥ न गायेद्ग्राम्यगीतानि ग्राम्यवार्तां न कीर्तयेत् । न दौत्यं न च पैशुन्यं वर्णी कुर्यान्न चारताम् ॥२५॥ देवताप्रतिमानां च तीर्थानां धर्मिणां गवाम् । वेदानां च सतीनां गर्हां कुर्यान्न सद्गुरोः ॥२६॥ न हिंसेत्प्राणिमात्रं च मनसा वपुषा गिरा । न दन्तधावनायापि छिन्द्यादार्द्रद्रुमाङ्कम् ॥२७॥ तुलसीपत्रपुष्पादि विष्णुपूजनहेतवे । होमार्थं समिधो दर्भान् गृह्णन्नेष न दुष्यति ॥२८॥ न सूर्यास्तमयादूर्ध्वं चलेदध्वन्यनापदि । जन्तूनालोक्य शनकैर्दिवसेऽपि चलेत्पथि॥२९॥ न जन्तुबहुले स्नानं कार्यं क्वापि जलाशये । तत्रैव गालयित्वाम्बु पात्रे स्नायात्ततो बहिः ॥३०॥ शुद्ध्यर्थोदकपात्रेण विनाऽपाक्रच्छमात्मनः । अनिष्कास्य च कुर्वीत न मूत्रोत्सर्गमप्यसौ ॥३१॥ नात्मघातं क्वापि कुर्याज्जातिभ्रंशक्रियां न च । पाणिपादाक्षिचापल्यं न कुर्यात्कूर्दनं तथा ॥३२॥ राज्ञा च राजपुरुषैः स्त्रीभिश्च गुरुभिः सह। विवादं नैव कुर्वीत येन स्वस्य जयो भवेत् ॥३३॥ परान्नोद्वेजयेद्वाचा नाविश्वास्यः परैर्भवेत् । नोद्विजेद्धैर्यवान्वर्णी दुर्जनानां दुरुक्तिभिः ॥३४॥ तेन तूलपटी चापि न प्रावार्या ह्यनापदि । आपद्यपि क्वचिन्नैव सा तु चेत्प्रावृता स्त्रिया ॥३५॥ अनापदि न खट्वायां वर्णी नग्नश्च न स्वपेत् । न

હસ્તપ્રક્ષાલનાદિ કરે નહીં. મદ્યપાત્ર આદિકનો તથા શ્વાન-ગધેડા વગેરે અમંગલ પશુઓનો સ્પર્શ ના કરે. (૧૭) બ્રહ્મચારી આપત્કાલમાં પણ ગધેડા, ઊંટ, બળદ, પાડો, બકરો તેના ઉપર સવારી કરે નહીં. (૧૮) બ્રહ્મચારી આપત્કાલ પડ્યા વિના દિવસે નિદ્રા ના કરે. રાત્રિના પહેલા અને છેલ્લા પ્રહરમાં નિદ્રા ના કરે. બન્ને પ્રાતઃ સાયં સંધ્યામાં શયન કરે નહિ. (૧૯) બ્રહ્મચારી, હરિના પ્રસાદીભૂત ચંદનથી પણ અંગમાં ચર્ચા કરે નહીં તથા હરિનું પ્રસાદીભૂત સુગંધી તેલથી શરીરે મર્દન કરવું નહીં. (૨૦) કસ્તૂરી, કુંકુમ, અત્તર આદિ સુગંધી દ્રવ્ય ધારણ કરે નહીં. દાંતોને રંગે નહીં. દાંતોને દાતણથી ઘસીને અતિશ્વેત પણ ન કરે. (૨૧) વર્ણી છત્ર ધારણ ના કરે. નૃત્ય ન જુએ. કાષાય વસ્ત્રો પણ અતિ લાલ રંગવાળાં ધારણ ના કરે. (૨૨) સ્નાન-સમયે અંગ-મર્દન ના કરે. પગ ઘસીને ના ધૂએ. માત્ર ઊર્ધ્વપુંડ્ર તિલક કરતી વેળા અરીસામાં જુએ તે સિવાય અરીસામાં મુખ ન જુએ. (૨૩) વસ્ત્રો ધોઈને અતિ ઉજ્જ્વલ ક્યારેય ન કરે. નેત્રોમાં કાજલ ના આંજે. પાન તાંબુલ ખાય નહીં, તેમ જ સોપારી, એલાયચી, લવિંગ વગેરે પણ ખાય નહીં. (૨૪) વર્ણી ગ્રામ્યગીતો ન ગાય, ગ્રામ્યવાર્તા ના કરે. દૂતકર્મ ના કરે. ચાડિયાપણું ના કરે. (૨૫) દેવતાની પ્રતિમાઓ, તીર્થો, ધાર્મિક જનો, ગાયો, વેદો, પતિવ્રતા સ્ત્રીઓ અને પોતાના આચાર્યની નિંદા ના કરે. (૨૬) મન, વચન અને કર્મથી પ્રાણી માત્રની હિંસા ના કરે. દાતણ માટે પણ લીલા વૃક્ષનું છેદન કરવું નહીં. (૨૭) વિષ્ણુના પૂજન માટે તુલસીપત્ર, પુષ્પ, હોમ માટે સમિધા તથા દર્ભોને ગ્રહણ કરતાં આ વર્ણી દોષ પામતા નથી. (૨૮) આપત્કાલ પડ્યા વિના, સૂર્ય આથમ્યા પછી માર્ગમાં ન ચાલે. દિવસે પણ માર્ગમાં જંતુઓને જોઈને ધીમે ધીમે ચાલે. (૨૯) બહુ જંતુઓથી વ્યાપ્ત તળાવ વગેરેમાં ક્યારેય સ્નાન ન કરે. બીજા જળાશયના અભાવમાં તે તળાવ વગેરેમાંથી જળને પાત્રમાં ગાળીને તેનાથી સ્નાન કરે. (૩૦) વર્ણી શુદ્ધિ માટે જળપાત્ર વિના તથા પોતાનો પછવાડેનો કચ્છ કાઢ્યા વિના મૂત્રનો પણ ત્યાગ કરે નહીં. (ઉપસ્થને શુદ્ધ કરવાના જળનું પાત્ર તથા હાથપગ ધોવાનું તથા કોગળા કરવાનાં જુદાં જુદાં પાત્રો ધર્મશાસ્ત્રને અનુસરીને જાણવાં.) (૩૧) આત્મઘાત ક્યારેય પણ ના કરે. જાતિભ્રંશ ક્રિયા ન કરે. હાથ, પગ, નેત્રનું ચાપલ્ય ન કરે તથા કૂદે નહીં. (૩૨) રાજા અને રાજપુરુષો, સ્ત્રીઓ અને ગુરુઓની સાથે વિવાદ ના કરે. જે વિવાદથી પોતાનો જય થાય, તેવો વિવાદ ના કરે. (૩૩) વર્ણી, વાણી માત્રથી પણ બીજાને ઉદ્વેગ કરે નહીં. વર્ણી બીજાઓ માટે અવિશ્વાસુ ન બને. વિશ્વાસપાત્ર થાય. ધૈર્યવાળો અને દુર્જનોની નઠારી વાણીથી ઉદ્વેગ ન પામે. (૩૪) આપત્કાલ પડ્યા વગર રૂની ગોદડી વર્ણીએ ન પાથરવી. જો તે ગોદડી સ્ત્રીએ પાથરેલી હોય, તો આપત્કાલમાં પણ તે ઓઢવી કે પાથરવી નહીં. (૩૫) વર્ણી આપત્કાલ વિના ખાટલા-પલંગ ઉપર શયન કરે નહીં. નગ્ન શયન કરે નહીં.

**केशोत्पाटनं कुर्यान्न मण्यादिप्रतिग्रहम् ।।३६।। मृत्तिकातृणकाष्ठादि यत्स्यात्सस्वामिकं यदि । तदा तदपि चौर्येण गृह्णीयान्न कदाचन ।।३७।। न सन्ध्याहोमयोः कालमतिक्राम्येद्विनापदम् । विष्णुपूजां गुरोः सेवामर्कोपास्तिं तथैव च ।।३८।। क्षेत्रवाटीद्रुमावापं स्ववृत्त्यर्थं न चाचरेत् । नैवान्नसङ्ग्रहं कुर्यान्न रसादेरपि क्वचित् ।।३९।। नापवादं गुरोः क्वापि ब्रूयान्नातिक्रमेत्सतः । परिदध्यान्न विकृतं वासश्चोपानहौ न च ।।४०।। अमार्गेण न गच्छेच्च गृहिगेहं कदाचन । बालकं लालयेन्नैव वर्णी कस्यचिदप्यसौ ।।४१।। तैलेन केशसंस्कारं ब्रह्मचारी न चाचरेत् । मनुष्यं वापि पश्वादिं तृणेनापि न ताडयेत् ।।४२।। विप्रभिक्षुकसूतादेराजीव्यवृत्तिनाशनम् । यथा स्यान्न तथा कुर्याद्वार्ता हर्याश्रिता अपि ।।४३।। पितरौ स्वमुपाध्यायं सतीर्थ्यं च गुरुं विना । सनाभेरपि नो कुर्यादौर्ध्वदैहिककर्म च ।।४४।। यो यं निषेधेष्वेतेषु व्यतिक्रामेदनापदि। स तद्दोषापनोदार्थं कुर्यात्पृथगुपोषणम् ।।४५।। न निष्कृतिं दुष्कृतकर्मणो यः करोति मूढः स तु वर्णिवर्य !। दुष्कीर्तिमाप्नोति हि भूमिलोके ज्ञेयश्च्युतश्चोद्धवसम्प्रदायात् ।।४६।।** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे नैष्ठिकधर्मेषु ब्रह्मचारिणां निषिद्धक्रियानिरूपणनामैकपञ्चाशत्तमोऽध्यायः ।।५१।।

---

ભાલમાંથી કેશ ઉખાડે નહીં તથા મણિ આદિકનો પ્રતિગ્રહ ના કરે. (૩૬) જે મૃત્તિકા, તૃણ, કાષ્ઠ વગેરે ધણિયાતું હોય તો તે પણ ચોરીથી ગ્રહણ કરવું નહીં. તેના સ્વામીની આજ્ઞાથી ગ્રહણ કરવામાં દોષ નથી. (૩૭) આપત્તિ વિના સંધ્યા કે હોમનો સમય ઉલ્લંઘવો નહીં. તે પ્રકારે વિષ્ણુની પૂજા, ગુરુની સેવા, મધ્યાહ્ન અને સંધ્યાની ઉપાસનાનું ઉલ્લંઘન કરે નહીં. (૩૮) પોતાની જીવિકા માટે ક્ષેત્ર, વાડી, વૃક્ષારોપણ કરે નહિ. અન્ન-સંગ્રહ ક્યારેય કરે નહીં. દહીં,દૂધ, ઘી વગેરે રસનો સંગ્રહ કરે નહીં. (૩૯) ગુરુ-આચાર્યનો પોતે અપવાદ ક્યારેય ઉચ્ચાર ન કરે. સાધુ પુરુષોનું ઉલ્લંઘન કરે નહીં. લોકશાસ્ત્રનિંદિત વસ્ત્રો ધારણ કરે નહિ. જોડાં પહેરે નહિ. (આ એક સ્થાનમાં નિષેધ છે. આપત્કાલમાં, બીજે ગામ જવામાં અને માર્ગમાં દોષ નથી. )(૪૦) વર્ણી ક્યારેય માર્ગ વિનાના છાને રસ્તેથી ગૃહસ્થને ઘેર જાય નહિ. કોઈના બાલકને રમાડે નહિ. (૪૧) બ્રહ્મચારી તેલથી કેશનો સંસ્કાર કરે નહિ. મનુષ્યને અથવા પશુને, તણખલાથી પણ તાડન કરે નહિ. (૪૨) વિપ્ર, ભિક્ષુક, બંદીજન, ગાયક વગેરેની આજીવિકા નાશ થાય તેવી રીતે હરિના આશ્રયવાળી કથાવાર્તા પણ ના કરે. (૪૩) પોતાની માતા, પિતા, શિષ્ય, ઉપાધ્યાય, એક ગુરુના શિષ્ય અને પોતાના આચાર્ય વિના, પોતાના ભાઈની પણ ઔર્ધ્વદૈહિક ક્રિયા ન જ કરે. પિતા આદિકના ઔર્ધ્વદૈહિક કર્મમાં તો શાસ્ત્ર વચન હોવાથી દોષ નથી. (૪૪) જે વર્ણી ક્રોધાદિ ત્યાગ કરવારૂપ દોષોમાં અને નિષેધોમાં કોઈ નિષેધનો આપત્કાલ પડ્યા વિના ઉલ્લંઘન કરે, તો તે વર્ણી તે દોષના નિવારણ માટે જુદા જુદા ઉપવાસ કરે. (૪૫)

હે વર્ણીવર્ય ! જે વર્ણી દુષ્કર્મનું પ્રાયશ્ચિત્ત કરતો નથી તે મૂર્ખ વર્ણી તો પૃથ્વીમાં, આ લોકમાં અપકીર્તિ પામે છે અને તે ઉદ્ધવ સંપ્રદાયથી ભ્રષ્ટ થયેલો જાણવો. (૪૬)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે, ધર્મશાસ્ત્રે પંચમપ્રકરણે નૈષ્ઠિક ધર્મેષુ બ્રહ્મચારિણાં નિષિદ્ધક્રિયાનિરૂપણ નામૈકપંચાશત્તમોઽધ્યાયઃ (૫૧)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच-**कर्म दैवं च पित्र्यं च यथाकालं यथाविधि । ब्रह्मचारी विष्णुभक्तः कुर्यान्नित्यमतन्द्रितः ॥१॥ नरनारायणः साक्षादाचार्यो ब्रह्मचारिणाम् । तपः परोपकारार्थं कुर्वन्नमरदुष्करम् ॥२॥ दैवं पित्र्यं करोत्येव भगवानपि नित्यदा। तर्हि हेयं कथं तत् स्यादधुनातनवर्णिभिः ॥३॥ सन्ध्यात्रयमुपासीत काले काले यथाविधि । उपस्थानं रवेः कुर्याज्जपेद्वेदप्रसूं च सः ॥४॥ सायं प्रातः प्रदीप्तेऽग्नौ होममन्वहमाचरेत् । जलाञ्जलीनशक्तस्तु तस्मिन्काले जले क्षिपेत् ॥५॥ अनापदि द्विजान्नित्यं याचित्वाऽन्नमुपाहरेत् । अपक्वं पाचयित्वा तन्निवेद्याद्याच्च विष्णवे ॥६॥ स्नानं त्रिषवणं कुर्याद्विष्णुपूजां तथाऽन्वहम् । पञ्चयज्ञान् यथाशक्ति ब्रह्मचारी समाचरेत् ॥७॥ सदोपवीती च भवेत्सदा बद्धशिखश्च सः । पित्रोः श्राद्धं च कुर्वीत यथाकालं यथोचितम् ॥८॥ मेखलामजिनं दण्डमुपवीतं च तुम्बिकाम् । अप्सु प्रास्येद्विनष्टानि धृत्वैवान्यानि मन्त्रतः ॥९॥ सूनिसूतकिपाषण्डियवनान्त्यजपापिनाम् । स्पर्शे श्मशानाक्रमणे सचैलं स्नानमाचरेत् ॥१०॥ अमेध्यस्पर्शेन वान्तावसद्भैक्षभुजावपि । स्नानं कुर्यान्मलोत्सर्गे दुःस्वप्ने च बृहद्व्रतः ॥११॥ स्नात्वोपवासं कुर्वीत स्त्र्यङ्गस्पर्शे तु सर्वथा। स्त्र्यङ्गस्थवस्त्रस्पर्शे च क्वचिज्जातेऽप्यबोधतः ॥१२॥ एकादशीषु सर्वासु विष्णोर्जन्मोत्सवेषु च । उपवासान्स कुर्वीत सम्प्रदायानुसारतः ॥१३॥ प्रासादिकं हरेरन्नं मितं च नियतं शुचिः । भुञ्जीत प्रत्यहं वर्णी वैश्वदेवावशेषितम् ॥१४॥ भवेद्व्रतेषु निरतः कृच्छ्रचान्द्रायणादिषु । त्वगस्थिशेषगात्रस्तैः शुष्कमांसासृगात्मवान् ॥१५॥ ज्ञानविज्ञानवैराग्यसम्पन्नो**

## અધ્યાય : ૫૨

### બ્રહ્મચારીઓને શાસ્ત્રવિહિત કરવાની ક્રિયાઓનું નિરૂપણ કર્યું છે અને તે ક્રિયાની ભ્રષ્ટતામાં પ્રાયશ્ચિત્ત સ્પષ્ટ રીતે કહ્યું છે

**શ્રીનારાયણ મુનિ બોલ્યા** : હે વર્ણિન્ ! વિષ્ણુભક્ત બ્રહ્મચારી આળસરહિત થઈને દરરોજ વિષ્ણુનું પૂજન વગેરે ક્રિયા અને પિતૃતર્પણાદિ, યથાકાલ વિધિ પ્રમાણે કરે. (૧) બ્રહ્મચારીઓના આચાર્ય પ્રત્યક્ષ નરનારાયણ, દેવોને દુર્લભ તપ પરોપકાર માટે કરતાં, સ્વયં પરમેશ્વર હોવા છતાં પણ હંમેશા દેવ સંબંધી અને પિતૃસંબંધી કર્મ કરે છે, જ. તો હાલના બ્રહ્માચારીઓ તે દૈવ અને પિતૃ સંબંધી કર્મ ત્યાગ કેવી રીતે કરે ? અર્થાત્ ના જ કરે (૨-૩) બ્રહ્મચારી, સમય સમય પ્રમાણે શાસ્ત્રવિધિથી પ્રાતઃ મધ્યાહ્ન અને સાયં-સંધ્યાની ઉપાસના કરે. સૂર્યનારાયણનું ઉપસ્થાન યથાવિધિ કરે. વેદમાતા ગાયત્રીનો યથાવિધિ જપ કરે. (૪) દરરોજ સાયંકાલે અને પ્રાતઃકાલે પ્રદીપ્ત અગ્નિમાં હોમ કરે. અશક્ત વર્ણી તો હોમ-સમયે જલમાં જલાંજલિ અર્પણ કરે. (૫) આપત્કાલ પડ્યા વગર હંમેશા બ્રહ્મચારીઓ, બ્રાહ્મણની પાસેથી માગીને કાચું અન્ન લાવે; તેને પકાવીને વિષ્ણુને નૈવેદ્ય કરીને જમે. (૬) બ્રહ્મચારી દરરોજ ત્રણ વખત સ્નાન તથા વિષ્ણુની પૂજા કરે. દેવ-યજ્ઞાદિ પંચમહાયજ્ઞો યથાશક્તિ કરે. (૭) વર્ણી હંમેશા ઉપવીત ધારણ કરે, શિખાબંધન કરે. સમય પ્રમાણે, પોતાના અધિકારને અનુસરીને માતાપિતાનું શ્રાદ્ધ કરે. (૮) મેખલા, મૃગચર્મ, દંડ, ઉપવીત, શૌચ માટેની તુંબિકા આટલાં વિનાશ પામ્યા હોય તો તે મંત્રોથી બીજાં નવા ધારણ કરીને જળમાં (તૂટેલાં) ફેંકે. (૯) પ્રાણી-હિંસક, બન્ને પ્રકારના સૂતકી, પાખંડી, નાસ્તિક, યવન, અંત્યજ, ધોબી, ચર્મકાર અને મહાપાપીનો સ્પર્શ, સ્મશાનનું ઉલ્લંઘન કર્યું હોય તો વસ્ત્રે સહિત સ્નાન કરે. (૧૦) નૈષ્ઠિક બ્રહ્મચારી અપવિત્ર માંસ, કૂતરું, ગધેડું વગેરેના સ્પર્શમાં, દુષ્ટજનની ભિક્ષાથી પ્રાપ્ત થયેલું અન્ન અથવા સ્વભાવ દુષ્ટ અન્નના ભોજન નિમિત્તે, તથા બલાત્કારે વમન કર્યું હોય, મળનો ઉત્સર્ગ, અને નઠારું સ્વપ્ન થયું હોય; ત્યારે સ્નાન કરવું. (૧૧) ક્યારેક અજ્ઞાનથી સ્ત્રીના અંગનો સ્પર્શ અને તેના વસ્ત્રનો સ્પર્શ થયો હોય તો સ્નાન કરીને ઉપવાસ કરે. (૧૨) વર્ણી, સર્વ એકાદશીઓ અને વિષ્ણુના જન્મોત્સવોમાં પોતાનાં સંપ્રદાયને અનુસરીને ઉપવાસો કરે. (૧૩) વર્ણી, બાહ્ય અને આભ્યંતરથી શુદ્ધ થઈને દરરોજ હરિની પ્રસાદી વૈશ્વદેવથી અવશેષ મિતાહાર અન્ન નિયમથી ભોજન કરે. (આથી ભગવાનને અન્ન સમર્પણ કરી, તેથી વૈશ્વદેવ કરવું.) (૧૪) આત્મનિષ્ઠ વર્ણી, કૃચ્છ્ર ચાંદ્રાયણાદિ વ્રતોમાં પ્રીતિવાળો થાય. વ્રતોથી ચામડી અને અસ્થિ બાકી રહે તેવા શરીરવાળો થાય. માંસલોહી સૂકવી નાખે. (૧૫) આત્માપરમાત્માનું જ્ઞાન



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

विजितेन्द्रियः । एकान्तिकीं हरौ भक्तिं कुर्यादचलनिश्चयः ॥१६॥ गुरोः समीपे वर्तेत दासवत्तन्निदेशकृत् । याने स्थाने च शयने नातिदूरस्ततो भवेत् ॥१७॥ शान्तो दान्तश्च धृतिमान् समलोष्टाश्मकाञ्चनः । मित्रोदासीनरिपुषु समदृष्टिर्भवेत्सुधीः ॥१८॥ बिभियादिव सर्पेभ्यः स्वबन्धुभ्योऽथ योषितः । शवादिव च मिष्टान्नतृप्तेस्तु निरयादिव ॥१९॥ विप्राणां कुशलं वाञ्छन् प्रशंसेत्तांश्च संसदि । पूजयेन्मानयेत्प्रीत्या विष्णुभक्तानमत्सरः ॥२०॥ जीवेद्धर्मार्थमेवासौ फलं धर्मस्य तु प्रभोः । श्रीविष्णोः प्रीणनं विद्यान्न तु क्षुद्रसुखं स च ॥२१॥ अभयं सर्वभूतेभ्यो महादानादितोऽधिकम् । भगवद्वार्तया दद्यात्सर्वकालं च नैष्ठिकः ॥२२॥ स्नाने होमे जपे चैव भोजने सन्ध्ययोर्द्वयोः । मौनी भवेत्तथोत्सर्गे स च शौचक्रियावधि ॥२३॥ विधिष्वेतेषु यद्येकमतिक्रामेत्प्रमादतः । तर्हि तद्दोषशुद्ध्यर्थं कुर्यादेकमुपोषणम् ॥२४॥ ज्ञानं सत्यं तितिक्षा ह्रीरमात्सर्यं धृतिस्तपः । शमो दमोऽनसूया च दानं यज्ञो गुणा अमी ॥२५॥ कामः क्रोधः शोकमोहौ तृष्णेर्ष्या चाकृपा स्पृहा । लोभोऽसूया जुगुप्सा च मानो दोषा इमे मताः ॥२६॥ दोषैः स च द्वादशभिर्विहीनो युक्तो गुणैर्द्वादशभिश्च नित्यम् । श्रीकृष्णभक्तौ निरतश्च कुर्वन् सेवां गुरोरत्र विशिष्यते वै ॥२७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे नैष्ठिकधर्मेषु ब्रह्मचारिणां विहितक्रियानिरूपणनामा द्विपञ्चाशत्तमोऽध्यायः ॥५२॥

---

અને સાક્ષાત્ અનુભવ રૂપ વિજ્ઞાન, ભગવાન વિના અન્ય પદાર્થમાં અપ્રીતિ, એવા વૈરાગ્યથી યુક્ત, ચક્ષુ આદિ ઈંદ્રિયોને જીતનાર, અચલ નિશ્ચયવાળો, વર્ણી શ્રીહરિમાં એકાંતિકી ભક્તિ કરે. (૧૬) ગુરુની આજ્ઞામાં અનુવર્તન કરનારો, ગુરુની સમીપમાં દાસની માફક વર્તે. ગમન, સ્થિતિ કે શયન વેળાએ ગુરુથી અતિ દૂર ન રહે. (૧૭) નિયમિત અંતઃકરણવાળો, બાહ્યેન્દ્રિયોને નિયમમાં રાખનાર, ધૈર્યયુક્ત, કચરો અને કાંચનમાં સમાન ભાવવાળો વર્ણી, મિત્ર-ઉદાસીન અને શત્રુઓમાં સમદષ્ટિવાળો થાય. (૧૮) વર્ણી, પોતાના બંધુઓથી, સર્પની જેમ ભય પામે, સ્ત્રીથી શબની જેમ ભય પામે, મિષ્ટાન્ન તૃપ્તિથી તો નરકની જેમ ભય પામે. (૧૯) વર્ણી, બ્રાહ્મણોનું કુશળ ઇચ્છતો, સભામાં બ્રાહ્મણોને વખાણે, મત્સરે રહિત થઈને વિષ્ણુના ભક્ત સાધુઓને પ્રીતિથી પૂજે, અને માને. (૨૦) તે આ વર્ણી ધર્માચરણથી જ જીવે. ધર્મનું ફળ તો પ્રભુ શ્રી વિષ્ણુની પ્રસન્નતા જાણવી. માયિક વિષયભોગનું સુખ, તે ધર્મનું ફલ ન જાણે. (૨૧) નૈષ્ઠિક વર્ણી, ગૌદાન આદિ દાનોથી પણ અધિક ભગવદ્- વાર્તાથી સંસારના મહાભયથકી નિવૃત્તિ રૂપ અભયદાન, સર્વ ભૂતોને સર્વકાળે આપે. (૨૨) વર્ણી, સ્નાન-હોમ-જપ-ભોજન અને બન્ને સંધ્યાઓમાં મૌનવ્રત ધારણ કરે તથા મળમૂત્રના ત્યાગ સમયમાં, શૌચ-ક્રિયા પર્યન્ત મૌન-વ્રત રાખે. (૨૩) આ દેવ-પિતૃ સંબંધી કર્મનાં આચરણો વગેરેના વિધિમાંથી, એક પણ વિધિમાં પ્રમાદથી ઉલ્લંઘન થાય, તો તેના દોષની શુદ્ધિ માટે એક ઉપવાસ કરે. (૨૪) જ્ઞાન, સત્ય, તિતિક્ષા, અકાર્યમાં લજ્જા, અમાત્સર્ય, ધીરજ, તપ, શમ, દમ, અનસૂયા, દાન, યજ્ઞ આ બાર ગુણો કહ્યા છે. (૨૫) કામ, ક્રોધ, શોક, મોહ, તૃષ્ણા, ઈર્ષ્યા, અદયા, સ્પૃહા, લોભ, અસૂયા, નિન્દા, માન-આ બાર દોષ માનેલા છે. (૨૬)

નિત્ય બાર દોષો, કામાદિથી રહિત અને બાર જ્ઞાનાદિ ગુણોથી યુક્ત, શ્રીકૃષ્ણની ભક્તિમાં પ્રીતિવાળો, ગુરુની સેવામાં કાર્યમગ્ન બ્રહ્મચારી આ લોકમાં વિશેષ (અધિક શ્રેષ્ઠ) થાય છે જ. (૨૭)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે નૈષ્ઠિક ધર્મેષુ બ્રહ્મચારિણાં વિહિતક્રિયાનિરૂપણ નામા દ્વિપંચાશત્તમોઽધ્યાયઃ (૫૨)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच – **वेदाभ्यासः प्रकर्तव्यः प्रत्यहं ब्रह्मचारिणा । नारायणात्मको वेदो यतः प्रोक्तः सनातनः ॥१॥ माहात्म्यातिशयज्ञानं हरेर्वेदार्थबोधनम् । विना नैव भवेत्तस्माच्चिन्त्योऽर्थस्तस्य चादरात् ॥२॥ प्रमाणानां हि सर्वेषां वेद एव पुरातनैः । प्रमाणं परमं प्रोक्तः सद्भिस्तत्त्वार्थवेदिभिः ॥३॥ नारायणात्समुद्भूतो वेदः प्रणवमूलकः । यथा तथेह सङ्क्षेपात्कथयामि प्रसङ्गतः ॥४॥ पुरुषोत्तम एवादौ प्रकृतेः पुरुषात्परः । नारायणोऽक्षरे धाम्नि वासुदेवो व्यराजत ॥५॥ स सिसृक्षुरथाण्डानि स्वतन्त्रः स्वेक्षया प्रभुः । प्राबोधयद्ब्रह्मधाम्नि सुप्तौ प्रकृतिपूरुषौ ॥६॥ वीर्यं पुरुषरूपेण मायायां वीक्षया प्रभुः । निदधे साऽग्रहीत्तच्च स्त्री गर्भमिव पूरुषात् ॥७॥ ततः प्रधानपुरुषा आविर्भूता अनेकशः । प्रधाने वीर्यमाधत्त तत्पुंरूपेण च प्रभुः ॥८॥ चिद्रूपं भगवद्वीर्यं मायास्थै रजआदिभिः । मिश्रं गुणैरचिद्रूपैर्महानासीद्गुणात्मकः ॥९॥ तं मायाऽसूत सोऽस्राक्षीदण्डकोशं हिरण्मयम् । अहङ्काराकाशमुख्यैः षड्भिरावरणैर्वृतम् ॥१०॥ महापुरुषसृष्टेऽसावनेकाण्डसमाश्रये । विराट्संज्ञो जलेऽवात्सीत्कारणार्णवसंज्ञके ॥११॥ आविर्बभूव कालेन तस्मिन्वैराजपूरुषः । सोऽव्यक्तकरणः शिश्ये तदण्डे गर्भवारिणि ॥१२॥ ब्रह्मादीनीश्वरान्सर्वाञ्जीवांस्तत्स्थानकानि च । स्रष्टुं स नाशकद्भोगान्भोगोपकरणानि च ॥१३॥ कालशक्त्या प्रभोस्तस्य मुखबाहुपदादयः । आसन्नवयवा व्यक्ता**

## અધ્યાય : ૫૩

### વર્ણીઓને વેદાધ્યનના પ્રસંગથી, સંક્ષેપથી વેદોત્પત્તિનું વર્ણન કરેલું છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે વર્ણિન્ ! દરરોજ બ્રહ્મચારીએ વેદાભ્યાસ કરવો. વેદ, એ નારાયણથી ઉત્પન્ન થયેલો હોવાથી નારાયણાત્મક, સનાતન કહેલો છે. (૧) વેદાર્થના જ્ઞાન વિના હરિના માહાત્મ્યનું અતિશયપણે જ્ઞાન થાય નહિ. માટે વેદના અર્થનો આદરપૂર્વક વિચાર કરવો. (૨) તત્ત્વાર્થને જાણનારા પુરાતન સત્પુરુષોએ સર્વે પ્રમાણોમાં વેદ જ પરમ પ્રમાણ કહેલો છે. (૩) જે પ્રકારે ૐ કાર કારણ જેનું છે, એવો વેદ નારાયણથી ઉત્પન્ન થયેલો; તે પ્રકારે આ વર્ણીના ધર્મપ્રકરણમાં અધ્યયનના પ્રસંગથી સંક્ષેપમાં નિરૂપણ કરું છું. (૪) મહામાયાથી અને તેના સ્વામી જે અક્ષરરૂપ મહાપુરુષથી સ્વરૂપ-સ્વભાવ-ગુણ-વિભૂતિ- ઐશ્વર્યાદિથી અત્યંત ઉત્કૃષ્ટ, અક્ષરધામમાં રહેલા, અપરિમિત પુરુષોથી પણ અતિ ઉત્તમ, નારાયણ = ક્ષર અને અક્ષરના અંતર્યામી વાસુદેવ જ, પ્રથમ આત્યંતિક પ્રલય પછી અનેક બ્રહ્માંડની સૃષ્ટિથી પૂર્વે અક્ષરધામમાં અપરિમિત અક્ષર પુરુષોએ સંસેવિત છે ચરણકમળ જેમનાં એવા વિરાજમાન હતા. (૫) પછી સ્વતંત્ર, ક્ષર અને અક્ષરના નિયામક શ્રી વાસુદેવ અસંખ્ય બ્રહ્માંડોને સર્જવા માટે ઈચ્છતા, અક્ષર બ્રહ્મના તેજમાં તિરોધાન ભાવથી રહેલા મહામાયા અને મહાપુરુષને પોતાના સંકલ્પરૂપ ઈક્ષણ માત્રથી **પ્રાબોધયત્=**જગાડતા હતા. (૬) શ્રી વાસુદેવે મહા પુરુષ દ્વારા મહા પ્રકૃતિમાં પોતાની દૃષ્ટિ માત્રથી વીર્યને ધારણ કર્યું. તે મહામાયા મહાપુરુષના વીર્યને ગ્રહણ કરતી હતી. સ્ત્રી, પુરુષથી ગર્ભને જ જેમ તેમ ધારણ કરતી હતી. (૭) મહામાયાથી અનેક પ્રધાન પુરુષો આવિર્ભાવ પામ્યા. શ્રી વાસુદેવ પ્રધાન અધિષ્ઠાતા પુરુષ દ્વારા, પ્રધાન નામની પ્રકૃતિમાં વીર્યને ધારણ કરતા હતા. (૮) ચૈતન્યાત્મક પ્રધાન અધિષ્ઠાતા પુરુષ દ્વારા આરોપિત ભગવાનનું વીર્ય, પ્રધાનમાં રહેલા અચિદ્રૂપ રજ આદિ ગુણોની સાથે મિશ્રિત થઈને સત્ત્વ આદિ ત્રણ ગુણાત્મક મહત્ તત્ત્વરૂપ થયું. (૯) પ્રધાનાત્મક પ્રકૃતિએ મહત્તત્ત્વને પ્રસવ આપ્યો. તે માયાથી પ્રસવ પામેલા મહાન્ (મહત્તત્ત્વ), અહંકાર-આકાશ વગેરે છ આવરણોથી યુક્ત હિરણ્યમય બ્રહ્માંડને અહંકારાદિ તત્ત્વ દ્વારા સર્જતા હતા. (૧૦) વિરાટ સંજ્ઞાવાળું આ અંડકોશ મહાપુરુષે સર્જેલા (મહામાયાના પતિએ પોતાના શ્રમથી ઉદ્ભવેલા પરસેવા દ્વારા ઉત્પન્ન કરેલા) અનેક બ્રહ્માંડના એક આધારભૂત જળમાં ઘણા કાળ પર્યન્ત રહ્યો. (૧૧) તે અંડકોશમાં વૈરાજપુરુષ કાલ વડે આવિર્ભાવ પામ્યા. જેનો શ્રોત્રાદિ ઈન્દ્રિયોનો સમુદાય સ્પષ્ટ જણાતો નથી એવા વૈરાજપુરુષ, પોતાના આધારભૂત તે અંડકોશમાં રહેલા,ગર્ભના જળમાં શયન કરતા હતા. (૧૨) તે વૈરાજ પુરુષ બ્રહ્માદિ ઈશ્વરો-સર્વે ચાર પ્રકારનાં પ્રાણીઓ, તેમના જીવ-ઈશ્વરોના સ્થાનભૂત લોકો અને તેની તેની ભોગ્ય વસ્તુઓ અને ભોગ ઉપકરણોને સર્જવા માટે સમર્થ થયા નહિ. (૧૩) શ્રી વાસુદેવની કાલશક્તિથી વૈરાજ પુરુષના મુખ, બાહુ, પદ વગેરે બહાર રહેલા અવયવો



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

बहिश्चान्तर्हृदादयः ॥१४॥ तेष्विन्द्रियैः सहावात्सुर्गोलकेष्वधिदेवताः । वरुणाद्याश्च चन्द्राद्या बाह्यैराभ्यन्तरैस्तथा ॥१५॥ विराट्सूत्राव्याकृताख्यं तदा तस्य वपुस्त्रयम् । अपि सुव्यक्तमभवत्स्थूलादीवात्मनामिह ॥१६॥ यथा पाकदशायां स्यान्नालिकेरीफलं त्रिधा । व्यक्तं ज्ञेयं तथैवास्य वपुरेकमपि त्रिधा ॥१७॥ तद्योगात्कथितश्चासौ विष्णुब्रह्मशिवाभिधः । गोलकेन्द्रियदेवांस्तान्व्यापत्तादात्म्यतोऽथ सः ॥१८॥ तथाभूतोऽपि नोत्थातुं स शशाक यदा तदा । महापुरुषरूपेण तस्मिन्नारायणोऽविशत् ॥१९॥ तज्जीवरूपतां प्राप्य तदध्यात्मादितां च सः। सहस्रशीर्षपुरुषसंज्ञोऽभूत्पुरुषोत्तमः ॥२०॥ आदौ वैराजशिरसि स सहस्रदलाम्बुजे । आविर्भूयाक्षरब्रह्मात्मकं नादं चकार च ॥२१॥ सुषुम्णावर्त्मना सद्यो नाभिकन्दं च तस्य सः । व्याप्योर्ध्वं ववृधे तस्मान्महाप्राणेन संयुतः ॥२२॥ अधोमुखं नाभिपद्मं कदलीकोशवत्स्थितम् । तेनैवाभूदूर्ध्वमुखं हृदयावधि तस्य च ॥२३॥ तस्य यो नाभिकन्दे तु नादोऽभूत्सा परेति वाक् । वेदोत्पत्त्यै भगवता बीजत्वेन प्रकाशिता ॥२४॥ तेजःप्रवाहरूपाऽथ सार्धमात्रात्मिका ततः । प्राप्य तद्धृदयाकाशं पश्यन्त्याख्यामवाप च ॥२५॥ मध्यमाख्यां कण्ठदेशं प्राप्य सालभताथ च । वदनं प्राप्य याति स्म वैखरीत्यभिधां किल॥२६॥ ऊर्ध्वं गच्छत्यधो गत्वा जलयन्त्रे जलं यथा । नाभिमेत्य मुखं याति नादोऽपि शिरसस्तथा ॥२७॥ वैखर्यादिस्थानकेषु तद्वक्त्रगलहृत्स्वथ । वर्णाः क्रमेणाविरासंस्त्रयस्त्रैलोक्यधारकाः ॥२८॥ अकारः प्रथमः प्रोक्तस्तत्रोकारो द्वितीयकः । अन्त्यो मकारः

અને હૃદયાદિ અન્તરભૂત અવયવો સ્પષ્ટ થયા. (૧૪) મુખાદિ રૂપ ગોલકોમાં વરુણ વગેરે અને ચન્દ્રાદિ અધિદેવતા બાહ્યાભ્યન્તર ઈન્દ્રિયોની સાથે નિવાસ કરતા હતા. વરુણાદિ દેવો બાહ્યેન્દ્રિયોની સાથે મુખાદિ સ્થાનોમાં નિવાસ કરતા હતા. (૧૫) તે સમયે વૈરાજના વિરાટ, સૂત્ર અને અવ્યાકૃત નામનાં ત્રણ શરીર પણ આ લોકમાં દેવ મનુષ્યાદિ શરીરીઓના સ્થૂલ, સૂક્ષ્મ અને કારણ નામનાં ત્રણ દેહની માફક સુસ્પષ્ટ થયાં. (૧૬) જેમ એક નાળિયેરનું ફળ, પરિપક્વ દશામાં ત્રણ પ્રકારે છોતરાં, કાચલી અને કોપરા રૂપે વ્યક્ત થાય, તે પ્રકારે જ વૈરાજ પુરુષનું એક જ શરીર ત્રણ પ્રકારે વ્યક્ત થયું. (૧૭) વૈરાજ પુરુષ વિરાટાદિ ત્રણ શરીરના સંબંધથી બ્રહ્મા, વિષ્ણુ, મહેશ-નામ, વૈશ્વાનર, હિરણ્યગર્ભ, ઈશ્વરનામથી કહેલા છે. અને પછી વૈરાજ પુરુષ ગોલક-ઈન્દ્રિય-દેવો (અધ્યાત્મ, અધિભૂત, અધિદૈવ) ને તાદાત્મ્ય, ભાવથી વ્યાપ્ત થયા. (૧૮) તેવા વૈરાજ પુરુષ પણ જ્યારે ઊભા થવા માટે, ક્રિયા કરવા માટે શક્તિમાન થયા નહિ, ત્યારે શ્રી વાસુદેવે મહાપુરુષ રૂપે વૈરાજપુરુષમાં તેના બ્રહ્મરંધ્ર દ્વારા પ્રવેશ કર્યો. (૧૯) અંતર્યામીપણે તેની અંદર પ્રવેશ પામેલા પુરુષોત્તમ શ્રી વાસુદેવ વૈરાજનો જે જીવ, તેની તાદાત્મ્યતાને પામીને વૈરાજપુરુષની અધ્યાત્માદિતા અને ઈન્દ્રિય અને તેના અધિષ્ઠાતા દેવાદિ ભાવને પામીને **સહસ્ત્ર શીર્ષ પુરુષ** સંજ્ઞાવાળા વૈરાજ પુરુષ નામવાળા થયા. (૨૦) પોતે પોતાની ઈન્દ્રિયો દ્વારા તે તે વિષય ગ્રહણમાં સમર્થ વૈરાજ પુરુષના અંતરમાં શ્રી વાસુદેવ પ્રવેશ કરી, તે દ્વારા બ્રહ્માદિ જગતસર્ગને સર્જવા માટે તે તે ઈન્દ્રિયના વિષયોને ગ્રહણ કરાવતા હતા. (આ ઉપરોક્ત અર્થને કહેવા ઈચ્છતા શ્રીહરિ વેદોત્પત્તિ કહેવા માટે સમગ્ર ઈન્દ્રિયોની પ્રવૃત્તિના ઉપલક્ષણભૂત તેમની વાણી ઈન્દ્રિયની પ્રવૃત્તિને શ્રી વાસુદેવના અન્તઃપ્રવેશના કથન પૂર્વક વીશ શ્લોકથી કહે છે.) શ્રીવાસુદેવ પ્રથમ સહસ્ત્ર દળ (પત્ર) વાળું કમળ છે જેમાં, એવા વૈરાજના મસ્તકમાં રહેલા બ્રહ્મરંધ્રમાં આવિર્ભાવ પામીને અક્ષર બ્રહ્માત્મક નાદ કર્યો. (૨૧) તે નાદ સુષુમ્ણા નામની નાડીમાર્ગથી વૈરાજ પુરુષની નાભિકંદને તત્કાલ વ્યાપીને મહાપ્રાણથી સંયુક્ત થઈને, તે નાભિકંદથી ઊર્ધ્વ પ્રદેશમાં વૃદ્ધિ પામ્યો. (૨૨) કદલી કોશની માફક રહેલું અધોમુખવાળુ નાભિપદ્મ, નાદથી જ વૈરાજ પુરુષના હૃદય પર્યંત ઊર્ધ્વમુખ થયું. (૨૩) તે વૈરાજપુરુષના નાભિકંદમાં જે નાદ થયો, તે 'પરા' નામની શાસ્ત્રપ્રસિદ્ધ વાણી થઈ. તે પરાવાણીને વેદોની ઉત્પત્તિ માટે શ્રીવાસુદેવે બીજપણે પ્રકાશ કરી છે. (૨૪) પછી તેજના પ્રવાહરૂપ અર્ધ માત્રારૂપવાળી તે પરા વાણી, નાભિથી વૈરાજના હૃદયાકાશને પામતી **'પશ્યન્તી'** નામની સંજ્ઞાને પામી. (૨૫) તે પરાવાણી કંઠ-દેશને પામીને **'મધ્યમા'** સંજ્ઞાને પામી. અને વૈરાજના મુખકમળને પામીને **'વૈખરી'** સંજ્ઞાને પામી. (૨૬) જેમ જળના યંત્રમાં જળ ઊર્ધ્વ પ્રદેશથી અધઃપ્રદેશમાં જઈને ઊંચે જાય છે, તેમ નાદ પણ મસ્તકથી નાભિને પામીને મુખ સુધી પહોંચે છે. (૨૭)

હવે વૈખરી આદિ સ્થાનકોમાં પરાવાણીથી વૈખરી વગેરે સંજ્ઞાની પ્રાપ્તિસ્થાનોમાં તેના મુખ,ગળું, અને હૃદયમાં ત્રિલોકીને ધારણ કરનારા ત્રણ વર્ણો (અક્ષરો) અનુક્રમે પ્રાદુર્ભાવ પામ્યા. (૨૮) તે વર્ણોમાં અકાર પ્રથમ કહેલો છે. બીજો



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कथितास्त्रयोऽमी त्रिगुणात्मकाः ॥२९॥ स्थानेष्वेषु व्यतिष्ठंस्ते विष्णुब्रह्ममहेश्वराः । अधीश्वराः क्रमेणैषां वर्णानां च गुणौकसाम् ॥३०॥ स्वस्वस्थानस्थिता एव वर्णास्ते त्विच्छया हरेः । ऐक्यं प्रापुर्हृदाकाशे ततोऽभूत्प्रणवध्वनिः ॥३१॥ महाप्राणमयो घोषः स मनोमयतां हृदि । प्राप्येन्द्रियमयत्वं च कण्ठे व्याञ्जीच्च तन्मुखे ॥३२॥ अन्तःस्थोष्मस्वरस्पर्शप्रमुखाः सकलास्ततः । वर्णा आसंस्ततो वेदाः सर्गारम्भे हि जज्ञिरे ॥३३॥ स्थानभेदाद्यथा नाद एकोऽप्यासीच्चतुर्विधः नारायणोऽपि भगवांस्तथैवाभूच्चतुर्विधः ॥३४॥ नाभिपद्मे परादेवो वासुदेवाख्य ईरितः । सङ्कर्षणाख्यश्च तथा पश्यन्तीदेवता हृदि ॥३५॥ अनिरुद्धाभिधः कण्ठे मध्यमायाश्च देवता । मुखे प्रद्युम्ननामाऽसौ वैखर्या देवता मतः ॥३६॥ विष्ण्वादयस्त्रयो देवाः स्वस्थानस्था उपासत । प्रद्युम्नादीन् क्रमेणैव तत्तद्वाण्यधिदेवताः ॥३७॥ सङ्कर्षणादयस्तत्र सगुणा मूर्तयः प्रभोः । स्वयं तु वासुदेवोऽस्ति नाभिपद्मे हि निर्गुणः ॥३८॥ इत्थं नारायणादेव साक्षाच्छ्रीपुरुषोत्तमात् । आविर्बभूव सृष्ट्यादौ वेदः सर्वार्थबोधकः ॥३९॥ सर्वस्मिन् वाङ्मये मुख्यः साक्षान्नारायणास्यतः । उत्पन्नत्वाद्वेद एव ततोऽध्येयः स वर्णिना ॥४०॥ अच्छेद्योऽखण्डचैतन्यः स्वात्मा ज्ञेयः पृथक्तनोः । तस्यैक्यं ब्रह्मणा बुद्ध्वा तद्रूपः सन्भजेद्धरिम् ॥४१॥ भोगानामुपभोगेन न कामः शाम्यति क्वचित् । हविषा कृष्णवर्त्मेव भूयस्तेन तु वर्धते ॥४२॥ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः । नालमेकस्य तत्सर्वमिति पश्यन्न मुह्यति ॥४३॥ जीर्यमाणस्य पुंसः केशरदादयः । जीविताशा

बध्वा पद्मासनं हस्तौ जानूर्वोरन्तरेण च । भुवि संस्थाप्य व्योमस्थो भवेत्तत्कुक्कुटासनम् ॥३६॥ कुक्कुटासनबन्धस्थो दोर्भ्यां संहृत्य कन्धराम् । भवेत्कूर्मवदुत्तान एतदुत्तानकूर्मकम् ॥३७॥ सव्योरुमूले दक्षाङ्घ्रिं कृत्वा जान्वोर्बहिर्धरेत् । वेष्टितेन करेणान्यं दक्षेण धनुरासनम् ॥३८॥ एतज्जाठररोगघ्नं कुण्डलीबोधकारकम् । अङ्गानां स्थैर्यकृच्चोक्तमासनं मुनिसम्मतम्॥३९॥ दोर्भ्यां भूमिमवष्टभ्य नाभिपार्श्वे कफोणिगे । कृत्वा भवेत्स्वस्थवपुर्मायूरं तद्धि दण्डवत् ॥४०॥ रोगानौदरिकान्हन्ति प्रदीपयति जाठरम् । भुक्तं विषं कदशनं जरयत्येतदासनम् ॥४१॥ प्रसार्य दण्डवत्पादौ गृहीत्वाग्रद्वयं

---

યોગી યોગની સિદ્ધિ માટે દર્ભ, મૃગાજીન, વસ્ત્ર - આ પ્રમાણે આસનમાં બેસે અથવા સ્વસ્તિકાસનમાં બેસે. તે યોગનું ત્રીજું અંગ **આસન** માનેલું છે. (૨૬) યોગ જાણનારા, આસનો ઘણા પ્રકારનાં કહે છે. ઘણા પ્રકારનાં આસનોમાં ચોરાશી સંખ્યાવાળાં આસનોને યોગીઓ મુખ્ય માને છે. (૨૭) તે ચોરાશી આસનોમાં ત્રીશ આસનો યોગીઓ મુખ્ય માને છે; ત્રીસ આસનોમાં પણ મુખ્ય ચૌદ **આસનો** તમોને હું કહું છું. (૨૮) સ્વસ્તિક, ગોમુખ, વીર, યોગ, પદ્‌મ, કુકકુટ, કૌર્મ, ચાપ, મયૂર, તથા પશ્ચિમોત્તાનાસન (૨૯) શબ, સિદ્ધ, સિંહ તથા ભદ્ર - આ ચૌદ આસનો છે. પછી હવે આ **ચૌદ આસનોનાં લક્ષણો**-અનુક્રમથી યથાર્થપણે કહું છું. (૩૦) યોગસાધક-બન્ને ચરણના તળને ઢીંચણ સાથળના મધ્યમાં મૂકીને સરળ દેહે બેસે, તેને **સ્વસ્તિકાસન** કહ્યું છે. (૩૧) દક્ષિણ પાર્શ્વભાગમાં, વામ પગની ઘૂંટીને મૂકે અને વામ પાર્શ્વ ભાગમાં દક્ષિણ પગની ઘૂંટીને મૂકીને જે બેસવું, તેથી ગાયના મુખ જેવી આકૃતિ થાય, તેને **ગૌમુખાસન** કહ્યું છે. (૩૨) એક પગને સાથળ ઉપર મૂકે, અને બીજા પગ ઉપર સાથળ મૂકે આ **વીરાસન** કહ્યું છે. આ આસન સુખેથી થઈ શકે તેવું છે. (૩૩) ડાબી, જમણી ઘૂંટી વડે વિપરીત ક્રમથી ગુદાને રોકીને નિશ્ચળ થાય; તે આ યોગીસંમત **યોગાસન** કહ્યું છે. (૩૪) ડાબા સાથળ ઉપર જમણા ચરણને અને જમણા સાથળ ઉપર ડાબા ચરણને મૂકીને, લોભ-વિલોમ ક્રમથી પાછળ પ્રસારેલા હાથ વડે પગના બે અંગૂઠાને પકડે તે આસન **પદ્‌માસન** કહ્યું છે. (૩૫) પાછળ પ્રસારેલા હાથથી પકડેલા પગના અંગૂઠાથી રહિત કેવળ પૂર્વોક્ત પદ્‌માસન બાંધીને ઢીંચણ-સાથળના મધ્ય ભાગથી બે હાથને ભૂમિ ઉપર સંસ્થાપીને ભૂમિથી નિતંબાદિને ઊંચે રાખે, ત્યારે **'કુકકુટાસન'** થયું કહેવાય. (૩૬) ભૂમિ ઉપર સ્થાપેલા, હસ્ત તળે રહિત કુકકુટાસનની પેઠે પાદબંધ કરીને પરસ્પર સંલગ્ન આંગળીવાળા બે હાથ વડે ગ્રીવાને પકડીને કાચબાની પેઠે ઉત્તાનપણે (ચત્તું રહેવું) તે સ્થિતિને **ઉત્તાન કૂર્માસન** કહેવાય છે. આ જ કૌર્મ પૂર્વોક્ત નામ જાણવું. (૩૭) વામ સાથળના મૂળમાં, જમણા પગને મૂકીને ઢીંચણ થકી બહાર વીંટેલા દક્ષિણ કર વડે દક્ષિણ જાનુ ઉપર મૂકેલા વામ પાદના અંગૂઠાને પકડે, અને વામ હસ્તના અગ્રથી વામ શ્રવણમાં, લબડતા નીચેના ભાગને પકડે તેને **'ધનુરાસન'** કહેવાય છે. 'ચાપાસન' આને જ કહે છે. (૩૮) આ આસન ઔદરિક રોગને નાશ કરનારું, કુંડલીનો બોધ કરનારું, અવયવોની સ્થિરતા કરનારું અને મુનિસંમત કહ્યું છે. (૩૯) બે હસ્ત તળ વડે, ભૂમિને અવલંબન કરીને કુણી ઉપર શરીર રાખીને દંડની પેઠે નિશ્ચલ લાંબા ગાત્રવાળો થાય તે આ **મયૂરાસન** માન્યું છે. આ આસન ઉદરના રોગને નાશ કરે છે. જઠરાગ્નિને પ્રદીપ્ત કરે છે અને અજ્ઞાનાદિથી ખાધેલા વિષને તથા ન પચી શકે એવા ખાધેલા અન્નને પચવી નાખે છે. (૪૦-૪૧) બંને પગને દંડની પેઠે લાંબા કરીને તે પગના

तयोः । न्यसेज्जानूपरि शिर इति पश्चिमतानकम् ।।४२।। पवनं पश्चिमगतिं जठराग्निप्रदीपनम् । कृशत्वमुदरस्यापि कुर्यादेतत्किलासनम् ।।४३।। शबासनं च शबवदुत्तानं शयनं भुवि । सर्वासनश्रान्तिहरं चित्तविश्रान्तिसाधनम् ।।४४।। निपीड्य सीवनीं वामपार्ष्णिना वामगुल्फके । विन्यसेद्दक्षिणं गुल्फमेतत्सिद्धासनं स्मृतम् ।।४५।। आसनाग्र्यं च रोगघ्नमेतद्वज्रासनं विदुः । केचिन्मुक्तासनं प्राहुरेके गुप्तासनं जगुः ।।४६।। अधोवृषणयोर्गुल्फौ सीवनीपार्श्वयोः क्षिपेत् । सव्ये दक्षं दक्षिणेऽन्यं प्रसृताङ्गुलिकौ करौ ।।४७।। जान्वोर्धृत्वा व्यात्तवक्त्रो नासिकाग्रं विलोकयेत् । एतत्सिंहासनं प्रोक्तं योगिनामभिवाञ्छितम् ।।४८।। सीवनीपार्श्वयोर्गुल्फौ वृषणाधः क्रमान्न्यसेत् । दध्यात्पादावपाग्दोर्भ्यामिति भद्रासनं परम् ।।४९।। इत्यादीन्यासनान्याहुर्योगशास्त्रविशारदाः । स्थिरं सुखं ध्यानकाले तेषामेकतमं श्रयेत् ।।५०।। आसनश्रमजातेन स्वेदेनाङ्गं विमर्दयेत् । दृढता लघुता चैव तेन गात्रस्य जायते ।।५१।। आसनानां फलं प्रोक्तं सर्वद्वन्द्वसहिष्णुता । शारीररोगनाशश्च प्राणायामाधिकारिता ।।५२।। उदितान्यासनान्यस्य सिद्धानि स्युर्यदा तदा । गुरूपदिष्टमार्गेण नाडीशोधनमभ्यसेत् ।।५३।। विना नाडीशोधनं तु प्राणायामो न सिद्ध्यति । मलाकुलासु नाडीषु नान्तश्चरति मारुतः ।।५४।। धौतिर्बस्तिस्तथा नेतिस्त्राटकं नौलिका तथा । कपालभातिश्चेत्याद्याः क्रियाः सन्त्यत्र कीर्तिताः ।।५५।। शनैर्ग्रसेत्सितं वस्त्रं चतुरङ्गुलविस्तृतम् । प्रत्याहरेत्पुनरिति धौतिः कासादिरोगहा ।।५६।। नाभिमात्रे जले स्थित्वा पायुनाकृष्य वारि च । त्यजेद्बस्तिं क्षालयित्वा स बस्तिः सर्वरोगहृत् ।।५७।। शिश्नेनाकृष्य सलिलं पुनस्तेनैव रेचयेत्। गुदेन वा रेचयेत्तद्बस्तिरेष द्वितीयकः ।।५८।। पीत्वा

બંને અગ્રભાગને બન્ને હાથ વડે પકડીને સંયોગ કરાયેલા કે વિયોગ કરાયેલા ઢીંચણ ઉપર મસ્તકને મૂકે તે આ **પશ્ચિમતાનક** આસન કહ્યું છે. (૪૨) આ આસન પવનને પશ્ચિમ દ્વારની ગતિવાળો કરે અને જઠરાગ્નિને પ્રદીપ્ત કરે અને ઉદરને કૃશ કરે છે. (૪૩) ભૂમિ ઉપર શબની પેઠે છતા સૂઈ રહેવું તે **શબાસન** કહ્યું છે. આ આસન સમગ્ર આસનો કરવાથી થયેલા થાકને નાશ કરે છે અને ચિત્તની વિશ્રાન્તિને પણ સાધે છે. (૪૪) સીવની જે લિંગની નીચે વર્તતી નાડી તેને ડાબી પેની વડે દબાવીને ડાબી ઘૂંટી ઉપર જમણી ઘૂંટીને મૂકે તે આ **સિદ્ધાસન** કહ્યું છે. આ આસન આસનાન્તરની અપેક્ષાએ શ્રેષ્ઠ હોઈને સર્વ રોગોને નાશ કરનારું છે. આ આસનને જ કેટલાક **વજ્રાસન** કહે છે તો કેટલાક મુક્તાસન કહે છે તો બીજા ગુપ્તાસન કહે છે. (૪૫-૪૬) વૃષણની નીચે સીવનીનાં બે પડખામાં ઘૂંટીને મૂકે, ડાબા ભાગમાં જમણી ઘૂંટીને મૂકે અને જમણા ભાગમાં ડાબી ઘૂંટીને મૂકે પછી પૂર્વ ભાગમાં પહોળી આંગળીઓવાળા બે હાથને જાનુ ઉપર મૂકીને મુખ ફાડીને નાસિકાના અગ્રભાગોને જોતો રહે તે આ **સિંહાસન** કહ્યું છે. આનાથી યોગીઓને અભિવાંછિત સિદ્ધિ થાય છે. એમ હઠપ્રદીપિકામાં કહ્યું છે. (૪૭-૪૮) વૃષણની નીચે રહેલાં સીવનીના બે પડખાંમાં ઉક્ત પ્રકારે અનુક્રમે ઘૂંટીને મૂકીને પાછળ કરેલાં બે હાથ વડે બે પાદને પકડે તે આ ઉત્તમ **ભદ્રાસન** કહ્યું છે. (૪૯) આવાં બહુ પ્રકારનાં આસનોને યોગશાસ્ત્રના નિષ્ણાતો કહે છે તેમાં જે આસન સ્થિર સુખવાળું પોતાને થાય તે એકને યોગાભ્યાસ સમયે આશ્રય કરે તેવું પાતંજલ યોગનું સૂત્ર છે. **'સ્થિર સુખમ્ આસનમ્'** (૫૦) પૂર્વોક્ત તે તે આસનોના કરવાના પરિશ્રમથી ઉત્પન્ન થયેલાં પરસેવાના પાણીથી અંગોનું વિમર્દન કરે પણ તે જળબિંદુઓને વાયુથી કે વસ્ત્રથી નિવૃત્ત કરે નહિ. અંગમાં જ મર્દન કરીને પ્રવેશ કરાવી દેવાથી અંગોની દૃઢતા અને હલકાપણું થાય છે. (૫૧) આ સર્વ કોઈ **આસનોનું મુખ્ય ફળ** આ છે : ટાઢ અને તડકો વગેરે દ્વંદ્વની સહનશીલતા, શરીરનો રોગ નાશ પામે છે અને પ્રાણાયામમાં અધિકાર પ્રાપ્ત થાય છે. (૫૨) કહેલાં આસનો જ્યારે સિદ્ધ થાય ત્યારે ગુરુએ ઉપદેશેલા માર્ગને અનુસારે નાડીઓના શોધન-પ્રકારનો અભ્યાસ કરે. (૫૩) નાડીશોધન વિના આસનસિદ્ધિ માત્રથી પ્રાણાયામ સિદ્ધ થતો નથી. જે હેતુ માટે નાડીઓ મળથી વ્યાકુળ વર્તે છે તે માટે તેની અંદર વાયુ યોગીની ઈચ્છા પ્રમાણે સારી રીતે સંચરણ કરે નહિ, માટે અવશ્ય નાડીઓનું વિશોધન કરવું. (૫૪) આ નાડીશોધનમાં ધોતિ, બસ્તિ, નેતિ, ત્રાટક, નૌલિકા, કપાળભાતિ, વગેરે અનેક ક્રિયા-ભેદો કહ્યા છે. (તેમાંથી કેટલાક ભેદોનું નિરૂપણ કરું છું:) (૫૫) ચાર આંગળ પહોળા શ્વેતવસ્ત્રને ધીમે ધીમે ગળે; ફરી તે વસ્ત્રને ઉદ્‌ગારથી ધીમે ધીમે બહાર કાઢે તે આ કાસ, શ્વાસ, કફાદિ રોગને નાશ કરનારી **ધોતિ** કહી છે. (ગળવાના વસ્ત્રની પનર હાથ લંબાઈ જાણી લેવી, તે વસ્ત્ર સુંવાળું અને ઝીણું લેવું.) (૫૬) નાભિમાત્ર જળમાં રહીને ગુદા દ્વારા જળને ખેંચીને **બસ્તિ** જે નાભિનો નીચલો પ્રદેશ તે પ્રક્ષાલીને તે જ માર્ગથી તે જળને બહાર કાઢી નાખે તે આ બસ્તિ-ક્રિયા સમસ્ત રોગને હરે છે. (૫૭) લિંગથી જળને ખેંચીને ફરી તે જ માર્ગથી અથવા ગુદાથી તે જળને બહાર કાઢી નાખે, તે આ બસ્તિનો બીજો પ્રકાર છે. (૫૮) મુખથી જળપાન કરીને તેને ગુદાથી રેચન

मुखेन पानीयं रेचयेत्तद्गुदेन च। शङ्खप्रक्षालनाख्यैषा बस्तिरुक्ता मनीषिभिः ॥५९॥ पीत्वा जलं मुखेनादौ पुनस्तेनैव तद्वमेत् । प्रोक्ता गजकरण्येषा क्रिया वै नाडीशोधनी ॥६०॥ नासानाले स्निग्धसूत्रं प्रवेश्याकर्षयेन्मुखात् । एषा नेतिर्नेत्रमूर्धरोगघ्नी दिव्यदृष्टिदा ॥६१॥ त्राटकं च सूक्ष्मलक्ष्यं यावत्स्यादश्रुपातनम्। तावत्स्थिरदृशेक्षेत नेत्ररुक्तन्द्रिहन्त्रिदम् ॥६२॥ अमन्दावर्तवेगेन तुन्दं सव्यापसव्यतः। नतांसो भ्रामयेदेषा नौलिर्दोषैकशोषणी ॥६३॥ रेचकं पूरकं कुर्याद्भस्त्रावच्च ससम्भ्रमम् । कपालभातिः सा प्रोक्ता दोषघ्नी योगिसम्मता॥६४॥ शुद्ध्यन्ति नाड्य एताभिः क्रियाभिर्योगचारिणः । शुद्धासु तस्य नाडीषु प्राप्नोति कृशतां तनुः ॥६५॥ देहे भवति कान्तिश्च जठराग्निप्रदीपनम् । नादाभिव्यक्तिरारोग्यं यथेष्टं वायुधारणम् ॥६६॥ इत्थं नाडीः शोधयित्वा प्राणायामं समभ्यसेत् । चले वाते चलं चित्तं निश्चले निश्चलं यतः ॥६७॥ आसनं दृढमाश्रित्य कुर्वीत प्राणसंयमम् । गुरुप्रोक्तक्रमेणैव स्वस्थचित्तः शनैः शनैः ॥६८॥ प्राणशब्देन तु मुने! शारीरो वायुरुच्यते । आयामो निग्रहस्तस्य प्राणायामस्ततः स्मृतः ॥६९॥ प्राणायामो द्विधा प्रोक्तः सगर्भोऽगर्भ एव च । जपध्यानं विनाऽगर्भः सगर्भस्तत्समन्वितः ॥७०॥ अगर्भात्केवलात्सद्धिः सगर्भः श्रेष्ठ उच्यते । सगर्भाभ्यासतः शीघ्रं सिद्धिं योगस्य विन्दति ॥७१॥ द्वयोऽप्यसौ चतुर्धोक्तः पूरको रेचकस्तथा । कुम्भकः शून्यकश्चेति शृणु तल्लक्षणान्यपि ॥७२॥ यथा कमलनालेन जलं वक्त्रधृतेन तु । आकर्षयेत्तथा वायुं पूरकः स निगद्यते ॥७३॥ समुत्क्षिप्य बहिर्वायुं शून्यं कुर्याद्धृदम्बरम् । स रेचक इति प्रोक्तो योगशास्त्रविशारदैः ॥७४॥ उच्छ्वासमथ निःश्वासं रुन्ध्याद्योगी स्थिरस्थितिः। स कुम्भक इति प्रोक्तः पूर्णकुम्भ इव स्थितः ॥७५॥ कुम्भको द्विविधो ब्रह्मन्नेष सङ्कथ्यते बुधैः। एक आभ्यन्तरस्तत्र द्वितीयो

---

કરે તે આ **શંખપ્રક્ષાલન** નામની બસ્તિક્રિયા યોગીઓએ કહી છે. (૫૯) પ્રથમ મુખથી જળપાન કરીને ફરી મુખથી જ તેનું જે રેચન કરવું તે **ગજકરણી** નામની બસ્તિ ક્રિયા કહી છે. આ ક્રિયા નાડીશોધનને કરે છે. (૬૦) નાસિકાના છિદ્રમાં સુંવાળો, સ્વચ્છ, વેંત પરિમિત કપાસનો દોરો ઘાલીને મુખથી આકર્ષણ કરે તે આ **નેતિ** ક્રિયા કહી છે. આ નેતિ નેત્ર અને મસ્તકના રોગને નાશ કરનારી થઈને દિવ્ય દૃષ્ટિ આપે છે. (૬૧) જ્યાં સુધી અશ્રુપાત થાય ત્યાં સુધી સૂક્ષ્મ એક લક્ષ્યને સ્થિર દૃષ્ટિથી જોઈ રહેવું તે આ **ત્રાટક** નામની ક્રિયા કહી છે. આ ત્રાટક નેત્રરોગો અને આળસ્યનો નાશ કરે છે. (૬૨) યોગસાધક ખભાને નમતા રાખીને ઉદરને સમધિક ભમાવાના વેગથી ડાબા અને જમણા તરફ ભમાવે આ **નૌલિક્રિયા** કહી છે. આ નૌલી વાત, પિત્ત, કફાદિ દોષ માત્રને નાશ કરે છે. (૬૩) ધમણની પેઠે વેગથી રેચક (નાસા વાયુનું બહાર કાઢવું) અને પૂરક– (નાસિકાની અંદર તેનો પ્રવેશ કરાવવો) ને કરે આ **કપાલ ભાતિ** નામની ક્રિયા કહી છે. તે આ ક્રિયા કફાદિ સમસ્ત દોષોને નાશ કરનારી યોગી સંમત છે. (૬૪) આ ક્રિયાઓ કરવાથી યોગ સાધકની સમસ્ત નાડીઓ શુદ્ધ થઈ જાય છે. નાડીઓ શુદ્ધ થતાં તેનું શરીર કૃશતાને પામે છે; વળી, તેના દેહમાં વિલક્ષણ કાંતિ ઉદ્‌ભવે છે, જઠરાગ્નિનું પ્રદીપન થાય છે. પ્રણવધ્વનિનું શ્રવણ થાય છે, આરોગ્ય થાય છે અને યથેષ્ટ વાયુધારણનું સામર્થ્ય સિદ્ધ થાય છે. (૬૫-૬૬) આ પ્રકારે નાડીસંશોધન કરીને પછી પ્રાણાયામનો અભ્યાસ કરે. જ્યાં સુધી પ્રાણાયામની સિદ્ધિ ન થાય ત્યાં સુધી ચિત્ત સ્થિર થાય નહિ. વાયુ ચળે તો ચિત્ત પણ ચળેજ, કેમ તો વાયુગતિને અનુસારે ગતિ કરનારું ચિત્ત છે. વાયુ નિશ્ચળ થતાં મન નિશ્ચળ થાય છે માટે પ્રાણાયામનો અભ્યાસ કરે. (૬૭) સ્વસ્થ ચિત્તવાળો યોગસાધક સુદૃઢ આસનનો આશ્રય કરીને ગુરુએ કહેલા અનુક્રમ પ્રમાણે ધીરે ધીરે **પ્રાણાયામ** કરે. (૬૮) હે મુને ! **પ્રાણ** શબ્દથી શરીરની અંદર રહેલો વાયુ કહેવાય છે તે પ્રાણવાયુના નિયમનને **આયામ** કહેવાય છે માટે પ્રાણાયામ કહેવાય છે તેનાથી યુક્ત જપ અને ધ્યાન રહિત કેવળ **અગર્ભ** પ્રાણાયામથી પ્રણવાદિ મંત્રજાપ અને ભગવદ્ ધ્યાન યુક્ત **સગર્ભ** પ્રાણાયામ શ્રેષ્ઠ છે કારણ કે **સગર્ભ પ્રાણાયામના અભ્યાસથી યોગની સિદ્ધિ તત્કાલ પ્રાપ્ત થાય છે.** (૬૯-૭૦-૭૧) બે પ્રકારનો પ્રાણાયામ પણ પૂરક, રેચક અને કુંભક તથા શૂન્યક આવી રીતે ચાર પ્રકારનો કહ્યો છે. **પૂરકાદિનાં લક્ષણો** પણ સાંભળો. (૭૨) જેમ મુખથી ધારણ કહેલા કમળના નાળથી જળ ખેંચાય છે તે પ્રમાણે નાસિકાની અંદર વાયુને આકર્ષણ કરે તે **પૂરક** કહેવાય છે. (૭૩) ખેંચેલા વાયુને બહાર ફેંકી (રેચન કરીને) હૃદયાકાશને શૂન્ય કરે તે યોગશાસ્ત્રના વિશારદોએ **રેચક** કહ્યો છે. (૭૪) દૃઢ સ્થિતિવાળો યોગી ઉચ્છ્‌વાસ અને નિઃશ્વાસને રોકે, તે જળથી ભરેલા કુંભની માફક સ્થિર રહેલો; તે પ્રાણાયામ **કુંભક** કહેલો છે. (૭૫) હે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

बाह्य उच्यते ॥७६॥ अपाने प्राणसंरोधो ज्ञेय आभ्यन्तरो मुने! । प्राणेऽपानस्य संरोधो द्वितीयः कुम्भकः स्मृतः ॥७७॥ पूरकः प्रणवैस्तत्र कार्यः षोडशभिः शनैः । द्वात्रिंशता रेचकस्तु चतुःषष्ट्या च कुम्भकः ॥७८॥
अथवा विष्णुगायत्रीं योगी स्वमनसा पठन् । यथाशक्त्येव कुर्वीत प्राणायाममतन्द्रितः ॥७९॥ पिङ्गला दक्षिणे वामे नाडीडा संस्थितौ तयोः । सूर्यचन्द्रौ सुषुम्णा तु तन्मध्ये तत्र पावकः ॥८०॥ इडया पूरकं कृत्वा ततः कुर्वीत कुम्भकम् । ततः पिङ्गलया कुर्याद्रेचकं तु शनैः शनैः ॥८१॥ यद्वा पिङ्गलया कुर्यात्पूरकं कुम्भकं ततः । कृत्वा च रेचकं कुर्यादिडया योगसाधकः ॥८२॥ शनैः कृतेन युक्तेन प्राणायामेन योगिनः । रोगनाशश्च सिद्धिः स्यादन्यथा तु विपर्ययः ॥८३॥ प्रातर्मध्यन्दिने सायमर्धरात्रे च कुम्भकान् । शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥८४॥ कनीयसि प्राणरोधे स्वेदः कम्पस्तु मध्यमे । उत्तमे चासनोत्थानं साधकस्य मुहुर्भवेत् ॥८५॥ बहिः स्थितस्याग्रहणमत्यागोऽन्तःस्थितस्य च । वायोः स शून्यको ज्ञेयः शून्यवेधाद्यभूमिका ॥८६॥ प्राणायामफलं प्रोक्तं मुनिभिर्योगवित्तमैः । योग्यता धारणासु स्यान्मनसस्त्विति सुव्रत! ॥८७॥ अस्य शून्यकसंज्ञस्य प्राणरोधस्य सर्वतः । विशेषो वर्तते तं च सर्वं ते कथयाम्यहम् ॥८८॥ न शून्यकप्राणनिरोधसाम्यं योगाङ्गमाप्नोत्यपरं हि किञ्चित् । नादाभिधब्रह्मणि यत्र लब्धे भवेत्परब्रह्मसुखानुभूतिः ॥८९॥
इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे योगोपदेशे यमनियमासनप्राणायामलक्षणनिरूपणनामा सप्तपञ्चाशत्तमोऽध्यायः ॥५७॥

---

બ્રહ્મન્ ! વિદ્વાનોએ આ કુંભક બે પ્રકારનો કહેલો છે. તે બેમાં પ્રથમ કુંભક આભ્યન્તર અને બીજો બાહ્ય કહ્યો છે. (૭૬) હે મુને ! પાયુસ્થ મૂલાધાર ચક્રમાં પ્રાણને રોકવો તે **આભ્યન્તર કુંભક** જાણવો. નાભિમાં રહેલા અનાહત ચક્રમાં અપાનને રોકવો તે બીજો **બાહ્ય કુંભક** કહેલો છે. (૭૭) પહેલા કહેલા ત્રણ પ્રકારના પ્રાણાયામોમાં પૂરક ધીમેથી સોળ પ્રણવોથી કરવો; રેચક બત્રીસ પ્રણવોથી કરવો; કુંભક ચોસઠ પ્રણવોથી કરવો. (૭૮) અથવા યોગી પોતાના મનથી શક્તિ પ્રમાણે ગાયત્રીનો પાઠ કરતો સતો આળસે રહિત થઈને પ્રાણાયામ કરે. (અને આથી ભગવાનના નામમંત્રાદિકનું પણ જાણવું.) (૭૯) જમણી બાજુ નાસિકાના પુટમાં પિંગલા નાડી રહેલી છે. ડાબી નાસિકાના પુટમાં ઈડા નાડી રહેલી છે. પિંગલા નાડીમાં સૂર્ય અને ઈડા નાડીમાં ચંદ્ર રહેલો છે એમ જાણવું. પિંગલા અને ઈડા નાડી મધ્યે સુષુમ્ણા નાડી રહી છે તેમાં અગ્નિ રહેલો છે. (૮૦) ઈડાથી પૂરક કરીને પછી કુંભક કરે પછી પિંગલાથી ધીમે ધીમે રેચક કરે. (૮૧) અથવા યોગ - સાધક પિંગલાથી પૂરક કરે પછી કુંભક કરીને ઈડાથી રેચક કરે. (૮૨) ધીમેથી કરેલા પોતાની શક્તિ પ્રમાણે આચરણ કરેલા પ્રાણાયામથી યોગીને રોગનો નાશ અને યોગની સિદ્ધિ થાય; એમ ના કરે તો રોગ થાય અને યોગની સિદ્ધિ થાય નહિ. (૮૩) પ્રાતઃકાલે, મધ્યાહ્નને, સાયંકાલે અને અડધી રાત્રે આ ચાર વાર દરેક વખતે વીશ વાર ધીમેથી એંસી વાર ચાર વખત થઈને કુંભકનો અભ્યાસ કરે. આ ઉત્તરોત્તર વૃદ્ધિ પમાડે. દરેક સમયે ધીમે ધીમે આચરણ કરતો કરતો વીશ કુંભક કરે, પરંતુ એકદમ વૃદ્ધિ પમાડે નહિ. (૮૪) કનિષ્ઠ પ્રાણાયામ કર્યે સતે સાધકને પરસેવો થાય. મધ્યમ પ્રાણરોધ થયે સતે કમ્પ થાય, ઉત્તમ, પ્રાણ રોકવાથી વારંવાર આસનથી ઉદ્ગમ થાય. (૮૫) બહાર રહેલા વાયુનું ગ્રહણ ના કરવું અંદર રહેલા વાયુનો ત્યાગ ન કરવો તે શૂન્યક નામનો પ્રાણાયામ જાણવો. આ શૂન્યક યોગિજનપ્રસિદ્ધ જે શૂન્યવેધ તેની પ્રથમ ભૂમિકારૂપ માન્યો છે. (૮૬) હે સુવ્રત ! ધારણાઓમાં મનની યોગ્યતા થાય તે આ યોગને જાણનારા મુનિઓએ પ્રાણાયામનું ફલ કહ્યું છે. તેવું પાતંજલ સૂત્ર છે– **'ધારણાસુ ચ યોગ્યતા મનસઃ'** (૮૭) શૂન્યક સંજ્ઞાવાળા પ્રાણાયામનું સર્વે પૂરકાદિ પ્રાણાયામોથી અધિકપણું છે તે સર્વ વિશેષો હું તમોને કહું છું. (૮૮)

બીજું શૂન્યક પ્રાણાયામથી ભિન્ન કોઈ પણ યોગનું અંગ શૂન્યક પ્રાણના નિરોધના સમાનપણાને પામતું નથી કારણ કે શૂન્યક પ્રાણાયામ પ્રાપ્ત થયે સતે નાદ નામના બ્રહ્મમાં પરબ્રહ્મના સુખનો અનુભવ થાય છે. (૮૯)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે યોગોપદેશે યમ-નિયમ-આસન, પ્રાણાયામલક્ષણનિરૂપણનામા સપ્તપંચાશત્તમોઽધ્યાયઃ (૫૭)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच - **प्राणायामः शून्यकाख्यो मतः श्रेष्ठतया बुधैः । स निर्वासनचित्तस्य पुंसो हृद्येव जायते ॥१॥ हृदि तस्मिञ्जायमाने प्राणाद्या दश वायवः । स्वस्वस्थानावकाशेषु शाम्यन्ति हृदयादिषु ॥२॥ योगिनो जायतेऽवस्था तदा जाग्रत्सुषुप्तिवत् । देहे च स्तब्धता चान्तर्नादस्य श्रवणं तथा ॥३॥ आदौ तन्त्रीरवमिव श्रुत्वा सूक्ष्मध्वनिं ततः । अन्तः प्रबुद्ध्यते चाथ वेणुनादं शृणोति सः ॥४॥ ततो मृदङ्गवन्नादं शङ्खदुन्दुभिवत्ततः । भेर्याद्यनेकवादित्रतुल्यनादं शृणोत्यथ॥५॥ मेघगर्जनतुल्यांश्च नादान्नैकविधानिति । श्रुत्वाऽतीव प्रबुद्धः सन्प्रकाशं हृदि पश्यति ॥६॥ ततः स्थूलविराडाख्यदेहेषु प्रणवं स च । श्वासोच्छ्वासस्वरूपेण स्थितं स्वहृदि पश्यति ॥७॥ अभ्यसन्ति योगिनोऽत्र प्राप्तये यस्य नित्यदा । प्रतिश्वासं महामन्त्रमष्टाक्षरमतन्द्रिताः ॥८॥ आदौ तु तेजसां राशिमाकाशवदनन्तकम् । नादब्रह्मेति यं प्राहुस्तं पश्यति महोज्ज्वलम् ॥९॥ यस्माच्चाग्नेर्विस्फुलिङ्गा इव निर्यान्ति सर्वतः । तेजसो मण्डलान्यर्कबिम्बतुल्यान्यनन्तशः ॥१०॥ तस्मात्तु तेजसां राशेरुद्यन्तं प्रणवं ततः । स वीक्षते नादरूपं योगी तेजोमयं सितम् ॥११॥ प्रणवध्वनयस्तत्र तेजोभ्रमिसमप्रभाः । उत्पद्यन्तोऽपियन्तश्च दृश्यन्ते तेन भूरिशः ॥१२॥ यथा समुद्रे कल्लोला विद्युतो वा बलाहके । उत्पद्यन्ते च लीयन्ते तेजःपुञ्जे तथा रवाः ॥१३॥ नादात्मकस्य तस्याथ प्रणवस्य महाध्वनौ । प्राक्श्रुता इतरे नादास्तिरोधीयन्त एव ते ॥१४॥ प्रणवस्यास्य माहात्म्यं वेदेषु बहुधोदितम् । तस्य सारं समाकृष्य सङ्क्षेपेण वदाम्यहम् ॥१५॥ यत्किञ्चिद्वाङ्मयं लोके प्रणवो ह्येष तस्य तु । ज्ञेयः कारणमस्तीति बीजरूपः सनातनः ॥१६॥ तस्याकार उकारश्च मकारश्चार्धमात्रिका । मात्राश्चतस्र इत्याहुः सर्वाधारतया**

## અધ્યાય : ૫૮

### યોગોપદેશમાં પ્રાણાયામનું - નિશ્ચિત શૂન્યક નામનું લક્ષણ કહેલું છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે મુને ! શૂન્યક નામનો પ્રાણાયામ યોગીન્દ્રોએ શ્રેષ્ઠપણે માનેલો છે તે શૂન્યક પ્રાણાયામ ભગવાન વિના અન્ય પદાર્થમાં પ્રીતિ રહિત અંતઃકરણવાળા યોગીના મનમાં જ થાય છે. (૧) શૂન્યક પ્રાણાયામ યોગીના હૃદયમાં ઉત્પન્ન થયે સતે પ્રાણાદિ દશ વાયુઓ હૃદયાદિ પોતપોતાના સ્થાનના અવકાશોમાં નિશ્ચલપણાને પામે છે. (૨) તે સમયે યોગીને જાગ્રત અવસ્થા, સુષુપ્તિ અવસ્થાની માફક થાય છે, દેહમાં નિશ્ચલતા થાય છે તથા અંતઃકરણમાં નાના પ્રકારના ધ્વનિઓનું શ્રવણ થાય છે. (૩) તે યોગી પ્રથમ સિતારની માફક સૂક્ષ્મ ધ્વનિ સાંભળીને પછી અંતઃકરણમાં જાગ્રતની માફક બોધ યુક્ત થાય છે પછી વાંસળીના જેવો ધ્વનિ સાંભળે છે. (૪) પછી મૃદંગની માફક નાદ સાંભળે છે, પછી શંખના ધ્વનિ અને નગારાના ધ્વનિ જેવો નાદ સાંભળે છે, પછી અનેક વાજિંત્રોના સમાન નાદ સાંભળે છે. (૫) પછી મેઘની ગર્જના સમાન અનેક પ્રકારના નાદોને આ પ્રમાણે સાંભળીને અત્યંત બોધયુક્ત થઈને પોતાના હૃદયકમળમાં તેજનો સમુદાય જુએ છે. (૬) પછી યોગી સ્થૂલ- વિરાટ નામના દેહોમાં, જીવોના સ્થૂલાદિ ત્રણ દેહોમાં અને વૈરાજના વિરાટાદિ ત્રણ દેહોમાં શ્વાસોશ્વાસ રૂપથી રહેલા પ્રણવને પોતાના હૃદયમાં જુએ છે. (આ યોગીઓને જ પ્રત્યક્ષ શ્વાસ અને ઉચ્છ્વાસમાં પ્રત્યક્ષ થાય છે, બધાને થતો નથી) (૭) આ લોકમાં યોગીઓ પ્રણવની પ્રાપ્તિ માટે આળસે રહિત થઈને હંમેશા એક એક શ્વાસ પ્રત્યે અષ્ટાક્ષર મહામંત્ર 'ૐ નમો નારાયણાય' આ મહામંત્રનો અભ્યાસ કરે છે. (૮) પ્રણવના દર્શન પહેલાં તો આકાશની માફક અપાર જેને નાદબ્રહ્મ કહે છે તે અત્યંત કાન્તિવાળા તેજનાં રાશિને યોગી જુએ છે. (૯) અગ્નિથી તણખાઓ જેમ તેમ તેજના સમુદાયથી ચોતરફ સૂર્યમંડલના સમાન ઘણા તેજનાં મંડલો નીકળે છે તેને પણ યોગી જુએ છે. (૧૦) પછી યોગી તેજોના સમુદાયથી નીકળતો નાદરૂપ તેજોમય શ્વેત પ્રણવ જુએ છે. (૧૧) યોગીએ તેજોની ગોળ ભ્રમિઓ (આવર્ત) સમાન કાંતિઓવાળા ઘણા પ્રણવના ધ્વનિઓ તેજોરાશિમાં ઉત્પન્ન થતા અને લય પામતા પણ જોવાય છે. (૧૨) જેમ સમુદ્રમાં મહાતરંગો અથવા મેઘમાં વીજળીઓ ઉત્પન્ન થાય છે અને લય પામે છે તેવી રીતે પ્રણવના ધ્વનિઓ તેજના સમુદાયમાં ઉત્પન્ન થાય છે અને લય પામે છે તેને યોગી જુએ છે. (૧૩) પછી પ્રથમ સાંભળેલા બીજા તંત્રીના શબ્દો વગેરે ધ્વનિઓ નાદાત્મક પ્રણવના મહાનાદમાં લય પામે છે. (૧૪) આ પ્રણવનું માહાત્મ્ય ચાર વેદોમાં ઘણા પ્રકારે કહ્યું છે તે વેદમાં કહેલા પ્રણવના માહાત્મ્યનો સાર ભેગો કરી હું સંક્ષેપથી કહું છું. (૧૫) લોકમાં જે કંઈ વાણીમય થયેલું છે તેનું કારણ આ પ્રણવ જાણવો, જે માટે તે **બીજ રૂપ** સનાતન છે. (૧૬) પ્રણવની અકાર, ઉકાર, મકાર અને

मताः ॥१७॥ विराड्विष्णुः स्थितिश्चेति त्रयं चाकारमाश्रितम्। सूत्रं हिरण्यगर्भश्च सृष्टिश्चोकारमाश्रिताः ॥१८॥ अव्याकृतेश्वरलया मकारमिति संश्रिताः । चिदाकाशाक्षरब्रह्मतुर्यमित्यर्धमात्रिकाम् ॥१९॥ मातृकाश्च द्विपञ्चाशद्वेदा व्याहृतिभिः सह । वेदाङ्गान्यथ यत्किञ्चित्तन्मूलं वाङ्मयं हि तत् ॥२०॥ ततोऽवकाशोऽप्यखिलः प्रणवस्यास्य तेजसा । व्याप्त इत्यवलोक्यासौ प्राप्नोत्यानन्दमुत्तमम् ॥२१॥ तस्यैवालम्बनाच्छून्यमहाशून्यादिभूमिकाः । विध्वा नादात्मकं योगी याति नारायणं प्रभुम्॥२२॥ कार्यकारणरूपोऽसौ नादः सर्वो यदङ्गतः । प्रादुर्भवति तं देवं साक्षात्स्वहृदि वीक्षते ॥२३॥ ततः स कृतकृत्योऽत्र भवत्येव न संशयः । तत्प्रसादादवाप्नोति तद्धाम परमं बृहत् ॥२४॥ शून्यकप्राणसंरोधाद्येयं स्थितिरुदीरिता । सहजः स समाधिर्हि कथ्यते तत्त्वदर्शिभिः ॥२५॥ तद्वान्योगी वपुःस्थोऽपि वर्तते साक्षिवत्सदा । प्राप्य चात्यन्तिकलयस्थितिमुन्निद्र एव सः॥२६॥ न सर्वलोकसाध्योऽयं शून्यकः प्राणसंयमः । न चैकजन्मजन्येन सुकृतेनापि लभ्यते ॥२७॥ अनेकजन्मजन्यानां सञ्चयैः पुण्यकर्मणाम् । अशेषवासनाहीनं यस्य चित्तं तु जायते ॥२८॥ तस्य सत्सङ्गसच्छास्त्रे विनापि शून्यकस्थितिः । वासुदेवस्यैव साक्षादिच्छया जायते मुने! ॥२९॥ सहात्मनो ब्रह्मणैक्यं बाल्येऽप्यनुभवत्यसौ । आर्षभेषु यथा पूर्वं नवयोगेश्वरास्तथा॥३०॥ कविर्हरिरन्तरिक्षः प्रबुद्धः पिप्पलायनः । आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥३१॥ पुत्रा ऋषभदेवस्य नवैते योगवित्तमाः। सिद्धा बभूवुर्बाल्येऽपि प्राप्तब्रह्मात्मदर्शनाः

અર્ધમાત્રા; આ **ચાર માત્રાઓ** કહેલી છે તે વિરાટાદિ સર્વની વાઙ્મય (વાણી)ના એક આધાર પણે માનેલીઓ છે. (૧૭) વિરાટ=વૈરાજ પુરુષનું બ્રહ્માંડાધાર શરીર, વિષ્ણુ = વૈશ્વાનર બીજા, નામવાળા વિરાટના અભિમાની અને સ્થિતિ = વિશ્વની સ્થિતિનો સમય, આ ત્રણ અકારને આશ્રિત છે. સૂત્ર=હિરણ્યગર્ભનું સૂત્રાત્મ સંજ્ઞાવાળું શરીર, હિરણ્યગર્ભ, બ્રહ્મા જેમનું બીજું નામ તે સૂત્રાત્મા-શરીરના અભિમાની તથા સૃષ્ટિ = જગતનો સર્ગ સમય આ ત્રણ ઉકારને આશ્રેલા છે. (૧૮) અવ્યાકૃત=ઈશ્વરનું અવ્યાકૃત શરીર, ઈશ્વર બીજા નામવાળા શિવ, અવ્યાકૃત શરીરના અભિમાની અને લય=જગતનો પ્રલય કાલ આ ત્રણ મકારને આશરીને રહેલા છે; ચિદાકાશ અને અક્ષર બ્રહ્મ અને તુર્યપદ વાચ્ય શ્રી વાસુદેવ આ ત્રણ અર્ધ માત્રિકાને આશ્રિત છે. (૧૯) બાવન અક્ષરો શિક્ષાથી જાણવા. ભૂરાદિ સાત વ્યાહૃતિઓએ સહિત વેદો-વેદનાં અંગો શિક્ષાદિ છો અને જે કંઈ વાણીમય તે સર્વનું પ્રણવ જ મૂલ કારણ છે. (૨૦) પ્રણવના દર્શન પછી પ્રણવના તેજથી સમગ્ર અવકાશ વ્યાપેલો છે : આ પ્રમાણે જોઈને યોગી ઉત્તમ આનંદ પામે છે. (૨૧) પ્રણવના જ આલંબનથી શૂન્ય, મહાશૂન્યાદિ ભૂમિકાઓને ઉલ્લંઘન કરી યોગી નાદની ઉત્પત્તિના સ્થાન ભૂત મહાસમર્થ શ્રી વાસુદેવને પામે છે. (૨૨) કાર્ય કારણરૂપ આ સર્વ નાદ જેના અંગથી પ્રાદુર્ભાવ પામે છે તે વાસુદેવને પોતાના હૃદયમાં પ્રત્યક્ષ જુએ છે. (૨૩) પછી યોગી આ લોકમાં કૃતાર્થ જ થાય છે, એમાં સંશય નથી, શ્રી વાસુદેવના અનુગ્રહથી અક્ષરબ્રહ્મ સંજ્ઞાવાળા સર્વોત્તમ શ્રી વાસુદેવના સ્થાનને પામે છે. (૨૪) શૂન્યક પ્રાણાયામની સિદ્ધિથી જે આ સ્થિતિ કહી તેને જ સમાધિના તત્ત્વને જાણનારાઓ **સ્વાભાવિક સમાધિ** કહે છે. (૨૫) સહજ સમાધિવાળો યોગી સ્થૂલ દેહમાં રહેલો છે. તો પણ હંમેશાં સાક્ષીની માફક વર્તે છે તે યોગી આત્યંતિક લય સ્થિતિને પામીને નિદ્રાએ રહિત જ વર્તે છે. (સદા બ્રહ્મરૂપથી રહેલો સતો પરબ્રહ્મ શ્રી વાસુદેવને જુએ છે.) (૨૬) આ શૂન્યક પ્રાણાયામ સર્વ લોકથી સિદ્ધ કરવા માટે યોગ્ય નથી જ. એક જન્મથી ઉત્પન્ન થયેલા પુણ્યથી સ્વ-ધર્મ, જ્ઞાન, વૈરાગ્યે સહિત ભગવાનની ભક્તિ સ્વરૂપ પુણ્યથી પણ પ્રાપ્ત થતો નથી. (૨૭) અનેક જન્મથી ઉત્પન્ન થયેલાં સ્વધર્મ, જ્ઞાન, વૈરાગ્યથી યુક્ત ભગવાનની ભક્તિસ્વરૂપ પુણ્ય - કર્મના સંયોગથી જેનું ચિત્ત સમગ્ર વાસના રહિત થાય છે. હે મુને ! તે પુરુષને સત્સંગ અને સત્શાસ્ત્રના શ્રવણ વિના પણ શૂન્યક સ્થિતિ-શૂન્યક પ્રાણાયામથી ઉત્પન્ન થતી સ્થિતિ પ્રત્યક્ષ વાસુદેવની ઈચ્છાથી થાય છે. (૨૮-૨૯) જેમ પૂર્વે ઋષભદેવના પુત્રોમાં નવ યોગેશ્વરો હતા, તેવી રીતે આ પુરુષ પણ બાલ્યાવસ્થામાં પણ અક્ષરબ્રહ્મની સાથે પોતાના ઐક્યપણાનો અનુભવ કરે છે. અર્થાત્ ભગવાનની ઈચ્છાથી અક્ષરબ્રહ્મના ભાવને પામેલો યોગી પ્રત્યક્ષ ભગવાનને પામે છે. (૩૦) કવિ, હરિ, અન્તરિક્ષ, પ્રબુદ્ધ, પિપ્પલાયન, આવિર્હોત્ર, દ્રુમિલ, ચમસ અને કરભાજન આ **નવ** ઋષભદેવના પુત્રો બાલ્યાવસ્થામાં પણ પ્રાપ્ત થયેલા છે, બ્રહ્મરૂપથી પોતાના આત્માથી પર જે પરબ્રહ્મ શ્રી વાસુદેવનાં દર્શન જેમને એવા યોગ જાણનારાઓમાં ઉત્તમ સિદ્ધો હતા. (૩૧-૩૨) આ પૃથ્વીમાં હાલમાં



**પ્રસિદ્ધ કર્તા :-** શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

॥३२॥ तथाविधाश्च ये केचित्तेऽधुनाप्यत्र भूतले । नारायणेच्छयाऽकस्माल्लभन्ते तादृशीं स्थितिम् ॥३३॥ चित्तस्य निर्वासनतां विना शून्यकसिद्धये । उपायोऽन्यस्तु नास्त्येव कश्चिदप्यत्र सन्मते! ॥३४॥ स निर्वासनचित्तस्य हृदये प्राणसंयमः । जायते सहसैवापि पूरकाद्याः क्रिया विना ॥३५॥ इति ते प्राणसंरोधो मया सङ्कीर्तितो मुने! । यः सामान्यविशेषाभ्यां प्रोक्तो योगविशारदैः ॥३६॥ यः प्राणसंयमनमभ्यसतीह सिद्धयोगोपदर्शितपथेन पुमांस्तु धीरः । तस्यातिचञ्चलमपि प्रशमं समेति मोक्षोन्मुखैकरिपुराशु मनोऽपि नूनम् ॥३७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे योगोपदेशे शून्यकप्राणायामलक्षणनिरूपणनामाऽष्टपञ्चाशत्तमोऽध्यायः ॥५८॥

श्रीनारायणमुनिरुवाच – पुंसा सिसाधयिषता प्राणायाममिहाञ्जसा । ज्ञेयानि नासानिःश्वासे पञ्च तत्त्वानि सर्वथा ॥१॥ इडायां पिङ्गलायां वा सुषुम्णायां च योगिना । वहन्त्यां यच्च कर्तव्यं ज्ञेयं तदपि तत्त्वतः ॥२॥ सौरांश्चान्द्रांश्च तिथ्यादीनपि ज्ञात्वा यथागमम् । विदधीत यथाकालं योगकृत्सकलाः क्रियाः ॥३॥ विस्तृतं सर्वमेतद्धि वर्तते स्वरशासने । ब्रुवे तत्सारमाकृष्य साधकानां हिताय च ॥४॥ तत्र पीतं चतुष्कोणं ज्ञेयं तत्त्वं तु पार्थिवम् । श्वासस्तदा मध्यगतिर्भवेच्च द्वादशाङ्गुलः ॥५॥ तदा स्थिरः स्वभावः स्यादर्थे च सुरभौ रुचिः । पीतवर्णपदार्थानां सङ्कल्पश्च भवेद्धृदि ॥६॥ एवंविधे धरातत्त्वे वर्तमाने तु योगिना । स्थिरकार्याणि कार्याणि स्वोचितान्येव नेतरत् ॥७॥ वारितत्त्वं भवेच्छ्वेतमर्धचन्द्रसमाकृति । अधोगतिस्तदा श्वासः षोडशाङ्गुलमायतः ॥८॥ तदा स्वभावे चाञ्चल्यं रसेहाचिन्तं हृदि । भवेच्छ्वेतपदार्थानां शान्तिकर्मात्र

પણ જે કોઈ તેવા પ્રકારના હોય તે પણ પરમાત્માની ઈચ્છાથી એકદમ તેવી સ્થિતિને પામે છે. (૩૩) હે સન્મતે ! ચિત્તની નિર્વાસનિકતા વિના **શૂન્યક** પ્રાણાયામની સિદ્ધિ માટે બીજો કોઈ પણ ઉપાય તો આ લોકમાં નથી જ. (૩૪) તે શૂન્યક પ્રાણાયામ વાસનાએ રહિત ચિત્તવાળા પુરુષના હૃદયમાં પૂરકાદિ ક્રિયાઓ વિના પણ તત્કાલ જ થાય છે. (૩૫) હે મુને! આ પ્રકારે મેં પ્રાણાયામ તમોને કહ્યો. જે પ્રાણાયામ યોગમાં નિપુણ જનોએ **સામાન્ય** અને **વિશેષ**થી કહ્યો છે તેમાં પૂરક, કુંભક અને રેચકપણે સામાન્ય અને શૂન્યકપણે વિશેષ છે એમ જાણવું. (૩૬)

હે મુને ! આ લોકમાં જે પુરુષ ધૈર્ય યુક્ત થઈને સંસિદ્ધ યોગવાળા યોગીએ બતાવેલા માર્ગથી પ્રાણાયામનો અભ્યાસ કરે છે તે પુરુષનું અતિ ચંચલ મન પણ તત્કાલ નિશ્ચલપણાને પામે છે જ. (૩૭)

*ઈતિ શ્રી સત્સંગિ જીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે યોગોપદેશે શૂન્યક પ્રાણાયામલક્ષણનિરૂપણનામાઽષ્ટ પંચાશત્તમોઽધ્યાયઃ (૫૮)*

## અધ્યાય : ૫૯

### યોગના ઉપદેશમાં, યોગસાધનમાં તત્ત્વાદિ જ્ઞાન સારી રીતે નિરૂપણ કરેલું છે.

**શ્રી નારાયણ મુનિ બોલ્યા** : હે મુને ! આ લોકમાં પ્રાણાયામ સિદ્ધ કરવા ઈચ્છતા યોગી પુરુષે નાસિકામાં સંચાર કરતાં વાયુમાં પૃથ્વી આદિ પાંચ તત્ત્વો યથાર્થપણે સર્વ પ્રકારે જાણવા. (૧) વળી ઈડા, પિંગલા અને સુષુમ્ણા ચાલતી હોય ત્યારે યોગીએ જે કર્તવ્ય હોય તે પણ યથાર્થપણે જાણવું. (૨) સૂર્ય સંબંધી અને ચંદ્ર સંબંધી તિથિપક્ષ વાર વગેરે શાસ્ત્ર પ્રમાણે જાણીને યોગસાધક સમય પ્રમાણે સમગ્ર ક્રિયાઓ કરે. (૩) આ તત્ત્વજ્ઞાનાદિ સમગ્ર સ્વરોદયાદિ સ્વરશાસ્ત્રે વિસ્તારથી કહેલું છે. તે સ્વર શાસ્ત્રનો સારાંશ ખેંચીને સાધકોના હિત માટે તત્ત્વજ્ઞાનાદિ કહું છું. (૪) તે પાંચ તત્ત્વોમાં પાર્થિવ તત્ત્વ તો પીળા વર્ણવાળું, ચાર ખૂણાવાળું જાણવું. તે જ્યારે પૃથ્વી તત્ત્વ વહેતું હોય તે સમયે નાસિકા-શ્વાસ ઊર્ધ્વ અને અધોગમન રહિત મધ્યગમન અને બાર આંગળ લાંબી ગતિ હોય ત્યારે નાસિકા-શ્વાસમાં પૃથ્વીતત્ત્વ વર્તે ત્યારે યોગીની પ્રકૃતિ સ્થિર હોય, સુગંધીમાન પદાર્થોમાં પ્રીતિ થાય, યોગીના મનમાં પીળા વર્ણના પદાર્થોનો સંકલ્પ થાય. (૫-૬) આ પ્રકારે પૃથ્વીતત્ત્વ વર્તતું હોય ત્યારે યોગીએ પોતાને યોગ્ય નિશ્ચિત ભાવે કરવા યોગ્ય કર્મો જ કરવાં, બીજું કાર્ય ન કરવું. (૭) જળતત્ત્વ શુકલ વર્ણ અને અર્ધચંદ્રની સમાન આકૃતિવાળું હોય તે સમયે (જળતત્ત્વ વહન સમયે) શ્વાસ અધોગતિ સોળ આંગળ સુધી લાંબી ગતિવાળો હોય. તે સમયે સ્વભાવ ચંચળ હોય, રસાસ્વાદમાં રુચિ થાય, હૃદયમાં શ્વેત પદાર્થોનું ચિંતવન થાય આ જળ તત્ત્વમાં શાંતિકર્મનું આચરણ કરે. (૮-૯) તેજ તત્ત્વ રક્તવર્ણવાળું, ત્રિકોણ હોય તે સમયે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

चाचरेत् ॥९॥ तेजस्तत्त्वं भवेच्छोणं त्रिकोणं मरुतो गतिः । चतुरङ्गुलमूर्ध्वा च स्वभावे तीक्ष्णता तदा ॥१०॥ रूपे रुचिश्च शोणार्थचिन्तनं हृदये भवेत्। तदा तीक्ष्णं कर्म यत्तद्योगी स्वस्योचितं चरेत् ॥११॥ वायुतत्त्वं हरिद्वर्णं वर्तुलं च गतिस्तदा । श्वासस्याष्टाङ्गुलं तिर्यक्स्यात्स्वभावोऽतिचञ्चलः ॥१२॥ प्रीतिः स्पर्शसुखेऽथ स्याद्धरिदर्थस्य मानसे । सङ्कल्पस्तत्र कुर्वीत चरकर्माणि योगकृत्॥१३॥ आकाशतत्त्वं श्यामं स्याद्बिन्दुवच्च तदा गतिः । एकाङ्गुलं सर्वतश्च भवेच्छ्वासस्य योगिनः ॥१४॥ स्वभावे शून्यता शब्दे रुचिः सङ्कल्पहीनता । भवेत्तदा तु कर्तव्यं योगिनात्मविचिन्तनम् ॥१५॥ श्रेष्ठ आद्येऽन्तिमे तत्त्वे प्राणायामोऽथ मध्यमः । द्वितीये च तृतीयेऽपि कनिष्ठस्तु तुरीयके । ॥१६॥ इडायामम्बुतत्त्वे च वहत्येव पिबेदपः । पिङ्गलायामग्नितत्त्वे भुक्तिं चोत्सर्गमाचरेत् ॥१७॥ सुषुम्णायां हरेर्ध्यानं कुर्याद्वा प्राणसंयमम् । अन्यत्किञ्चिन्न कुर्वीत स्थिरं कर्माथवा चलम्॥१८॥ दिवा च वाहयेच्चान्द्रीं नाडीं सौरीं तथा निशि। कर्तव्ये त्वम्बुपानादौ तावत्तां विपरीतयेत् ॥१९॥ ज्ञेयश्चान्द्रः सितः पक्षः कृष्णः सौरोऽथ योगिना । सौम्यशुक्रेन्दुगुरवो वाराश्चेन्दोः परे रवेः ॥२०॥ शुक्लप्रतिपदोऽमान्तं त्रीणि त्रीणि दिनानि च । ज्ञातव्यानि क्रमेणैव चन्द्रस्य च रवेः पुनः ॥२१॥ चान्द्र्यां नाड्यां विधोः पक्षतिथिवारसमागमे । सौर्यां तथैव सूर्यस्य सर्वं कार्यं हि सिद्ध्यति ॥२२॥ एतेषां मिश्रतायां तु कृतारम्भस्य कर्मणः । मनोभिलषितं तूर्णं फलं नैव हि जायते ॥२३॥ इति तत्त्वादिरूपाणि तुभ्यं सङ्क्षेपतो मया । प्रोक्तानि तानि जानीयाद्योगकृत्स्वार्थसिद्धये ॥२४॥ एतत्तत्त्वादिविज्ञानं पूर्वोक्तनियमस्थितेः । भवेद्योगकृतः सर्वं न तु तद्बाह्यवर्तिनः ॥२५॥ कुपथ्यभोजी बह्वाशी प्रमादी

---

નાસિકાના વાયુની ગતિ ચાર આંગળ જેટલી ઊંચી હોય અને સ્વભાવમાં ઉગ્રતા હોય છે. રૂપ વિષયમાં રુચિ થાય, હૃદયમાં લાલ પદાર્થનું ચિન્તવન થાય. તે સમયે યોગી પોતાને યોગ્ય જે તીક્ષ્ણ કર્મ કરે. (૧૦-૧૧) વાયુ તત્ત્વ નીલ વર્ણવાળું અને ગોળ હોય, તે સમયે શ્વાસની ગતિ આઠ આંગળ વાંકી હોય, સ્વભાવ અતિ ચંચળ હોય. તે સમયે સ્પર્શસુખમાં પ્રીતિ થાય, હૃદયમાં નીલ વર્ણના પદાર્થોનો સંકલ્પ થાય તે વાયુ તત્ત્વમાં યોગ સાધક તત્કાલ કરવા યોગ્ય ક્રિયાઓ કરે. (૧૨-૧૩) આકાશતત્ત્વ કૃષ્ણવર્ણ, અને બિંદુની માફક ગોળ આકાર થાય તે સમયે યોગીના શ્વાસની ગતિ એક આંગળ ચોતરફ હોય. તે સમયે સ્વભાવમાં શૂન્યતા થાય. શબ્દસુખમાં રુચિ થાય, મન પદાર્થ માત્રના સંકલ્પે રહિત હોય. ત્યારે તો યોગીએ આત્મા, પરમાત્માના સ્વરૂપનું ધ્યાન કરવું. (૧૪-૧૫) પ્રાણાયામ પ્રથમ પૃથ્વીતત્ત્વમાં અને અંતિમ આકાશ તત્ત્વમાં શ્રેષ્ઠ માનેલો છે અને બીજા જળતત્ત્વમાં અને ત્રીજા અગ્નિતત્ત્વમાં મધ્યમ માનેલો છે. ચોથા વાયુ તત્ત્વમાં તો કનિષ્ઠ માનેલો છે. (૧૬) ઇડા નાડીમાં જળ તત્ત્વ વહેતું હોય ત્યારે જ જળ પીએ અને પિંગલા નાડીમાં અગ્નિતત્ત્વ વહેતું હોય ત્યારે જ ભોજન અને મળોત્સર્ગ ક્રિયા કરે. (૧૭) સુષુમ્ણા નાડી ચાલતી હોય ત્યારે હરિનું ધ્યાન અથવા પ્રાણાયામ કરે, બીજું સ્થિર કર્મ અથવા ચલ કર્મ કંઈ પણ કરે નહિ. (૧૮) દિવસે ચંદ્ર સંબંધીની ઇડા નાડી વહન કરે તથા રાત્રિમાં સૂર્ય સંબંધી પિંગલા નાડી વહન કરે, જળપાન વગેરે કરવું હોય ત્યારે ત્યાં સુધી તે પિંગલા નાડીને વિપરીતપણે વહન કરાવે. (૧૯) યોગીએ શુકલ પક્ષ ચંદ્ર સંબંધી જાણવો. અને કૃષ્ણ પક્ષ સૂર્ય સંબંધી જાણવો. બુધ, શુક્ર, સોમ, અને ગુરુ આ વાર ચન્દ્ર સંબંધી જાણવા; બીજા રવિ, મંગળ, અને શનિ આ વારો સૂર્ય સંબંધી જાણવા. (૨૦) શુકલપક્ષની પ્રથમ તિથિથી આરંભીને અમાસ સુધી ત્રણ ત્રણ દિવસો અનુક્રમથી ચંદ્રના અને ફરીથી સૂર્ય સંબંધી જાણવા. (૨૧) ચંદ્ર સંબંધી ઇડા નાડીમાં ચંદ્રનો પક્ષ તથા તિથિ વારનો સમાગમ થયે સતે તે પ્રકારે જ સૂર્યસંબંધી પિંગલા નાડીમાં સૂર્યનો પક્ષ, તિથિવારનો સમાગમ થયે સતે સર્વ કાર્ય સિદ્ધ થાય છે જ. (૨૨) આ નાડી-પક્ષ વગેરેના પરસ્પર મિશ્રણ ભાવમાં તો આરંભ કરેલા કર્મનું મનને ઇચ્છિત ફલ તત્કાલ થતું નથી જ. (૨૩) આ પ્રમાણે મેં તત્ત્વાદિનાં લક્ષણો સંક્ષેપથી તમોને કહ્યાં. તેને યોગ કરનાર યોગી પોતાની સિદ્ધિને માટે જાણે. (૨૪) એ સર્વે તત્ત્વાદિ વિજ્ઞાન પૂર્વે કહેલાં નિયમોની સ્થિતિવાળા યોગ કરનારને થાય. પૂર્વે કહેલા નિયમથી રહિતને એ વિજ્ઞાન થાય નહિ. (૨૫) જે ભોજન કરવાથી પોતાના શરીરમાં ઉપદ્રવ થાય તેવા અન્નાદિને ભોજન કરનાર તથા વધારે ભોજન કરનાર, પ્રમાદી, વ્યસની, રોગી, ક્રોધવાળો, બહુ બોલનાર, દિવાનિદ્રાશીલ અને કામી : આ

व्यसनी सरुट् । बहुभाषी दिवास्वापी कामी चैतन्न बुध्यते ॥२६॥ प्राणायामप्रसङ्गेन तत्त्वाद्येतन्निरूपितम् । यज्ज्ञानिनाऽर्थस्य सिद्धिरसिद्धिश्च हृदीक्ष्यते ॥२७॥ अङ्गानि चत्वारि मया सुबुद्धे! योगस्य तुभ्यं स्फुटलक्षणानि । निरूपितानीत्थमथापराणि फलैः सहानुक्रमतो वदामि ॥२८॥इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशस्त्रे पञ्चमप्रकरणे योगोपदेशे तत्त्वादिज्ञाननिरू– पणनामैकोनषष्टितमोऽध्यायः ॥५९॥

श्रीनारायणमुनिरुवाच – **स्वस्वेभ्यो विषयेभ्यो यत्समाकर्षणमात्मनि । इन्द्रियाणां तु सर्वेषां स प्रत्याहार उच्यते ॥१॥ इन्द्रियाणां पारतन्त्र्याद्विमुक्तिर्योगिनस्त्विति । प्रत्याहारस्य कथितं फलं योगविशारदैः ॥२॥ आधारादिषु चक्रेषु प्राणस्य मनसा सह । हृदि वा भगवन्मूर्तौ धारणं धारणोच्यते ॥३॥ ध्यानसिद्धिर्धारणायाः फलं सद्भिर्निगद्यते । तच्च ध्यानं प्रवक्ष्यामि योगस्याङ्गं हि सप्तमम् ॥४॥ षडङ्गाभ्यासतः क्षीणकर्मदोषे स्वमानसे । योगिना साधनीयं तद्भगवत्प्रेमवृद्धिकृत् ॥५॥ अस्ति नाभिहृदे पद्ममष्टपत्रमधोमुखम् । कदलीकोशसङ्काशं द्वादशाङ्गुलनालकम् ॥६॥ प्रणवध्वनिभिस्तस्मिन्फुल्ले चोर्ध्वमुखीकृते। तेजोबिम्बे वासुदेवचिन्तनं ध्यानमुच्यते ॥७॥ भास्वत्कोटिसमप्रभं सुवदनं सत्पद्मपत्रेक्षणं कण्ठे कौस्तुभराजितं च मुरलीं सन्नादयन्तं रसात् । सर्वालङ्कृतिभूषणं सुमुकुटं कर्णोल्लसत्कुण्डलं ध्यायेद्दीर्घभुजं च पीतवसनं श्रीवासुदेवं हृदि ॥८॥ भातं मौक्तिकपुष्पहारततिभिर्भक्तार्पिताभिर्गले हैमं बिभ्रतमुज्ज्वलं च रुचिरं सद्ब्रह्मसूत्रं प्रभुम् । तं**

સર્વે તત્ત્વાદિકને જાણતા નથી. (૨૬) પ્રાણાયામના પ્રસંગથી આ તત્ત્વાદિ નિરૂપણ કર્યું, તત્ત્વાદિના જ્ઞાનવાળા યોગસાધકને યોગની સિદ્ધિ અને અસિદ્ધિ પોતાના હૃદયમાં જણાય છે. (૨૭)

આ પ્રકારે મેં યોગનાં ચાર અંગો-યમાદિનાં સ્વરૂપો સ્ફુટ પણે નિરૂપણ કર્યા. હવે બીજાં પ્રત્યાહારાદિ ચાર અંગો ફલે સહિત અનુક્રમે કહું છું. (૨૮)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે યોગોપદેશે તત્ત્વાદિજ્ઞાન નિરૂપણ નામૈકોનષષ્ટિતમોઽધ્યાયઃ (૫૯)*

## અધ્યાય : ૬૦

### યોગોપદેશમાં, પ્રત્યાહાર-ધારણા અને ધ્યાન તથા સમાધિનું લક્ષણ સ્પષ્ટ કહ્યું છે.

**શ્રી નારાયણ મુનિ બોલ્યા** : હે મુને ! પોતપોતાના વિષયોથી સર્વે ઈન્દ્રિયોનું જે પોતાના અંતઃકરણમાં અથવા આત્મસ્વરૂપમાં સમાકર્ષણ કરવું (પાછા વાળવું) તે **પ્રત્યાહાર** કહેવાય છે. (૧) ઈન્દ્રિયોના પરતંત્રપણાથી યોગીની વિમુક્તિ થાય : આ પ્રત્યાહારનું ફળ યોગ વિશારદોએ કહેલું છે. **'તતઃ પરમાવશ્યતેન્દ્રિયાણામ્'** એવું સૂત્ર છે. (૨) આધારાદિ ચક્રોમાં મનની સાથે પ્રાણનું ધારણ-સ્થિરીકરણ અથવા હૃદયમાં ભગવાનની મૂર્તિમાં ધારણ કરવું તે **ધારણા** કહેવાય છે. આધારાદિ ચક્રોનાં સ્થાનો, 'હઠપ્રદીપિકા'માં કહ્યાં છે—'મૂલાધાર', સ્વાધિષ્ઠાન, મણિપુર, અનાહત, વિશુદ્ધિ, આજ્ઞા, આ છ ચક્રો શુભ છે. મૂલાધાર ગુદામાં જાણો, સ્વાધિષ્ઠાન લિંગમાં, મણિપુર નાભિમાં, હૃદયમાં અનાહત છે, વિશુદ્ધિ ચક્ર કંઠમાં, આજ્ઞાચક્ર ભ્રકુટિના મધ્યમાં રહે છે. (૩) ધ્યાનની સિદ્ધિ તે ધારણાનું ફલ છે એમ યોગીઓએ કહેલું છે. હવે યોગનું સાતમું અંગ જે **ધ્યાન** તે કહું છું. (૪) પોતાના મનમાં યમાદિ યોગનાં છ અંગોના અભ્યાસથી નિવૃત્તિ પામ્યાં છે મોક્ષમાં વિરોધી પ્રાચીન કર્મના દોષો જેનાથી, એમ થયે સતે યોગીએ ભગવાનમાં પ્રેમવૃદ્ધિ કરનારું ધ્યાન સાધવું. (૫) આઠ પત્રવાળું, નીચે મુખવાળું, કેળના કોશ સમાન, બાર આંગળના નાલવાળું કમળ (નાભિકંદમાં ઉત્પન્ન થયેલું કમળ) નાભિહૃદમાં છે. (૬) પ્રણવના ધ્વનિઓથી પ્રફુલ્લિત થયેલું અને ઊંચા મુખવાળું થયેલું જે તે નાભિકમળ તેમાં (પ્રફુલ્લિત નાભિકમળ જે તેજોમંડળ તેના મધ્યમાં) વાસુદેવનું ચિન્તન તે **ધ્યાન** કહેવાય છે. (૭) એકીસાથે ઉદય પામેલા કરોડો સૂર્ય સમાન શોભાયમાન મુખારવિન્દવાળા, કમળના પત્ર સમાન નેત્રવાળા, કંઠમાં કૌસ્તુભમણિથી સુશોભિત, પ્રીતિના અતિશયથી મુરલી વગાડતા, પોતાનાં અંગોમાં ધારણ કરેલાં સમગ્ર અલંકારોને અલંકૃત કરતા, ધારણ કર્યો છે સુન્દર મુકુટ જેમણે કર્ણોથી શોભાયમાન છે કુંડલો જેમને એવા જાનુ પર્યન્ત લાંબા છે બન્ને હસ્તો જેમના એવા- ધારણ કર્યું છે પીતાંબર જેમણે એવા શ્રી વાસુદેવનું હૃદયકમળની સમીપમાં નાભિકમળની અંદર તેજોમંડલમાં ધ્યાન કરવું. (૮) કંઠમાં ભક્તોએ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ध्यायंश्चरणाम्बुजादिषु मनश्चाङ्गेषु सन्धारयेत्प्रत्येकं तु पृथक्पृथग्दृढमतिर्योगी चिरं सुस्थिरः ॥९॥ अवतारा भगवतो वासुदेवस्य येऽभवन् । तेष्वन्यतममव्यग्रो ध्यायेद्वा योगसाधकः ॥१०॥ प्रतिमां वा यथादृष्टां ध्यायेद्भगवतोऽन्वहम् । यत्किञ्चिद्धरिसम्बन्धि वस्तु तद्ध्येयमुच्यते ॥११॥ ध्यानमभ्यसतो नित्यमित्थं वै योगिनोऽचिरात् । प्रेमा विवर्धते विष्णौ भक्तानामतिवाञ्छितः ॥१२॥ ध्यानस्थानानि देहेऽस्मिन्सन्त्यनेकानि योगिनः । तत्रापि नाभिकन्देऽस्मिन्विशेषोऽस्तीति तं शृणु ॥१३॥ तेजोमण्डलके तस्मिन्ध्याता योगी यदेक्षते । भगवन्तं वासुदेवं सर्वदेवाधिदैवतम् ॥१४॥ तदैव नाड्यः सकलाः सङ्कुचन्त्यसुभिः सह । निरोधं मनसश्चासौ ध्येये सपदि विन्दते ॥१५॥ ध्यायन्ति योगिनो नित्यमत एव समाहिताः । भगवन्तं नाभिपद्मे तद्विदः शीघ्रसिद्धिदे ॥१६॥ ध्यायन्तं भगवन्मूर्तिं भक्तं विघ्नाश्चतुर्विधाः । पीडयन्तीति ताञ्ज्ञात्वा जयेद्विद्वानतन्द्रितः ॥१७॥ तत्र चाद्यो लयः प्रोक्तो विक्षेपस्तदनन्तरः । कषायाख्यस्तृतीयश्च रसास्वादश्चतुर्थकः ॥१८॥ चित्तावस्थाविशेषा हि दोषा जेया इमे बुधैः। योगभ्रष्टोऽन्यथा योगी संसृतिं यात्यसंशयम् ॥१९॥ लयात्प्रबोधयेच्चित्तं विक्षेपाच्च निवर्तयेत् । कषायं क्षालयेद्बुद्ध्या विरक्त्या वर्जयेद्रसान् ॥२०॥ न सिद्ध्यत्यन्यथा ध्यानं ध्यानाभावे कुतः स्थितिः । तां विना च कुतो मुक्तिर्ध्याता दोषाञ्जयेत्ततः ॥२१॥ समाधिमष्टमं चाङ्गं योगस्याथ वदामि सः। ध्यानाभ्यासविवृद्धेन प्रेम्णा स्यान्मनसो हरौ ॥२२॥ एकैकावयवस्योक्तं पृथक्यच्चिन्तनं हरेः । तत्तथा न प्रकुर्वीत सर्वां

---

અર્પણ કરેલાં મોતીઓ અને પુષ્પોના હારોની પંક્તિઓથી શોભાયમાન, સુવર્ણાદિ સૂત્રોથી નિર્માણ કરેલું પીળું અને ઉજ્જ્વળ કાંતિવાળું બ્રહ્મસૂત્ર ( યજ્ઞોપવીત) ખભામાં ધારણ કરતાં ક્ષરાક્ષરના નિયન્તા શ્રી વાસુદેવનું ધ્યાન કરતો દઢ મતિવાળો યોગી ચરણકમળાદિ અંગોમાં પૃથક્ પૃથક્ મનને ઘણા સમય સુધી ધારણ કરે. (૯) અથવા તે ભગવાન વાસુદેવના જે અવતારો થયા હોય તેમાંથી કોઈપણ એક અવતારનું અવ્યગ્ર મનથી યોગ સાધક ધ્યાન કરે. (૧૦) અથવા જેવી હોય તેવી ભગવાન વાસુદેવની પ્રતિમાને દરરોજ ધ્યાન કરે અથવા ભગવાનના સંબંધવાળાં વસ્ત્ર, અલંકાર, માલા, આયુધો વગેરે જે વસ્તુ હોય તે વસ્તુનું ધ્યાન કરવા યોગ્ય છે. (૧૧) આ પ્રકારે નિત્યે ધ્યાનનો અભ્યાસ કરનાર યોગીને તત્કાલ ભક્તોને અત્યંત ઈચ્છિત શ્રી વાસુદેવમાં પ્રેમ વૃદ્ધિ પામે છે. (૧૨)

આ દેહમાં યોગીને ધ્યાનનાં સ્થાનો અનેક છે તે ધ્યાનનાં સ્થાનોમાં પૂર્વે કહેલા ધ્યેયના આધારભૂત નાભિ કંદમાં રહેલા કમળમાં વિશેષ છે માટે તે વિશેષ સાંભળો. (૧૩) ધ્યાન કરનાર યોગી જ્યારે નાભિપદ્મમાં રહેલા તેજોમંડલમાં સર્વ દેવોના દેવ ભગવાન વાસુદેવને જુએ છે. (૧૪) તે સમયે નાભિકંદથી નીચે, ઊંચે અને વાંકી નીકળેલી સર્વે નાડીઓ પ્રાણોની સાથે સંકોચ પામે છે. આ યોગી શ્રીવાસુદેવના સ્વરૂપમાં મનનો નિરોધ તત્કાલ જ પામે છે. (૧૫) માટે નિત્ય સાવધાન થઈને ભગવાનના ધ્યાનની તત્કાલ સિદ્ધિ જાણનારા યોગીઓ ધ્યાનની તત્કાલ સિદ્ધિ આપનાર નાભિકમળમાં શ્રીવાસુદેવનું ધ્યાન કરે છે. (૧૬) ચાર પ્રકારનાં વિઘ્નો ભગવાનની મૂર્તિનું ધ્યાન કરનાર ભક્ત યોગીને પીડે છે માટે વિઘ્નોને જાણીને વિદ્વાન યોગી આળસે રહિત થઈને તેનો પરાભવ કરે. (૧૭) ચાર પ્રકારનાં વિઘ્નોમાં પ્રથમ વિઘ્ન લય કહેલો છે; બીજું વિઘ્ન રસાસ્વાદ કહેલો છે. તેમાં નિદ્રાની સન્મુખ થવું તે લય કહ્યો છે. કામોપભોગની સન્મુખ થવું તે વિક્ષેપ કહ્યો છે. તીવ્ર રાગદ્વેષથી દુઃખની ચિંતા સન્મુખ થવું તે કષાય છે. સમાધિમાં જોયેલા નાના પ્રકારના દેવોનાં સ્થાનના સુખના આસ્વાદમાં સન્મુખપણું થવું તે રસાસ્વાદ છે. (૧૮) બુદ્ધિ અવસ્થાના ભેદો જે આ લયાદિ દોષોને, વિદ્વાનોએ જીતવા જ; એમ ના કરે તો યોગી યોગભ્રષ્ટ થઈને સંસારને પામે છે, એમાં સંશય નથી. (૧૯) ચિત્તને લયથી જાગ્રતભાવ યુક્ત કરે, વિક્ષેપથી અર્થાત્ તે તે સંકલ્પથી પાછું વાળે, કષાયને જ્ઞાનાભ્યાસથી નાશ કરે, રસોને વૈરાગ્યના અભ્યાસથી જીતે. (૨૦) કહેલી રીત પ્રમાણે ના કરે તો ધ્યાનની સિદ્ધિ થતી નથી અને ધ્યાનના અભાવમાં સમાધિનું નિશ્ચલપણું ક્યાંથી થાય અને તેવી સ્થિતિ વિના મોક્ષ ક્યાંથી થાય ? માટે ધ્યાન કરનાર યોગી લયાદિ ચાર વિઘ્નોને જીતે. (૨૧)

હવે યોગનું આઠમું અંગ **સમાધિ** કહું છું. તે સમાધિ, ધ્યાનના અભ્યાસથી હરિમાં વૃદ્ધિ પામેલાં મનના પ્રેમથી થાય. (૨૨) હરિના એક એક અવયવ, ચરણકમળ વગેરે એક એક અંગનું જે ભિન્ન ભિન્ન ચિંતન કહ્યું તે, તે પ્રકારે ન કરે, પરંતુ

मूर्तिं विचिन्तयेत् ॥२३॥ नैरन्तर्येण यन्मूर्तेः सर्वस्याश्चिन्तनं हरेः । स समाधिरिति प्रोक्तो योगाङ्गं योगवित्तमैः ॥२४॥ ध्येयाकारमनोवृत्तिप्रवाहः सुचिरं तु यः । स संप्रज्ञातनामाङ्गी समाधिः कथ्यते बुधैः ॥२५॥ ध्यानेऽङ्गे चाङ्गिनि तथा समाधौ सूक्ष्मया दृशा । विशेषस्त्ववगन्तव्यः पक्वापक्वत्त्वभेदतः ॥२६॥ यथा वेदमधीयानोऽधीतवेदश्च पूरुषः । वेदाध्यापक इत्येते क्रमाच्छ्रेष्ठाः प्रकीर्तिताः ॥२७॥ तथाऽत्र ध्यानवाञ्छ्रेष्ठस्त-स्मादङ्गसमाधिमान् । तस्माच्छ्रेष्ठश्च कथितः संप्रज्ञातसमाधिमान् ॥२८॥ अष्टस्वङ्गेषु चैतेषु बहिरङ्गान्तरङ्गता । प्रोक्ता तत्राप्यन्तरङ्गश्रेष्ठत्वं विद्धि सन्मते! ॥२९॥ पूर्वपुण्यौघसंस्कारैरादावेव लभेत यः । अन्तरङ्गं स नो कुर्याद्बहिरङ्गाप्तये श्रमम् ॥३०॥ भक्त एकान्तिको विष्णोः स्नेहस्यातिशयेन यः । तस्मिन्समाधिं प्राप्नोति सिद्धयस्तस्य विघ्नदाः ॥३१॥ अणिमा महिमा प्राप्तिः प्राकाम्यं वशितेशिता। लघिमा कामपूर्तिश्चेत्यष्टौ मुख्या हि सिद्धयः ॥३२॥ शतशोऽन्या अपि तथा सिद्धयः सन्ति मोहिकाः । तासु सक्तो भवेन्नैव योगी माहात्म्यविद्धरेः ॥३३॥ सिद्धिजालसमासक्तं योगिनं काललुब्धकः । प्रमत्तं पक्षिणमिव निहन्त्येव न संशयः ॥३४॥ तस्मान्मनः समाकृष्य सर्वतः परमात्मनि । वासुदेवे समादध्याज्ज्ञानिमुक्तो यतो भवेत् ॥३५॥ अन्यत्र भगवन्मूर्तेः कस्मिंश्चिदपि वस्तुनि । मनो यस्यात्र सक्तं स्यात्तस्य विघ्नो महान्भवेत् ॥३६॥ सक्तस्तुच्छपदार्थेऽत्र यः सोऽलौकिकवस्तुषु । सज्जेत न कथं योगी भगवद्धामवर्त्मनि ॥३७॥ अत्र सम्यग्विरक्तस्य दृढज्ञानवतो मुनेः । कुत्रापि स्थानके नास्ति विघ्नः कश्चन कर्हिचित् ॥३८॥ देवैः प्रलोभ्यमानोऽपि तत्र तत्र च सिद्धिभिः । उद्दालकादिमुनिवद्योगी

---

સંપૂર્ણ મૂર્તિનું ચિંતન કરે. (૨૩) હરિની સમગ્ર મૂર્તિનું જે નિરંતરપણે ચિંતન તે યોગમાં નિપુણ યોગીઓએ યોગના અંગરૂપ **સમાધિ** કહેલી છે. (૨૪) ઘણા કાલ સુધી જે ધ્યેય શ્રીવાસુદેવની મૂર્તિમાં મનની વૃત્તિનું તેલની ધારાની માફક અવિચ્છિન્નપણે રહેવું તે યોગીઓએ **સંપ્રજ્ઞાત** નામની સમાધિ કહેલી છે. (૨૫) ધ્યાનમાં અને અંગસમાધિમાં તથા અંગીસમાધિમાં, (સંપ્રજ્ઞાત સમાધિમાં) પક્વ અને અપક્વના ભેદથી સૂક્ષ્મ દૃષ્ટિએ **વિશેષ** જાણવો. (૨૬) પ્રથમ જેમ-વેદને ભણનારો પુરુષ, અભ્યાસથી વેદને ગ્રહણ કરેલો પુરુષ અને વેદાધ્યાપક પુરુષ આ ત્રણ અનુક્રમે શ્રેષ્ઠ કહેલાં છે; (૨૭) તેવી રીતે આ પ્રકરણમાં ધ્યાનવાળો યમાદિ છ અંગો જાણનારથી શ્રેષ્ઠ છે. (વેદનું અધ્યયન કરનારો પદ પદમાં ભૂલો કરે છે અને ફરીથી સમાધાન કરે છે તેવી રીતે અહીં ધ્યાનવાળો) અને અભ્યાસથી વેદ ભણેલો પુરુષ સાવધાન થઈને ભણે છે તેમાં ભૂલ થતી નથી તેવી રીતે અંગસમાધિવાળો પૂર્વથી શ્રેષ્ઠ છે; અને (વેદનો અધ્યાપક આળસ કરે તો પણ અભ્યાસના દઢપણાથી ક્યારેય ભૂલ કરતો નથી તેમ) સંપ્રજ્ઞાત સમાધિવાળો તેનાથી પણ શ્રેષ્ઠ છે. (૨૮) હે સન્મતે! આ આઠ અંગોમાં બહારનાં અંગો **યમાદિ** પાંચ કહ્યાં છે અને **ધારણાદિ** ત્રણ અંગો અંતરંગ છે તેમાં પણ અંતરંગનું શ્રેષ્ઠપણું છે એમ જાણો. (૨૯) જે પુરુષ સ્વધર્મ, જ્ઞાન, વૈરાગ્ય અને ભક્તિસ્વરૂપ જે પૂર્વજન્મમાં કરેલા સુકૃતના સમુદાયોના સંસ્કારોથી પ્રથમથી જ અંતરંગ સંજ્ઞાવાળા ધારણાદિ ત્રણને પામે તે બહિરંગ જે યમાદિની પ્રાપ્તિ માટે પ્રયત્ન ના કરે. (૩૦) જે વાસુદેવનો એકાન્તિક ભક્ત વિષ્ણુમાં અતિશય સ્નેહથી સમાધિ પામે છે તે ભક્તને સિદ્ધિઓ સમાધિમાં વિઘ્ન કરે છે. (૩૧) અણિમા, મહિમા, પ્રાપ્તિ, પ્રાકામ્ય, વશિતા, ઈશિતા, લઘિમા, કામાવસાયિતા આ **અષ્ટ સિદ્ધિઓ** મુખ્ય માનેલી છે, જ. (૩૨) તથા બીજી પણ યોગીઓને મોહ ઉત્પન્ન કરનારી સોએ સો સિદ્ધિઓ છે. હરિનું માહાત્મ્ય જાણનાર યોગી અણિમાદિ કોઈપણ સિદ્ધિઓમાં આસક્ત થાય નહિ. (૩૩) કાલરૂપ પારધિ અણિમાદિ સિદ્ધિરૂપ જાળમાં પડેલા યોગીને અસાવધાન પક્ષીને પારધી જ જેમ તેમ પોતાની ઈષ્ટ સિદ્ધિથી રહિત કરે છે, એમાં સંશય નથી. (૩૪) માટે સમગ્ર માયિક પદાર્થોથી મનને ખેંચીને પરમાત્મા વાસુદેવમાં સંપ્રજ્ઞાત સમાધિ વડે સ્થિર કરે, સંપ્રજ્ઞાત સમાધિની પ્રાપ્તિથી **જ્ઞાની મુક્ત** થાય. (૩૫) આ લોકમાં ભગવાનની મૂર્તિ વિના કોઈ પણ વસ્તુઓમાં યોગીનું મન આસક્ત થાય તે યોગીને મહાવિઘ્ન થાય. (૩૬) જે યોગી આ લોકમાં ભગવાનની મૂર્તિ વિના જે કાંઈ માયિક પદાર્થમાં આસક્ત થાય તે યોગી ભગવાનના ધામના માર્ગમાં રહેલા દિવ્ય સ્વર્ણરત્ન, મંદિરાદિમાં કેમ આસક્ત ના થાય ? અર્થાત્ થાય જ. (૩૭) આ લોકમાં ભગવાન વિના બીજા પદાર્થોમાં દોષ- દૃષ્ટિથી અત્યંત વૈરાગ્યવાળા, આત્મા - પરમાત્માનું સુદઢ જ્ઞાનવાળા યોગીને કોઈ પણ સ્થાનમાં ક્યારેય પણ કોઈ આસક્તિ થાય નહિ. (૩૮) દેવો અને સિદ્ધિઓએ પ્રલોભાવેલો પણ યોગી ઉદ્દાલકાદિ મુનિની

नासज्जते क्वचित् ॥३९॥ अङ्गी समाधिरेषोऽपि द्वेधा सम्प्रोच्यते बुधैः । सम्प्रज्ञाताख्य एकोऽन्यस्त्वसम्प्रज्ञातसंज्ञकः ॥४०॥ लक्ष्यं तत्र चाद्यस्य प्रोक्तमन्यस्य कीर्तये । चित्तस्य भूमिकास्तस्य प्रसङ्गाच्छृणु पञ्च च ॥४१॥ क्षिप्तं मूढं च विक्षिप्तमेकाग्रं रुद्धमेव च । चित्तं पञ्चविधं तेन तत्संज्ञा भूमिका अपि ॥४२॥ आद्यद्वये तु शङ्कैव समाधेस्तत्र नास्ति हि । सन्देहोऽस्ति च विक्षिप्ते क्वाचित्कध्यानसम्भवात् ॥४३॥ सम्प्रज्ञातसमाधिस्तु चित्तैकाग्र्ये समीरितः। रोधे तु सर्ववृत्तीनामसम्प्रज्ञात उच्यते ॥४४॥ चेतसो विलये ह्यत्र हरावानन्दवारिधौ । मग्नः किञ्चिन्न जानाति बाह्यमाभ्यन्तरं तथा ॥४५॥ व्युत्थानेऽस्य पुनश्चित्तवृत्तीनां सम्भवोऽपि च । निरिन्धनाग्निवद्ब्रह्मञ्छाम्यत्येव शनैः शनैः ॥४६॥ ततो योगी प्रशान्तात्मा ब्रह्मरूपतया स्थितः । अनिर्वाच्यं महानन्दं हृदयेऽनुभवत्यसौ ॥४७॥ यत्किञ्चित्स्वशरीरस्थं स्थूलं सूक्ष्मं च भौतिकम् । यथावत्किल तत्सर्वं समाधौ वीक्षते मुनिः ॥४८॥ ब्रह्माण्डस्थं च यत्किञ्चित्तत्सर्वं स्वहृदम्बरे । स्वातन्त्र्येणेक्षते चासौ तत्तन्नाड्यध्वना व्रजन् ॥४९॥ नाडीचक्राद्यात्मदेहस्थितं यत्सम्यग्योगी वीक्षते भौतिकं च । तत्ते सर्वं तत्त्वतो वच्मि विद्वन्! प्राप्तैरन्तं योगशास्त्रस्य बुद्धम् ॥५०॥ इति श्रीसत्सङ्गिजीवे नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे योगोपदेशे प्रत्याहारधारणाध्यानसमाधिलक्षणनिरूपणनामा षष्टितमोऽध्यायः ॥६०॥

---

માફક અલૌકિક વસ્તુઓમાં ક્યારેય પણ આસક્ત થાય નહિ. (૩૯) આ અંગિસમાધિ પણ વિદ્વાનોએ બે પ્રકારે કહી છે તેમાં એક સંપ્રજ્ઞાત નામની અને બીજી અસંપ્રજ્ઞાત નામની કહી છે. (૪૦) તે બેમાં પ્રથમ સંપ્રજ્ઞાત નામની સમાધિનું લક્ષણ કહ્યું હવે બીજી **અસંપ્રજ્ઞાત સમાધિ**નું લક્ષણ કહું છું. અસંપ્રજ્ઞાતસમાધિના કથનના પ્રસંગથી **ચિત્તની ભૂમિકા** નિરૂપણ કરૂં છું તે સાંભળો. (૪૧)

ક્ષિપ્ત, મૂઢ, વિક્ષિપ્ત, એકાગ્ર અને રુદ્ધ આ પ્રકારે ચિત્ત પાંચ પ્રકારે થાય છે તેનાથી ક્ષિપ્તાદિ નામની પાંચ પ્રકારની ભૂમિકા (નિવાસસ્થાનો) પણ થાય છે. તેમાં આસુરી સંપત્તિ અને લોક-શાસ્ત્ર તથા દેહની વાસનામાં આસક્ત ચિત્તને **ક્ષિપ્ત** કહેવાય છે. નિદ્રા, તંદ્રાદિથી યુક્ત **મૂઢ,** ક્યારેક ધ્યાનયુક્ત, (કિંચિત્ રજતમ યુક્ત સત્ત્વથી) ક્ષિપ્તથી વિશિષ્ટ તે **વિક્ષિપ્ત** છે. એક ધ્યેયાકારમાં સંલગ્ન **એકાગ્ર** કહેવાય છે, ધ્યેયાકારમાં નિમગ્ન તે **રુદ્ધ** છે. (૪૨) તે ચિત્તના પાંચ પ્રકારના ભેદોમાં પ્રથમના બે ક્ષિપ્ત અને મૂઢ તેમાં સમાધિ થાય જ નહિ. સમાધિ થાય કે ના થાય એવી શંકાને સ્થાન નથી અને વિક્ષિપ્ત ચિત્તમાં ક્યારેક ધ્યાનનો સંભવ છે. (૪૩) ચિત્તની એકાગ્રતામાં ચિત્તની ધ્યેયાકારમાં એકાગ્રતા થાય ત્યારે તો **સંપ્રજ્ઞાત સમાધિ** કહેલી છે. સર્વ ચિત્તવૃત્તિઓનું ધ્યેયાકારમાં નિમગ્ન થયે સતે તો **અસંપ્રજ્ઞાત સમાધિ** કહેવાય છે. (૪૪)

આ અસંપ્રજ્ઞાત સમાધિમાં આનંદ સમુદ્ર શ્રીહરિમાં ચિત્તની નિમગ્નતા થયે સતે ચિત્તની સાથે નિમગ્નતા પામેલો યોગી કંઈ પણ પોતાના દેહથી બહાર વર્તતું મમતાના સ્થાનભૂત વસ્તુમાત્રને જાણતો નથી તથા આભ્યન્તર અહંતાના સ્થાનભૂત દેહમાં વર્તતું મન, બુદ્ધિ વગેરે કંઈ પણ જાણતો નથી. (૪૫) હે બ્રહ્મન્ ! આ યોગીની ચિત્તવૃત્તિઓનું ફરીથી ભગવત્સ્વરૂપથી જુદા થવામાં જે સંભવ થાય છે તે પણ કાષ્ઠ વિનાના અગ્નિની માફક ધીમે ધીમે શાંત થાય છે જ. (૪૬) પછી પ્રસન્ન મનવાળો આ યોગી બ્રહ્મરૂપથી રહીને હૃદયમાં અનિર્વચનીય મહાઆનંદનો અનુભવ કરે છે. આ **મહામુક્ત**ની સ્થિતિ કહી. (૪૭) પોતાના શરીરમાં રહેલું પંચભૂતના વિકારથી ઉત્પન્ન જે કંઈ સ્થૂલ, સૂક્ષ્મ હોય છે તે સર્વને પણ સંપ્રજ્ઞાત સમાધિમાન યોગી સમાધિમાં યથાર્થપણે જુએ છે. (૪૮) બ્રહ્માંડમાં રહેલું જે કંઈ છે તે સર્વને પણ આ યોગી તે તે નાડીમાર્ગથી ચાલતો સતો પોતાના હૃદયાકાશમાં સ્વતંત્રપણે જુએ છે. (૪૯)

હે વિદ્વન્ ! યોગી પોતાના દેહમાં રહેલું પંચભૂતાત્મક જે નાડીચક્રાદિ સારી રીતે જુએ છે— યોગશાસ્ત્રની સમાધિ પામેલા યોગીઓએ જાણેલું તે સર્વે તમોને તત્ત્વથી કહું છું. (૫૦)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે યોગોપદેશે પ્રત્યાહાર, ધારણા, ધ્યાન, સમાધિલક્ષણનિરૂપણનામા ષષ્ટિતમોઽધ્યાયઃ (૬૦)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच – कोशा वपुषि षट् सन्ति वह्निस्थानतया मताः । वह्निनाऽन्नरसः पक्वो जाठरेण भवत्यसृक् ॥१॥ स्वकोशस्थेन तत्पक्वं वह्निना जायते पलम् । तत्स्वकोशाग्निना पक्वं मेदस्त्वं प्रतिपद्यते ॥२॥ मेदः स्वकोशाग्निपक्वमस्थितां तच्च वह्निना । पक्वं मज्जा भवेत्सोऽपि शुक्रतां याति वह्निना ॥३॥ परिणामो न शुक्रस्य कोश आद्यस्तदात्मनः । रम्भास्तम्भत्वच इव षट्कोशा देहरूपिणः ॥४॥ अस्थ्नां शतत्रयं चास्ति नरदेहेषु षष्टियुक् । दन्तास्तत्र चतुःषष्टिः सस्थाला विंशतिर्नखाः ॥५॥ शलाकाः पाणिपादस्य सङ्ख्याता विंशतिः खलु । अस्थ्नां षष्टिस्त्वङ्गुलीनामेकैकस्यास्त्रिकं त्रिकम् ॥६॥ गुल्फेषु सन्ति चत्वारि पाष्र्योर्द्वे अस्थिनी मते । बाह्वोररत्निमानानि चत्वार्येवं च जङ्घयोः ॥७॥ जानूरुफलकस्कन्धकपोलस्य द्वयं द्वयम् । ताल्वक्षश्रोणिफलके द्वे द्वे चैकं तु मेहने ॥८॥ हनावेकं पञ्चदश ग्रीवायां जत्रुणोर्द्वयम् । हनुमूले द्वे च पृष्ठे चत्वारिंशच्च पञ्च च ॥९॥ अक्षिगण्डललाटे च द्वे द्वे चैकं नसि स्थितम् । अर्बुदैः स्थालकैः सार्धं पार्श्वास्थीनि द्विसप्ततिः ॥१०॥ चतुष्टयं कपालानां शीर्ष्णश्च द्वे तु शङ्खयोः । हृदि सप्तदशास्थीनि पुंस इत्यस्थिसङ्ग्रहः ॥११॥ ओजो नाभिर्गुदं शुक्रं रक्तं शङ्खौ शिरो गलः । प्राणस्यायतनान्यत्र हृदयादीनि सन्ति च ॥१२॥ वातपित्तश्लेष्मवहाश्चत्वारिंशच्छिरा इह । शाखाभेदेन चैताः स्युः शतानि सप्तसङ्ख्यया ॥१३॥ चतुर्विंशतिसङ्ख्याका

## અધ્યાય : ૬૧

### યોગના ઉપદેશમાં, વિદ્વાનોએ સૂક્ષ્મ દૃષ્ટિથી ભૌતિક—દેહની રચના સહિત વિકાર જાણવા યોગ્ય છે તે નિરૂપણ કરેલા છે.

શ્રી નારાયણ મુનિ બોલ્યા : હે મુને ! અગ્નિના આધારભાવથી માનેલા શરીરમાં છ કોશો છે. જઠરાગ્નિથી પકવ થયેલો અન્નરસ રુધિર થાય છે. (૧) પોતાના કોશમાં અગ્નિથી પકવ થયેલું લોહી માંસ થાય છે. માંસના કોશમાં રહેલા અગ્નિથી પકવ થયેલું માંસ મેદભાવને પામે છે. (૨) મેદ—પોતાના કોશમાં રહેલી અગ્નિથી પકવ થયેલો મેદ અસ્થિપણાને પામે છે. અસ્થિના કોશમાં રહેલા અગ્નિથી પકવ થયેલું અસ્થિ મજ્જા થાય, મજ્જાના કોશમાં રહેલા અગ્નિથી પકવ થયેલી મજ્જા પણ વીર્યપણાને પામે છે. (૩) વીર્યનો પરિણામ નથી તે વીર્ય જીવનો પ્રથમ કોશ છે. કેળના સ્તંભની ત્વચાની માફક દેહ સ્વરૂપવાળા છ કોશો છે; આ અત્યંત આયુર્વેદમાં પ્રસિદ્ધ છે. (૪) મનુષ્યના દેહમાં ત્રણસો ને સાઠ અસ્થિ (હાડકાં) છે તેમાં દાંતોના મૂલ પ્રદેશમાં રહેલાં હાડકાં (દાંતોને બેસવાનાં સ્થાન) બત્રીસે સહિત ચોસઠ સંખ્યાવાળા દાંતો છે, વીશ નખો છે. (૫) બે હાથ અને બે પગની શલાકાઓ=સળીઓના આકારના અસ્થિ વીશ છે. એક એક આંગળીના ત્રણ ત્રણ અસ્થિ છે. આ પ્રકારે વીશ આંગળીઓનાં અસ્થિની સાઠ સંખ્યા થઈ. (૬) ચાર ઘૂંટીઓમાં ચાર ચાર અસ્થિ છે. પગના પશ્ચિમ બન્ને ભાગમાં બે અસ્થિ માનેલાં છે બંને ભુજાઓમાં અરત્નિમાપના ચાર અસ્થિ છે. (વિસ્તારે યુક્ત કનિષ્ઠિકા આંગળીવાળા મુષ્ટિથી ઉપલક્ષિત (માપેલા) હસ્તને અરત્નિ કહે છે) જંઘામાં ચાર અસ્થિ છે. જાનુ (જંઘા અને સાથળનો સંધિ), સાથળ, ખભા અને કપોળમાં બે બે અસ્થિ છે. તાળુઅક્ષ (કર્ણ અને નેત્રની વચમાં શંખથી અધોભાગ) અને કેડ્યમાં બે બે અસ્થિ છે, શિશ્નમાં એક અસ્થિ છે, હનુમાં (કપોળનો નીચેનો ભાગ જડબું) એક અસ્થિ છે, ડોકમાં પંદર અસ્થિ છે, દાઢીના મૂળમાં બે અસ્થિ છે, જત્રુ (વક્ષઃસ્થલ અને ખભાનો સંધિ)માં બે અસ્થિ છે, હનુના મૂળમાં બે અસ્થિ છે, પશ્ચિમ ભાગમાં-બરડામાં ૪૫ પીસતાલીશ અસ્થિઓ છે. (૭-૮-૯) બંને નેત્ર અને ગંડ સ્થળ (કપોળ અને અક્ષનો મધ્ય પ્રદેશ) અને લલાટમાં બે બે અસ્થિ રહ્યાં છે. નાસિકામાં એક અસ્થિ રહ્યું છે. અર્બુદ (અવાંતર અસ્થિઓ) અને સ્થાળક (પડખામાં રહેલાં અસ્થિઓનાં આધારભૂત અસ્થિઓ) સાથે પાર્શ્વ (બાહુના મૂળના નીચેના ભાગમાં બે પડખાં)નાં અસ્થિઓ ૭૨ બોંતેર છે. (૧૦) મસ્તક-કપાળનાં ચાર અસ્થિઓ છે. શંખ જે ભ્રકુટિ અને કર્ણનો મધ્ય ભાગ, તેમાં બે અસ્થિઓ છે. છાતીના ભાગમાં સત્તર અસ્થિઓ છે : આ પ્રકારે પુરુષનાં અસ્થિઓની ગોઠવણીનો ક્રમ છે. (૧૧)

'हृदि तिष्ठति यच्छुद्धमीषद्रक्तं सपीतकम् । ओजः शरीरे सङ्ख्यातं तन्नाशे नाशमृच्छति ॥' એમ આયુર્વેદમાં કહેલા લક્ષણવાળું ઓજ, નાભિ, ગુદા, શુક્ર, રક્ત, શંખ, શિર, ગળું, હૃદય ઈત્યાદિક આ દેહમાં પ્રાણનાં મુખ્ય સ્થાનો છે. (૧૨) આ દેહમાં વાત, પિત્ત, શ્લેષ્મને વહેનારી પ્રધાન પણે નાડીઓ (નાભિ સાથે બંધાયેલી સકળ કલેવરમાં વ્યાપનારી નાડીવિશેષો) ૪૦ ચાલીશ છે. આ નાડીઓના શાખાભેદો પ્રધાનપણે સાતસો છે. (૧૩) પ્રાણાદિ વાયુઓને વહન કરનારી



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

धमन्यो वायुवाहिकाः । नाभिजास्ताश्च शाखाभिर्द्वे शते सन्ति सङ्ख्यया ॥१४॥ एकोनत्रिंशल्लक्षाणि तथा नव शतानि च । षट्पञ्चाशच्च शाखाभिः शिरा धमनिसंयुताः ॥१५॥ अङ्गप्रत्यङ्गसन्धीनां बन्धकाः स्नायवोऽपि च । शतानि नव सन्तीह पेश्यः पञ्चशतानि च ॥१६॥ श्मश्रूणि केशा उभये त्रीणि लक्षाणि देहिनाम् । सप्तोत्तरं मर्मशतं मुख्यसन्धिशतद्वयम् ॥१७॥ शरीररोम्णां सर्वेषां सूक्ष्मांशाः परमाणुभिः । वायवीयैः संविभक्ताः सन्ति स्वेदायनैः सह ॥१८॥ चतुःपञ्चाशदत्रोक्ताः कोट्यः सप्ताधिका तथा । षष्टिर्लक्षाणि पञ्चाशत्सहस्राण्येव ते मताः ॥१९॥ न स्थूलदृष्ट्या केनापि ज्ञातुं शक्यं कथञ्चन । समाधिस्थैरिदं सर्वं दृश्यते सूक्ष्मदर्शिभिः ॥२०॥ सम्यक्परिणताहारसारस्याञ्जलयो नव । सन्ति देहे दशैवापां विशः सप्तासृजोऽष्ट च ॥२१॥ मूत्रपित्तश्लेष्मणां च चत्वारः पञ्च षट् क्रमात् । मज्जामेदोवसानां चाप्येको द्वौ च त्रयः क्रमात् ॥२२॥ मस्तिष्कस्याञ्जलिश्चार्धस्तावाञ्छ्लेष्मरसस्य च । रेतसोऽर्ध इति प्रोक्ता समधातुवपुःस्थितिः ॥२३॥ देहस्य मध्ये हृदयं स्थानं तु मनसः स्मृतम् । कफस्य हृदयं स्थानं पित्तं नाभ्यां प्रतिष्ठितम् ॥२४॥ पक्वाशयस्त्वधो नाभेरूर्ध्वमामाशयः स्मृतः । मध्ये च जाठरो वह्निस्तयोस्तिष्ठन्ति चासवः ॥२५॥ अण्डाकृतिस्तत्र कन्दश्चतुरङ्गुलसम्मितः । हेतुर्देहस्थितेश्चास्ति नाभिचक्रं तदन्तरे ॥२६॥ जीवो भ्रमति तच्चक्रे पुण्यपापप्रचोदितः। प्राणारूढो यथोर्णायुः स्वकृते तन्तुपञ्जरे ॥२७॥

---

નાભિ થકી ઉત્પન્ન થયેલી નાડીઓ ચોવીશ છે : તેની શાખા નાડીઓ બસો છે. આ નાડીઓએ સહિત શિરાઓ, શાખા-ઉપશાખા-અવાન્તરોપશાખાના ભેદથી તો **ઓગણત્રીશ લાખ, નવસો છપ્પન** (૨૯,૦૦,૯૫૬) છે. (૧૪-૧૫) અંગસંધિઓ અને પ્રત્યંગ સંધિઓના બંધક સ્નાયુઓ પણ શરીરમાં નવસો છે. બે કર, બે ચરણ, મધ્ય ભાગ, મસ્તક, આ છ અંગ કહ્યાં છે અને ઉદર, નાભિ, લલાટ, નાસિકા, ચિબુક, નેત્ર આ છ પ્રત્યંગ કહ્યા છે; સાથળ, પિંડીઓ વગેરે અંગ-પ્રત્યંગ સંધિ સંબંધી સ્થૂળાકાર પેશીઓ પાંચસો છે. (૧૬) દાઢી, મૂછના અને મસ્તકના કેશો મળી ત્રણ લાખ છે. મર્મસ્થળો એકસો સાત છે, અસ્થિઓના મુખ્ય સાંધાઓ બસો છે. (૧૭) સર્વ શરીરના રૂંવાડાંનાં સૂક્ષ્મ ભાગો પરસેવાના ઉત્પન્ન થવાના સ્થાનભૂત વાયુસંબંધી પરમાણુઓએ સહિત જુદા કરીને બતાવેલા છે. (૧૮) આ શરીરમાં, તે શરીરના રુંવાડાંના સૂક્ષ્મ અંશો (૫૪,૬૭,૫૦,૦૦૦) **ચોપન કરોડ, સડસઠ લાખ અને પચાસ હજાર** છે. યોગને જાણનારાઓએ કહેલા મેં માનેલા છે. (૧૯) આ બધું સર્વ કોઈ પણ સ્થૂળ દૃષ્ટિથી જાણવા માટે કોઈ પણ પ્રકારે શક્ય નથી. સૂક્ષ્મદર્શી સમાધિવાળા યોગીઓએ જ આ સર્વ જોઈ શકાય છે. (૨૦) દેહમાં ખાધેલો આહાર જેનો સારી રીતે પરિપાકને પામે છે તેના શરીરમાં ભુક્તાહારનો સારાંશ નવ અંજલિ પરિમિત હોય છે. **'અંજલિ'** શબ્દ કુડવપર્યાય (લગભગ પાશેર પરિમિત) જાણવો. જળ દશ અંજલિ પરિમિત વર્તે છે, વિષ્ટાંશ સાત અંજલિ, રુધિર આઠ અંજલિ, મૂત્રાંશ ચાર અંજલિ, પિત્તાંશ પાંચ અંજલિ, શ્લેષ્માંશ છ અંજલિ, મજ્જાંશ એક અંજલિ, મેદાંશ બે અંજલિ, વસાંશ ત્રણ અંજલિ, મસ્તકમાં રહેનાર સ્નેહ, શ્લેષ્મસાર અને વીર્ય પ્રત્યેક અર્ધ અંજલિ પરિમિત છે. આ પ્રકારે **સમધાતુ શરીરની** આ **સ્થિતિ** કહી છે. વિષમ ધાતુ શરીરનો નિયમ નથી. (૨૧ થી ૨૩) દેહના મધ્ય ભાગમાં વર્તતું હૃદય મનનું સ્થાન કહ્યું છે; કફનું પણ તે જ સ્થાન કહ્યું છે. નાભિ પિત્તનું સ્થાન છે. પક્વાશય તો નાભિની નીચે છે. આમાશય નાભિ થકી ઊંચા ભાગમાં છે તે બન્ને વચ્ચે જઠરાગ્નિ વર્તે છે તેમાં જ પ્રાણ પણ વર્તે છે (૨૪-૨૫) તે નાભિ મધ્યે ચાર આંગળ પરિમિત અંડાકૃતિ કંદ વર્તે છે. આ કંદ દેહાન્ત સ્થિતિનો હેતુ છે. આ કંદના મધ્ય ભાગમાં નાભિચક્ર છે. (૨૬) તેજ ચક્રમાં પુણ્ય-પાપ પરવશ જીવ પ્રાણે વ્યાપ્ત થઈને કરોળિયો, પોતે નિર્માણ કરેલાં તંતુચક્રમાં જ જેમ એમ પરિભ્રમણ કરે છે; (જો કે કરોળિયો પોતાના જ વશવર્તી થઈને સ્વેચ્છાથી કરેલા તંતુજાળમાં વિહાર કરે છે. આ જીવ તો કર્મગતિને આધીન થઈને ઈશ્વરે આપેલા શરીરમાં પરિભ્રમણ કરે છે તો પણ પોતે સ્વકર્મથી અદષ્ટ દ્વારા સર્જાયેલાને પોતાનું માને છે તો પોતાપણાની માનીનતા માત્રથી કરોળિયો-તંતુ દષ્ટાંતની સંગતિ સમજવી. પરવશ એવા આ જીવને સ્વદષ્ટિથી ભોગ્યતાબુદ્ધિ વર્તતી હોવાથી પરિભ્રમણ જ વિહરણ જ છે એમ તેની સંગતિ છે. સાંખ્ય અને વેદાંતના મતમાં જીવની હૃદયમાં સ્થિતિ છે અને યોગ અને આયુર્વેદના મતમાં નાભિ-ચક્રમાં જીવની સ્થિતિ કહેલી છે. ભિન્ન મતથી બે પ્રકારે કહેલું છે માટે વિરોધ નથી.) (૨૭) હે મુને ! નાભિમાં રહેલા કંદના પડખાના પ્રદેશમાં ચોતરફ આઠ આવર્ત સહિત સર્પિણીના આકારવાળી કુંડલિની શક્તિ બ્રહ્મરન્ધ્રનું મુખ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**कन्दपार्श्वेऽस्ति परितः शक्तिः कुण्डलिनी मुने! । ब्रह्मरन्ध्रमुखं रुध्वा सुप्ताऽष्टवलयोरगी ॥२८॥ द्वासप्ततिः सहस्राणि नाड्यः कन्दसमुद्भवाः । प्रसृताः सर्वतस्तासां सन्ति मुख्याश्चतुर्दश ॥२९॥ सुषुम्णा पिङ्गलेडा च वारुणा च सरस्वती । यशस्विनी हस्तिजिह्वा पूषा विश्वोदरा कुहूः ॥३०॥ अलम्बुषा च गान्धारी शङ्खिनी च पयस्विनी । नाड्यस्तिस्रः सन्ति मुख्या एतास्वप्यादिमा मुने! ॥३१॥ कन्दमध्योद्भवा तत्र सुषुम्णोर्ध्वगतिप्रदा । मूर्ध्नि च ब्रह्मरन्ध्रे सा स्थिताऽतः सर्वतोऽधिका ॥३२॥ पिङ्गला चोर्ध्वगा याम्ये नासान्तं प्राप्य संस्थिता। इडापि सव्यनासान्तं सव्यभागेऽस्ति संस्थिता ॥३३॥ अधश्चोर्ध्वं च विज्ञेया वारुणा सर्वगामिनी । सरस्वती तथैवोर्ध्वमाजिह्वायाः प्रतिष्ठिता ॥३४॥ यशस्विनी याम्यभागे पादाङ्गुष्ठान्तमस्ति च । हस्तिजिह्वा तथा सव्यपादाङ्गुष्ठावधि स्थिता ॥३५॥ याम्ये पूषा च नेत्रान्तं पिङ्गलायास्तु पृष्ठतः । विश्वोदराभिधा नाडी तुण्डमध्ये व्यवस्थिता ॥३६॥ पूर्वभागे सुषुम्णाया मेढ्रान्तं च कुहूः स्थिता । अलम्बुषा तथा नाडी तुण्डमध्यादधोमुखी ॥३७॥ गान्धारी सव्यनेत्रान्तमिडायाः पृष्ठतः स्थिता । आसव्यकर्णाच्च मुने! शङ्खिन्यस्त्यूर्ध्वगामिनी ॥३८॥ पयस्विनी तथैवोर्ध्वं याम्ये कर्णावधि स्थिता । एतास्वन्याः समुत्पन्ना नाड्यो ज्ञेयाः सहस्रशः ॥३९॥ इत्यादि स्वशरीरस्थं यत्किञ्चिदिह भौतिकम् । वीक्षते योगदृष्ट्या तद्योगवानेव नापरः ॥४०॥ वासुदेवचरणाब्जकृपायाः पात्रतामुपगतैस्तदुपास्त्या । योगिभिर्न किमपि ह्यनवाप्यं सर्वथेह च परत्र महर्षे! ॥४१॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे योगोपदेशे भौतिकदेहविकारनिरूपणनामैकषष्टितमोऽध्यायः ॥६१॥

---

રોકીને સૂતેલી છે. (૨૮) નાભિ કંદથી ઉત્પન્ન થયેલી **બોંતેર હજાર નાડીઓ** દેહના સર્વે પ્રદેશોમાં પણ પ્રસરેલી છે તે નાડીઓના મધ્યમાં ચૌદ નાડીઓ મુખ્ય છે. આ યોગ અને આયુર્વેદના મતથી કહ્યું છે. (૨૯) સુષુમ્ણા-પિંગલા, ઈડા, વારુણા, સરસ્વતી, યશસ્વિની, હસ્તિજિહ્‌વા, પૂષા, વિશ્વોદરા અને કુહૂ, અલમ્બુષા, ગાંધારી, શંખિની અને પયસ્વિની, હે મુને ! આ ચૌદ નાડીઓમાં પહેલાની ત્રણ સુષુમ્ણા, પિંગલા અને ઈડા આ ત્રણ નાડીઓ મુખ્ય છે. તેઓમાં પણ પ્રથમ **સુષુમ્ણા** મુખ્ય છે. (૩૦-૩૧) ત્રણ નાડીઓમાં સુષુમ્ણા, કંદના મધ્યમાંથી ઉત્પન્ન થયેલી મહરાદિ મોક્ષ પર્યન્ત ઊર્ધ્વગતિ આપનારી છે. તે સુષુમ્ણા મસ્તકમાં બ્રહ્મરન્ધ્રમાં રહેલી માટે સર્વ નાડીઓથી અધિક છે. (એ આગળ કહેશે.) (૩૨) સુષુમ્ણાના દક્ષિણ ભાગમાં પિંગલા ઊર્ધ્વગામી સતી દક્ષિણ નાસિકાના (પુટરૂપ) અન્તને પામીને રહેલી છે. સુષુમ્ણાના વામભાગમાં ઈડા નાડી પણ વામ નાસિકાના અંતને પામીને રહેલી છે. (૩૩) વારુણા નાડી નાભિકંદના નીચેના પ્રદેશમાં સર્વ શરીર વ્યાપતી જાણવી, તે જ પ્રકારે સરસ્વતી નાડી નાભિ કંદના ઊર્ધ્વભાગમાં જિહ્‌વા પર્યન્ત રહેલી છે. (૩૪) નાભિકંદની નીચે દક્ષિણ ભાગમાં યશસ્વિની નાડી દક્ષિણ પગના અંગૂઠા સુધી રહેલી છે તથા હસ્તિ જિહ્‌વા નાડી નાભિ કંદથી ડાબા પગના અંગૂઠા સુધી રહેલી છે. (૩૫) કંદના જમણા ભાગમાં પિંગલા નાડીના પાછળના ભાગમાં પૂષા નાડી જમણા નેત્ર સુધી રહેલી છે. વિશ્વોદરા નાડી મુખના મધ્ય પ્રદેશમાં રહેલી છે. (૩૬) સુષુમ્ણા નાડીના પૂર્વ ભાગમાં નીચેના પ્રદેશમાં કુહૂ નાડી શિશ્ન પર્યન્ત રહેલી છે તથા અલમ્બુષા નાડી મુખના મધ્ય પ્રદેશથી નીચે મુખવાળી રહેલી છે. (૩૭) હે મુને ! ઈડા નાડીના પાછળના પ્રદેશમાં ગાંધારી નાડી ડાબા નેત્ર સુધી રહેલી છે, શંખિની નાડી ડાબા કર્ણ સુધી ઊર્ધ્વ ગમન કરનારી છે. (૩૮) તેવી જ રીતે પયસ્વિની નાડી દક્ષિણ ભાગમાં જમણા કર્ણ સુધી ઊંચે રહેલી છે. બીજી હજારો નાડીઓ સુષુમ્ણાદિ ચૌદ નાડીઓમાં ઉત્પન્ન થયેલી જાણવી. (૩૯) એ આદિક શરીરમાં રહેલું જે કંઈ પંચભૂતજન્ય છે તે સર્વ આ લોકમાં સમાધિયોગમાં રહેલો યોગી યોગદષ્ટિથી જુએ છે તેથી બીજો કોઈ જોઈ શકતો નથી. (૪૦)

હે મહર્ષે ! શ્રી વાસુદેવના ચરણકમળની એકાંતિક ઉપાસનાથી વાસુદેવના ચરણકમળની કૃપાથી યોગ્યતાને પામેલા યોગીઓએ આ દેહે સહિત આ લોક અને પરલોકમાં કંઈ પણ વસ્તુ કોઈ પ્રકારે અપ્રાપ્ય નથી, જ. (૪૧)

*ઈતિ શ્રી સત્સંગિજીવનેનારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે યોગોપદેશે ભૌતિક દેહ વિકાર નિરૂપણનામૈકષષ્ટિતમોઽધ્યાયઃ (૬૧)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच – **कथयाम्यथ सङ्क्षेपाद्ब्रह्माण्डरचनामपि । अधोदलात्क्रमेणैव सर्वामूर्ध्वदलावधि ॥१॥ अधोदलोपरि महद्वर्तते विततं जलम् । तस्योपरि महाकूर्मः शेषस्तस्यास्ति चोपरि ॥२॥ सहस्रशीर्ष्णं एकस्मिन्फणे तस्याखिलोऽपि च । भूगोलोऽस्ति पुटेष्वस्य सप्त लोका भवन्ति हि ॥३॥ पाताललोकः प्रथमे भूपुटेऽस्ति मनोहरः । वसन्ति वासुकिमुखा नागा यत्र फणोज्ज्वलाः ॥४॥ दैत्याश्च दानवाः सन्ति तस्योपरि रसातले । महातले तदुपरि नागाश्च तक्षकादयः ॥५॥ तलातलेऽस्ति तस्योर्ध्वं सगणो मयदानवः । तस्योपर्यस्ति सुतले बलिर्भगवता सह ॥६॥ तस्योपर्यस्ति च शिवो वितले हाटकेश्वरः । तस्योपर्यतले चास्ति सगणो बलदानवः ॥७॥ अष्टमोऽयं हि भूर्लोकस्तन्मध्ये मेरुपर्वतः । तस्योपरि पुरः सन्ति ब्रह्मविष्णुकपर्दिनाम् ॥८॥ इन्द्रादीनां दिक्पतीनां तत्तद्दिक्षु पुरोऽष्ट च । तत्रामरावतीमुख्याः सन्ति हेमाचलेऽनघ! ॥९॥ जम्बूद्वीपस्तमभितो वेष्टितः क्षारसिन्धुना । लक्षितो नवभिः खण्डैर्वर्तते भारतादिभिः ॥१०॥ सङ्कर्षण उपास्योऽस्ति तत्र खण्ड इलावृते । हयग्रीवश्च भद्राश्वे हरिवर्षे नृकेसरी ॥११॥ कामदेवः केतुमाले मत्स्यमूर्तिश्च रम्यके । उपास्यो भगवानस्ति कूर्मरूपो हिरण्मये ॥१२॥ वराहः कुरुखण्डेऽस्ति रामः किंपुरुषे तथा । नरनारायण ऋषिरुपास्योऽस्मिंश्च भारते ॥१३॥ क्षारोदवेष्टितादस्माद्द्वीपादुत्तर उत्तरः । द्विगुणो द्विगुणो ज्ञेयो द्वीपोऽब्धिश्चापि तादृशः ॥१४॥ जम्बूद्वीपात्परः प्लक्षद्वीपोस्तीक्षुरसाब्धिना । वृतस्तत्र हरिर्लोकैः सूर्यमूर्तिरुपास्यते ॥१५॥ ततश्च शाल्मलिद्वीपः सुरोदेनाब्धिना वृतः ।**

---

## અધ્યાય : ૬૨

### યોગના ઉપદેશમાં, બ્રહ્માંડની રચનાનું સંક્ષેપથી અનુક્રમે નિરૂપણ કર્યું છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે મુને ! હવે પછી નીચેનું દળ જે આવરણભૂમિનું નીચેનું દળ તેને આરંભીને ઊર્ધ્વદળ પર્યંત ક્રમથી જ બ્રહ્માંડની રચના, સર્વ રચના સ્થિતિને હું સંક્ષેપમાં કહું છું. (૧) અધોદળની ઉપર ચોતરફ વિસ્તારે સહિત મહાજળ (ગર્ભોદક સંજ્ઞાવાળું) વર્તે છે તે જળની ઉપર ઊર્ધ્વગતિનો પ્રતિરોધક મહાકૂર્મ વર્તે છે; તે કૂર્મની ઉપર શેષ છે તે હજાર ફણાથી અલંકૃત શેષના એક મધ્ય ફણા ઉપર સમગ્ર પણ આ ભૂગોળ (ગોળીની અંદર વર્તતી છાશના મધ્યમાં તરતા માખણના પિંડની માફક) પ્રતિષ્ઠિત રહેલું છે. આ ભૂગોળના અંતઃપુટોમાં (ઉપર વર્તતાં અન્તઃછિદ્રોમાં) સાત લોકો છે. (૨-૩) હવે **પુટ સહિત તે લોકોને** કહે છે- તે આ ભૂગોળના પ્રથમપુટમાં અતિમનોહર પાતાળલોકમાં રત્નો વડે ઉજ્જ્વળ ફણાવાળા વાસુકી વગેરે નાગો વસે છે; તે પાતાળની ઉપર રસાતળ છે, તેમાં દૈત્યો તથા દાનવો વસે છે. તે રસાતળની ઉપર ભૂપુટમાં મહાતળ છે, તેમાં તક્ષકાદિ નાગો વસે છે. (૪-૫) તે મહાતળની ઉપર તળાતળ છે, તેમાં મયનામે દાનવેન્દ્ર સગણ વર્તે છે. તે તળાતળ ઉપર સુતળ છે, તેમાં બલિ વર્તે છે; તે જ બલિના ભવનમાં તેની ઉપર અનુગ્રહ માટે ભગવાન વિરાજે છે. (૬) તે સુતળની ઉપર વિતળ છે, તેમાં હાટકેશ્વર ભગવાન શિવ વર્તે છે. તે વિતળની ઉપર અતળ છે, તેમાં બળ દાનવ સગણ વર્તે છે. (૭) તે થકી આઠમો ભૂલોક છે, તેના મધ્યપ્રદેશમાં મેરુ નામે મહાપર્વત છે, તે મેરુની ઉપર ત્રણ નગરીઓ છે તે અનુક્રમે બ્રહ્મા વિષ્ણુ અને શિવથી અધિષ્ઠિત છે. (૮) હે મુને ! એ જ મેરુ વિષે પૂર્વાદિ દિશાઓમાં ક્રમથી આઠ અમરાવતી વગેરે નગરીઓ ઇન્દ્રાદિ દિગ્પાળોની વર્તે છે. (૯) તે મેરુની ચોતરફ જંબુદ્વીપ ક્ષાર સાગરથી વીંટાયેલો ભારતાદિ નવ ખંડોએ યુક્ત વર્તે છે. (૧૦) **ઉપાસ્ય દેવતાઓએ સહિત તે ખંડોને નામથી કહે છે.** તે નવ ખંડો મધ્યે ઇલાવૃત્ત નામના ખંડમાં સંકર્ષણ ઉપાસ્ય દેવ વર્તે છે. ભદ્રાશ્વખંડમાં હયગ્રીવ ઉપાસ્ય વર્તે છે. હરિવર્ષ ખંડમાં નૃસિંહજી ઉપાસ્ય વર્તે છે, કેતુમાળ ખંડમાં કામરૂપ ભગવાન ઉપાસ્ય છે. રમ્યકખંડમાં મત્સ્યમૂર્તિ ભગવાન ઉપાસ્ય છે. હિરણ્મયખંડમાં કૂર્મરૂપ ભગવાન ઉપાસ્ય છે. કુરુખંડમાં વરાહ ભગવાન ઉપાસ્ય વર્તે છે. કિંપુરુષખંડમાં રામચંદ્ર ભગવાન ઉપાસ્ય છે. આ ભારતખંડમાં નરનારાયણ ઋષિ ઉપાસ્ય વર્તે છે. (૧૧ થી ૧૩) ખારા સમુદ્રથી વીંટાઈ રહેલા આ લાખ યોજન પ્રમાણવાળા જંબુદ્વીપ થકી ઉત્તરોત્તર વર્તતો દ્વીપ પણ બમણા પરિમાણવાળો જાણવો અને તે તે દ્વીપને વીંટાઈ રહેલો સમુદ્ર પણ ઉત્તરોત્તર બમણા માપવાળો જાણવો; (૧૪) તેમાં—જંબુદ્વીપ થકી ઉત્તર પ્લક્ષ નામનો દ્વીપ છે. તે શેરડીરસના સમુદ્રથી વીંટાયેલો છે તેમાં સૂર્યાત્મક હરિને લોકો ઉપાસે છે. (૧૫) તે થકી ઉત્તર શાલ્મલી દ્વીપ વર્તે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

वर्तते चन्द्ररूपश्च तत्रोपास्यो हरिर्जनैः ॥१६॥ ततः परः कुशद्वीपो घृतोदाब्ध्यभिवेष्टितः । अस्ति तत्राग्निरूपश्च हरिर्लोकैरुपास्यते ॥१७॥ क्षीरोदाब्धिवृतश्चास्ति क्रौञ्चद्वीपस्ततः परः । अम्बुरूपस्तत्र लोकैर्वासुदेव उपास्यते ॥१८॥ दधिमण्डोदाब्धिवृतः शाकद्वीपस्ततः परः । वर्तते तत्र च जनैर्वायुर्हरिरुपास्यते ॥१९॥ स्वादूदकाब्ध्यभिवृतः पुष्कराख्यस्ततः परः । द्वीपोऽस्ति तत्र च ब्रह्मा पुष्करस्थ उपास्यते ॥२०॥ ततोऽस्ति काञ्चनी भूमिर्लोकालोकस्ततो नगः । तस्योपरि चतुर्दिक्षु चत्वारः सन्ति दिग्गजाः ॥२१॥ तत्रैव साक्षाद्भगवान्महापुरुष ईश्वरः । आस्ते च लोकरक्षार्थं विष्वक्सेनादिभिर्वृतः ॥२२॥ भूर्लोकादीदृशादूर्ध्वं भुवर्लोकोऽस्ति सन्मते! । भूतप्रेतपिशाचानां तद्विहारनिकेतनम् ॥२३॥ भूमध्यगे च हेमाद्रौ दिक्पालानां पुरोऽभितः । सूर्यो दिव्यरथारूढो भ्रमति ह्यण्डमध्यगः ॥२४॥ उपर्युपरि सन्त्येनं मण्डलानि क्रमेण च । चन्द्रर्क्षशुक्रसौम्याङ्गारकदेवपुरोधसाम् ॥२५॥ तदूर्ध्वं मण्डलं पङ्गोस्ततः सप्तर्षिमण्डलम् । ततः पुरं ध्रुवपदं वर्तते धाम वैष्णवम् ॥२६॥ तत्समीपप्रदेशेऽस्ति स्वर्गलोकोऽतिशोभनः । तत्रास्तीन्द्रस्त्रिलोकीशः सर्वदेवगणैः सह ॥२७॥ शिशुमाराश्रितं ह्येतत्सूर्याद्यस्ति ध्रुवावधि । ग्रहचक्रं तदुपरि महर्लोकोऽतिशोभनः ॥२८॥ जनलोकस्तदुपरि तपोलोकस्ततः परम् । एते लोकास्त्रयः सन्ति ऋषिमण्डलसंश्रिताः ॥२९॥ तत ऊर्ध्वं सत्यलोको धाम विश्वसृजोऽस्ति तत् । चतुर्दशैते लोकाश्च परितस्तमसावृताः ॥३०॥ अस्ति तस्मात्तु तमसः परं गर्भोदकं मुने! । ततः परं चाष्ट सन्ति पृथ्व्याद्यावरणानि च ॥३१॥ ततोऽस्ति मूलप्रकृतिः परंज्योतिस्ततः परम् । तदेव भगवद्धाम यद्ब्रह्मपुरमुच्यते ॥३२॥ एवंस्थितेऽत्र ब्रह्माण्डे योगविज्ञः समाधिना । तत्तन्नाड्यध्वना गत्वा तत्तत्स्थानं समीक्षते ॥३३॥ सुषुम्णयैव भगवद्धाम

---

છે તે સુરા સાગરથી વીંટાયેલો વર્તે છે. તેમાં ચંદ્રરૂપ હરિનું જનો ઉપાસન કરે છે. (૧૬) તે થકી પર કુશ દ્વીપ છે તે ઘૃતોદ સમુદ્રથી વીંટાયેલો છે તેમાં અગ્નિરૂપ ભગવાનનું ઉપાસન છે. (૧૭) તેથી ઉત્તર ક્રૌંચદ્વીપ છે. તે ક્ષીરસાગરથી વીંટાયેલો વર્તે છે તેમાં જળરૂપ વાસુદેવની લોકો ઉપાસના કરે છે. (૧૮) તેથી પર શાક દ્વીપ છે. તે દધિમંડોદ નામના સમુદ્રથી વીંટાયેલો વર્તે છે તેમાં લોકો વાયુરૂપ હરિની ઉપાસના કરે છે. (૧૯) તે થકી પર પુષ્કર નામનો દ્વીપ છે તે સ્વાદૂદક (મીઠાજળના) સમુદ્રથી વીંટાયેલો છે, તેમાં કમલ ઉપર રહેલા બ્રહ્માની લોકો ઉપાસના કરે છે. (૨૦) તેથી પર કાંચનભૂમિ છે, તેથી પર **લોકાલોક** પર્વત છે તે પર્વતની ચાર દિશામાં ચાર દિગ્ગજો છે. (૨૧) તે લોકાલોક પર્વતમાં જ સમર્થ સાક્ષાત્ **ભગવાન મહાપુરુષ** વિશ્વક્સેનાદિ પાર્ષદોથી વીંટાઈને આ લોકના સંરક્ષણ માટે રહ્યા છે. (૨૨) હે સન્મતે ! આવા ભૂર્લોક થકી ઊર્ધ્વ ભૂવર્લોક છે. તે લોક ભૂત, પ્રેત, પિશાચ આદિનું વિહરણ સ્થાન છે. (૨૩) બ્રહ્માંડની મધ્યમાં રહેલો સૂર્ય પૃથ્વીની મધ્યમાં રહેલા મેરુમાં વર્તતા ઈન્દ્રાદિ દિગ્પાળોનાં નગરોની ચોતરફ દિવ્ય રથમાં બેસીને ફરે છે. (૨૪) આ સૂર્યના ઉપરના ભાગમાં ચંદ્ર, નક્ષત્ર, શુક્ર, બુદ્ધ, મંગળ અને બૃહસ્પતિનાં મંડળો; ઉપર ઉપર અનુક્રમે વર્તે છે. (૨૫) બૃહસ્પતિના મંડળથી ઊંચે શનિશ્ચરનું મંડલ વર્તે છે, તેથી ઊંચે સપ્તર્ષિનું મંડલ છે, તેથી ઊંચે વૈષ્ણવધામ **ધ્રુવપદ** છે. (૨૬) તે ધ્રુવપદથી નીચે સમીપ દેશમાં અતિ શોભાયમાન **સ્વર્ગલોક** છે તેમાં ત્રણ લોકોનો અધિપતિ ઈન્દ્ર સમસ્ત દેવગણોથી વીંટાયેલો વર્તે છે. (૨૭) સૂર્યમંડલાદિ ધ્રુવપદ સુધી આ સર્વ ગ્રહચક્ર શિશુમાર ચક્રને આશરીને વર્તે છે તે શિશુમાર ચક્રની ઉપર શોભાયમાન મહર્લોક છે. (૨૮) મહર્લોકની ઉપર જનલોક છે, તેની ઉપર તપલોક છે : આ મહર્લોકાદિ ત્રણેય લોકમાં ઋષિમંડળો રહેલાં છે. (૨૯) તે તપોલોકથી ઊંચે સત્યલોક છે, તે લોક વિશ્વનો સર્ગ કરનાર હિરણ્યગર્ભ (વૈરાજ-બ્રહ્મા)નું સ્થાન છે. આ ચૌદેય લોકો ચોતરફ ગાઢ તમથી આવરણવાળા વર્તે છે. (૩૦) હે મુને ! તે આવરણ-તમથી પર ગર્ભોદક છે, ગર્ભોદકથી પર પૃથ્વી, જળ, તેજ, વાયુ, આકાશ, અહંકાર, મહત્તત્ત્વ, પ્રકૃતિ નામનાં ઉત્તરોત્તર આઠ આવરણો એકએક થકી ઉત્તર દશ દશ ગણાં વર્તે છે. (૩૧) તે આવરણ પ્રકૃત્તિતત્ત્વ થકી પણ પર મૂળ પ્રકૃતિ છે, પ્રકૃતિનું નીચે માપ નથી. તે પ્રકૃતિથી ઉપર પરંજ્યોતિ અક્ષર નામનું ભગવાનનું ધામ છે, જેને શ્રુતિ **બ્રહ્મપુર** કહે છે. અને જે મુક્તોએ પ્રાપ્ય છે. (૩૨) આ પ્રકારની રચનાવાળા આ બ્રહ્માંડમાં યોગી યોગના પ્રભાવથી તે તે લોકોમાં ગમનના હેતુભૂત નાડીમાર્ગે કરીને જઈને તે તે કહેલા લોકોને પ્રત્યક્ષ જુએ છે. (૩૩) પ્રકૃતિથી પર જે ભગવાનનું ધામ તેને તો પૂર્વોક્ત સુષુમ્ણા નાડી માર્ગથી જ સમાધિનિષ્ઠ સાક્ષાત્ કરે છે. સમાધિ થકી બહાર આવતાં ફરી આ ભૌતિક



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

यत्प्रकृतेः परम्। तच्च दृष्ट्वा पुनर्देहं भौतिकं प्राप्य बुद्ध्यते ॥३४॥ इत्थं समाधौ स्वातन्त्र्यं प्रेम्णा नारायणे भवेत् । तस्मात्तस्यैव वृद्ध्यर्थं शिक्षेद्योगं गुरोर्बुधः ॥३५॥ भक्तियोगनिपुणस्य सद्गुरोः शिक्षयाऽभ्यसत एव योगिनः । योगमेतमिह सिद्धिरीप्सिता स्याद्द्रुतं ह्यनघ! नेतरस्य तु ॥३६॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे योगोपदेशे ब्रह्माण्डरचनानिरूपणनामा द्विषष्टितमोऽध्यायः ॥६२॥

श्रीनारायणमुनिरुवाच – **समाधिनिष्ठो योगीन्द्रः स्वतन्त्रः स निजेच्छया । देहं धत्ते त्यजति वा कालभीतिविवर्जितः ॥१॥ देहत्यागे योगिनोऽत्र चिरं वा देहधारणे । पञ्चानां महतां ज्ञानं भूतानामस्त्यपेक्षितम् ॥२॥ पिण्डब्रह्माण्डहेतूनां तेषां ज्ञानं विना तु सः । विद्याद्भौतिकपिण्डस्य त्यागात्यागकलां कथम् ॥३॥ तस्मात्कारणरूपाणि महाभूतानि पञ्च च । ज्ञेयानि तेषां कार्याणि ह्यण्डपिण्डस्थितान्यपि ॥४॥** शतानन्द उवाच – **पिण्डब्रह्माण्डहेतूनां भूतानां महतां विभो! । विशेषं बोद्धुमिच्छामि वक्तुमर्हति तं भवान् ॥५॥ समानेष्विह भूतेषु पृथिव्यादिषु पञ्चसु । कार्याणां कारणानां च भेदो ज्ञायेत वा कथम् ॥६॥** श्रीनारायणमुनिरुवाच – **कार्याणां कारणानां च ह्याधेयाधारभावतः । अल्पत्वेन महत्त्वेन तेषां भेदोऽवगम्यताम् ॥७॥ कारणेषु तु भूतेषु कार्यरूपाण्डगोलकाः । संस्थिताः सन्ति हि यथा भुवि भौमा घटादयः ॥८॥ आधारभूतान्यण्डानां महाभूताभिधानि च । सन्ति तानि तरङ्गाणां यथाम्बुनिधयस्तथा ॥९॥ पुंप्रकृत्याश्रितान्येव पञ्च ज्ञेयानि तानि तु ।**

---

શરીરને જાગ્રત અવસ્થાથી પામીને ‘આ હું અમુક અહીં છું.’ એમ પ્રબુદ્ધ થાય છે. (૩૪) આ પ્રકારનું સમાધિમાં જે સ્વતંત્રપણું; તે તે સ્થાનના જોવારૂપ, તે ભગવાન વાસુદેવમાં પરા પ્રીતિથી જ થાય; તો તે પ્રીતિની વૃદ્ધિ માટે જ ગુરુથકી વિદ્વાન્ માણસ ભક્તિગર્ભિત યોગનો અભ્યાસ કરે. (૩૫)

હે નિર્દોષ મુને ! ભક્તિયોગમાં જે નિપુણ હોય તે સદ્‌ગુરુની શિક્ષાથી આ યોગનો અભ્યાસ કરનારા યોગીને જ ઈપ્સિત યોગસિદ્ધિ તત્કાલ થાય; બીજા પ્રકારે અન્ય યોગીને ના જ થાય. (૩૬)

*ઈતિ શ્રીસત્સંગિજીવને ધર્મશાસ્ત્રે પંચમ પ્રકરણે યોગોપદેશે બ્રહ્માંડરચના નિરૂપણનામા દ્વિષષ્ટિતમોઽધ્યાયઃ (૬૨)*

## અધ્યાય : ૬૩

### યોગોપદેશમાં, બાહ્ય અને અંતરના પાંચ ભૂતોનું સ્વરૂપ સ્ફુટપણે નિરૂપણ કર્યું છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે મુને ! સમાધિનિષ્ઠ સ્વતંત્ર પૂર્વે કહેલો યોગીન્દ્ર કાલના ભયથી રહિત થઈને પોતાની ઈચ્છાથી દેહને ધારણ કરે છે અથવા ત્યાગ કરે છે. (૧) યોગીને દેહત્યાગમાં અથવા આ લોકમાં ઘણા કાલ સુધી દેહ ધારણ કરવામાં પંચમહાભૂતોના જ્ઞાનની અપેક્ષા છે. (૨) પિંડ અને બ્રહ્માંડના કારણભૂત પંચમહાભૂતોના જ્ઞાન વિના યોગી ભૌતિક પિંડનો ત્યાગ કરવાની અથવા ધારણ કરવાની યુક્તિને કયા પ્રકારે જાણે ? ન જ જાણે. (૩) માટે કારણભૂત પાંચ મહાભૂતો જાણવા યોગ્ય છે, કારણરૂપ મહાભૂતોના કાર્યરૂપ પિંડ-બ્રહ્માંડમાં રહેલા પંચભૂતો છે તે પણ જાણવા યોગ્ય છે. (૪) **શતાનંદ મુનિ બોલ્યા :** હે વિભો ! પિંડ-બ્રહ્માડના કારણભૂત મહાભૂતોનો વિશેષભેદ કહેવા માટે યોગ્ય છો. (૫) આ લોકમાં વર્તતા કાર્યરૂપ અને કારણરૂપ પૃથ્વી વગેરે પાંચ ભૂતો સમાનપણે દેખાય છે, તો કાર્ય-કારણ ભાવને પામેલાં તેમનો ભેદ કેમ જાણવો ?(૬)

શતાનંદ મુનિએ પૂછેલા **શ્રીહરિ કહે છે :** હે મુને ! કાર્ય અને કારણરૂપ મહાભૂતોનો આધેય અને આધાર ભાવથી અલ્પત્વ અને મહત્ત્વપણાથી ભેદ જાણો. (૭) હે મુને ! જેમ પૃથ્વીના પિંડથી ઉત્પન્ન થયેલા ઘટાદિ પૃથ્વીમાં રહેલા છે તેવી રીતે પંચ ભૂતાત્મક બ્રહ્માંડરૂપ ગોલકો કારણરૂપ ભૂતોમાં રહેલા જ છે. (૮) જેમ સમુદ્રો તરંગોના આધારભૂત છે તેવી રીતે મહાભૂતો પંચમહાભૂતાત્મક બ્રહ્માંડોના આધારભૂત છે. (૯) પાંચ મહાભૂતો તો મહામાયા-મહાપુરુષને જ આશ્રિત



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तयोर्योगे यतोऽण्डानि तद्द्वारा सम्भवन्ति वै ॥१०॥ अण्डजद्वन्द्वसंयोगान्मायया परमात्मनः । यथाण्डसम्भवो ह्यत्र दृश्यते भुवि सन्मते ! ॥११॥ पुंप्रकृत्योस्तथा योगाद्भूतद्वाराण्डसम्भवः । परस्यैवेच्छया ताभ्यां भवत्येव हि नान्यथा ॥१२॥ ब्रह्माण्डमध्ये भूतानि यानि पञ्चात्र तानि तु । जातान्यंशैर्हि महतां भूतानामीश्वरेच्छया ॥१३॥ यथाण्डजाण्डमध्येऽत्र पक्षिदेहसमुद्भवः । कालेन तद्वद्भवति ब्रह्माण्डे भूतसम्भवः ॥१४॥ कारणाख्यान्यतः प्राहुर्महाभूतानि तानि तु । ब्रह्माण्डमध्यभूतानि कार्याख्यानि च तद्विदः ॥१५॥ पिण्डाख्यः स्थूलदेहो यः शुक्रशोणितसम्भवः । स्त्रीपुंसयोगतः सोऽपि पञ्चभूतांशजोऽस्ति हि ॥१६॥
काठिन्यरूप आधारस्तत्र पृथ्वीति गद्यते । देहे द्रवस्तथैवाप उष्मा तेजश्च कथ्यते ॥१७॥ चेष्टा वायुस्तथाकाशमवकाशोऽस्ति सुव्रत! । एवं पञ्चापि भूतानि सन्ति सर्ववपुष्ष्वपि ॥१८॥ तत्राप्यग्निर्जलं वायुरिति त्रीणि विशेषतः । देहे मुख्यतया सन्ति ज्ञातव्यमिति योगिना ॥१९॥ तत्रापि वायुर्मुख्योऽस्ति भवतोऽन्ये तदाश्रिते । वायुस्तदाश्रितोऽस्त्येवमेषामन्योन्य संश्रयः॥२०॥ अग्निः षट्स्वपि कोशेषु धातूनां पक्वतामिह । कुर्वाणो जाठरश्चासौ देहं धारयति ध्रुवम् ॥२१॥ जलं च वीर्यरूपेण कारणं वपुषोऽस्ति हि । वीर्येण वर्तते देहः क्षये वीर्यस्य नश्यति ॥२२॥ प्राणपञ्चकरूपेण चेष्टयंश्चाखिलं वपुः । इन्द्रियाद्यात्मतां प्राप्य वायुर्धारयते वपुः ॥२३॥ नाभिमध्ये स्थिताः सर्वे प्राणा देहेषु देहिनाम् । तत एव प्रसर्पन्ति तिर्यगूर्ध्वमधश्च ते ॥२४॥ सुषुम्णायां मुख्यतया वायुर्वहति सर्वदा । तदाश्रितासु नाडीसु सर्वास्वपि विशत्यतः ॥२५॥ नाभेरूर्ध्वं स्थितः प्राणः शरीरं परिपालयन् । मूर्ध्नि तत्स्थे तथा वह्नौ वर्तते व्याप्य सत्तम ! ॥२६॥ नाभेरधो ह्यपानश्च

---

(તેમણે અધિષ્ઠિત) છે એમ જાણવું, જે માટે મહામાયા અને મહાપુરુષના યોગથી અનેક પ્રધાન પુરુષો ઉત્પન્ન થાય છે, તેમાં એક એક પ્રધાન પુરુષના યોગથી તત્ત્વ સંજ્ઞાવાળા પંચમહાભૂતો ઉત્પન્ન થાય છે. પંચમહાભૂત દ્વારા બ્રહ્માંડો ઉત્પન્ન થાય છે. એવો અહીંયા ક્રમ જાણવો. (૧૦) હે સન્મતે ! આ પૃથ્વીમાં શ્રીવાસુદેવની માયાથી પક્ષીઓના જોડલાના મિથુની ભાવથી ઈંડાની ઉત્પત્તિ જણાય છે, જ. (૧૧) તે પ્રકારે પુરુષ અને પ્રકૃતિથી પર એવા શ્રીવાસુદેવની ઇચ્છાથી જ પુરુષ અને પ્રકૃતિના યોગથી મહાભૂત દ્વારા બ્રહ્માંડની ઉત્પત્તિ થાય છે, બીજા પ્રકારે થતી નથી. (૧૨) આ બ્રહ્માંડમાં જે પંચભૂતો છે તે તો શ્રીવાસુદેવના સંકલ્પથી મહાભૂતોના અંશોથી ઉત્પન્ન થયેલા છે. (૧૩) જેમ આ લોકમાં પક્ષીના ઈંડામાં પક્ષીના દેહની ઉત્પત્તિ શ્રીવાસુદેવની શક્તિરૂપ કાલથી થાય છે તેની માફક બ્રહ્માંડમાં પંચભૂતોની ઉત્પત્તિ કાલાંતરે થાય છે. (૧૪) માટે પંચભૂતોના કાર્ય અને કારણને જાણનાર મુનિઓ બ્રહ્માંડ ગોલાથી બહાર રહેલાં મહાભૂતોને **કારણ** નામથી કહે છે. બ્રહ્માંડના મધ્યમાં રહેલાંને **કાર્ય** નામથી કહે છે. (૧૫) સ્ત્રી-પુરુષના સંયોગથી શુક્રશોણિતથી ઉત્પન્ન થયેલો જે પિંડ નામે સ્થૂળ દેહ છે તે પણ પંચભૂતોના કાર્યરૂપ ઐશ્વર્યથી ઉત્પન્ન થયેલો છે જ. (૧૬) પંચભૂતોની મધ્યે દેહમાં કાઠિન્યરૂપ આધાર અર્થાત્ દ્રવત્વ વગેરે યુક્ત પદાર્થના આધારભૂત છે તે **પૃથ્વી** કહેવાય છે, તથા દ્રવ તે જળ કહેવાય છે. ઉષ્ણતા છે તે તેજ છે. (૧૭) હે સુવ્રત ! તથા ચેષ્ટા વાયુ છે. અવકાશ તે આકાશ છે. આ પ્રકારે પાંચેય ભૂતો સમગ્ર શરીરોમાં પણ છે. (૧૮) તે પંચભૂતોમાં પણ અગ્નિ, જળ, વાયુ આ ત્રણ ભૂતો દેહમાં અધિક ભાવથી મુખ્યપણે છે, એમ યોગીએ જાણવું. (૧૯) અગ્નિ આદિ ત્રણ તત્ત્વમાં પણ વાયુ મુખ્ય છે. જળ અને તેજ તે વાયુને આશ્રિને રહેલાં છે. વાયુ પણ જળ તેજને આશ્રિત છે, આ પ્રકારે એ ત્રણને પરસ્પરનો આશ્રય છે. (૨૦) શરીરમાં આ જઠરાગ્નિ છ કોશોમાં રક્તાદિ ધાતુઓની પકવતાને કરતો સતો દેહને ધારણ કરે છે, જ. (૨૧) અને જળ વીર્યરૂપથી દેહની સ્થિતિમાં કારણ છે. જેથી દેહ વીર્યથી રહેલો છે. વીર્યનો ક્ષય થાય ત્યારે નાશ પામે છે. (૨૨) વાયુ ઇન્દ્રિયાદિના આત્મપણાને પામીને પાંચ પ્રાણ રૂપે સમગ્ર શરીરને ચેષ્ટા કરાવતો સતો શરીરને ધારણ કરે છે. (૨૩) સર્વે પ્રાણો મનુષ્યોના દેહોમાં નાભિ મધ્યે રહેલા છે તે પ્રાણો નાભિ સ્થાનથી જ વાંકી તથા ઊંચે અને નીચે ગતિ કરે છે. (૨૪) વાયુ મુખ્યપણે સુષુમ્ણામાં સર્વદા વહે છે. માટે સુષુમ્ણા થકી સુષુમ્ણાને આશ્રિત સર્વ નાડીઓમાં પણ પ્રવેશ કરે છે. (૨૫) હે સત્તમ ! નાભિથી ઊંચે રહેલો **પ્રાણ,** શરીરને પરિપાલન કરતો સતો મસ્તકમાં તથા મસ્તકમાં રહેલા અગ્નિમાં વ્યાપીને વર્તે છે. (૨૬) નાભિની નીચે **અપાન,**



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**जाठराग्निसमिन्धनः । अपानप्राणयोर्मध्ये जाठरोऽग्निश्च वर्तते ॥२७॥ व्यानः सन्धिषु सर्वेषु वर्तते चेष्टयन्वपुः । बलकर्मप्रयत्नात्मा ह्युदानश्चास्ति कण्ठगः ॥२८॥ यत्किञ्चिदशितं पीतं तत्तन्मार्गं समानयन् । उद्दीपयंश्च कोशाग्निमास्ते नाभौ समानकः ॥२९॥ इत्यग्निजलवायूनां देहे मुख्यत्वमुच्यते । तत्रापि वायोः प्राधान्यं प्रोच्यते योगवेदिभिः ॥३०॥ त्यागे वा धारणे तस्मात्स्वशरीरस्य योगिना । कर्तव्ये सति तु ध्येयो वायुर्बाह्यस्तथान्तरः ॥३१॥ कृते प्राणनिरोधे च जाठरोऽग्निस्तदाश्रितः । स्वयं निरुद्ध्यते तेन तिष्ठेद्योगिवपुश्चिरम्॥३२॥ उपेक्षा धारणे यस्य वपुषो योगिनो भवेत् । जिहासा तु भवेत्तर्हि ध्यात्वा वायुं तदुत्सृजेत् ॥३३॥ वायुस्वरूपं निश्चित्य पिण्डब्रह्माण्डसंस्थितम् । आदौ ततः स योगज्ञः कुर्यात्सुदृढमासनम् ॥३४॥ यल्लोकेच्छा भवेत्स्वस्य तल्लोकप्रापकं हृदि । ध्यात्वा वायुं ततस्तत्स्थं जह्यात्स्वस्य कलेवरम् ॥३५॥ वायुरूपः स कालात्मा योगी सर्वत्र निर्भयः । स्वस्येप्सितं पदं याति वन्द्यमानः सुरादिभिः ॥३६॥ वासुदेवप्रसादेन ततो भागवतीं तनुम् । सम्प्राप्य परमानन्दं जुषमाणः स वर्तते ॥३७॥ सम्प्राप्य धाम परमं परमस्य पुंसः साक्षाद्रमेव चरणाम्बुजमेव तस्य । संसेवमान ऋषिसत्तमचिन्त्यमूर्तेराप्नोति सौख्यमभिवाञ्छितमात्मनोऽसौ ॥३८॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे योगोपदेशे बाह्याभ्यन्तरपञ्चभूतस्वरूपनिरूपणनामा त्रिषष्टितमोऽध्यायः ॥६३॥

---

જઠરાગ્નિને પ્રદીપ્ત કરનારો છે. જઠરાગ્નિ અપાન અને પ્રાણની મધ્યમાં વર્તે છે. (૨૭) **વ્યાન,** શરીરને ચેષ્ટા કરાવતો સતો સર્વ સંધિઓમાં વર્તે છે. **ઉદાન,** કંઠમાં રહેલો સતો ભાર વગેરે ધારણ કરવાની શક્તિ અને ગમનાદિ પ્રયત્નને અનુકૂલ ઉદ્યોગોનો પોષક છે. (૨૮) **સમાન વાયુ,** જે કંઈ ભક્ષણ કરેલું પાન કરેલું તે તે તેનાં સ્થિતિ માર્ગને સમાનપણે પમાડતો અને છ કોશાગ્નિને પ્રદીપન કરતો નાભિમાં રહે છે. (૨૯) આ પ્રકારે દેહમાં અગ્નિ, જળ અને વાયુનું મુખ્યપણું યોગ જાણનારાઓએ કહ્યું છે. તેમાં પણ અગ્નિ, જળ અને વાયુમાં પણ વાયુનું પ્રધાન પણું કહેવાય છે. (૩૦) માટે યોગીએ પોતાના દેહના ત્યાગમાં અથવા ધારણ કરવામાં તો આવહાદિરૂપ બાહ્ય વાયુ-બ્રહ્માંડમાં રહેલો તથા પ્રાણાદિરૂપ દેહમાં રહેલો વાયુ એકપણે ચિન્તન કરવો. (૩૧) પ્રાણનો નિરોધ કર્યે સતે પ્રાણને આશ્રિત જઠરાગ્નિ પોતે નિરોધ પામે છે. પ્રાણાગ્નિના નિરોધથી યોગીનું શરીર ઘણા સમય સુધી રહે. (૩૨) જે યોગીને શરીરના ધારણમાં ભૌતિક દેહ ધારણ કરવાનું શું પ્રયોજન છે ? એ પ્રકારની ઉપેક્ષા હોય તો દેહત્યાગની ઈચ્છા થાય તેથી તે યોગી વાયુનું ધ્યાન કરીને તે શરીરનો ત્યાગ કરે. (૩૩) યોગને જાણનાર યોગી પ્રથમ પિંડ અને બ્રહ્માંડમાં રહેલા વાયુના સ્વરૂપનો નિશ્ચય કરી પછી સુદૃઢ આસન કરે. (૩૪) પોતાને જે લોકની ઈચ્છા હોય તે લોકમાં રહેલા વાયુને પોતાના મનમાં ધ્યાન કરીને પોતાના શરીરનો ત્યાગ કરે. (૩૫) વાયુની સાથે એક આત્મવાળો તથા કાલની સાથે એકાત્મપણાને પામેલો માટે સર્વત્ર નિર્ભય યોગી દેવેન્દ્ર બ્રહ્માદિકોએ સ્તુતિ કરાયેલો સતો પોતાને ઈચ્છિત શ્રી વાસુદેવના **બ્રહ્મપુર** નામના ધામને પામે છે. (૩૬) પછી યોગી વાસુદેવની પ્રસન્નતાથી ભાગવતી તનુને પામીને પરમાનંદને સેવતો થકો વર્તે છે. (૩૭)

હે મુને ! આ યોગી સર્વોત્તમ પુરુષ શ્રી વાસુદેવના સર્વોત્તમ અક્ષર નામના ધામને પામીને અક્ષરધામમાં રહેલાં મુક્ત મુનીન્દ્રોએ સદા ધ્યાન કરવા યોગ્ય મૂર્તિવાળા શ્રી વાસુદેવના ચરણકમળની જ સાક્ષાત્ મૂર્તિમતી લક્ષ્મીની માફક સેવા કરતો સતો પોતાને અભિવાંછિત સર્વોત્તમ સુખને પામે છે. (૩૮)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે યોગોપદેશે બાહ્યાભ્યંતરપંચભૂત સ્વરૂપનિરૂપણનામા ત્રિષષ્ટિતમોડધ્યાયઃ (૬૩)*

शतानन्द उवाच-**वायुस्वरूपं भगवन्पिण्डब्रह्माण्डसंस्थितम् । अञ्जसा ज्ञातुमिच्छामि वक्तुमर्हति तद्भवान् ॥१॥** श्रीनारायणमुनिरुवाच-**सर्वात्मा सर्वगो वायुः सर्वाधारतया स्थितः । पिण्डे सोऽस्ति च ब्रह्माण्डे तद्बहिश्च स वर्तते ॥२॥ ज्ञेयः सप्तविधो वायुः पिण्डब्रह्माण्डयोः पृथक् । तत्र पिण्डे स्थितं वायुं सप्तधा शृणु बुद्धिमन् ! ॥३॥ प्राणोऽपानस्तथा व्यान उदानश्च समानकः । षष्ठ उत्क्रमणो वायुराधाराख्यस्तु सप्तमः ॥४॥ अथावहश्च प्रवह उद्वहः संवहस्तथा । विवहोऽथो परिवहः परावह इति क्रमात् ॥५॥ ब्रह्माण्डसंस्थितो वायुः सप्तधैष प्रकीर्तितः। उभयेषां लक्षणानि कथयामि च तेऽनघ! ॥६॥ तत्रान्तराणां पञ्चानां प्राणादीनां नभस्वताम् । प्रोक्तानि लक्षणान्यत्र षष्ठस्य कथयामि ते ॥७॥ षष्ठ उत्क्रमणो वायुर्मूलाधारे व्यवस्थितः । मृत्युमाश्रित्य सोऽस्त्येव प्राणोत्क्रमणकारकः ॥८॥ आधाराख्यस्तु देहस्य बहिरन्तश्च तिष्ठति । आश्रयः स हि सर्वेषां तत्त्वानामिति कथ्यते ॥९॥ ब्रह्माण्डे प्रथमो वायुर्वृष्टिकाले विहायसि । धूमोष्मजातान्यभ्राणि प्रेरयत्यावहाभिधः॥१०॥ धूमज्योतिर्जलस्नेहान्सम्प्राप्यानुक्रमेण सः । महाद्युतिस्तडिद्रूपो भवतीत्यवधारय ॥११॥ द्वितीयः प्रवहो वायुर्ज्योतिश्चक्रभ्रमाश्रयः । सोमादीनामुदयकृन्मुने! संवाति सर्वतः ॥१२॥ तृतीय उद्वहो वायुः समुद्रेभ्यो जलं स तु । जीमूतेभ्यः समुद्धृत्य ददात्येवाम्बरे द्रुतम् ॥१३॥ चतुर्थः संवहो वायुर्मेघान्सङ्घीकरोति सः । पुनर्भिनत्ति तान्नादो महानुत्पद्यते यतः ॥१४॥ अन्तरिक्षे विमानानां वाहकश्च स कथ्यते । स्ववेगेन गिरीणां च शिखराणां स मर्दनः ॥१५॥ विवहः पञ्चमो वायुर्महावेगोत्कटध्वनिः । दारुणोत्पातरूपश्च स्वर्धुनीं खे दधाति सः ॥१६॥ तेन प्रतिहतो भानुः सहस्रकिरणोऽपि सन् ।**

---

## અધ્યાય : ૬૪

### યોગોપદેશમાં, બાહ્ય અને આભ્યંતર વાયુઓનું સ્વરૂપ અનુક્રમે યથાર્થ નિરૂપણ કર્યું છે.

**શતાનંદમુનિ બોલ્યા** : હે ભગવન્ ! પિંડ અને બ્રહ્માંડમાં રહેલા વાયુનું સ્વરૂપ હું તત્ત્વથી જાણવા ઈચ્છું છું માટે તમો તેવા પ્રકારના વાયુનું સ્વરૂપ કહેવા માટે યોગ્ય છો. (૧) **શ્રી નારાયણમુનિ બોલ્યા** : હે મુને ! સર્વના અંતરમાં રહેલો, સર્વત્ર ગતિ કરનારો (યોગીઓને બ્રહ્માંડમાં રહેલા અને તેથી બહાર રહેલા ધામ માત્રમાં પહોંચાડનારો) સર્વના આધારપણે રહેલો વાયુ પિંડમાં છે અને બ્રહ્માંડમાં છે, તે વાયુ પિંડ અને બ્રહ્માંડની બહાર પણ વર્તે છે. (૨) હે બુદ્ધિમન્! પિંડ અને બ્રહ્માંડમાં જુદા જુદા સાત પ્રકારના વાયુ જાણવા, તેમાં પિંડમાં રહેલા સાત પ્રકારના વાયુને સાંભળો. (૩) પ્રાણ, અપાન, વ્યાન, ઉદાન તથા સમાન છઠ્ઠો વાયુ ઉત્ક્રમણ, સાતમો વાયુ આધાર નામનો છે. (૪) હવે આવહ, પ્રવહ, ઉદ્વહ, સંવહ, વિવહ, તથા પરિવહ અને પરાવહ આ અનુક્રમથી બ્રહ્માંડમાં રહેલો આ વાયુ સાત પ્રકારે કહેલો છે. હે અનઘ ! તે બંને પ્રકારના વાયુઓનાં લક્ષણો તમોને કહું છું. (૫-૬) તેમાં પિંડમાં રહેલાં પ્રાણાદિ પાંચ વાયુઓનાં લક્ષણો આ પ્રકરણમાં પૂર્વેના અધ્યાયમાં કહેલા છે. છઠ્ઠા ઉત્ક્રમણ વાયુનું લક્ષણ તમોને કહું છું. (૭) છઠ્ઠો ઉત્ક્રમણ વાયુ મૂલાધાર ચક્રમાં રહેલો છે. તે ઉત્ક્રમણ વાયુ મૃત્યુને આશ્રિને પ્રાણનું ઉત્ક્રમણ કરાવનારો, શરીરથી પ્રાણને બહાર કાઢનારો છે. (૮) આધાર નામનો સાતમો વાયુ તો દેહની બહાર અને અંદર રહે છે તે આધાર વાયુ દેહમાં રહેલાં પૃથ્વી આદિનો આશ્રય છે. માટે આધાર નામથી કહેવાય છે. (૯) બ્રહ્માંડમાં **આવહ** નામનો પ્રથમ વાયુ વૃષ્ટિ સમયમાં ધૂમ અને ગરમીથી થયેલાં વાદળાંને આકાશમાં વરસાદ માટે ચલાયમાન કરે છે. (૧૦) આવહ નામનો બાહ્ય વાયુ અનુક્રમથી ધૂમ, સૂર્યનું તેજ અને જલ (ઉદ્વહ વાયુ વડે સમુદ્રથી આકાશમાં લઈ જવાયેલું પાણી) ને સ્નેહ અને તેના સંબંધથી ચિકાશપણાને પમાડીને વીજળીરૂપે થઈને મહાપ્રકાશવાન થાય છે. આ પ્રમાણે જાણો. (૧૧) હે મુને ! બીજો **પ્રવહ** નામનો વાયુ, સૂર્ય, ચંદ્ર, તારા વગેરે જ્યોતિચક્રના ભ્રમણમાં કારણભૂત છે, તેજ (વાયુ) ચંદ્રાદિને ઉદય કરનારો પણ છે. (૧૨) **ઉદ્વહ** નામનો ત્રીજો વાયુ સમુદ્રથી જલ ગ્રહણ કરીને આકાશમાં મેઘોને પહોંચાડે છે. (૧૩) ચોથો **સંવહ** વાયુ છે. તે સંવહ વાયુ મેઘોને ભેગા કરે છે. તે મેઘોને ફરીથી વર્ષવા માટે ભેદી નાખે છે. તે ભેદન કરવાથી મહાનાદ ઉત્પન્ન થાય છે. તે સંવહ વાયુ અંતરિક્ષમાં વિમાનોનો વહન કરનારો કહેવાય છે. તે પોતાના વેગથી પર્વતનાં શિખરોને ભાંગનારો કહેવાય છે. (૧૪-૧૫) **વિવહ** પાંચમો વાયુ છે. તે મહાવેગથી અતિ તીક્ષ્ણ ધ્વનિવાળો, વીજળીપાત, ભૂકમ્પાદિમાં કારણભૂત, વિવહવાયુ આકાશમાં આકાશ ગંગાને ધારણ કરે છે. વિવહ વાયુથી તાડન કરાયેલો સૂર્ય સહસ્ત્ર કિરણોવાળો હોવા છતાં પણ એક કિરણની

एकरश्मिरिवाभाति मृदुतेजा विहायसि ॥१७॥ षष्ठः परिवहो वायुः सोमाप्यायनकृन्मतः। ब्रह्माण्डनाशकश्चासौ यममृत्यू यमाश्रितौ ॥१८॥ संसारासक्तबुद्धीनां मृत्युरूपो ह्यसावपि । ध्यानाभ्यासरतानां तु योगिनाममृतप्रदः ॥१९॥ परावहः सप्तमस्तु योगिनामतिवल्लभः । ब्रह्माण्डस्य बहिश्चान्तः संवाति सुखदायकः ॥२०॥ योगिनः स्वेप्सितं स्थानं पुनरावृत्तिवर्जितम्। एष लम्भयते ब्रह्मंस्ततः सर्वाधिको मतः ॥२१॥ एतेषामेव सप्तानां पुराणेषु नभस्वताम् । प्रोक्तः स्थानविशेषश्च क्रमेण तमपि ब्रुवे ॥२२॥ भूर्लोकः प्रथमस्योक्तं द्वितीयस्य भुवस्तथा । सोमलोकस्तृतीयस्य वायोः स्थानमुदीरितम् ॥२३॥ तुर्यस्य लोको नाक्षत्रः पञ्चमस्य ग्रहाभिधः । सप्तर्षिलोकः षष्ठस्य ध्रुवलोकोऽन्तिमस्य च ॥२४॥ एवं बाह्याश्च शारीरा वायवः सप्त सप्त ते । मया सङ्कीर्तितास्ते च ध्येया एकतया मताः ॥२५॥ नाभिध्राणाग्रहृदयं पादाङ्गुष्ठ इति ध्रुवम् । स्थानान्युक्तानि मुनिभिः प्राणोपासनहेतवे ॥२६॥ तत्र त्वेकतमे धिष्ण्ये प्राणं योगी विचिन्तयेत् । नीलवर्णं सप्रणवं मान्तबीजवपुर्धरम्॥२७॥ आवहाख्येन तस्यैक्यं भावयेद्बाह्यवायुना । एवं सर्वत्र मरुतां ज्ञातव्यैक्येन भावना ॥२८॥ पार्ष्णिघाटापृष्ठगुदे स्थानेऽपानं सितेतरम् । सतारनान्तबीजं च ध्यायेत्प्रवहसङ्गतम् ॥२९॥ व्यानं त्वगिन्द्रियस्थाने शक्रचापसमप्रभम् । सताररान्तबीजं वा उद्वहैक्येन भावयेत् ॥३०॥ अरुणं मूर्धहृत्कण्ठताल्वग्राङ्घ्रितलेऽनिलम् । ससंवहमुदानं च ध्यायेत्ताररबीजकम् ॥३१॥ गौरवर्णं समानं च नाभौ वा हृदि सन्धिषु । सतारलान्तबीजं च ध्यायेद्विवहसङ्गतम्

માફક કોમળ તેજવાળો આકાશમાં જણાય છે. (૧૬-૧૭) છઠ્ઠો **પરિવહ** વાયુ છે. આ પરિવહ ચંદ્રની કલાઓનો ક્ષય થયા પછી ફરીથી ચંદ્રને વિષે કલાઓની વૃદ્ધિ કરે છે. આ જ વાયુ પ્રલયકાલમાં બ્રહ્માંડનો નાશ કરનારો માનેલો છે. યમ અને મૃત્યુ પરિવહ વાયુને આશ્રિને રહેલા છે. આ વાયુ જ સંસારમાં આસક્ત બુદ્ધિવાળા મનુષ્યોને મૃત્યુરૂપ છે. શ્રી વાસુદેવના સ્વરૂપના ચિંતનના અભ્યાસમાં આસક્ત યોગીઓને તો મોક્ષ આપનારો છે, જ. (૧૮-૧૯) સાતમો **પરાવહ** વાયુ તો યોગીઓને અતિ સુખદાયક થઈને બ્રહ્માંડની બહાર અને અંદર વાય છે. (૨૦) હે બ્રહ્મન્ ! આ પરાવહ વાયુ યોગીને પોતાને ઈચ્છિત પુનરાવૃત્તિ રહિત અક્ષર નામના ધામને પમાડે છે. માટે સર્વથી અધિક માનેલો છે. (૨૧) આ આવહાદિ સાત વાયુઓનો સ્થાનભેદ પુરાણોમાં કહ્યો છે. તે સ્થાન વિશેષ પણ અનુક્રમે તમોને કહું છું. (૨૨) પ્રથમ આવહ વાયુનું સ્થાન ભૂતલથી આરંભીને મેઘમંડલ સુધી કહ્યું છે. બીજા પ્રવહ વાયુનું સ્થાન પૃથ્વીના મેઘમંડલથી આરંભીને સૂર્યમંડલ સુધી ભૂવર્લોક કહેલો છે. તથા ત્રીજા ઉદ્‌વહ વાયુનું સ્થાન સોમ લોક કહેલો છે.(૨૩) ચોથા સંવહ વાયુનું સ્થાન નક્ષત્ર સંબંધી લોક છે. પાંચમા વિવહ વાયુનું સ્થાન ગ્રહ સંજ્ઞાવાળો લોક છે. છઠ્ઠા પરિવહ વાયુનું સ્થાન ધ્રુવ લોક કહેલો છે. (૨૪) આ પ્રકારે શરીરમાં રહેલા અને બ્રહ્માંડમાં રહેલા સાત-સાત વાયુઓ મેં તમોને કહ્યા તે સાત-સાત વાયુઓ એકાત્મભાવથી ધ્યાન કરવા યોગ્ય માનેલા છે. (૨૫)

નાભિ, નાસિકાનો અગ્રભાગ, હૃદય, અને પગનો અંગૂઠો આ સ્થાનો મુનિઓએ પ્રાણની ઉપાસના માટે કહ્યા છે. (૨૬) તે ચારમાં એક શ્રેષ્ઠ સ્થાનમાં યોગી નીલ વર્ણવાળા પ્રણવે સહિત યકાર બીજને ધારણ કરનારો - યંકારાખ્ય બીજરૂપ મૂર્તિને ધારણ કરનાર પ્રાણનું ચિંતવન કરે. (૨૭) તે પ્રાણને આવહાખ્ય વાયુની સાથે ઐક્યતાની ભાવના કરે : આ પ્રકારે સર્વ બાહ્ય અને આભ્યંતર વાયુઓના એકપણાની ભાવનાથી ઉપાસનાઓમાં બાહ્ય અને આભ્યંતર વાયુઓની ઐક્ય ભાવના જાણવી. (૨૮) અપાનને પેની, ડોકનો વાંસેનો ભાગ અથવા ડોકનો ઊંચો ભાગ, પૃષ્ઠ ભાગ, ગુદા આ ચાર મધ્યે એક સ્થાનમાં રહેવાપણે પ્રણવ સહિત પકાર બીજ રૂપ શરીરપણે કૃષ્ણવર્ણપણે અને પ્રવહ વાયુ સાથે એકાત્મપણે ચિન્તન કરે. (૨૯) વ્યાનને ઉદ્‌વહ વાયુ સાથે એકાત્મપણાને પામેલો પ્રણવસહિત લકાર બીજ અક્ષર શરીર જેનું છે અને વર્ષાઋતુમાં મેઘ વિષે થતા ઈન્દ્રધનુષ્ય જેવી કાંતિવાળા એવાને ત્વગિન્દ્રિય સ્થાનમાં ચિન્તન કરે. (૩૦) મસ્તક, હૃદય, કંઠ, તાલુનો અગ્ર ભાગ અને ચરણનું તળિયું એ સ્થાનોમાંથી એક સ્થાનમાં લાલ વર્ણવાળો ઓંકારે સહિત રંકારાખ્ય બીજરૂપ મૂર્તિ ધરનાર ઉદાન વાયુને સંવહાખ્ય વાયુની સાથે એકી ભાવ પામેલાનું ધ્યાન કરે. (૩૧) નાભિમાં અથવા

**॥३२॥ ध्यायेदुत्क्रमणं षष्ठमिडायां श्वेतरोचिषम् । सतारसान्तबीजं च युक्तं परिवहेन च ॥३३॥ पिङ्गलायामथाधारमतिश्वेतं च सप्तमम्। सतारकाद्यबीजं च ध्यायेत्सहपरावहम् ॥३४॥ ध्यानेषु सप्तस्वेतेषु षट्स्वावृत्तिः पुनर्मता । योगिनः सप्तमे तु स्यान्न पुनर्जन्मसङ्कटम् ॥३५॥ उपासकान्नयन्त्येते स्वस्वलोकान्महौजसः । षड्वायवः सप्तमस्तु भगवद्धाम चेप्सितम् ॥३६॥ एवं वायुस्थितिं ज्ञात्वा स्वस्येच्छा यादृशी भवेत्। उपास्य तादृशं वायुं देहं जह्यात्तदात्मकः ॥३७॥ त्यागात्यागौ हि वपुषः स्वतन्त्रौ विजितात्मनाम् । योगिनां भवतो ब्रह्मन्! भक्तिं विदधतां हरौ ॥३८॥ समाधिनिष्ठां परमामुपेतैः स्वातन्त्र्यमाप्तैः स्ववपुस्त्यजौ च । कर्तव्यमित्थं कथितं मया ते ब्रुवे ततोऽन्यैश्च विधेयमद्य ॥३९॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे योगोपदेशे बाह्याभ्यन्तरवायुस्वरूपनिरूपणनामा चतुःषष्टितमोऽध्यायः ॥६४॥

श्रीनारायणमुनिरुवाच - **चिह्नैर्जाग्रति च स्वप्ने जायमानैस्तु योगिना । एतैः स्वासन्नमृत्युत्वं निश्चेतव्यमिहादितः ॥१॥ देववर्त्म ध्रुवं शुक्रं तथा गुरुमरुन्धतीम् । आसन्नमृत्युः पुरुषश्छायां स्वस्य च नेक्षते ॥२॥ सूर्यमग्निं शशाङ्कं च पश्येन्निस्तेजसं च स । द्वैरूप्यमपि चन्द्रादेर्वीक्षेत ज्योतिषोऽम्बरे ॥३॥ वान्तिमूत्रपुरीषाणि स्वर्णरूप्यनिभानि च । वृक्षानपि स्वर्णवर्णानासन्नमृतिरीक्षते ॥४॥ कर्दमे वालुकादौ वा पदकार्धानि चात्मनः। छायां सच्छिद्रां पश्येच्च**

હૃદયમાં અથવા સર્વ શરીરની સંધિઓમાં ગૌરવર્ણવાળા પ્રણવ સહિત વંકારાખ્ય બીજરૂપ શરીર ધારણ કરનાર સમાનનું વિવહવાયુની સાથે એકભાવને પામેલાનું ધ્યાન કરે. (૩૨) ઈડા નાડીમાં શ્વેતવર્ણ વાળા પ્રણવ સહિત હંકારાખ્ય બીજરૂપ શરીર જેનું છે એવા ઉત્ક્રમણ વાયુને પરિવહવાયુની સાથે એકીભાવ પામેલાનું ધ્યાન કરે. (૩૩) પછી પિંગલા નાડીમાં અત્યન્ત શ્વેતવર્ણવાળા પ્રણવ સહિત અકારનામના બીજરૂપ શરીર ધરનાર સાતમાં આધાર વાયુને પરાવહ વાયુ સાથે એકીભાવને પામેલાનું ધ્યાન કરે. (૩૪) આ સાત ધ્યાનોમાં છ ધ્યાનોમાં યોગીને ફરી આવૃત્તિ માનેલી છે. સાતમા ધ્યાનમાં તો યોગીને ફરીથી જન્મ-સંકટ થાય નહિ. (૩૫) મહાબલવાન આ છ આવહાદિ વાયુઓ પોતાના ઉપાસક યોગીઓને પોતપોતાના લોકોના પ્રત્યે લઈ જાય છે. સાતમો પરાવહ વાયુ તો ભગવાનના એકાંતિક ભક્ત યોગીએ પામવા ઈચ્છેલું ભગવાનનું ધામ બ્રહ્મપુર સંજ્ઞાવાળું જે શ્રી વાસુદેવ પરમાત્માનું **અક્ષરધામ** તે પ્રત્યે લઈ જાય છે. (૩૬) આ પ્રકારે વાયુની સ્થિતિ જાણીને પોતાની જેવી ઈચ્છા હોય તેવા વાયુની ઉપાસના કરીને તે વાયુ આત્મક યોગી દેહને ત્યાગ કરે. (૩૭) હે બ્રહ્મન્ ! હરિમાં એકાંતિકી ઉપાસના કરતાં જીત્યાં છે અંતઃકરણ જેમણે એવા યોગીઓને શરીરનો ત્યાગ અથવા ત્યાગ ન કરવામાં પોતાને સ્વાધીનતા થાય છે, જ. (૩૮)

હે મુને ! આ પ્રમાણે પરમ સમાધિનિષ્ઠાને પામેલા, પોતાના દેહનો ત્યાગ કરવામાં સ્વાધીનપણાને પામેલા યોગીઓએ કરવા યોગ્ય મેં તમોને કહ્યું. હાલમાં સ્વતંત્ર સમાધિવાળા યોગીઓથી બીજા અસ્વતંત્ર સમાધિવાળા યોગીઓએ જે કરવા યોગ્ય છે તે કહું છું. (૩૯)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે પંચમપ્રકરણે યોગોપદેશે બાહ્યાભ્યન્તર વાયુ સ્વરૂપ નિરૂપણનામા ચતુઃષષ્ટિતમોऽધ્યાયઃ (૬૪)*

## અધ્યાય : ૬૫

### શ્રીહરિએ યોગીને વૈરાગ્યની ઉત્પત્તિમાં કારણભૂત સમીપ મૃત્યુના કાળજ્ઞાનનું નિરૂપણ કર્યું છે.

**શ્રીનારાયણ મુનિ બોલ્યા** : હે મુને ! અસ્વતંત્ર સમાધિવાળા યોગીજને આ લોકમાં જાગ્રદવસ્થામાં અને સ્વપ્નાવસ્થામાં ઉત્પન્ન થતાં આ ચિહ્નોથી પોતાના સમીપમાં વર્તતા મૃત્યુભાવને દેહના પડ્યા પહેલાં જ નિર્ણય કરવા યોગ્ય છે. (૧) જેનો મૃત્યુકાળ સમીપમાં આવેલો હોય એવો યોગી પુરુષ દેવમાર્ગ - ધ્રુવ, શુક્ર, ગુરુ, અરૂંધતી (વસિષ્ઠ તારાની સમીપે વર્તતો અરૂંધતીનો સૂક્ષ્મ તારો) અને પોતાની છાયાને જોઈ શકતો નથી જ્યારે આ સર્વને જોઈ શકે નહિ ત્યારે નજીકમાં મૃત્યુ (કાળ) જાણવો. (૨) તથા જેનો મૃત્યુ (મરણકાળ) સમીપમાં આવ્યો છે એવો યોગી સૂર્ય, અગ્નિ, ચંદ્રને નિસ્તેજ જુએ. કદાચિત્ આકાશમાં ચંદ્રાદિ જ્યોતિબિંબને બે રૂપે પણ જુએ ત્યારે મૃત્યુ નજીકમાં આવેલો જાણવો. (૩) સમીપમાં આવેલા મૃત્યુવાળો યોગી કદાચિત્ ઊલટી, મળ, મૂત્રાદિને સુવર્ણ અને ચાંદી સમાન જુએ; આવું દેખાય ત્યારે મૃત્યુનો સમીપ સમય સમજવો. વૃક્ષોને પણ સુવર્ણવર્ણના જુએ છે. (૪) સમીપમાં મૃત્યુવાળો યોગી કાદવમાં અથવા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

प्रतिबिम्बं स चाशिरः ॥५॥ कृशः स्थूलो भवेत्सद्यो देहः स्थूलोऽथवा कृशः । यदा तदपि विज्ञेयमासन्नमृतिलक्षणम् ॥६॥ देहश्चोरणदुर्गन्धो भवेद्यस्य च देहिनः । दहच्छवसगन्धो वा तस्यापि निकटे मृतिः ॥७॥ यस्य च स्नातमात्रस्य हृदयं चरणावपि । शुष्कतां प्राप्नुयातां च स म्रियेताचिरेण वै ॥८॥ यस्याशितं च पीतं च न किञ्चिदपि जीर्यते। करोति न गुणं किञ्चिच्चौषधं सोऽपि तादृशः ॥९॥ स्यात्तालूदरहृद्दाहो नासाश्रवणवक्रता । सर्वाङ्गसन्धिशूलानि भवेयुर्लक्ष्म तन्मृतेः ॥१०॥ भुक्त्वा तृप्तस्यापि भवेद्यस्य सद्यः क्षुदुद्भवः । दीपादिगन्धज्ञानं च न स्यात्सोऽप्यन्तिकान्तकः ॥११॥ योऽन्यनेत्रे न पश्येत्स्वं पिधाय श्रवसी तथा । प्राणघोषं न शृणुयान्मृत्युस्तस्याविदूरतः ॥१२॥ इन्द्रियैर्गृह्यमाणानां विषयाणां पृथक्पृथक् । सदसत्त्वेन विज्ञानं न स्यात्तन्मृत्युलक्षणम् ॥१३॥ नेत्रभ्रमिर्नाभिकाष्र्ण्यं दन्तानां चापि कृष्णता । प्रकृतेश्च विपर्यास आसन्नमृतिलक्षणम् ॥१४॥ पूज्यानामपमानश्च दानीयाद्ग्रहणेषणा । इत्यादीन्यवगम्यानि मृत्युचिह्नानि जाग्रति ॥१५॥ तथा स्वप्ने य आरुह्य ऋक्षवानरवाहनम् । खरं वोष्ट्रं व्रजेद्याम्यां दिशं तस्यान्तिके मृतिः ॥१६॥ गर्ते वा पतितः स्वप्ने तत्र रूद्ध्येत केनचित् । यः स आसन्नमृत्युर्वै प्रेतं यश्च परिष्वजेत् ॥१७॥ निमज्जेद्योऽप्सु वा स्वप्ने प्रविशेद्वा हुताशनम् । विषमद्यात्कर्दमे वा लग्नः स्यात्सोऽन्तिकान्तकः ॥१८॥ तैलाभ्यक्तः ककुब्वासा जपाकुसुममाल्यधृत् । दक्षिणां यो दिशं गच्छेत्स्वप्ने तस्यान्तिके मृतिः ॥१९॥ इत्यादीनि च चिह्नानि सन्ति स्वाप्नानि सन्मते! । तैरपि स्वान्तिके मृत्युं प्राप्तं विद्यात्स योगकृत् ॥२०॥ चिह्नमासन्नमृत्योस्तु स्वस्य यस्मिन्दिने भवेत् । तत आरभ्य मतिमान्सावधानो द्रुतं

રેતીમાં પોતાનાં અર્ધાં પગલાં જુએ અને છાયાને અંદર-છિદ્રોએ સહિત જુએ. તળાવના જળ વગેરેમાં પડેલું પોતાનું પ્રતિબિંબ મસ્તકે રહિત જુએ. (૫) જ્યારે કૃશ શરીર હોય તે તત્કાલ જ પુષ્ટ થાય અથવા સ્થૂલ દેહ તત્કાલ કૃશ થાય તે પણ સમીપમાં આવેલ મૃત્યુનું ચિહ્ન જાણવું. (૬) જે યોગીનો દેહ ઘેટાની જેમ ખરાબ દુર્ગન્ધિવાળો થાય અથવા બળતા શબની સમાન ગંધવાળો થાય તે દેહીનું પણ મૃત્યુ સમીપમાં જાણવું. (૭) તત્કાલ સ્નાન કરાયેલા યોગીનું હૃદય શુષ્કપણાને પામે અને બન્ને ચરણો પણ શુષ્કપણાને પામે તે યોગી અલ્પ સમયમાં મરણ પામે જ. (૮) જે યોગીને ભોજન કરાયેલું અને પાન કરાયેલું લગારેય પણ ઉદરમાં પચે નહિ અને ખાધેલું ઔષધ લગારેય પણ રોગવિનાશ ના કરે તે બે પ્રકારે પણ સમીપમાં આવેલા મૃત્યુનો સમય જાણવો. (૯) તાલુ, ઉદર અને હૃદયમાં દાહ થાય અને નાસિકા અને બંને શ્રવણનું વાંકાપણું થાય, સર્વે અંગોનાં સાંધાઓમાં શૂલ(વ્યથા) થાય તે સર્વે સમીપમાં મૃત્યુનાં લક્ષણો છે. (૧૦) જમીને તૃપ્ત થયેલા યોગીને પણ તત્કાલ જ ભૂખનો પ્રાદુર્ભાવ થાય અને દીવા વગેરેના ગંધનું જ્ઞાન ના થાય : આ બે પ્રકારે પણ સમીપમાં આવેલું મૃત્યુ જાણવું. (૧૧) જે બીજાના નેત્રમાં કૃષ્ણ વર્ણવાળી સૂક્ષ્મ કીકીમાં પોતાનું મુખ ન જુએ તથા બન્ને કર્ણો બીડીને પ્રાણઘોષ ન સંભળાય તેનું મૃત્યુ સમીપમાં જ જાણવું. (૧૨) ઇન્દ્રિયોએ ગ્રહણ થતા વિષયોનું સારા નરસાપણે ભિન્ન ભિન્ન જ્ઞાન થાય નહિ તે સમીપમાં આવેલાં મૃત્યુનું ચિહ્ન છે. (૧૩) નેત્રનું ભ્રમણ થાય (ચકળવકળ થાય) નાભિ પ્રદેશમાં કાળાશ આવી જાય, દાંત કાળા પડી જાય અને સ્વભાવનું એકદમ વિપરીતપણું થઈ જાય આ સર્વ સમીપમાં આવેલાં મરણનાં લક્ષણો છે. (૧૪) જ્યારે મોટાઓના અપમાનમાં પ્રવૃત્તિ થાય, દાનપાત્ર થકી દ્રવ્ય લેવામાં પ્રવૃત્તિ થાય એનો મૃત્યુ નજીકમાં આવ્યો છે એમ જાણવું.એ આદિક જાગ્રત દશામાં ઉત્પન્ન થતાં સમીપમાં આવેલા મૃત્યુનાં ચિહ્નો યોગીએ જાણવાં. (૧૫) **હવે સ્વપ્રમાં ચિહ્નો કહે છે :** તથા સ્વપ્રમાં જે ગધેડા, ઊંટ, વાનર, રીંછ વગેરે વાહનમાં બેસીને દક્ષિણ દિશા તરફ જતો પોતાને જુએ તેનો મૃત્યુ પાસે જાણવો. (૧૬) જે સ્વપ્રમાં પોતાને ખાડામાં પડેલો જુએ અથવા બીજા કોઈએ રોકેલો જુએ તેને સમીપમાં મૃત્યુ આવેલું જાણવું અને સ્વપ્રમાં મરેલાને આલિંગન કરે તેને સમીપમાં મૃત્યુ આવેલું જાણવું. (૧૭) જે સ્વપ્રમાં જળમાં બૂડે, અથવા અગ્નિમાં પ્રવેશ કરે અથવા ઝેર ખાય અથવા કાદવમાં ચોંટી જાય આ સર્વેને પણ સમીપમાં મૃત્યુ આવેલું જાણવું. (૧૮) જે યોગી સ્વપ્રમાં શરીરે તેલ ચોળેલું હોય અને દિગમ્બર, જપાકુસુમની માળાને ધારણ કરતો સતો દક્ષિણ દિશા તરફ જાય તેનું સમીપમાં મૃત્યુ જાણવું. (૧૯) હે સન્મતે ! એ આદિક સ્વપ્ર સંબંધી ચિહ્નો છે તેનાથી પણ યોગી પોતાના સમીપમાં પ્રાપ્ત થયેલા મૃત્યુને જાણે. (૨૦) પોતાને જે દિવસે સમીપમાં મૃત્યુનું ચિહ્ન જણાયેલું થાય

भवेत् ॥२१॥ वपुर्जगच्च सकलमसदेवेति निश्चयात् । विरक्तस्तत्र नवधा भक्तौ स्यान्निरतो हरेः ॥२२॥ भक्तः स निर्भयो योगी कालेन वपुषो मृतौ । स्वतन्त्रयोगिवद्धाम प्राप्नोति परमं हरेः ॥२३॥ इत्थं योगस्य महिमा वर्तते मुनिसत्तम! । तस्माच्छ्रेयोर्थिभिः पुम्भिः साधनीयोऽयमादरात् ॥२४॥ प्रागपीह बहवो महर्षयो भूमिपाश्च शतशोऽपि योगतः। लेभिरे स्वमनसोऽभिवाञ्छितं साध्य इत्ययमुदारबुद्धिभिः ॥२५॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे योगोपदेशे कालज्ञाननिरूपणनामा पञ्चषष्टितमोऽध्यायः ॥६५॥

श्री नारायणमुनिरुवाच - योगोऽयं सिद्धिमायाति देशाद्यैः सेवितैः शुभैः । न सिद्ध्यत्यशुभैरेतैर्नाशहेतुश्च जायते ॥१॥ देशः काल : किया ध्यानं शास्त्रं दीक्षा तथा मनुः । सङ्गश्च यादृशा ह्येते तादृक्तत्सेविनां फलम् ॥२॥ शुभैरेतैः सेवितैस्तु शुभा बुद्धिर्भवेन्नृणाम् । अशुभैस्तैर्भवेद्बुद्धिरशुभा नात्र संशयः ॥३॥ असतो देशकालादीन् न सेवेत ततः सुधीः। विहाय ताञ्छुभानेव हितार्थी शीघ्रमाश्रयेत् ॥४॥ योगशास्त्ररहस्यं हि साङ्गोपाङ्गमशेषतः । तुभ्यं बुभुत्सवे प्रोक्तमिति योगज्ञसम्मतम्॥५॥ एतत्तु परमं गुह्यं योग्यत्वात्तव धीमतः । मया निगदितं सम्यग्यथा पृष्टं त्वया तथा ॥६॥ निर्मथ्य सर्वशास्त्रार्थांस्तत्सारोऽयं समुद्धृतः । मया सङ्कथितस्तुभ्यं सर्वलोकहितावहः ॥७॥ यो योगशास्त्रमेतत्तु शृणुयात्कीर्तयेच्च

---

ત્યારથી આરંભીને બુદ્ધિમાન યોગી તત્કાલ જ સાવધાન થાય. (૨૧) પોતાનો દેહ તથા સમગ્ર જગત નાશવંત છે આવો નિશ્ચય પામીને પોતાનું શરીર અને જગતથી વૈરાગ્ય પામેલો યોગી હરિની નવધા ભક્તિમાં પ્રીતિવાળો થાય. (૨૨) તે ભક્ત (ભગવાનનો ઉપાસક) યોગી ભયે રહિત થઈને, કાળે કરીને શરીર મૃત્યુ પામ્યે સતે સ્વતંત્ર યોગીની માફક હરિના પરમ ધામને પામે છે. (૨૩) હે મુનિસત્તમ ! આ પ્રકારે યોગનો મહિમા વર્તે છે માટે પોતાના શ્રેયને ઈચ્છનારા પુરુષોએ આ યોગ આદરપૂર્વક સિદ્ધ કરવો. (૨૪)

પહેલાં પણ આ લોકમાં ઘણા મહર્ષિઓ તથા હજારો રાજાઓ પણ યોગથી પોતાના મનનું ઈચ્છિત પામ્યા છે માટે મહાબુદ્ધિશાળી ભગવાનના ભક્તોએ આ **યોગ** સિદ્ધ કરવો. (૨૫)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે યોગોપદેશે કાલજ્ઞાન નિરૂપણનામા પંચષષ્ટિતમોઽધ્યાયઃ (૬૫)*

## અધ્યાય : ૬૬

**શતાનન્દ મુનિએ કરેલી શ્રીહરિની સ્તુતિ તથા શતાનંદ મુનિને વરદાનનું સારી રીતે નિરૂપણ કરેલું છે.**

**શ્રી નારાયણ મુનિ બોલ્યા :** હે મુને ! આ મેં કહેલો યોગ, શુભ દેશાદિમાં સેવવાથી જલદી સિદ્ધ થાય છે. અશુભ દેશાદિમાં સેવવાથી સિદ્ધ થતો નથી અને વિનાશનું કારણ થાય છે. (૧) દેશ, કાળ, ક્રિયા, ધ્યાન, શાસ્ત્ર, દીક્ષા, મંત્ર અને સંગ : એ દેશાદિ આઠ શુભ અશુભ જેવા હોય તેવા પ્રકારનું તેમને સેવનારાઓને શુભ અશુભ ફળ મળે છે. (૨) આ શુભ દેશકાળાદિને સેવનારાં મનુષ્યોની બુદ્ધિ શુભ થાય છે અને અશુભ દેશકાળાદિને સેવનારાં મનુષ્યોની બુદ્ધિ અશુભ થાય છે, તેમાં સંશય નથી. (૩) માટે બુદ્ધિમાન અશુભ દેશકાળાદિનું સેવન કરે નહિ, તેનો ત્યાગ કરીને પોતાના હિતને ઈચ્છતો મુમુક્ષુ શુભ દેશકાળાદિનો તત્કાલ આશ્રય કરે. (૪) આ પ્રકારે યોગશાસ્ત્રના જાણનારાઓએ પ્રમાણ કરેલું અંગોપાંગો સહિત જ (તેમાં અંગો યમાદિ આઠ; અને ઉપાંગો તે તે ક્રિયાના ઉપયોગી સાધનો સહિત જ) યોગશાસ્ત્રનું રહસ્ય સમગ્રપણે જાણવા ઈચ્છતા તમોને કહ્યું, (૫) પરમ ગુહ્ય આ યોગશાસ્ત્રનું રહસ્ય તમોએ જે પ્રમાણે પૂછ્યું તે પ્રમાણે મેં બુદ્ધિશાળી તમોને યોગ્ય હોવાથી સારી રીતે કહ્યું. (૬) સર્વ શાસ્ત્રોના અર્થનું મંથન કરીને સમુદ્ધાર કરેલો, સર્વ લોકને હિત કરનારો શાસ્ત્રનો સાર મેં તમોને સારી રીતે કહ્યો. (૭) જે આ યોગશાસ્ત્રને સાંભળે અને કીર્તન કરે તે બન્ને પણ સર્વ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

यः । सर्वपातकसङ्गेभ्यो मुच्येयातां हि तावपि ॥८॥ सुव्रत उवाच–इति सद्गुरुणा तेन योगशास्त्रमुदीरितम् । शतानन्दमुनिः श्रुत्वा सोऽतिहृष्टोऽभवन्नृप! ॥९॥ अन्येऽपि मुनयः सर्वे निशम्यैतत्तदाश्रिताः । सम्प्राप्य परमानन्दं तं संस्तुत्य ववन्दिरे ॥१०॥ प्राप्तानन्दः शतानन्दः स चापि परमादरात् । तं नमस्कृत्य तुष्टाव भगवन्तं नराकृतिम् ॥११॥ शतानन्द उवाच– श्रीवासुदेव ! विमलामृतधामवासं नारायणं नरकतारणनामधेयम्। श्यामं सितं द्विभुजमेव चतुर्भुजं च त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥१२॥ शिक्षार्थमत्र निजभक्तिमतां नराणामेकान्तधर्ममखिलं परिशीलयन्तम् । अष्टाङ्गयोगकलनाश्च महाव्रतानि त्वां भक्ति० ॥१३॥ श्वासेन साकमनुलोमविलोमवृत्त्या स्वान्तर्बहिश्च भगवत्युरुधात्मनश्च । पूरे गतागतजलाम्बुधिनोपमेयं त्वां भक्ति० ॥१४॥ बाह्यान्तरिन्द्रियगणश्वसनाधिदैववृत्त्युद्भवस्थितिलयानपि जायमानान् । स्थित्वा ततः स्वमहसा पृथगीक्षमाणं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥१५॥ मायामयाकृतितमोशुभवासनानां कर्तुं निषेधमुरुधा भगवत्स्वरूपे

---

પાતકના સંગથી મુકાઈ જાય, [માટે જ સમગ્ર પોતાના આશ્રિત મુનિઓનું હિત કરવા માટે શતાનંદ મુનિને જે શ્રીહરિ યોગશાસ્ત્ર કહેતા હતા તે પોતાને વિષે યોગ આપનારા શ્રીહરિ મારા ઉપર પ્રસન્ન થાઓ. જેની કૃપાથી તત્કાલ સમાધિ ઘણાં જનો પામ્યાં તે શ્રીહરિ સદા ધ્યાનના વિષય થાઓ.] (૮)

**સુવ્રત મુનિ બોલ્યા** : હે પ્રતાપસિંહ રાજન્ ! સમગ્ર યોગશાસ્ત્રના ઉપદેષ્ટા શ્રી નારાયણ મુનિએ આ પ્રમાણે કહ્યું તે યોગશાસ્ત્ર સાંભળીને યોગ વિષયક પ્રશ્નકર્તા શતાનન્દ મુનિ અત્યન્ત પ્રસન્ન થયા. (૯) અને બીજા મુનિઓ જે હરિના આશ્રિત સર્વે મુનિઓ ગોપાલાનંદ વગેરે સાધુઓ પણ આ શ્રીહરિએ કહેલું યોગશાસ્ત્ર સાંભળીને પરમાનંદ પામીને શ્રીહરિની સ્તુતિ કરીને અભિવંદન કરતા હતા. (૧૦) આનંદ પામેલા શતાનંદ મુનિ પણ નરાકૃતિ ભગવાન શ્રીહરિને પરમ આદરપૂર્વક નમસ્કાર કરીને સ્તુતિ કરવા લાગ્યા. (૧૧)

**શતાનંદમુનિ સ્તુતિ કરે છે** : હે વાસુદેવ ! નિર્મલ અક્ષર ધામમાં સદા નિવાસ કરનારા નારાયણ મુનિ નામવાળા, નરકથી ઉદ્ધાર કરનારું છે સ્વામિનારાયણ વગેરે નામ જેનું એવા નવીન-મેઘ સમાન શ્યામશરીરવાળા, શરીરથી નીકળતી શ્વેત કાંતિથી શ્વેત જણાતા, સર્વદા બે ભુજાવાળા, પોતાના આશ્રિતજનોની ઈચ્છાથી ચતુર્ભુજપણે દેખાતા, હે ભક્તિ અને ધર્મના પુત્ર ! હું તમારે શરણે આવેલો છું. (૧૨) આ લોકમાં પોતાની એકાંતિકી ભક્તિ કરનારા મનુષ્યોની શિક્ષા માટે પોતાના આચરણથી ઉપદેશ માટે સંપૂર્ણ અંગયુક્ત એકાંતિક ધર્મ, અષ્ટાંગયોગની સમગ્ર યુક્તિઓ અને અહિંસા તથા નૈષ્ઠિક બ્રહ્મચર્યાદિ મહાવ્રતોનો અભ્યાસ કરતા એવા - હે ભક્તિધર્મના પુત્ર ! હું તમારે શરણે આવેલો છું. (૧૩) પોતાના શ્વાસની સાથે પોતાના અંતઃકરણમાં અને બહાર બન્ને નેત્રોની આગળ પોતાનું શ્રીવાસુદેવમાં વારંવાર અનુલોમ અને વિલોમભાવથી વર્તવા વડે (દેહની અંદર પ્રતિલોમ વર્તવાથી, દેહથી બહાર તો અનુલોમપણે વર્તવાથી) વેળામાં = આવેલા અને ગયેલા નીરના સ્થાનમાં; ગયેલું અને આવેલું છે. નીર જેને એવા સમુદ્રની સાથે ઉપમા આપવા યોગ્ય (તેમાં શ્રીવાસુદેવના સ્વરૂપનું સમુદ્રના પુરનું ઉપમાનપણું, શ્રીહરિની શ્વાસે સહિત અનુલોમ અને વિલોમ વૃત્તિનું સમુદ્રના જળનું જવા આવવાનું ઉપમાનપણું, શ્રીહરિની જળાધાર સમુદ્રના ઉપમાનપણાથી જ યોજના કરવી) એવા ભક્તિ અને ધર્મના પુત્ર એવા શ્રીહરિને હું શરણને પામેલો છું. (૧૪) જે બાહ્ય ચક્ષુરાદિ ઇન્દ્રિયો, જે આંતર-મન આદિ ઇન્દ્રિયો, જે પ્રાણાપાનાદિ વાયુઓ, જે ઇન્દ્રિયોના અધિષ્ઠાતા દેવો ગુણ-સ્વભાવને અનુસારે ગુણકાર્યોમાં પ્રવર્તતા તે સર્વની જે વિવિધ વૃત્તિઓ તેમના જે ઉત્પત્તિ, સ્થિતિ, લયો થાય છે. તેને પણ પોતાના અસાધારણ જ્ઞાનાનંદૈક સ્વરૂપમાં સર્વદા વર્તતા તમો સ્વયં સ્વપ્રતાપથી નિર્લેપ હોઈને જ તે વૃત્તિનો ઉદ્‌ભવ સ્થિતિ અને લય થકી પૃથક્ રહીને સાક્ષાત્કાર કરો છો એવા યોગીઓના અગ્રેસર ભક્તિ-ધર્મના પુત્ર તમારા શરણને પામ્યો છું. (૧૫) ભગવાનના સ્વરૂપમાં (પોતાને ક્યારેક પ્રતીતિરૂપે ઉત્પન્ન થનારા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

।निर्बीजसाङ्ख्यमतयोगगयुक्तिभाजं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥१६॥ दिव्याकृतित्वसुमहस्त्वसुवासनानां सम्यग्विधिं प्रथपितुं च पतौ रमायाः ।सालम्बसाङ्ख्यपथयोगसुयुक्तिभाजं त्वां भक्तिधर्मतन० ॥१७॥ कामार्ततस्करनटव्यसनिद्विषन्तः स्वस्वार्थसिद्धिमिव चेतसि नित्यमेव । नारायणं परमयैव मुदा स्मरन्तं त्वां भक्ति० ॥१८॥ साध्वीचकोरशलभास्तिमि-कालकण्ठकोका निजेष्टविषयेषु यथैव लग्नाः । मूर्तौ तथा भगवतोऽत्र मुदाऽतिलग्नं त्वां भक्ति० ॥१९॥ स्नेहातुरस्त्वथ भयातुर आमयावी यद्वत्क्षुधातुरजनश्च विहाय मानम् । दैन्यं भजेयुरिह सत्सु तथा चरन्तं त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥२०॥ धर्मस्थितैरुपगतैर्बृहता सहैक्यं सेव्यो हरिः सितमहःस्थितदिव्यमूर्तिः । शब्दाद्यरागिभिरिति स्वमतं वदन्तं त्वां भक्ति० ॥२१॥ सद्ग्रन्थनित्यपठनश्रवणादिसक्तं ब्राह्मीं च सत्सदसि शासतमत्र विद्याम् । संसारजालपतिताखिलजीवबन्धो ! त्वां भक्तिधर्मतनयं शरणं प्रपद्ये ॥२२॥ सुव्रत उवाच-इति स्तुत्वा च नत्वा तं प्राञ्जलिः स तदग्रतः। तस्थौ मुनिस्तं भगवान्प्रीतः

---

धर्मविद्विषां गुरुक्षितीशेशवपुर्द्रुहां नृणाम् ॥२८॥ जातक्रियाद्या उपनायनान्तास्तत्संस्कृतीः साधु चकार धर्मः । हर्यादिनामा स च सर्वथैव तं प्रीणयामास च मातरं स्वाम् ॥२९॥ वैराग्यवेगोज्झितगेहसौख्यः स तीर्थयात्रां विदधद्धरायाम् । निजप्रतापातिशयेन धर्ममतिष्ठिपत्तद्रिपुमुत्खनंश्च ॥३०॥ स्वधर्मविज्ञानविरागयुक्तामेकान्तिकीं श्रीरमणस्य भक्तिम् । प्रावर्तयत्स्वाश्रितपुंसु भूमौ धर्मद्विषश्चुक्षुभुराशु तेन ॥३१॥ अधर्मसंस्थासुरदेशिकानां यूथानि भूयांसि च तत्र तत्र । धर्मद्रुहो भूपतयश्च शुष्कज्ञानाभिमाना अथ दम्भभक्ताः ॥३२॥ सद्धर्मसंस्थापनमञ्जसाऽस्य दृष्ट्वा तथैश्वर्यमलौकिकं ते । समत्सरास्तत्पदवीमशक्ता लब्धुं व्यधुर्द्रोहभरं तु चास्य ॥३३॥ ते दुर्जनास्त्वस्य कदर्थनोत्थपापेन भूम्नातिविमोहमापुः। सहस्त्रशः शस्त्रभृतश्च तत्र कृत्वा प्रहारं मिथ आपुरन्तम् ॥३४॥ जुगुप्सितं कर्म विधाय केचिन्नासाश्रुतिच्छेदखरावरोहान् । सम्प्राप्य भूपादिकृतान् विनेशुः केचिच्च नौकाजलमज्जनेन ॥३५॥ हरिद्रुहो भूपतयस्तु केचिद्रोगैः सपत्नैः कतिचिच्च नेशुः । हृतश्रियोऽन्ये बलिभिर्नृपाद्यैर्भृशं लभन्ते स्म च दुर्दशां वै ॥३६॥ एवंप्रतापो विचरन्स भूमावधर्मसर्गं भृशमुच्चखान। प्रवर्तयामास च धर्मसर्गं सुरामिषाशासुरभक्तलुप्तम् ॥३७॥ सद्यः समाधिं भुवि मानवानां विधापयन्नात्मन इच्छयैव । विस्मापयामास स योगभाजस्तत्प्राप्तये भूरितरप्रयत्नान् ॥३८॥ अज्ञाततद्भूरितरप्रतापा अप्यत्र ये तं शरणं प्रपन्नाः । तानप्यवित्वा यमदूतदोर्भ्यो मुक्तिं ददावेष दयालुवर्यः ॥३९॥ मुमुक्षवः सुज्ञजनास्तु तस्य दृष्ट्वा प्रतापातिशयं स्वमुक्त्यै ।

---

ભય ઉત્પન્ન થયો. (વિપ્રો અને ગાયો, દેવો, તપ, સત્ય, દમ, શમ, શ્રદ્ધા, દયા, તિતિક્ષા, યજ્ઞો આ હરિનું શરીર છે એમ ભાગવતના દશમ સ્કંધમાં કહ્યું છે.) (૨૮) ધર્મ જાતક કર્મ વગેરે ઉપનયન પર્યન્ત પોતાના પુત્ર રૂપ ભગવાનની સંસ્કાર-ક્રિયાઓ સારી રીતે કરતા હતા. હરિ વગેરે નામને ભજનારા શ્રીકૃષ્ણ પોતાના પિતા ધર્મ અને પોતાના માતુશ્રીને સર્વ પ્રકારે પ્રસન્ન કરતા હતા. (પોતાનાં સ્વરૂપનું જ્ઞાન આપવાથી દુર્વાસાના શાપથી મુકાવ્યાં અને પોતાની સમીપમાં નિવાસ કરાવીને પ્રસન્ન કર્યાં.) (૨૯) વૈરાગ્યના તીવ્ર વેગથી ત્યાગ કર્યું છે ગૃહનું સુખ જેણે એવા શ્રીહરિ પૃથ્વીમાં સમગ્ર તીર્થયાત્રા કરતા સતા, ધર્મનો વૈરી જે અધર્મને મૂળમાંથી ઉખાડતા સતા પોતાના અતિશય પ્રભાવથી પૃથ્વીમાં ધર્મને અચલપણે સ્થાપન કરતા હતા. (૩૦) સ્વધર્મ અને આત્મા-પરમાત્માનું વિજ્ઞાન અને વૈરાગ્યે યુક્ત શ્રીકૃષ્ણની એકાંતિકી ભક્તિ પૃથ્વીમાં પોતાના આશ્રિત પુરુષોમાં પ્રવર્તાવતા હતા તેવા પ્રકારની ભક્તિની પ્રવૃત્તિથી ધર્મના વેરી અસુરો તત્કાલ દુઃખી થતા સતા દ્રોહ કરતા હતા. (૩૧) તે તે પૃથ્વીના પ્રદેશમાં અધર્મમાર્ગમાં રહેલા જે અસુર ગુરુઓના ઘણા સમુદાયો ધર્મનો જ એક દ્રોહ કરનારા અસુર રાજાઓ અને ભગવાનની ઉપાસના રહિત કેવલ આત્મત્વાદી શુષ્ક જ્ઞાનવાળા અને દાંભિક ભક્તો, તે આ કહેલા સર્વે પણ શ્રીહરિનું તત્કાલ એકાંતિક ધર્મનું પ્રતિષ્ઠાપન જોઈને તથા અલૌકિક ઐશ્વર્ય જોઈને મત્સર યુક્ત થકા શ્રીહરિનો ઉત્કર્ષને સહન નહિ કરનારા; શ્રીહરિના અલૌકિક ઐશ્વર્ય માર્ગને પામવા માટે અસમર્થ થઈને શ્રીહરિનો અતિશય દ્રોહ કરતા હતા. (૩૨-૩૩) તે દુર્જનો પૂર્વે કહેલા તે સર્વે ઘણા પ્રકારે શ્રીહરિના દ્રોહથી ઉત્પન્ન થયેલા પાપથી અતિમોહ પામ્યા તેમાં હજારો શસ્ત્રધારીઓ પરસ્પર શસ્ત્ર પ્રહાર કરીને વિનાશ પામ્યા. (૩૪) કેટલાંક અતિનિન્દિત કર્મ કરવાથી રાજાઓએ કરેલા નાક, કાનના છેદનથી અને ગધેડા ઉપર બેસાડવાથી વિનાશ પામ્યા, કેટલાકને નૌકામાં બેસાડીને મહાનદીના પ્રવાહમાં બુડાડીને નાશ કર્યાં. (૩૫) ભગવાનનો દ્રોહ કરનારા કેટલાક અસુર રાજાઓ ક્ષયરોગ, કુષ્ઠરોગ, રક્ત નીકળતો દુષ્ટરોગ વગેરેથી નાશ પામ્યા; કેટલાક શત્રુઓએ નાશ કર્યા, કેટલાક બલવાન રાજાઓએ જેની રાજ્યલક્ષ્મી લઈ લીધી છે એવા સતા જ દુર્દશાને પામ્યા હતા. (૩૬) આ પ્રકારના પ્રતાપશાળી શ્રીહરિ પૃથ્વીમાં વિચરણ કરતા થકા અધર્મસર્ગને અત્યન્ત ઉખેડી નાખતા હતા. સુરા અને માંસ તેનું ભોજન કરનારા અસુર ભક્તો-કાલી વગેરેના ઉપાસકોએ લુપ્ત કરેલા ધર્મસર્ગને ફરીથી પ્રવર્તાવતા હતા. (૩૭) પૃથ્વીમાં આશ્રિતજનો અને અનાશ્રિત જનોને પોતાની ઈચ્છાથી જ તત્કાલ સમાધિ કરાવતા શ્રીહરિ સમાધિસિદ્ધિ માટે કર્યો છે ઘણો પ્રયત્ન જેમણે એવા અષ્ટાંગ યોગનો અભ્યાસ કરનારા યોગીજનોને વિસ્મય પમાડતા હતા. (૩૮) આ ભૂમિમાં જે જનો શ્રીહરિનો અતિશય પ્રતાપ જાણતા ન હતા તે પણ શ્રીહરિના શરણને પામ્યાં હતાં; તેઓને પણ યમદૂતોના હાથથી રક્ષણ કરીને દયાળુપણામાં શ્રેષ્ઠ શ્રીહરિએ મુક્તિ આપી. (૩૯) મુમુક્ષજનો અને સુજ્ઞ પુરુષો તો શ્રીહરિનો પ્રતાપાતિશય જોઈને શ્રીહરિને વિષે જ પ્રત્યક્ષ શ્રીકૃષ્ણ વાસુદેવનો નિશ્ચય

तदीयमेवाश्रयमाशु चक्रुः साक्षाद्विनिश्चित्य तमेव कृष्णम् ॥४०॥ केचित्तदीयाङ्घ्रिकरस्थचिह्नैस्तमैश्वरैर्निश्चितवन्त ईशम् ।अनन्यसाध्येन समाधिनापि केचिच्च तं साहजिकेन सुज्ञाः ॥४१॥ सतामसाधारणधर्मनिष्ठामालोक्य केचिच्च तदाश्रितानाम् । शास्त्रोदितामप्यनवेक्षमाणा विदुस्तमीशं ननु लोकसत्सु ॥४२॥ ये दम्भभक्ताः स्वमतं सदोषं त्यक्त्वा न कृष्णाश्रयमाचरंस्तान्। ऐश्वर्यमाश्चर्यमलौकिकं स्वं प्रादर्शयद्योगकला वितन्वन् ॥४३॥ सहस्रशस्ते च विना प्रयत्नं सद्यः समाधिं हृदयेऽलभन्त । स्वस्वेष्टदेवं च विलोक्य तत्र तमेव तं चापुरतिप्रहर्षम् ॥४४॥ ते व्युत्थिता आत्मन इष्टदेवं तमेव निश्चित्य सचित्रमाशु । विधाय तस्याश्रयमात्ममुक्त्यै तद्वाचि तस्थुः स्वमतं विहाय ॥४५॥ ये शुष्कवेदान्तविदो नरास्तान् जित्वाशु वादेन स सप्रमाणम् । उपासनं ब्रह्मण एव साक्षाद्दिव्याकृतेर्ग्राहयति स्म भक्त्या ॥४६॥ तदाश्रयं ये विदधुश्च विप्रास्ते स्नानसन्ध्यामुखषट्क्रियाभिः। सहैव राधारमणस्य भक्तिं चक्रुः शमाद्यात्मगुणोपपन्नाः ॥४७॥ तदाश्रिता वर्णिजनाश्च सन्तो बृहद्व्रतं दुश्चरमष्टधैव । सम्पालयन्तोऽखिलसाधुधर्मा विलक्षणा लौकिकसद्भ्य आसन् ॥४८॥ अन्ये च वर्णाश्रमिणः स्वधर्मं नित्यं यथाशास्त्रमिहाचरन्तः । भेजुर्हरिं भक्तिभरेण हित्वा तस्य प्रतापादखिलान्स्वदोषान् ॥४९॥ प्रापुः श्रितास्तं सधवस्त्रियोऽत्र पतिव्रताधर्म उरुप्रतिष्ठाम् । स्वधर्मनिष्ठा विधवस्त्रियश्च सद्ब्रह्मचर्ये स्थितिमापुरग्र्याम् ॥५०॥ सम्भारभारैर्विपुलैः स शुद्धैश्चित्रावहान्भूमिभुजामपीह । महोत्सवान् कृष्णजनुर्दिनादौ चक्रेऽन्नकूटप्रमुखान्मुहुश्च ॥५१॥ यज्ञान्स वैश्योत्तम ! वैष्णवांश्च व्यधापयद्भूपतिचित्रकर्तॄन् । मासान्बहून्भोजयति स्म विप्रान्सहस्रशः साधुजनान्मुहुश्च

કરી પોતાની મુક્તિ માટે શ્રીહરિનો જ આશ્રય કરતા હતા. (૪૦) કેટલાંક જનો પરમેશ્વરપણાના સૂચક શ્રીહરિનાં બંને ચરણકમળોમાં રહેલાં અખંડિત ઊર્ધ્વરેખા વગેરે ચિહ્નોથી શ્રીહરિમાં પરમેશ્વરપણાનો નિશ્ચય કરતાં હતાં; કેટલાક સુજ્ઞ જનો પરમેશ્વર વિના બીજાથી જે સિદ્ધ ના થઈ શકે, અને શ્રીહરિએ તો સ્વાભાવિક પ્રાપ્ત કરાવેલી સમાધિથી પણ શ્રીહરિને પરમેશ્વર છે એમ નિશ્ચય કરતા હતા. (૪૧) કેટલાક જનો તો શ્રીહરિના આશ્રિત સાધુઓની અસાધારણ ધર્મનિષ્ઠા જોઈને સત્શાસ્ત્રમાં કહેલી સાધુધર્મની નિષ્ઠા બીજા સાધુઓમાં નહિ જોતા સતા શ્રીહરિને પરમેશ્વર છે એમ નિશ્ચય જ જાણતા હતા. (૪૨) દાંભિક ભક્તો જે ઘણા દોષ સહિત એવો પોતાનો મત-પોતાના ગુરુએ કહેલા સિદ્ધાંતનો ત્યાગ કરીને પ્રત્યક્ષ શ્રીહરિનું શરણ કરતાં નહોતાં તેવાં જનોને પોતાના યોગનાં ઐશ્વર્યોને વિસ્તારતા સતા આશ્ચર્યજનક અલૌકિક પોતાનું ઐશ્વર્ય બતાવતા હતા. (૪૩) હજારો તે જનો પ્રયત્ન વિના પોતપોતાના મનમાં તત્કાલ સમાધિ પામ્યા. તે સમાધિમાં પોતાના ઈષ્ટદેવ સ્વરૂપે શ્રીહરિને જ જોઈને અતિ હર્ષ પામ્યા. (૪૪) સમાધિમાંથી ઊઠેલા તે જનો પોતાના ઈષ્ટદેવ શ્રીહરિ જ છે એમ નિશ્ચય કરી આશ્ચર્ય સહિત જેમ હોય તેમ તત્કાલ શ્રીહરિનો આશ્રય કરી પોતાના મતને ત્યાગ કરી પોતાની મુક્તિ માટે શ્રીહરિના વચનમાં રહેતા હતા. (૪૫) જે મનુષ્યો શુષ્ક વેદાન્તને જાણનારાં હતાં. તેઓને સપ્રમાણ જેમ હોય તેમ વાદથી જીતીને તત્કાલ જ શ્રીહરિ દિવ્ય આકૃતિવાળા પ્રત્યક્ષ સ્વરૂપ, સ્વભાવ, ગુણ-ઐશ્વર્યાદિથી અતિ મહાન શ્રી વાસુદેવની ભક્તિથી -પ્રેમપૂર્વક દાસભાવથી આરાધન જ ગ્રહણ કરાવતા હતા. (૪૬) જે બ્રાહ્મણો શ્રીહરિનો સમાશ્રય કરતા હતા. તે બ્રાહ્મણો શમાદિ ગુણોએ યુક્ત થઈને સ્નાન, સંધ્યા વગેરે મુખ્ય જેમને છે એવી છ ક્રિયાએ સહિત જ શ્રીકૃષ્ણની ભક્તિ કરતા હતા. (૪૭) શ્રીહરિના આશ્રયવાળા બ્રહ્મચારીઓ અને સાધુઓ કલિયુગમાં બીજાંઓથી સિદ્ધ ના થઈ શકે એવું નૈષ્ઠિક બ્રહ્મચર્યવ્રત આઠ પ્રકારે જ પાલન કરતા સતા સમગ્ર સાધુઓના ધર્મો જેમાં છે એવા સતા લોકપ્રસિદ્ધ સાધુઓથી વિલક્ષણ હતા. (૪૮) આ લોકમાં પોતપોતાના વર્ણાશ્રમ—ધર્મવાળા બીજા શ્રીહરિના આશ્રિત પોતાનો વર્ણાશ્રમનો સદાચાર શાસ્ત્ર પ્રમાણે નિત્ય આચરણ કરતા સતા શ્રીહરિના પ્રતાપથી સમગ્ર કામાદિ દોષોનો ત્યાગ કરીને અત્યંત પ્રીતિથી શ્રીહરિને ભજતા હતા. (૪૯) આ લોકમાં શ્રીહરિને આશરેલી સધવા નારીઓ પતિવ્રતા-ધર્મમાં મહાસ્થિતિને પામી હતી અને વિધવા નારીઓ સ્વધર્મમાં સ્થિતિવાળી થઈને પોતાના બ્રહ્મચર્ય-વ્રતમાં ઉત્તમ સ્થિતિને પામી હતી. (૫૦) શ્રીહરિ આ લોકમાં રાજાઓને પણ આશ્ચર્યજનક શ્રીકૃષ્ણના પ્રાદુર્ભાવને દિવસે અન્નકૂટના અને જન્માષ્ટમીના મહોત્સવોને મહાપવિત્ર સામગ્રીઓથી વારંવાર કરતા હતા. (૫૧) હે વૈશ્યોત્તમ ! શ્રીહરિ સાર્વભૌમ રાજાઓને પણ આશ્ચર્ય કરનારા વિષ્ણુયાગો કરાવતા હતા. હજારો બ્રાહ્મણો તથા સાધુઓને ઘણા માસ પર્યન્ત વારંવાર ભોજન કરાવતા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

॥५२॥ महान्नसत्राणि च तत्र तत्र सोऽचीकरद्यात्रिकलोकतुष्टयै । यत्रागता भूरिसुखं यथेष्टं पान्था लभन्ते स्म जनाः सचित्रम् ॥५३॥ कूपांश्च वापीः स सरोवराणि सद्धर्मशाला अपि तत्र तत्र । व्यधापयज्जीवहिताय भूमौ सोपस्करा ब्रह्मपुरीरदाच्च ॥५४॥ उपानयद्विप्रकुमारकांश्च यथोपयुक्तं द्रविणं स दत्त्वा । सहस्रशः कारयति स्म कन्यादानानि विप्रैश्च यथाविधानम् ॥५५॥ कर्तुं न शक्तान्स्वऋणापहारं निजाश्रितान्कांश्चन धर्मनिष्ठान् । स उत्तमर्णेभ्य उरुप्रतापो दत्त्वा धनं मोचयति स्म सद्यः ॥५६॥ उपासनाग्निं कतिचित्स विप्रांस्त्रेतामपि ग्राहयति स्म विज्ञान् । देयं धनं च प्रतिवर्षमेभ्यो न्यबन्धयद्येन हि कर्मसिद्धिः ॥५७॥ गोभूहिरण्यादि च पर्वकाले दानं महद्विप्रवरेभ्य एषः । सदक्षिणं दापयति स्म भूयो यथाविधानं भुवि धर्मपोष्टा ॥५८॥ प्रादर्शयच्च स्वकभूरिभक्तान्स ब्रह्मगोलोकमुखानि भूमा । दिव्यानि धामानि निजानि भूयस्तत्तन्महैश्वर्ययुतानि चान्तः ॥५९॥ सहैव तत्तत्परिचारकाद्यैर्निजावतारानपि पूर्ववृत्तान् । प्रादर्शयत्तत्तदुपासकेभ्यः सोऽचिन्त्यशक्तिः कतिचिज्जनेभ्यः ॥६०॥ स जीवमायाबृहदीश्वराणां रूपाणि सच्छास्त्रविदां मतानि । निरूपयामास सभासु सम्यक् प्रादर्शयत्तानि च कांश्च शक्त्या॥६१॥ भ्रष्टाः स्वराज्यात्कतिचिच्च भूपा हृतश्रियः शत्रुजनैर्बलिष्ठैः । तदाश्रयेणैव पुनः स्वऋद्धिं प्राप्याधिकत्वं खलु पूर्वतोऽगुः ॥६२॥ स्वेच्छानुरूपां पुरुषार्थसिद्धिं सकामभक्ताः किल तस्य चापुः । निष्कामभक्ता अपि भुक्तिमुक्ती तदिच्छयैवापुरनेकशोऽत्र ॥६३॥ भक्तिप्रवृत्तेर्भुवि भूरिकालं महान्ति कृष्णस्य स मन्दिराणि । व्यधापयद्यानि विलोक्य भूपा आश्चर्यमापुर्हृदयङ्गमानि ॥६४॥ निःसीमकारुण्यभरेण नृणां निःश्रेयसाय स्वकधर्मवंशे । अतिष्ठिपद्धर्मधुरां स्वकीयां धास्यंस्तिरो मानुषनाट्यमेषः ॥६५॥ एवंविधान्यद्भुतानि कर्माणीह समाचरन्

---

હતા. (૫૨) શ્રીહરિ તે તે ગામો અને પુરોમાં યાત્રા માટે આવેલાં જનોના સંતોષ માટે મહા અન્નસત્રો કરાવતા હતા; જે અન્નક્ષેત્રોમાં આવેલાં યાત્રિકો આશ્ચર્યપૂર્વક યથેષ્ટ ઘણું સુખ પામતાં હતાં. (૫૩) શ્રીહરિ પૃથ્વીમાં તે તે દેશોમાં સમગ્ર જીવના હિત માટે કૂવા, વાવ્યો, સરોવરો અને સારી ધર્મશાળાઓ પણ કરાવતા હતા અને બ્રાહ્મણોને ગૃહોના ઉપસ્કરો સહિત નિવાસસ્થાનો (ઘરો) આપતા હતા. (૫૪) શ્રીહરિ યથાયોગ્ય ધન આપીને હજારો બ્રાહ્મણોના કુમારોને યજ્ઞોપવીત-સંસ્કાર કરાવતા હતા અને હજારો કન્યાદાનો વિધિપુરઃસર બ્રાહ્મણો પાસે કરાવતા હતા. (૫૫) મહાપ્રતાપી શ્રીહરિ પોતે ઋણ આપવા સમર્થ ન હોય તેવાં અશક્ત, ધર્મનિષ્ઠાવાળાં પોતાનાં આશ્રિતોને દેણદાર-ધનના માલિકને આપવા યોગ્ય ધન આપીને તત્કાલ મુકાવતા હતા. (૫૬) શ્રીહરિ વેદ-વિદ્યાને જાણનારા કેટલાક બ્રાહ્મણોને ઉપાસના યોગ્ય આવસથ્ય-અગ્નિ ગ્રહણ કરાવતા હતા અને કેટલાક બ્રાહ્મણોને ત્રેતાગ્નિ=અગ્નિહોત્રાગ્નિ ગ્રહણ કરાવતા હતા તે વિપ્રોને દરેક વર્ષે આપવા યોગ્ય ધન બાંધી આપતા હતા કે જે ધનથી હોમકાર્યની સિદ્ધિ થાય. (૫૭) પૃથ્વીમાં દાન-ધર્મના પોષક આ શ્રીહરિ સંક્રાંતિ આદિ પર્વ સમયે દક્ષિણા સહિત ગાયો, પૃથ્વી, સુવર્ણ વગેરે મહાદાન શાસ્ત્રોક્ત વિધિને અનુસરીને શ્રેષ્ઠ બ્રાહ્મણોને વારંવાર અપાવતા હતા. (૫૮) વ્યાપક શ્રીહરિ અક્ષરધામ અને ગોલોક વગેરે જેમને છે એવાં તે તે મહાઐશ્વર્ય યુક્ત પોતાનાં દિવ્ય ધામો પોતાના ઘણા ભક્ત જનોના અંતઃકરણમાં, સમાધિમાં વારંવાર બતાવતા હતા. (૫૯) અચિંત્ય શક્તિવાળા શ્રીહરિ પૂર્વે થયેલા પોતાના વરાહાદિ અવતારોને તેમના સેવક વગેરેની સાથે જ તે તે ઉપાસક કેટલાક જનોને બતાવતા હતા. (૬૦) શ્રીહરિ સત્શાસ્ત્રોને જાણનારાઓના મતોને જીવ, માયા, અક્ષર બ્રહ્મ અને ઈશ્વર-પરમેશ્વર તેમનાં સ્વરૂપો સભામાં સારી રીતે નિરૂપણ કરતા હતા અને તે જીવાદિ રૂપો પોતાના સામર્થ્યથી કેટલાંક જનોને સારી રીતે બતાવતા હતા. (૬૧) અતિ બળવાન શત્રુજનોએ જેની રાજ્યલક્ષ્મી અપહરી લીધી છે માટે જ પોતાના રાજ્યથી ભ્રષ્ટ થયેલા કેટલાક રાજાઓ શ્રીહરિના શરણની પ્રાપ્તિથી જ ફરી પોતાની રાજ્ય-સમ્પત્તિ પ્રાપ્ત કરી પોતાના પૂર્વના વૈભવથી અધિક વૈભવવાળા થયા હતા. (૬૨) આ લોકમાં શ્રીહરિના અનેક સકામ ભક્તો પોતાની ઈચ્છાને અનુરૂપ પુરુષાર્થ સિદ્ધિને પામ્યા હતા અને અનેક નિષ્કામી ભક્તો પણ શ્રીહરિની ઈચ્છાથી ભુક્તિ અને મુક્તિ પામ્યા હતા જ. (૬૩) શ્રીહરિ પૃથ્વીમાં ઘણા કાળ સુધી ભક્તિમાર્ગની પ્રવૃત્તિ માટે કૃષ્ણનાં મહામંદિરો કરાવતા હતા, અતિ સુંદર શ્રીકૃષ્ણનાં મંદિરો જોઈને રાજાઓ પણ આશ્ચર્ય પામ્યા. (૬૪) મનુષ્યાનુકરણ-ભાવને તિરોભાવ પમાડતા સતા શ્રીહરિ નિરતિશય દયાના સમુદાયથી મનુષ્યોનાં **આત્યંતિક કલ્યાણ** માટે પોતાના ધર્મવંશમાં (પોતાના મોટા અને નાના ભાઈના પુત્રો, જે અયોધ્યાપ્રસાદ અને રઘુવીરને વિષે) પોતાની ધર્મધુરાને સ્થાપતા હતા. (૬૫) આ પ્રકારનાં અલૌકિક ચરિત્રો આચરણ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

। सर्वथाश्रयणीयोऽभूद्धरिः साक्षाज्जगद्गुरुः ॥६६॥ अधुनापि स भक्तेभ्यः स्वकीयेभ्यः क्वचित् क्वचित् । साक्षात्स्वदर्शनं दत्ते यथापूर्वं निजेच्छया ॥६७॥ देहावसानकाले तु स्वभक्तेभ्यः स सर्वशः । दत्त्वा स्वदर्शनं दत्ते मुक्तिमेव यमादवन् ॥६८॥ तस्य जन्मदिने कार्यः सोपवासो महोत्सवः । वाञ्छितं सकलं तेन सिद्ध्यतीत्यनुभूयते ॥६९॥ व्रतेनानेन निष्कामस्त्यागवानपि पूरुषः । ज्ञानवैराग्यसंसिद्धिं भक्तिपुष्टिमुपैति च ॥७०॥ धर्मार्थी लभते धर्मं कामान् सर्वांश्च कामुकः । धनं धनार्थी लभते मोक्षार्थी मोक्षमीप्सितम् ॥७१॥ भार्यार्थी लभते भार्यां पुत्रार्थी पुत्रमुत्तमम् । तस्मादेतद्व्रतं कार्यं नवम्यां चैत्रिके सिते ॥७२॥ अष्टमीवेधरहिता शुक्लैषा नवमी मधोः । सूर्योदयस्था व्रतिभिर्ग्राह्या चोपोषणे तिथिः ॥७३॥ शुद्धाधिका यदा चैषा विद्धा वाऽपि क्षयं गता । भवेत्तदा तु पूर्वैव ग्रहीतव्या व्रते तिथिः ॥७४॥ यदा पूर्वदिने ह्येव रजन्यामश्विनीक्षणे । नवमीचन्द्रपुष्याणां योगः स्यान्न परत्र सः ॥७५॥ तदा तु विद्धाप्यष्टम्या सैव ग्राह्या व्रतोत्सवे । नवमी तादृशो योगो यतोऽभूद्धरिजन्मनि ॥७६॥ चातुर्वर्ण्यस्याधिकारो भवत्यत्र सयोषितः । तस्मात्पुम्भिश्च नारीभिः कार्यमेतद्व्रतं हरेः ॥७७॥ सर्वथैव विधातव्य उपवासोऽत्र तच्छ्रितैः। तत्पूजा महती कार्या रात्रौ जागरणं च तैः ॥७८॥ मिताहारो नरोऽष्टम्यां नवम्यामरुणोदये । उत्थाय चिन्तयन् कृष्णं देहशुद्धिं समाचरेत् ॥७९॥ अपां द्वादश गण्डूषाः कर्तव्या मुखशुद्धये । न दन्तधावनं कार्यं काष्ठेन व्रतवासरे ॥८०॥ कृत्वा स्नानादि कर्माथ हरिं नत्वा तदग्रतः । मन्त्रेणानेन नियमं गृह्णीयाद्व्रतकृन्नरः ॥८१॥ अहोरात्रं निराहारो भवाम्यद्य जगत्पते ! । श्वो भोक्ष्ये व्रतमेतन्मे पालनीयं त्वया हरे! ॥८२॥ एवं गृहीत्वा नियमं

કરતાં જગદ્‌ગુરુ પ્રત્યક્ષ શ્રીહરિ આ લોકમાં સર્વ પ્રકારે આશ્રય કરવા યોગ્ય હતા. (૬૬) તે શ્રીહરિ હાલમાં પણ ક્યારેક ક્યારેક પોતાના ભક્તોને પોતાના સંકલ્પથી પોતાના પ્રત્યક્ષ પ્રાદુર્ભાવ સમયે જેમ તેમ પ્રત્યક્ષ પોતાનાં દર્શન આપે છે. (૬૭) શ્રીહરિ પોતાના ભક્તોના દેહના અંતિમ સમયે યમદૂતોથી રક્ષણ કરવા માટે સમગ્ર પોતાના ભક્તોને પોતાનાં દર્શન આપીને મુક્તિ જ આપે છે; વિમાનાદિમાં બેસાડીને પોતાના ધામમાં લઈ જાય છે. (૬૮)

શ્રીહરિના જન્મ-દિવસને વિષે **ઉપવાસ સહિત મહોત્સવ** કરવો જે ઉપવાસથી સમગ્ર ઈચ્છિત ફળ સિદ્ધ થાય છે : આવો અનુભવ મેં પ્રત્યક્ષ કર્યો છે. (૬૯) માયિક પદાર્થોની ઈચ્છા રહિત ત્યાગી પુરુષ પણ આ વ્રતથી જ્ઞાન-વૈરાગ્યની સિદ્ધિ અને ભક્તિની પુષ્ટિને પામે છે. (૭૦) ધર્માર્થી ધર્મને પામે છે, કામાર્થી સર્વ કામોને પામે છે, ધનાર્થી ધનને પામે છે, મોક્ષાર્થી ઈચ્છિત મોક્ષને પામે છે. (૭૧) ભાર્યાર્થી ભાર્યાને પામે છે, પુત્રાર્થી ઉત્તમ પુત્ર પામે છે, માટે ચૈત્ર માસના શુકલ પક્ષની નવમીમાં આ વ્રત કરવું. (૭૨) ચૈત્ર માસની સુદી આ નવમી તિથિ અષ્ટમીના વેધ રહિત સૂર્યોદય વ્યાપિની વ્રતીઓએ ઉપવાસમાં ગ્રહણ કરવી. (૭૩) જ્યારે આ નવમી, અષ્ટમીના વેધ રહિત અધિક હોય અથવા અષ્ટમીવેધ યુક્ત ક્ષય પામેલી હોય ત્યારે તો પ્રથમની જ વ્રતમાં ગ્રહણ કરવી. (૭૪) જ્યારે પહેલે દિવસે (અષ્ટમીના વેધવાળી નવમીને દિવસે જ) રાત્રિમાં અશ્વિની નક્ષત્ર મુહૂર્તમાં (દશ ઘડી પરિમિત રાત્રિના અતિક્રમણ સમયે જ ) નવમી તિથિ-સોમવાર અને પુષ્ય-નક્ષત્રનો યોગ હોય અને તે યોગ જો સૂર્યોદય વ્યાપિની નવમીને દિવસે ન હોય ત્યારે તો અષ્ટમી વિદ્ધા પણ તે જ નવમી તિથિ વ્રતોત્સવમાં ગ્રહણ કરવી, કારણ કે તેવો યોગ હરિના જન્મમાં હતો. (૭૫-૭૬)

સ્ત્રીઓએ સહિત ચાર વર્ણનાં જનોને આ **શ્રીહરિ જયન્તી-વ્રત**માં અધિકાર છે માટે પુરુષો અને સ્ત્રીઓએ હરિનું આ વ્રત કરવું (૭૭) શ્રીહરિનાં આશ્રિત સ્ત્રીપુરુષોએ આ વ્રતમાં ઉપવાસ-નિરાહાર ઉપવાસ સર્વ પ્રકારે કરવો. આ વ્રતમાં બાળક, વૃદ્ધ અને રોગી વિનાનાએ ફલાહાર પણ ન કરવો. ઉપવાસ યુક્ત શ્રીહરિનાં આશ્રિતજનોએ રાત્રિમાં શ્રીહરિની મહાપૂજા કરવી અને જાગરણ કરવું. (૭૮) વ્રતના દિવસની પૂર્વે અષ્ટમીને દિવસે મિતાહારી પુરુષ નવમીને દિવસે સૂર્યોદય પહેલાં ઊઠીને શ્રીહરિકૃષ્ણ ભગવાનનું સ્મરણ કરતો થકો દેહશુદ્ધિ કરે. (૭૯) નવમીને દિવસે મુખશુદ્ધિ માટે ગાળેલા સ્વચ્છ જળના બાર કોગળા કરવા. કાષ્ટથી દાતણ કરવું નહીં. (૮૦) સ્નાનાદિ કર્મ કરીને પછી શ્રીહરિને નમસ્કાર કરીને વ્રત કરનારો પુરુષ શ્રીહરિની સમીપે આ મંત્રથી નિયમ ગ્રહણ કરે. (૮૧) હે જગત્પતે ! હે હરે ! આ દિવસે અહોરાત્ર નિરાહાર રહીશ. આવતે દિવસે તમારું પ્રસાદીઅન્ન ભક્ષણ કરીશ. મારું આ વ્રત તમોએ પરિપૂર્ણ કરવું. (૮૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

नित्यकर्म समापयेत् । न व्यावहारिकं कर्म व्रती कुर्वीत तद्दिने ॥८३॥ तदेव कर्म कर्तव्यं कृष्णसम्बन्धि यद्भवेत् । ब्रह्मचर्यं पालनीयं त्याज्यः क्रोधस्तु सर्वथा ॥८४॥ स्त्रीणां निरीक्षणात्स्पर्शात्ताभिः सङ्कथनादपि । भ्रश्यति ब्रह्मचर्यं वै स्वभार्यायास्तु सङ्गतः ॥८५॥ दिवानिद्रा च ताम्बूलमेकोऽप्यन्नकणोऽशितः । उपवासं निहन्त्येव जलपानं मुहुस्तथा ॥८६॥ स्त्रीभिः शोको न कार्योऽत्र रोदनं सूत्रकर्तनम् । भूरिवस्त्रक्षालनं च सीवनं कलहस्तथा ॥८७॥ निजशक्त्यनुसारेण व्रती संसाधयेद्दिवा । पूजोपहारान्सकलान् निशि सम्पूजयेद्धरिम् ॥८८॥ तत्र कार्यः शुचौ देशे मण्डपश्च सुशोभनः । रम्भास्तम्भैः सुवस्त्रैश्च पुष्पाशोकाम्रपल्लवैः ॥८९॥ रङ्गवल्लीशोभितेऽथ तन्मध्ये पीठ उत्तमे। पञ्चवर्णैर्विरचिते तण्डुलैर्मण्डले शुभे ॥९०॥ सर्वतोभद्रसंज्ञे वा तण्डुलाष्टदले व्रती । अव्रणं ताम्रकलशं स्थापयेदम्बुना भृतम् ।९१॥ पञ्चरत्नाद्युपेतेऽस्मिंस्ताम्रपात्रे सदासने । स्थापयेत्प्रतिमां हैमीं यथाशक्ति कृतां हरेः ॥९२॥ भक्तिधर्मयुतस्यास्य हरिकृष्णस्य यत्र तु । प्रतिमा स्यात्स्थिरा वापि मन्दिरे चञ्चला तु सा ॥९३॥ तस्या एवार्चनं तत्र व्रती कुर्याद्यथाविधि । अन्यत्र हैमी कर्तव्या तन्मूर्तिः पूजनाय तु ॥९४॥ स्थाप्याऽस्य दक्षिणे भक्तिर्वामे धर्मस्तथाविधः । प्रत्यक् सङ्कर्षणश्चास्य स्थाप्यश्छत्रं दधत्करे ॥९५॥ प्रद्युम्नश्चानिरुद्धोऽग्रे धर्मभक्त्योः सचामरौ । स्थाप्यौ हरेरग्रतश्च स्थितो रौप्यस्तथोद्धवः ॥९६॥ धर्माद्युपेतस्य हरेर्महापूजां ततो व्रती । विधाय जागरं कुर्यात्तत्कथाश्रवणादिभिः ॥९७॥ अशक्त उपवासे तु पूजनान्ते हरेर्निशि । किञ्चित्कुर्यात् फलाहारं पिबेद्वा कुडवं पयः ॥९८॥ प्रातः कृत्वा पुनः पूजां कुर्यात्तस्य विसर्जनम् । विप्राय प्रतिमां दत्त्वा सतो विप्रांश्च भोजयेत् ॥९९॥ ततश्च स्वजनैः साकं व्रती कुर्वीत पारणाम् । एवं कृते व्रते सर्वे सफलाः स्युर्मनोरथाः ॥१००॥

---

આ પ્રમાણે વ્રત-કર્તા જન નિયમ ગ્રહણ કરી નિત્યકર્મ સમાપ્ત કરે તે દિવસે વ્યાવહારિક કાર્ય ન કરે. (૮૩) જે ક્રિયા કૃષ્ણ સંબંધી હોય તે જ કર્મ કરવું. બ્રહ્મચર્ય પાલન કરવું, ક્રોધ તો સર્વથા ત્યાગ કરવો. (૮૪) સ્ત્રીઓને જોવાથી, સ્પર્શથી અને સ્ત્રીઓ સાથે સંભાષણથી પણ બ્રહ્મચર્ય નાશ પામે છે. પોતાની ભાર્યાથી તો અંગસંગથી જ બ્રહ્મચર્ય નાશ પામે છે. (૮૫) દિવસની નિદ્રા, તામ્બુલ-ભક્ષણ અને એક પણ અન્નકણનું ભક્ષણ તથા વારંવાર જળપાન, ઉપવાસનો નાશ કરે છે. (૮૬) સ્ત્રીઓએ આ વ્રતને દિવસે શોક કરવો નહિ તથા રડવું, સૂતર કાંતવું, ઘણાં વસ્ત્રો ધોવાં તથા સીવવું તથા કલહ; આ કાર્યો કરવાં નહિ. (૮૭) વ્રતવાળો પોતાની શક્તિને અનુસરી દિવસે સમગ્ર પૂજાના ઉપહારો મેળવીને રાત્રિએ હરિનું પૂજન કરે. (૮૮) તે દિવસે પવિત્ર દેશમાં કેળના થાંભલાઓ, સુંદર વસ્ત્રો, અને પુષ્પો, અશોક, આંબાનાં પલ્લવોથી અતિ સુશોભિત મંડપ કરવો. (૮૯) પછી તેના મધ્યમાં રંગોળીથી શોભાયમાન ઉત્તમ બાજોઠમાં પાંચ વર્ણના રંગોથી રંગાયેલા અક્ષતોથી વિરચિત **સર્વતોભદ્ર** સંજ્ઞાવાળા શુભ મંડલમાં અથવા તંદુલના અષ્ટ દલમાં વ્રતી છિદ્ર રહિત જળથી પૂર્ણ તાંબાનો કળશ સ્થાપન કરે. (૯૦-૯૧) માણિક્યાદિ પંચરત્ન યુક્ત-પાંચ પલ્લવો સહિત આ કળશની ઉપર સુશોભિત અમૂલ્ય વસ્ત્રથી રચિત આસનમાં, યથાશક્તિ કરેલી શ્રીહરિની સુવર્ણની પ્રતિમા સ્થાપન કરે. (૯૨) જે મંદિરમાં ભક્તિ-ધર્મ યુક્ત આ શ્રીહરિકૃષ્ણની સ્થિર પ્રતિમા હોય અથવા ચલાયમાન પ્રતિમા હોય, (૯૩) વ્રતી તે મંદિરમાં ભક્તિ-ધર્મયુક્ત હરિકૃષ્ણની પ્રતિમાનું જ યથાવિધિ પૂજન કરે. તે વિના બીજા સ્થાનમાં પૂજન માટે શ્રીહરિની પ્રતિમા સુવર્ણની કરવી. (૯૪) શ્રીહરિના જમણા ભાગમાં તેવા પ્રકારની સુવર્ણની ભક્તિની પ્રતિમા સ્થાપવી અને ડાબા ભાગમાં તેવા પ્રકારના સુવર્ણના ધર્મ સ્થાપન કરવા. શ્રીહરિના પશ્ચિમ ભાગમાં હાથમાં છત્રને ધારણ કરતાં સંકર્ષણ સ્થાપન કરવા. (૯૫) ધર્મ અને ભક્તિના આગળ ભાગમાં પ્રદ્યુમ્ન-અનિરુદ્ધ : આ બે ચામરોએ સહિત સ્થાપન કરવા. આ સંકર્ષણાદિ ત્રણ, શક્તિ - અશક્તિને અનુસારે સુવર્ણના અથવા ચાંદીના જાણવા તથા હરિની આગળ રહેલા ઉદ્ધવ ચાંદીના સ્થાપન કરવા. (૯૬) પછી વ્રતી ધર્માદિ સહિત હરિની મહાપૂજા કરી તેમની કથા-શ્રવણાદિથી જાગરણ કરે. (૯૭) નિરાહાર ઉપવાસ કરવામાં અશક્ત, બાલ, વૃદ્ધ અને રોગી વિના બીજો કોઈ હોય તો રાત્રિએ હરિની પૂજાના અંતમાં લગારેક ફલાહાર કરે અથવા પાશેર દૂધ પીએ. (૯૮) પ્રાતઃકાલમાં શ્રીહરિની ફરીથી પૂજા કરીને વિસર્જન કરે. પ્રતિમા વિપ્રને આપી સાધુઓ અને બ્રાહ્મણોને જમાડે. (૯૯) પછી વ્રતી સ્વજનોની સાથે પારણાં કરે : આ પ્રકારે વ્રત કર્યે સતે સર્વે મનોરથો સફલ થાય. (૧૦૦) પૂજન વગેરેમાં



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

पूजनादावशक्तस्तु हरिमन्यसमर्चितम् । भक्त्यैव प्रणमेद्दृष्ट्वा तद्भक्तांश्च सतः पुमान् ॥१०१॥ तावता पूजनस्यासौ प्राप्नुयात्फलमञ्जसा । एतद्व्रतं सर्वथाऽतः कर्तव्यं सकलैर्नरैः ॥१०२॥ प्रतिवर्षं विधातव्यं यावज्जीवमिदं व्रतम् । स्त्रीभिश्च पुरुषैः सर्वैर्बालवृद्धातुरान्विना ॥१०३॥ यदा स्वस्यानुकूल्यं स्यात्तदोद्यापनमस्य च । यथाशक्ति विधातव्यं तेन पूर्णं व्रतं भवेत् ॥१०४॥ सुव्रत उवाच – एवमुक्तः स विप्रेण वैश्योऽभूद्धृष्टमानसः । व्रतं चिकीर्षुः पप्रच्छ विधिमुद्यापनस्य तम् ॥१०५॥ वैश्य उवाच – उद्यापनविधिं ब्रूहि व्रतस्यास्य द्विजोत्तम ! । सम्पूर्णफलदं येन तद्भवेद्व्रतचारिणाम् ॥१०६॥ ब्राह्मण उवाच – उद्यापनं विना नैव व्रतं स्यात्फलदं ततः । कर्तव्यं तद्यथाशक्ति वित्तशाठ्यं न कारयेत् ॥१०७॥ प्रतिमासं नवम्यां तु व्रतं कृत्वा यथाविधि । कार्यमुद्यापनं तस्य देशकालानुसारतः ॥१०८॥ अथवोद्यापनं कृत्वा तत आरभ्य च व्रती । प्रतिमासं व्रतं कुर्याद्वर्षमेकं समाहितः ॥१०९॥ गुरुशुक्रास्तरहिते मलमासविवर्जिते । मधौ शुक्लनवम्यां तदित्थमुद्यापनं चरेत् ॥११०॥ विवाहादौ यथा नृणां भवत्युत्साह आदरात् । तथैवात्रापि कर्तव्य उत्साहश्च यथाधनम् ॥१११॥ देशान्तरे भवेयुर्ये निजसम्बधिनो जनाः । मित्राणि हरिभक्ताश्च पत्रैस्तांश्च समाह्वयेत् ॥११२॥ मधोः शुक्लप्रतिपद आरभ्यायं महोत्सवः । यथाधनं यथाशक्ति कर्तव्यो व्रतचारिभिः ॥११३॥ पालनीयं ब्रह्मचर्यं कथा श्रव्यान्वहं हरेः । तदीयगुणपद्यानि गातव्यानि च भक्तितः ॥११४॥ हरेर्भक्ता ब्राह्मणाश्च साधवो ब्रह्मचारिणः । नित्यं चन्दनपुष्पाद्यैः पूज्या भोज्याश्च शक्तितः ॥११५॥ विधिज्ञं ब्राह्मणं पृष्ट्वा प्रागष्टभ्यां सुसाधयेत् । उपहारान् यथावित्तं हरिकृष्णार्चनोचितान् ॥११६॥ कृत्वाह्निकं नवम्यां च सर्वतोभद्रमण्डलम् । शोभनं कारयेद्विप्रैर्मण्डपे निर्मिते शुभे ॥११७॥ चतुर्भिः कदलीस्तम्भैराम्राशोकादिपल्लवैः । पुष्पैः फलैश्च सद्वस्त्रैः शोभयेत्तं च दर्पणैः ॥११८॥ ताम्रान्वा मृन्मयानष्टौ कलशानष्टदिक्षु च । स्थापयेन्मध्यदेशे तु ताम्रजं

---

અશક્ત પુરુષ તો બીજા ગૃહસ્થ ભક્તજને પૂજેલા શ્રીહરિના દર્શન કરી સ્નેહથી પ્રણામ કરે. તથા શ્રીહરિના એકાંતિક ભક્ત એવા સાધુઓનાં દર્શન કરીને ભક્તિથી પ્રણામ કરે. (૧૦૧) અશક્ત પુરુષ તેટલા માત્રથી પૂજનનું ફળ તત્કાલ જ પામે, માટે સમગ્રજનોએ આ વ્રત સર્વ પ્રકારે કરવું. (૧૦૨) બાલ, વૃદ્ધ અને રોગી વિના સર્વ પુરુષોએ અને સ્ત્રીઓએ જીવનપર્યન્ત દરેક વર્ષે આ વ્રત કરવું. (૧૦૩) જ્યારે પોતાને અનુકૂલ હોય ત્યારે આ વ્રતનું **ઉદ્યાપન** શક્તિ પ્રમાણે કરવું. તે ઉદ્યાપનથી વ્રત સંપૂર્ણ થાય. (૧૦૪)

**સુવ્રતમુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે રામશર્મા વિપ્રે કહેવાયેલો વૈશ્ય શિવગુપ્ત પ્રસન્ન મનવાળો થયો. વ્રત કરવા ઇચ્છતો સતો ઉદ્યાપનનો વિધિ બ્રાહ્મણને પૂછવા લાગ્યો : (૧૦૫) હે દ્વિજોત્તમ ! **હરિ-જયંતી** નામના વ્રતનો **ઉદ્યાપનનો વિધિ** કહો; જે ઉદ્યાપનથી વ્રત કરનારાઓને તે વ્રત સંપૂર્ણ ફળ આપનારું થાય. (૧૦૬) હે વૈશ્ય ! વ્રત ઉદ્યાપન વિના ફળ આપનારું થાય નહિ, માટે તેનું ઉદ્યાપન યથાશક્તિ કરવું. તેમાં ધન હોય તો લોભ કરવો નહિ. (૧૦૭) જે વર્ષમાં નવમીથી વ્રતનો આરંભ કરાય તે વર્ષના આગામી દરેક માસમાં શુકલ પક્ષની નવમી તિથિમાં વ્રત કરીને, વર્ષને અંતે તે વ્રતનું ઉદ્યાપન દેશ-કાળને અનુસારે યથાવિધિ કરવું. (૧૦૮) અથવા વ્રતી ઉદ્યાપન કરીને તે દિવસથી આરંભીને એકાગ્ર મનવાળો થઈને એક વર્ષ પ્રતિ-માસ વ્રત કરે. (૧૦૯) ગુરુ શુક્રના અસ્ત રહિત મલમાસથી રહિત ચૈત્ર માસમાં સુદી નવમીને દિવસે ઉદ્યાપન આ પ્રમાણે કરે : (૧૧૦) જેમ વિવાહાદિમાં મનુષ્યોને આદરપૂર્વક ઉત્સાહ થાય તે પ્રકારે આ ઉદ્યાપનમાં ધન પ્રમાણે ઉત્સાહ કરવો. (૧૧૧) દેશાન્તરમાં હરિભક્તો પોતાનાં સંબંધી જનો અને મિત્રો હોય તેમને મંગલ પત્રિકાઓ મોકલીને બોલાવે. (૧૧૨) ચૈત્ર માસની શુકલ પક્ષની પ્રતિપદાથી આરંભીને આ ઉદ્યાપન-સ્વરૂપ મહોત્સવ, વ્રતધારીઓએ જેવું ધન હોય ને શક્તિ હોય તે પ્રમાણે કરવો. (૧૧૩) દરરોજ બ્રહ્મચર્ય પાલન કરવું. હરિની કથા ભક્તિથી સાંભળવી અને શ્રીહરિના ગુણોથી યુક્ત કીર્તનો ભક્તિપૂર્વક ગાવાં. (૧૧૪) હરિના ભક્તો, બ્રાહ્મણો, સાધુઓ અને બ્રહ્મચારીઓને ચંદન પુષ્પાદિથી નિત્ય પૂજવા અને શક્તિ પ્રમાણે જમાડવા. (૧૧૫) વિધિ જાણનાર બ્રાહ્મણને પૂછીને હરિકૃષ્ણના પૂજનના ઉપચારો વિત્ત પ્રમાણે અષ્ટમીને દિવસે પ્રથમથી જ સંપાદન કરે. (૧૧૬) નવમીને દિવસે આહ્નિક કરી શુભ દેશમાં રચેલા મંડપમાં વિપ્રો પાસે સુશોભિત સર્વતોભદ્ર મંડલ કરાવે. (૧૧૭) ચાર કેળના સ્તંભો, આંબા અને આસોપાલવનાં પલ્લવો, પુષ્પો, રંગો, સુન્દર વસ્ત્રો અને દર્પણોથી મંડળને સુશોભિત કરે. (૧૧૮) આઠ દિશાઓમાં

चाव्रणं घटम् ।।११९।। पूगीफलं ताम्रमुद्रा तण्डुला लड्डुकस्तथा । पृथक्पृथग्निधेयाश्च कलशेषु ततोऽष्टसु ।।१२०।। स्थालवद्वेणुपात्राणि तेष्वष्ट स्थापयेत्ततः । नालिकेरं पृथक्तेषु द्वे द्वे वस्त्रे सिते पुमान् ।।१२१।। मध्यमं ताम्रकलशं जलेनापूर्य तत्र च । फलं सरत्नं निक्षिप्य ताम्रपात्रं पिधापयेत् ।।१२२।। मृदुवस्त्रासने तत्र सौवर्णीं प्रतिमां हरेः । यथाशक्ति कृतां धर्माद्युपेतां स्थापयेत्ततः ।।१२३।। यथाविधि महापूजां कुर्यान्निशि महोत्सवम् । महाभिषेकं च महानैवेद्यं तत्र कारयेत् ।।१२४।। पूजाविधिं समाप्याथ हरेस्तच्छ्रवणादिभिः । विधाय जागरं प्रातः पुनः पूजां समाचरेत् ।।१२५।। होमममष्टोत्तरशतं मन्त्रेणाष्टाक्षरेण च । तिलाज्यपायसद्रव्यैस्ततोऽर्चेद्वर्णिनो द्विजान् ।।१२६।। धेनुं पयस्विनीं दद्यात्पात्रविप्राय सादरम् । हेमशृङ्गीं रूप्यखुरां ताम्रपृष्ठीं सुलक्षणाम् ।।१२७।। धेनोः पात्रस्य चालाभे स्वस्याशक्तौ च वा पुमान् । दद्यात्तन्निष्क्रयद्रव्यं कुर्याद्वापि जपादिकम् ।।१२८।। तिलपात्रं चाज्यपात्रं दद्यात्स्वर्णं च शक्तितः । अन्नवस्त्राद्यष्टविधं पदं देयं द्विजाय च ।।१२९।। शय्यादानं ततः कुर्यात्तदशक्तः सुखासनम् । दद्यात्ततश्च वस्त्राणि दम्पत्योरुचितानि सः ।।१३०।। कौशेयानि तानि दद्यात्कार्पासान्यथवाऽधनः । मिश्राणि वा ततः कुर्यात्साङ्गदेवविसर्जनम् ।।१३१।। वर्णिभ्यो वान्यविप्रेभ्यो दधादष्टौ घटांश्च तान् । प्रतिमासहितं कुम्भं मध्यमं गुरवेऽर्पयेत् ।।१३२।। भूयसीं दक्षिणां दत्त्वा साधून्विप्रांश्च भूरिशः । भोजयेदल्पवित्तस्तु विंशतिं द्वादशापि वा ।।१३३।। नवम्या निश आरभ्य पालनान्दोलनोत्सवः । कृष्णद्वितीयापर्यन्तं वीक्ष्यश्च व्रतचारिभिः ।।१३४।। एवं कृते विधाने तु व्रतं सम्पूर्णतामियात् । मनोरथाश्च सफलास्तेन स्युर्व्रतचारिणाम् ।।१३५।। कुरु व्रतं त्वमप्येतन्मित्रत्वाद्वच्मि ते हितम् । इह पुत्रफलं प्राप्य तेन मुक्तिं च यास्यसि ।।१३६।। सुव्रत उवाच –

તાંબાના અથવા મૃત્તિકાના આઠ કલશો સ્થાપન કરે. મંડલના મધ્ય પ્રદેશમાં તો છિદ્ર વિનાનો તાંબાનો ઘડો સ્થાપન કરે. (૧૧૯) પછી સોપારી, તાંબાની મુદ્રા, ચોખા તથા લાડુ એ આઠ કલશોમાં જુદા જુદા મૂકવા. થાળ જેવા વાંસનાં પાત્રો આઠ સ્થાપન કરે. તે વાંસપાત્રોમાં એક એક નાળિયેર અને ધોળા બે બે વસ્ત્રો જુદા જુદા સ્થાપન કરે.(૧૨૦-૧૨૧) મધ્યમાં રહેલા તાંબાના કલશને જળથી ભરીને તે કલશમાં મોતી વગેરે કોઈ રત્ન સહિત ફળ મૂકીને તાંબાનું પાત્ર ઉપર મુકે. (૧૨૨) પછી તાંબાના પાત્રમાં કોમળ વસ્ત્રના આસનમાં શક્તિ પ્રમાણે કરેલી ધર્માદિયુક્ત હરિની સુવર્ણની પ્રતિમાનું સ્થાપન કરે. (૧૨૩) નવમીની રાત્રિમાં વિધિ પ્રમાણે **મહાપૂજા** કરે. તે મહાપૂજામાં મહોત્સવ, મહાભિષેક અને મહાનૈવેદ્ય કરાવે. (૧૨૪) હરિનો મહાપૂજાનો વિધિ સમાપ્ત કરીને પછી શ્રીહરિની કથા-શ્રવણાદિથી જાગરણ કરી સવારમાં ફરી પૂજા કરે. (૧૨૫) પછી તલ,ઘી અને દૂધપાક-દ્રવ્યો વડે અષ્ટાક્ષર મંત્રથી એકસો આઠ હોમ કરે, પછી વર્ણીઓ અને વરેલા બ્રાહ્મણોને પૂજે. (૧૨૬) બહુ દૂધવાળી, સોનાની શીંગડીઓ-રૂપાની ખરીઓ-તામ્ર પૃષ્ઠવાળી, સારા લક્ષણવાળી ગાય પાત્ર બ્રાહ્મણને આદરપૂર્વક આપે. (૧૨૭) ગાય અને પાત્ર બ્રાહ્મણ ના મળે તો અથવા પોતાની અશક્તિ હોય તો વ્રતધારી તેનું મૂલ્ય આપે અથવા મંત્રની આવૃત્તિ, સ્તોત્ર પાઠાદિ કરે. (૧૨૮) તલનું પાત્ર, ઘીનું પાત્ર અને સુવર્ણ શક્તિ પ્રમાણે પાત્ર બ્રાહ્મણને આપે અને અન્ન-વસ્ત્રાદિ આઠ પ્રકારનું દાન આપે. (૧૨૯) પછી વ્રતધારી શય્યાદાન કરવા માટે અશક્ત તો સુખાસન આપે, પછી સ્ત્રી-પુરુષને યોગ્ય વસ્ત્રો આપે. (૧૩૦) દંપતીનાં વસ્ત્રો રેશમી આપે અથવા નિર્ધન હોય તે કપાસનાં આપે અથવા મિશ્ર આપે. પછી અંગ-દેવોએ સહિત શ્રીહરિનું વિસર્જન કરે. (૧૩૧) પૂર્વે કહેલા આઠ ઘડાઓ વર્ણીઓને અથવા બીજા બ્રાહ્મણોને આપે. પ્રતિમા સહિત મધ્યનો કુંભ ગુરુને આપે. (૧૩૨) ઘણી દક્ષિણા બ્રાહ્મણોને આપીને ઘણા સાધુઓ અને વિપ્રોને જમાડે. થોડા દ્રવ્યવાળો તો વીસ સાધુ-બ્રાહ્મણોને અથવા બાર સાધુ-બ્રાહ્મણોને ભોજન કરાવે. (૧૩૩)નવમીની રાત્રિથી આરંભીને ચૈત્ર વદી દ્વિતીયા સુધી વ્રત કરનારાઓએ બાલરૂપ શ્રીહરિનો પારણાનો મહોત્સવ સંદર્શન કરવા યોગ્ય છે.(૧૩૪) આ પ્રમાણે ઉદ્યાપન-વિધિ કર્યે સતે તો વ્રત સંપૂર્ણતાને પામે, તે સંપૂર્ણ વ્રતથી વ્રતચારીઓના મનોરથો સફલ થાય. (૧૩૫) હે વૈશ્ય! તમે પણ આ વ્રત કરો. તમારો અને મારો મિત્રભાવ હોવાથી તમારું હિત કહું છું. તે વ્રતથી આ લોકમાં પુત્ર-ફળને પામીને અંતે મોક્ષને પણ પામશો. (૧૩૬)

इत्युक्तः स सुधीर्वैश्यो निश्चित्य हरिमीश्वरम् । विश्वस्तो विप्रवचने तं प्रपन्नोऽभवद्दृढम् ॥१३७॥ गृहमेत्य सभार्योऽथ व्रतं चक्रे यथाविधि । कालेनाल्पेन सत्पुत्रं प्रसादात्प्राप स प्रभोः ॥ १३८॥ ततोऽन्ये बहवो भक्ताः स्वस्वकार्यस्य सिद्धये । व्रतमेतद्विधायापुर्वाञ्छितं सकलं फलम् ॥१३९॥ इति प्रोक्तो मया भूप ! जयन्तीविधिरुत्तमः। हरिकृष्णस्य भक्तानां वाञ्छितोऽभीष्टसिद्धिदः ॥१४०॥ भक्त्या पुमान् यः शृणुयाज्जयन्त्या विधिं हरेर्यः परिकीर्तयेद्वा । तौ प्राप्नुयातां हि फलं व्रतस्य हरेः प्रसादात्स्वमभीप्सितं च ॥१४१॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे श्रीहरिजयन्तीव्रतविधिनिरूपणनामैकोनसप्ततितमोऽध्यायः ॥६९॥

सुव्रत उवाच - नारायणस्य चरितमिति ते मङ्गलप्रदम् । भवत्प्रश्नानुसारेण क्रमेण कथितं नृप! ॥१॥ तत्रादितस्ते कथितो हिमाद्रौ बदरीवने । समागमो महर्षीणां नरनारायणेन च ॥२॥ धर्मस्यापि स्त्रिया तत्रागमनं च ततः परम्। शापाद्दुर्वाससो नृत्वमेतेषां कथितं नृप! ॥३॥ उद्धवस्य च धर्मस्य मूर्तेश्च जननं भुवि । ऋषीणां चापि कथितं धर्मोद्वाहस्ततः परम् ॥४॥ असुरोपद्रुतस्याथ धर्मस्य सह योषितः । रामानन्दस्वामिगुरोः समाश्रय उदीरितः ॥५॥ पुनर्दैत्यांशभूपाद्यैः क्लेशितस्य वृषस्य च । हनूमदाज्ञया प्रोक्तो गेहाद्वृन्दावनागमः ॥६॥ विष्णुयागाराधितस्य श्रीकृष्णस्येक्षणादि च । धर्मस्य शापश्चारण्ये द्रौणेः प्रोक्तस्ततः परम् ॥७॥ शापश्च विन्ध्यवासिन्या आसुराणामुदीरितः। प्रादुर्भावोत्सवः प्रोक्तस्ततो धर्मगृहे हरेः ॥८॥ तन्नामकर्म चौलं च कालीदत्तोपमर्दनम् । पौगण्डलीलाऽयोध्यायां हरेश्च व्रतबन्धनम् ॥९॥ हरिगीता

**સુવ્રતમુનિ કહે છે :** હે રાજન્ ! આ પ્રકારે કહેવાયેલો બુદ્ધિશાળી તે વૈશ્ય, વિપ્રના વચનમાં વિશ્વાસવાળો થઈને પરમેશ્વરનો નિશ્ચય કરી શ્રીહરિને દૃઢ જેમ હોય તેમ પ્રસન્ન થઈ શરણને પામ્યો. (૧૩૭) પછી ભાર્યાએ સહિત તે વૈશ્યે ઘેર જઈને યથાવિધિ વ્રત કર્યું, શ્રીહરિના અનુગ્રહથી થોડા સમયમાં સત્પુત્રને પામ્યો. (૧૩૮) પછી બીજા ઘણા ભક્તો પોતપોતાના કાર્યની સિદ્ધિ માટે આ વ્રત કરીને ઇચ્છિત સમગ્ર ફલને પામ્યા. (૧૩૯) હે રાજન્ ! આ પ્રકારે મેં હરિકૃષ્ણના ભક્તોને ઇચ્છિત અભીષ્ટ સિદ્ધિને આપનારો જયંતીવિધિ કહ્યો. (૧૪૦)

જે પુરુષ હરિની જયંતીનો વિધિ ભક્તિથી સાંભળે અથવા પરિકીર્તન કરે તે બંને જણ શ્રીહરિના પ્રસાદથી વ્રતના ફળરૂપ પોતાનું ઇચ્છિત પામે જ. (૧૪૧)

*ઇતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે શ્રીહરિજયંતી વ્રતવિધિનિરૂપણ-નામૈકોનસપ્તતિમોઽધ્યાયઃ (૬૯)*

## અધ્યાય : ૭૦

### સત્સંગિજીવન ગ્રંથનો અનુક્રમ અને તેનો ઉત્કર્ષ સર્વપ્રકારે સુંદર નિરૂપણ કર્યો છે.

**સુવ્રત મુનિ બોલ્યા :** હે નૃપ ! આ પ્રકારે મંગલ આપનાર શ્રીહરિકૃષ્ણ ભગવાનનું ચરિત્ર તમારા પ્રશ્નને અનુસારે અનુક્રમથી તમોને કહ્યું. (૧) શ્રી નારાયણનાં ચરિત્રોમાં પ્રથમથી હિમાદ્રિમાં બદરીવનમાં નારાયણની સાથે મરીચ્યાદિ મહામુનિનો સમાગમ તમોને કહ્યો. મહર્ષિઓએ કરેલું ભારતભૂમિમાં અધર્મની વૃદ્ધિનું નિવેદન કહ્યું. (૨) હે રાજન્ ! પછી શ્રી નારાયણની સમીપે મૂર્તિ પત્નીની સાથે ધર્મનું આગમન પણ કહ્યું. દુર્વાસાના શાપથી મહર્ષિઓનો મનુષ્યભાવ કહ્યો. (૩) ઉદ્ધવ, ધર્મ, મૂર્તિ અને ઋષિઓનો પણ પૃથ્વીમાં મનુષ્યભાવથી જન્મ કહ્યો. તેથી પર ભક્તિની સાથે ધર્મનો વિવાહ કહ્યો. (૪) પછી અસુરોએ પીડા પમાડેલા સ્ત્રીએ સહિત ધર્મને ગુરુ રામાનંદ સ્વામીનો સમાશ્રય તમોને કહ્યો. (૫) ફરી દૈત્યાંશ રાજાઓએ પીડા પમાડેલા ધર્મે આરાધના કરાયેલા હનુમાનજીની આજ્ઞાથી પોતાના ભવનથી વૃન્દાવનમાં ગયા તે કહ્યું. (૬) પછી વિષ્ણુયાગથી આરાધન કરાયેલા શ્રીકૃષ્ણના ધર્મ અને મરીચ્યાદિ મુનિઓને દર્શન અને વર-પ્રદાનાદિ કહ્યું. અરણ્યમાં ધર્મને અશ્વત્થામાનો શાપ કહ્યો. (૭) પછી વિન્ધ્યવાસિની દેવીનો અસુરાંશથી ઉત્પન્ન થયેલા કાલીદત્તાદિને શાપ કહ્યો. તે પછી ધર્મના ગૃહમાં હરિના પ્રાદુર્ભાવનો મહોત્સવ કહ્યો. (૮) પછી શ્રીહરિનો નામ-સંસ્કાર અને ચૌલ સંસ્કાર, કાલીદત્તનો વિનાશ, અયોધ્યામાં શ્રીહરિની પૌગંડલીલા કહી, તથા ઉપનયન સંસ્કાર કહ્યો. (૯) તે પછી માતાને ઉદ્દેશીને



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ततो भक्तिधर्मदिव्यगतिस्तथा । ततो हरेः प्रव्रज्या च भैरवीयपराजयः ॥१०॥ पुलहाश्रम उक्तं च भास्करस्य प्रसादनम् । योगाभ्यासः पिबैकादिमहाशाक्तपराजयः ॥११॥ तत उत्कलदेशीयासुरसङ्घपराभवः । तीर्थयात्रा हरेश्चोक्ता पार्वतीशङ्करेक्षणम् ॥१२॥ प्रोक्तस्ततो लोजपुर औद्धवीयसमागमः । रामानन्दस्वामिनोऽथ दर्शनं चास्य शिष्यता ॥१३॥ हरेर्गुरुत्वस्वीकारो दिव्यभावप्रदर्शनम् । पराजयो मेघजितः स्वप्रतापप्रदर्शनम् ॥१४॥ प्रादुष्कारः समाधीनां कृष्णरूपप्रदर्शनम् । नारायणस्य गीतोक्ता लोभादीनां च दुष्टता ॥१५॥ अहिंस्रधर्मस्य भुवि स्थापनं हरिणा कृतम् । प्रोक्तस्ततश्च संवादः खट्वाङ्ग-भयभूभुजोः ॥१६॥ अभयस्य प्रार्थनया हरेर्दुर्गपुरागमः । गवेन्द्रभूमिपालाय वरदानमथोदितम् ॥१७॥ उद्धवाध्वप्रकटनं नानाग्रामपुरेष्वथ । हरेर्विचरणं तत्र धर्मस्थापनमञ्जसा ॥१८॥ नानायज्ञविधानं च कौलादिमतखण्डनम् । हरेर्दिग्विजयः प्रोक्तो निवासो दुर्गपत्तने ॥१९॥ भक्त्युत्कर्षश्चोत्तमादेर्हरिसेवाव्यवस्थितिः । सविस्तरं ततः प्रोक्तो ह्यन्नकूटमहोत्सवः ॥२०॥ ततः सभास्वनुदिनं भक्तसङ्घानुरञ्जनम् । प्रकाशनं च सत्सङ्गदीपस्य हरिणा कृतम् ॥२१॥ धर्मरक्षा ततः स्पर्शविवेकस्तेन कीर्तितः । धर्मसिद्धिश्च निष्कामशुद्धिश्चोक्तं सदाह्निकम् ॥२२॥ कृष्णस्वरूपाद्वैतं च कृष्णमन्त्रजपे विधिः । एकादशीविधानं च प्रबोधन्युत्सवो महान् ॥२३॥ वृत्तालयपुरेऽथोक्तः पुष्पदोलोत्सवो महान् । पुराणश्रवणस्याथ विधिः सर्वो निरूपितः॥२४॥ श्रीमद्भागवतस्योक्तं माहात्म्यं तु विशेषतः । जन्माष्टम्युत्सवः प्रोक्तस्ततः सारङ्गपत्तने ॥२५॥ नागटङ्कपुरे यानं ततः प्रोक्तं हरेर्नृप! । पञ्चाले गमनं तत्र प्रोक्तः श्रुत्यर्थनिर्णयः ॥२६॥ ततः श्रीनगरे प्रोक्ता

હરિગીતા કહી તથા ભક્તિ ધર્મને દિવ્યગતિની પ્રાપ્તિ કહી તથા શ્રીહરિનો ગૃહત્યાગ કહ્યો. પછી વડના વૃક્ષમાં નિવાસ કરીને રહેલા ભૈરવનો પરાભવ કહ્યો. (૧૦) પછી પુલહાશ્રમમાં સૂર્યનારાયણની પ્રસન્નતા કહી, ગોપાલયોગીની સમીપે શ્રીહરિનો અષ્ટાંગયોગનો અભ્યાસ કહ્યો. અને પિબૈકાદિ મહાશાક્તનો પરાજય કહ્યો. (૧૧) પછી જગન્નાથપુરી વગેરેમાં અસુરસમુદાયનો પરાજય કહ્યો અને હરિની તીર્થયાત્રા કહી. તથા પાર્વતી અને શંકરનાં દર્શન કહ્યાં. (૧૨) પછી લોજપુરમાં ઉદ્ધવના શિષ્યો જે મુક્તાનંદાદિ તેમનો સમાગમ કહ્યો, પછી રામાનંદ સ્વામીનું દર્શન; તથા તે રામાનંદ સ્વામીના શ્રીહરિ શિષ્ય થયા તે કહ્યું. (૧૩) પછી શ્રીહરિએ રામાનંદ સ્વામીની આજ્ઞાથી રામાનંદ સ્વામીના શિષ્યોનો ગુરુભાવ સ્વીકાર કર્યો તે કહ્યું : **(આ પ્રમાણે પ્રથમ પ્રકરણનો અનુક્રમ છે.)** પછી દિવ્ય ભાવ-પ્રદર્શન, વાપિકા ઉત્સર્ગ-કર્મમાં શ્રીહરિએ દિવ્યભાવથી પોતાના ભક્તોને દર્શન આપ્યા તે કહ્યું. મેઘજીત નામના વણિકનો પરાજય કહ્યો. માંગરોલપુરમાં મતવાદીઓને તેના ઈષ્ટદેવોનાં દર્શન કહ્યાં. (૧૪) સમાધિઓનો પ્રાદુર્ભાવ કહ્યો. કૃષ્ણરૂપનું પ્રદર્શન કહ્યું. નારાયણ ગીતા કહી. લોભાદિ પાંચ દોષોની દુષ્ટતા કહી. (૧૫) પછી પૃથ્વીમાં શ્રીહરિએ કરેલું અહિંસા-ધર્મનું સ્થાપન કહ્યું; પછી ખટ્વાંગ રાજા અને અભય રાજાનો સંવાદ કહ્યો. (૧૬) પછી અભય રાજાની પ્રાર્થનાથી શ્રીહરિ કારીયાણી ગામથી દુર્ગપત્તનમાં આવ્યા તે કહ્યું, પછી ગવેન્દ્ર રાજાને વરદાન આપ્યું તે કહ્યું. (૧૭) પછી ઉદ્ધવ સંપ્રદાયનું શિવરામ બ્રાહ્મણના પ્રતિ પ્રકાશન કહ્યું, પછી અનેક ગ્રામો અને પુરોમાં શ્રીહરિનું વિચરણ કહ્યું, ત્યાં અનાયાસથી ધર્મનું સ્થાપન કર્યુ તે કહ્યું. (૧૮) પછી નાના પ્રકારના યજ્ઞોનું વિધાન અને કૌલાદિ મતનું ખંડન કહ્યું. હરિનો દિગ્વિજય કહ્યો, દુર્ગપત્તનમાં હરિનો નિવાસ કહ્યો : **(આ પ્રમાણે બીજા પ્રકરણનો અનુક્રમ છે.)** (૧૯)

પછી પોતાની બહેનો વગેરે સહિત ઉત્તમ રાજાની ભક્તિનો ઉત્કર્ષ કહ્યો. હરિની સેવાની વ્યવસ્થિતિ કહી, પછી વિસ્તારે સહિત જેમ હોય તેમ અન્નકૂટનો મહોત્સવ કહ્યો. (૨૦) પછી દરરોજ સભામાં ભક્ત-સમુદાયોને કથાવાર્તાથી આનંદ પમાડતા તે કહ્યું : શ્રીહરિએ કરેલું સત્સંગદીપનું પ્રકાશન કહ્યું. (૨૧) પછી શ્રીહરિએ ધર્મની રક્ષા કહી. સ્પર્શ વિવેક કહ્યો. ધર્મસિદ્ધિ અને નિષ્કામશુદ્ધિ કહી અને સાધુઓનું આહ્નિક-કર્મ કહ્યું. (૨૨) કૃષ્ણસ્વરૂપનું અદ્વિતીયપણું, કૃષ્ણમંત્રના જપમાં વિધિ, એકાદશીનું વિધાન અને મહાન પ્રબોધિનીનો ઉત્સવ કહ્યો. (૨૩) પછી વૃત્તાલયમાં મહાન પુષ્પદોલોત્સવ કહ્યો. **(આ પ્રમાણે તૃતીય પ્રકરણનો અનુક્રમ છે.)** પછી પુરાણશ્રવણનો સર્વ વિધિ નિરૂપણ કર્યો. (૨૪)

પછી શ્રીમદ્ ભાગવતનું માહાત્મ્ય વિશેષપણે કહ્યું; પછી સારંગપુરમાં જન્માષ્ટમીનો ઉત્સવ કહ્યો. (૨૫) હે રાજન્! પછી નાગડકાપુરમાં શ્રીહરિનું કારીયાણી ગામથી ગમન કહ્યું. પંચાલા ગામમાં હરિનું ગમન કહ્યું, ત્યાં શ્રુતિઓના અર્થનો

नरनारायणस्य च । प्रतिष्ठा विधिवत्प्रोक्ता भुजङ्गनगरे च सा ॥२७॥ वृत्तालये प्रतिष्ठोक्ता लक्ष्मीनारायणस्य च । आगमो द्वारिकेशस्य तत्र चोक्तस्ततः परम् ॥२८॥ ततस्त्रियुगशब्दार्थनिर्णयश्च निरूपितः । स्वीकारः पुत्रयोश्चोक्तो गुरुत्वे स्थापनं तयोः ॥२९॥ वटपत्तन उक्तं च सहर्षेर्गमनं हरेः। सिंहजिद्भूपसन्मानः शिक्षापत्र्याश्च लेखनम् ॥३०॥ दोलोत्सवः श्रीनगरे भाल्लदेशागमो हरेः। राधाकृष्णस्य धौरेयनगरे स्थापनं ततः ॥३१॥ दीक्षाविधेश्चोपदेशस्तस्य भूमौ प्रवर्तनम् । व्रतोत्सवानां च विधिः साधुधर्मानुशासनम् ॥३२॥ ज्ञानोपदेशश्च ततः साङ्ख्यशास्त्रार्थनिश्चयः । ततो धर्मोपदेशश्च कथितस्ते नराधिप ! ॥३३॥ वर्णानामाश्रमाणां च तद्बाह्यानां च सर्वशः। स्त्रीणां च कथिता धर्मा हरिणा तत्र विस्तरात् ॥३४॥ महतां च लघूनां च सर्वेषामेनसां तथा । प्रायश्चित्तविधानं च कृच्छ्राणां लक्षणानि च ॥३५॥ जीर्णदुर्गे प्रतिष्ठोक्ता द्वारिकाधीश्वरस्य च । ततो धर्माश्च कथिता नैष्ठिकब्रह्मचारिणाम् ॥३६॥ गोपीनाथस्य च ततः प्रतिष्ठा दुर्गपत्तने । साङ्ख्योगस्योपदेशो योगशास्त्रार्थसङ्ग्रहः ॥३७॥ वरदानं ततः प्रोक्तं शतानन्दमहर्षये । सत्सङ्गिजीवनस्याथ तेनैव च विधापनम् ॥३८॥ स्वीयाविर्भावहेतोश्च विचारो भक्तबोधनम् । हरेरन्तर्धिलीलोक्ता जयन्त्याश्च विधिस्ततः ॥३९॥ एवं मया ते नृपते ! हरेश्चरितमद्भुतम् । उक्तं क्रमेण सकलं यथापृष्टं त्वया तथा ॥४०॥ सत्सङ्गिजीवनमिदं शास्त्रं परमपावनम् । शतानन्दो मुनिः कृत्वा मामपाठयदञ्जसा ॥४१॥ मया ते कथितं सर्वं प्रीत्या शुश्रूषवे नृप ! । वेदशास्त्रपुराणानां साररूपमिदं परम् ॥४२॥ सन्तं तमीशं भुवि संश्रिता ये सत्सङ्गिनस्ते कथिता हि तेषाम् । भवत्यदो जीवनमेव यस्मात्तत्सर्वथा सेव्यमिदं सदा

નિર્ણય કહ્યો. (૨૬) પછી શ્રીનગરમાં નરનારાયણની પ્રતિષ્ઠા, વિધિ પ્રમાણે કરી તે કહી. (૨૭) પછી વૃત્તાલયપુરમાં લક્ષ્મીનારાયણની પ્રતિષ્ઠા કહી. (શ્રીહરિ આદિ મૂર્તિઓની પ્રતિષ્ઠાનું ચકારથી ગ્રહણ કરેલું છે) અને વૃત્તાલયપુરમાં દ્વારિકેશનું આગમન કહ્યું. (૨૮) પછી ત્રિયુગ શબ્દાર્થ નિર્ણય નિરૂપણ કર્યો. રામપ્રતાપ અને ઈચ્છારામના પુત્રોનો દત્તવિધિથી પોતાના પુત્રપણે સ્વીકાર કર્યો તે કહ્યો તેમજ તે અયોધ્યાપ્રસાદ અને રઘુવીર નામના પોતાના પુત્રોનું સ્વાશ્રિત જનોના આચાર્યપણામાં સ્થાપન કહ્યું. (૨૯) પછી વડોદરામાં મુનિમંડલોએ સહિત શ્રીહરિનું ગમન કહ્યું. સયાજીરાવ મહારાજાએ શ્રીહરિનું સન્માન કર્યું તે કહ્યું અને શિક્ષાપત્રીનું લેખન કહ્યું. (૩૦) શ્રી નગરમાં દોલોત્સવ કહ્યો શ્રીહરિનું ભાલ દેશમા આગમન કહ્યું. ધોલેરા નગરમાં શ્રીરાધિકા અને મદનમોહનનું સ્થાપન કહ્યું. (૩૧) પછી દીક્ષા વિધિનો ઉપદેશ કહ્યો. દીક્ષા-વિધિનું ભૂમિમાં પ્રવર્તન કહ્યું અને વ્રતોત્સવોનો વિધિ કહ્યો અને સાધુઓના ધર્મનો ઉપદેશ(ધર્મામૃત) કહ્યું. (૩૨) પછી જ્ઞાનનો ઉપદેશ અને સાંખ્યશાસ્ત્રના અર્થનો નિશ્ચય કહ્યો. **(આ પ્રમાણે ચોથા પ્રકરણનો અનુક્રમ છે.)** હે રાજન્ ! પછી ધર્મોપદેશ તમોને કહ્યો છે. (૩૩)

ધર્મોપદેશમાં વર્ણો, આશ્રમો તેનાથી બાહ્યો તથા સ્ત્રીઓના સર્વેના પણ ધર્મો શ્રીહરિએ વિસ્તારથી કહ્યા છે. (૩૪) પછી મોટાં અને નાના સર્વે પાપોનું પ્રાયશ્ચિત્તવિધાન કહ્યું તથા ચાન્દ્રાયણાદિ કૃચ્છ્રવ્રતોનાં લક્ષણો કહ્યાં. (૩૫) પછી જુનાગઢમાં દ્વારિકાધીશની પ્રતિષ્ઠા કહી. (રાધારમણ સિધ્ધેશ્વરાદિની પ્રતિષ્ઠાનું ગ્રહણ ચકારથી કરેલું છે) પછી નૈષ્ઠિક બ્રહ્મચારીઓના ધર્મો કહ્યા. (૩૬) પછી દુર્ગપત્તનમાં ગોપીનાથની પ્રતિષ્ઠા કહી. સાંખ્યયોગનો ઉપદેશ અને યોગશાસ્ત્રનો સંગ્રહ કહ્યો. (૩૭) પછી શતાનંદ મહર્ષિને ઈચ્છિત ગ્રંથ રચવારૂપ વરદાન આપ્યું તે કહ્યું. પછી તેમના દ્વારા જ સત્સંગિજીવન શાસ્ત્રની રચના કહી. (૩૮) પછી પોતાના પ્રાદુર્ભાવના હેતુની પરિપૂર્ણતાના વિચારપૂર્વક શ્રીહરિએ ભક્તોને આપેલા બોધનો ઉપદેશ કહ્યો. પછી હરિની અંતર્ધાન-લીલા કહી અને હરિજયંતીનો વિધિ કહ્યો. (૩૯) હે નૃપતે ! આ પ્રકારે જેમ તમોએ પૂછ્યું તે પ્રકારે અલૌકિક સમગ્ર શ્રીહરિનું ચરિત્ર અનુક્રમથી તમોને મેં કહ્યું. (૪૦) પરમ પાવન આ 'સત્સંગિજીવન' શાસ્ત્રની રચના કરીને શતાનંદ મુનિ તત્ત્વથી મને ભણાવતા હતા. (૪૧) હે નૃપ ! અતિ આદરથી સાંભળવા માટે ઈચ્છતા તમોને મેં તે સમગ્ર સત્સંગિજીવન શાસ્ત્ર કહ્યું. આ શાસ્ત્ર સમગ્ર વેદ-શાસ્ત્ર-પુરાણોના પરમ સારરૂપ છે. (૪૨) પૃથ્વીમાં સદા સત્ય સ્વરૂપ પરમેશ્વર શ્રીહરિને જે જનો સર્વ પ્રકારે શરણને પામેલા છે તે સત્સંગીઓ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तैः ॥४३॥ एतस्य पठनादेव वेदादेः पाठजं फलम् । द्विजन्मा प्राप्नुयान्नूनं सर्वयज्ञफलं तथा ॥४४॥ चातुर्वर्ण्यो नरः स्त्री वा श्रुत्वैतत् परमादरात् । इह लोके परे वापि प्राप्नुयात्सुखमीप्सितम् ॥४५॥ ब्राह्मणः प्राप्नुयाद्बुद्धिमाधिपत्यं च बाहुजः । सम्पदं श्रवणादस्य वैश्यः शूद्रस्तथा सुखम् ॥४६॥ येन येन च कामेन पठेद्वा शृणुयादिदम्। तं तमाप्नोति पुरुषो निष्कामो भक्तिमुत्तमाम् ॥४७॥ पुरश्चरणमेतस्य ये करिष्यन्ति च द्विजाः । सर्वे मनोरथास्तेषां सिद्धिमाप्स्यन्ति निश्चितम् ॥४८॥ धर्मं ज्ञानं च वैराग्यं भक्तिं वा ये बुभुत्सवः। नराः स्युस्तैरयं ग्रन्थः सेवनीयः प्रयत्नतः ॥४९॥ येषां निःश्रेयसेच्छा स्यात्तैरयं तु विशेषतः। श्रोतव्यः पठनीयश्च ग्रन्थोऽभीष्टफलप्रदः ॥५०॥ एतज्ज्ञानवतां पुंसां ज्ञेयं किञ्चिन्न शिष्यते । तस्मात्सर्वप्रयत्नेन सेव्योऽयं स्वहितार्थिभिः ॥५१॥ नारायणाय मुनये कृष्णाय हरये नमः । शतानन्दाय गुरवे तद्भक्ताय नमोनमः ॥५२॥ इति राजा सुव्रतेन मुनिवर्येण कीर्तितम् । नारायणस्य चरितं स श्रुत्वा मुदितोऽब्रवीत् ॥५३॥ धन्योऽहं मुनिशार्दूल ! सफलं मे नृजन्म च । समागमेन भवतो जातमेव न संशयः ॥५४॥ नारायणचरित्राणि श्रुत्वानन्दो महान् हृदि । महामुनेऽद्य जातो मे वक्तुं शक्नोमि तं न हि ॥५५॥ त्वं तु धन्योऽसि येनेह साक्षात्संसेवितो हरिः । वशीकृतः स भक्त्या च कृपापात्रं तथाऽस्य च ॥५६॥ सतां परोपकारित्वमस्ति स्वाभाविकं मुने !। अस्मादृशां हि बोधाय चरसि त्वं धरातले ॥५७॥ अहं च तव शिष्योऽस्मि त्वामेव शरणं गतः । कुरु मेऽनुग्रहं येन साक्षादीक्षेय तं प्रभुम् ॥५८॥ इति प्रतापसिंहेन सोऽर्थितो मुनिराह तम् । यथाश्रुतं हरिं राजन् ! ध्याय दास्यति दर्शनम् ॥५९॥ ग्रन्थमेतं तु ये प्रीत्या शृणुयुस्तेभ्य ईश्वरः। दद्यात्स्वदर्शनं चेति शतानन्द उवाच माम् ॥६०॥

---

કહેલા છે. તે સત્સંગીઓને આ શાસ્ત્ર જે કારણથી જીવનરૂપ જ છે માટે તે સત્સંગીઓએ આ શાસ્ત્ર સર્વ પ્રકારે સેવવા યોગ્ય, અર્થાત્ નિરંતર પઠન-શ્રવણાદિથી અભ્યાસ કરવા યોગ્ય છે. (૪૩) આ શાસ્ત્રના પઠનથી જ ત્રણ વર્ણના દ્વિજ, વેદાદિના પાઠથી ઉત્પન્ન થતા ફળને પામે તથા સર્વ યજ્ઞના ફળને પામે જ. (૪૪) ચાર વર્ણનો માણસ અથવા તેવા પ્રકારની નારી આ શાસ્ત્ર પરમાદરથી સાંભળી આ લોકમાં અને પરલોકમાં ઇચ્છિત સુખ પામે. (૪૫) બ્રાહ્મણ આ શાસ્ત્રના શ્રવણથી શાસ્ત્રપારંગત બુદ્ધિને પામે, ક્ષત્રિય રાજ્ય પામે, વૈશ્ય ધન-સમૃદ્ધિ પામે તથા શૂદ્ર સુખ પામે. (૪૬) સકામી ભક્તજન જે જે મનોરથથી આ શાસ્ત્ર ભણે અથવા સાંભળે તે તે મનોરથને પામે. નિષ્કામી એકાંતિકી ભક્તિ પામે છે. (૪૭) જે બ્રાહ્મણો આ શાસ્ત્રનું એકસો આઠ પારાયણસ્વરૂપ પુરશ્ચરણ કરશે તે બ્રાહ્મણોના સર્વે મનોરથો સિદ્ધિને નિશ્ચિત પામશે. (૪૮) જે મનુષ્યો ધર્મ, જ્ઞાન, વૈરાગ્ય અને ભક્તિ જાણવા ઇચ્છતા હોય તે ધર્માદિ જાણવા ઇચ્છતા પુરુષોએ આ ગ્રંથ પ્રયત્નથી સેવા કરવા યોગ્ય છે. (૪૯) જે જનોને પોતાના કલ્યાણની ઇચ્છા હોય તેમણે તો અભીષ્ટ ફળ આપનારો આ ગ્રંથ વિશેષપણે સાંભળવા યોગ્ય અને પાઠ કરવા યોગ્ય છે. (૫૦) જેથી આ ગ્રંથમાં કહેલા અર્થને જાણનારા પુરુષોને કંઈ પણ જાણવા યોગ્ય બાકી રહેતું નથી માટે પોતાના હિતને ઇચ્છતાં જનોએ આ ગ્રંથ પ્રયત્નપૂર્વક સેવન કરવા યોગ્ય છે. (૫૧) **(હાલમાં કથાની સમાપ્તિ કરતાં સુવ્રત મુનિ પોતાના ઈષ્ટદેવ અને ગુરુને પ્રણામ કરે છેઃ)** નારાયણ મુનિ નામના શ્રીકૃષ્ણ શ્રીહરિને નમસ્કાર. શ્રીહરિકૃષ્ણનાં એકાંતિક ભક્ત. ગુરુ શતાનંદ મુનિને નમસ્કાર થાઓ. (૫૨) (આ પ્રકારે મુનિવર્ય સુવ્રતે કહેલું છે.) શ્રીહરિકૃષ્ણ ભગવાનનું ચરિત્ર સાંભળીને તે **પ્રતાપસિંહ રાજા** પ્રસન્ન થઈને બોલ્યા, (આ શતાનંદ મુનિની ઉક્તિ છે.) (૫૩) હે મુનિશાર્દૂલ ! હું ધન્ય છું, મારો મનુષ્ય અવતાર તમારા સમાગમથી સફલ થયો, આ વિષયમાં સંશય નથી જ. (૫૪) હે મહામુને ! નારાયણચરિત્રોને સાંભળી મારા મનમાં હાલમાં મહાઆનંદ થયો છે તે મહાનંદને કહેવા હું શક્તિમાન નથી જ. (૫૫) હે સુવ્રતમુને ! તમો તો ધન્ય છો. જે તમોએ આ લોકમાં સાક્ષાત્ હરિ, પ્રત્યક્ષ શ્રીહરિકૃષ્ણ ભગવાન દર્શન, સ્પર્શ, અર્ચનાદિથી ઉપાસના કરાયેલા છે. અને તે શ્રીહરિ ભક્તિથી વશ કરાયેલા છે તથા શ્રીહરિના તમો કૃપાપાત્ર છો. (૫૬) હે મુને ! તમારા સમાન સાધુઓનું પરોપકારીપણું સ્વાભાવિક છે, કારણ કે તમો અમારા સમાન જનોને સાક્ષાત્ ભગવાનના સ્વરૂપના જ્ઞાનોપદેશ માટે પૃથ્વીમાં વિચરણ કરો છો. (૫૭) હું તમારો શિષ્ય છું, તમારા જ શરણને પામેલો છું માટે મારા ઉપર અનુગ્રહ કરો. જે તમારા અનુગ્રહથી પ્રભુ શ્રીહરિને પ્રત્યક્ષ જેમ હોય તેમ દેખું. (૫૮) આ પ્રકારે પ્રતાપસિંહ રાજાએ પ્રાર્થના કરાયેલા તે **સુવ્રત મુનિ પ્રતાપસિંહ રાજાને** કહેવા લાગ્યા : હે રાજન્ ! જેવા સાંભળ્યા છે તેવા શ્રીહરિને એકાગ્ર મનથી ચિંતન કરો. તમોને દર્શન આપશે. (૫૯) જે જનો આ 'સત્સંગિજીવન' શાસ્ત્રને પ્રીતિથી સાંભળે તે જનોને પરમેશ્વર શ્રીહરિ પોતાનાં દર્શન આપે, જ : આ પ્રમાણે મારા ગુરુ શતાનંદમુનિએ મને કહ્યું હતું. (૬૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ततः स भूपतिर्नत्वा सुव्रतं सुस्थिरासनः । यथाश्रुतं हरिं दध्यौ हृदये दृढनिश्चयः ॥६१॥ अपरोक्षानुभूतेर्हि गुरोस्तस्य प्रसादतः । तच्छास्त्रश्रुतिपुण्याच्च स ददर्श हरिं हृदि ॥६२॥ तेजःपुञ्जान्तरे साक्षात्कोटिकन्दर्पसुन्दरम् । समर्च्यमानं भक्तैस्तं दृष्ट्वा लेभे मुदं पराम् ॥६३॥ व्युत्थितोऽथ मुनिं नत्वा प्रसन्नः प्राह भूपतिः । कृतार्थोऽहं हि जातोऽस्मि प्रसादात्तव निश्चितम् ॥६४॥ नृपं प्राह मुनी राजन्नित्थं ध्यायाः सदा हरिम् । स्वधर्मस्थो भजेस्तं च लप्स्यसे तत्पदं परम् ॥६५॥ अत्रैव पावने क्षेत्रे निवसंस्तं भजेः सदा । इत्युक्त्वा प्रणतो राज्ञा ययौ क्षेत्रान्तरं मुनिः ॥६६॥ राजापि तत्र निवसन् भजन्प्रेम्णा हरिं सदा । कालेनाल्पेन गोलोकं तद्धाम परमं ययौ ॥६७॥ श्रवणं मङ्गलं यस्य कीर्तनं यस्य मङ्गलम् । स्मरणं मङ्गलं यस्य स हरिर्मङ्गलं क्रियात् ॥६८॥ अधर्मसर्गोत्खननस्य कर्ता धर्मान्वयस्याधिकपुष्टिकर्ता। स प्रीयतां मेऽखिलपापहर्ता हरिः स्वभक्तैः सह दुःखहर्ता ॥६९॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे पञ्चमप्रकरणे ग्रन्थानुक्रमणिकानिरूपणनामा सप्ततितमोऽध्यायः ॥७०॥

## समाप्तं पञ्चमप्रकरणम् ।
## समाप्तं सत्सङ्गिजीवनसच्छास्त्रम् ॥

પછી પ્રતાપસિંહ રાજા સુવ્રતમુનિને નમસ્કાર કરી સુસ્થિર આસનવાળા દૃઢ, નિશ્ચયવાળા થઈને જેવા સાંભળ્યા હતા તેવા શ્રીહરિને પોતાના હૃદયમાં ધ્યાન કરવા લાગ્યા. (૬૧) પ્રત્યક્ષ ભગવાનના જ્ઞાનવાળા ગુરુ સુવ્રતમુનિના **અનુગ્રહ** અને 'સત્સંગિજીવન' ગ્રંથના **શ્રવણજન્ય પુણ્ય**થી પ્રતાપસિંહ રાજાએ હૃદયમાં શ્રીહરિને જોયા. (૬૨) અક્ષરબ્રહ્મના તેજના સમૂહમાં પ્રત્યક્ષપણે વર્તમાન, કરોડો કામદેવના સમાન સુંદર, અક્ષરધામમમાં રહેલા અક્ષરમુક્તોએ દિવ્ય ચંદન, પુષ્પાદિ ઉપચારોથી પૂજાયેલા શ્રીહરિને પ્રત્યક્ષ જોઈને પરમ આનંદ પામ્યા. (૬૩) આ પ્રમાણે પોતાના હૃદયમાં શ્રીહરિના દર્શન થયા પછી સમાધિથી બહાર આવેલા પ્રતાપસિંહ રાજા પ્રસન્ન થઈને સુવ્રતમુનિને નમસ્કાર કરીને કહેવા લાગ્યા : હે મુને ! હું તમારી પ્રસન્નતાથી કૃતાર્થ થયેલો છું, જ. (૬૪) આ પ્રમાણે બોલતાં પ્રતાપસિંહ રાજાને **સુવ્રતમુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે જ સદાય શ્રીહરિનું સ્મરણ કરતા થકા શ્રીહરિનું સ્વધર્મમાં રહીને શ્રીહરિને ભજો તો સર્વોત્કૃષ્ટ શ્રીહરિના ધામને પામશો. (૬૫) પરમ પવિત્ર આ જગન્નાથપુરીમાં નિવાસ કરતા સતા શ્રીહરિને હંમેશા ભજો. એમ કહીને પ્રતાપસિંહ રાજાએ પ્રણામ કરાયેલા સુવ્રત મહર્ષિ પુલહાશ્રમ વગેરે બીજા ક્ષેત્રમાં ગયા. (૬૬) પ્રતાપસિંહરાજા પણ જગન્નાથપુરીમાં નિવાસ કરતા સતા અતિપ્રેમથી સદા શ્રીહરિને ભજતા સતા થોડા સમયમાં સર્વોપરી શ્રીહરિના અક્ષરધામમાં ગયા. (૬૭) (ગ્રંથના આદિ ભાગમાં મંગલ, મધ્યભાગમાં મંગલ અને ગ્રંથના અંતમાં મંગલ કરવું જોઈએ- એવાં શાસ્ત્રો જગતપ્રસિદ્ધ થાય છે તેનું સ્મરણ કરીને મંગલાચરણ કરે છે : ) જે શ્રીહરિના ગુણચરિત્ર વગેરેનું શ્રવણ મંગલરૂપ છે; કીર્તન, ગુણાદિનું ગાન મંગલરૂપ છે, જેનું સ્મરણ ગુણાદિનું ચિંતન મંગલરૂપ છે એવા શ્રીહરિ મારા ઉપર પ્રસન્ન થાઓ. (૬૮)

અધર્મસર્ગને ઉખેડી નાખનાર, ધર્મસર્ગની અત્યન્ત પુષ્ટિ કરનાર, સમગ્ર પાપોને નાશ કરનાર, દુઃખોને નાશ કરનાર એવા શ્રીહરિ પોતાના ભક્તોની સાથે મારા ઉપર પ્રસન્ન થાઓ. (૬૯)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પંચમ પ્રકરણે ગ્રન્થાનુક્રમણિકાનિરૂપણનામા સપ્તતિતમોઽધ્યાયઃ (૭૦)*

सत्संङ्गिजीवनस्येयं व्याख्या स्पष्टार्थबोधिका । शुकानन्देन मुनिना कृपया श्रीहरेः कृता ॥१॥
प्रीत्यै श्रीहरिकृष्णस्य रचितेयं महाप्रभोः । गुरोः श्रीरघुवीरस्य तदाश्रितसतां तथा ॥२॥
अतः स श्रीहरिः साक्षाद्रघुवीरो गुरूः स च । तदाश्रश्रिताश्च ते सन्तः प्रसन्नाः स्युः सदा मयि ॥३॥

**સ.જી. વ્યાખ્યા કર્તાનો ઉદ્દેશાર્થ** :- આ સત્સંગિજીવનશાસ્ત્રનાં સ્પષ્ટ અર્થને જણાવનારી **'હેતુ'** નામની વ્યાખ્યા શ્રીહરિની કૃપાથી મેં-શુકાનંદ મુનિએ લખી છે. આ વ્યાખ્યા શ્રીહરિકૃષ્ણ મહાપ્રભુ અને ગુરૂ આચાર્યશ્રી રઘુવીરજી તથા તેમના આશ્રિત સંતોની પ્રસન્નતા માટે કરેલી છે શ્રીહરિ સહિત તે સર્વે આચાર્યશ્રી તથા સંતો મારી ઉપર સદા પ્રસન્ન થાઓ.

એજ પ્રમાણે શુકાનંદમુનિ તથા **ભાવપ્રબોધિની** વ્યાખ્યાકર્તા આચાર્યવર્ય શ્રી વિહારીલાલજી મહારાજ સહિત વિદ્યમાન આચાર્યશ્રી તથા તેમના આશ્રિત સંતો-ભક્તો આ વ્યાખ્યા સંયોજનમાં કરેલા યથાશક્તિ પ્રયાસથી મારા ઉપર પ્રસન્ન રહો, ઈતિ સાભિલાષં વિરમ્યતે સાધુના આનન્દાખ્યદાસેન શરધારપુરાવાસેન પ્રણતિપુરઃસરમ્ ।

॥ જય શ્રી સ્વામિનારાયણ ॥

## પંચમ પ્રકરણં સમાપ્તમ્ ।
## શ્રીસત્સંગિજીવન શાસ્ત્રં સમાપ્તમ્ ॥



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર